CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13

Coll. No. 249

Title Saubhāgyaratnākara

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 249 Subject: Tantra.

Title: Saubhāgya Ratnākara.

Author: Śrīvidyānandanātha Scribe: Jīvarāma Pandyā.

Date of the work: – Date of the Ms.: V.S. 1990.

Place of the work: Prayāga. Place of the Ms.: –

Size: 10.2" x 4.6" Extent: 18 + 311 = 329 / 04

Language: Sanskrit. Script: Devanāgarī.

Remarks: Complete.

दि त्मोको त विहै प च्छ वा म ते स्या नमो म ने ।।
एव मा य मनं कं स्ते स्वाहा ना स प लो न व द
न त स्या पु एय पा या नि ऊ र व न्तु को न सं स व : ।।
अथां त : पुनरा व न्ते हु ते र श्रो य व स म्य लो
स्वो त्वा मु काप य ।। पा त्वा पा रं मे नु भ कर्म लिं
नु म ल स : प रि पा य त या ह द्वा ध्य मं ग तं
: भ्रमा ह्र ह्नु र्वे स रू पू द्वि र भां त : भु ग्नि मे
पृ म : ।। ता स न्नो प वि वे द्वि प्रो या व ह पे व न स्व रो
द : ।। ना मे द्वि वा ह र ना द्वि ना व र ल स्क ड ले थ
र : ।। नो का द्वि व ह र तो न मा ष मे कं ड नं पि वे द
नं ना र वि न अ ले म हो द्वि ड म्वां द्रा य लो वं द्र
म र द्वा : ।। रु द्वि नां नु त्व ना लो व पा ति ना हु द्वि
लो न नु ।। मु नां नु ए क नि वा भ्यां रो व लो व मं च
रे र ।। हु वी स्य म ह नं ना वे सो म पा नं न दो न रो
प : मे प्र न रा व म्य ह द्वि लो रा घि रं स्य तं
न द्वि वा ध द्वि ना वा नं द्वा व स्य पा नि रे सं न्तु र्व
आ : स्व : श्री : ८ ना च म र ... ध :
वि : वि : आ :
स : स : स :

मा टा ज्योतिष ।
२२९ पुरश्चरणविधि:

सौ.र.प.
१

॥श्रीगुरुगणपतीष्टदेवताभ्यो नमः॥ आरंभे भरणे भंजे यन्मदस्पंदबिंदवः। कारणानि प्रपंचस्य तं वंदे वारणाननं॥१॥
सच्चिदानंदनाथांघ्रिसरोरुहयुगं भजे। यत्कटाक्षक्षणात्क्षिप्रं ... पंचकृत्यकृत्॥२॥ प्रकाशरूपा प्रथमे प्रया
णेऽमृतरूपिणी। प्रतिप्रयाणे तामंतःपद्यां चित्कलां भजे॥३॥ अस्तौ यः सर्वतंत्राणि यामलादीन्यशेषतः॥ शा
स्त्रीगुरुमुखात्तेषां रहस्यार्थं श्रुतं ततः॥४॥ सच्चिदानंदनाथांघ्रिसरोजद्वयषट्पदः॥ श्रीविद्यानंदनाथो
ऽहं वीतरागो विविक्तधीः॥५॥ विचरन्मेदिनीमेतां विद्वद्भिर्विमलात्मभिः। प्रयागे प्रार्थितः प्राप्य तेषां लोकहि
ताय च॥६॥ पंचस्रोतःपयोगाधं तन्त्रमणिसंकुलं। समस्तयोगिनीचक्रप्रवालजतिकोज्ज्वलं॥७॥ नित्याप
ञ्जसूर्येंदुज्योत्स्नाजालविजृंभितं। नवचक्रमहाद्वीपं न्याससञ्जीवनतरंगितं॥८॥ श्रीनाथपादुकापोतं चतुर्व
र्गफलामृतं। प्रकाशयामि सौभाग्यरत्नाकरमिति स्फुटं॥९॥ श्रीविद्यायाः समभ्यर्च्या नित्यनैमित्तिकार्चनं।
काम्यार्चनं च दीक्षांगभूतं प्राच्यादिसाधनं॥१०॥ दीक्षाभेदः पुरश्चर्या तत्कर्मनियमादिकं॥ काम्यहोमविधि
श्चैव सौम्यक्रूरविभेदतः॥११॥ समस्तान्यस्त्वविद्याया जया काम्यफलोदयः॥ सदाचारादिकं चैव लिख्य
ते रत्नवारिधौ॥१२॥ ॥तत्र श्रीमान् साधको रजन्यास्तुर्ययामे ... ध्यावश्यकं कृत्वा हस्तौ पादौ च प्रक्षाल्य धौतेव राम
१

ससापरिधाया कंपस्वासने समुपविश्य पूजार्थं निर्माल्यमपकृष्य पूर्वदिनपूजावशिष्टपुष्पादिना वहमानसमस्तप्रकटेत्यादिस
मष्टिविद्ययाभ्यर्च्य श्रीलरेश्वरस्थस्थेतसहस्रदलकमलकर्णिकायां सिंहासने समुपविष्टं वामांकगतया देव्या रक्तवर्णया र
क्तवस्त्राभरणभूषितया वामकरेधृतलीलाकमलया दक्षिणभुजेनालिंगितं धवलवस्त्राभरणानुलेपनं मुक्तादामाद्यलं
कृतं चंद्रकांतनिभं त्रिनेत्रं ज्ञानमुद्रापुस्तकवराभयकरं शांतं सुप्रसन्नं शिवरूपिणं श्रीगुरुं ध्यात्वा तच्चरणारविंद
युगलविगलदमृतधाराभिः स्वदेहं परिप्लुतं विभाव्य प्रणवत्रितारपुटितं स्वबहुमानं श्रीगुरुपादुकाविद्यां ते श्रीसच्चिदानंदना
थश्रीपादुकां पूजयामि तर्पयामि नमः इति मानसैरुपचारैरभ्यर्च्य॥ ॥नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे। विद्यावतारसंसिद्ध्यै स्वीकृता
नेकविग्रह॥१॥ नवाय नवरूपाय परमार्थैकरूपिणे। सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते॥२॥ स्वतंत्राय दयाक्लृ
प्तविग्रहाय शिवात्मने। परतंत्राय भक्तानां भव्यानां भव्यरूपिणे॥३॥ विवेकिनां विवेकाय विमर्शाय विमर्शिनां॥ प्रका
शिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे॥४॥ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः॥ सदा मच्चित्तरूपेण वि
धेहि भवदासनं॥५॥ इति प्रणम्याहं मंत्रेण स्वहृदिस्थं भावयेत्॥ इति गुरुध्यानं॥ विद्याय स्वमूलाधारे चतुरस्र
वेष्टितं वादिसांतवर्णचतुष्टययुक्तचतुर्दलपंकजं पीतवर्णं ध्यात्वा कर्णिकायां सोमसूर्याग्निमयं प्रकृत्यासीत्रिरेखं
कुलशृंगाटं त्रिकोणं विभाव्य तन्मध्ये कोटिसूर्यप्रतीकाशं चंद्रकोटिसुशीतलं॥ नयासू समसप्रभं सत्वरजस्तमोगु

श्री·र·क·
२
णाकोणं तं कामाख्यं बिंदुं विभाव्य तदूर्ध्वे कुंडलिनीशक्तिं चिद्रूपां अष्टत्रिंशत्कलायुक्तपंचाशद्वर्णविग्रहश्रीविद्यारूपिणीं त
डित्कोटिप्रभाढ्यां बिसतंतुतनीयसीं प्रसुप्तभुजगाभिसार्द्धत्रिवलयेन स्थितां स्वेच्छादंडहतां हुत्वोत्थाप्य गुरूपदिष्ट
विधिना सुषुम्नामार्गेण मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाख्यषट्चक्रभेदक्रमेण ब्रह्मरंध्रस्थि
तसहस्रदलकमलं प्रापय्य ततः स्रवदमृतधारया रक्तवर्णया वर्णमय्या कुंडलिनीं तां संतर्प्य पुनः स्वधाम्नीतां स्वरूपि
णामकलामृतेन सिंचेन सुषुम्नांतर्गततत्तदाधारतत्तद्धातुतत्तद्दलतत्तदधिदेवताः प्लावयंतीमाज्ञाविशुद्ध्यादिक्रमेण मू
लाधारं नीत्वा तत्रैव स्थापयेदिति पारोहावरोहक्रमेण परां शक्तिं कुंडलिनीं ध्यात्वा विद्याकूटत्रयं ध्यायेत्॥ तत्र मूलाधा
रे वह्निमंडले दशकलात्मके विभाव्य तत्र मूलविद्यायाः प्रथमकूटं वाग्भवाख्यं स्फुरच्चंडविद्युल्लताभास्वरमनाहतपर्यंत
प्राप्तनादशिखं विभाव्यानाहते सूर्यमंडले द्वादशकलात्मके ध्यात्वा तन्मध्ये मूलविद्यायाः कामराजाख्यं द्वितीयं
कूटमुद्यदादित्यसंकाशमाज्ञापर्यंतप्राप्तनादशिखमधऊर्ध्वप्रसृतरश्मिकं ध्यात्वा पुनराज्ञायां सोममंडले षोड
शकलात्मके विभाव्य तन्मध्ये मूलविद्यायाः शक्तिकूटाख्यं तृतीयं खंडं शशिप्रभं ब्रह्मरंध्रांतर्गतचिच्चंद्रमंडलपर्यंत
प्राप्तनादशिखं ध्यात्वा॥ ततो मूलादिब्रह्मरंध्रांतं मूलविद्यामुद्यद्दिनकरसहस्रभास्वरां तेजोमंडलमयीम
राम
२

खंडं ध्यात्वा॥ तत्तेजसा व्याप्तं स्वदेहं परिचिंत्य तत्तेजसा परिणतां श्रीपरदेवतां हृदयकमले ध्यात्वा मानसैरुपचारैः
संपूज्य तां मूलविद्यया प्राणायामत्रयं मूलविद्यया वक्ष्यमाणऋष्यादिकरषडंगन्यासांश्च कृत्वा मूलविद्यां यथा
शक्ति जपित्वा जपं समर्प्य॥ प्रातर्नमामि त्रिजगतां जनन्याश्चरणांबुजं॥ श्रीमत्त्रिपुरसुंदर्या नमिता याहरा
दिभिः॥१॥ प्रातस्त्रिपुरसुंदर्या नमामि चरणांबुजं॥ हरिहरविरंचिश्च सृष्ट्यादिकं करोति यत्॥२॥ प्रात
स्त्रिपुरसुंदर्या नमामि पदपंकजं॥ यत्पादोदकं शिरसि भाति गंगा महेशितुः॥३॥ प्रातः पाशांकुशशरचा
पहस्तां स्मराम्यहं॥ उद्यदादित्यसंकाशां श्रीमत्त्रिपुरसुंदरीं॥४॥ प्रातर्नमामि पादाब्जं ययेदं धार्यते जगत्
तस्यास्त्रिपुरसुंदर्या यत्प्रसादान्निवर्तते॥५॥ यः श्लोकपंचकमिदं प्रातर्नित्यं पठेन्नरः॥ तस्मै ददात्यात्मप
दं श्रीमत्त्रिपुरसुंदरी॥६॥ इति स्तुत्वा प्रणम्य तस्यै निजं कृत्यं समर्पयेत्॥ तद्यथा॥ प्रातः प्रभृति सायांतं
सायादि प्रातरंततः॥ यत्करोमि जगद्योने तदस्तु तव पूजनं॥ इति समर्प्य स्वकर्मानुष्ठानार्थं देव्याज्ञां
प्रार्थयेत्॥ तद्यथा॥ त्रैलोक्यचैतन्यमयी सुरेश्वरी श्रीसुंदरि त्वच्चरणाज्ञयैव॥ प्रातः समुत्थाय तव प्रिया
र्थं संसारयात्रामनुवर्तयिष्ये॥१॥ संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीत्रिपुरे परेशि॥ स्पर्द्धाति

सो॰र॰क॰
३

रस्कारकलितमादमपानिमोमामिमयं कुमारः ॥२॥ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ॥
त्वया हृषीकेश हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥३॥ इति देव्याज्ञां प्राप्य गुरूपदेशेन स
हजसिद्धमजपाजपं तत्तद्देवताभ्यः समर्पयेत् ॥ तद्यथा ॥ अद्य पूर्वेद्युरहोरात्रमुच्छ्वासनिश्वासा
त्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं मूलाधारस्वाधिष्ठानमणिपूरकानाहत
विशुद्ध्याज्ञाब्रह्मरंध्रेषु चतुर्दलषड्दलदशदलद्वादशदलषोडशदलद्विदलसहस्रदलेषु स्थिते
विघ्नराजपंगतेब्रह्मविष्णुरुद्रजीवेश्वरस्थितेभ्यो गणपतिब्रह्मविष्णुरुद्रजीवात्मपरमा
त्मश्रीगुरुपादुकाभ्यो यथाभागशः समर्पयिष्यामीति कृतांजलिः संकल्प्य समर्पयेत् ॥ तद्यथा ॥
ॐ ऐं ह्रीं श्रीं मूलाधारस्थाय गणपतये अजपाजपानां षट् शतानि ६०० समर्पयामि नमः ॥
ब्रह्मणे ॐ स्वाधिष्ठाने षड्दले ब्रह्मणे अजपाजपानां षट्सहस्राणि ६००० समर्पयामि नमः ॥ ॐ मणिपू
रकचक्रस्थाय विष्णवे अजपाजपानां षट्सहस्राणि ६००० समर्पयामि नमः ॥४॥ अनाहतचक्र
स्थाय रुद्राय अजपाजपानां षट्सहस्राणि ६००० समर्पयामि नमः ॥४॥ विशुद्धिचक्रस्थाय जीवा राम ३

त्मने अजपाजपानामेकसहस्रं १००० समर्पयामि नमः ॥४॥ आज्ञाचक्रस्थाय परमात्मने अजपाजपानां एकसहस्रं १००० सम
र्पयामि नमः ॥४॥ सहस्रदलकमलकर्णिकामध्यस्थायै गुरुपादुकायै अजपाजपानामेकसहस्रं १००० समर्पयामि नमः ॥
इति समर्पयेत् ॥ एतावच्छक्तमशक्तश्चेत् ॥ ॐ ऐं ह्रीं श्रीं अद्य पूर्वेद्युरहोरात्रचरितमुच्छ्वासनिश्वासात्मकं ष
ट्शताधिकमेकविंशतिर् २१६०० सहस्रसंख्याकमजपाजपं ब्रह्मरंध्रस्थसहस्रदलकमलकर्णिकामध्यवर्ति
न्यै श्रीगुरुपादुकायै समर्पयामि नमः ॥ इति गुरव एव समर्पयेत् ॥ इत्यजपाजपं समर्प्य ॐ अद्यस्तनोदयादहोर
स्याहोरात्रं लोच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपमहं करिष्य
इति कृतांजलिपुटः संकल्प्य अजपामंत्रेण प्राणायामत्रयं कृत्वा ॥ ॐ हंसाय ऋषये नमः शिरसि ॥४॥ अव्यक्त
गायत्रीछंदसे नमः मुखे ॥४॥ परमहंसाय देवतायै नमः हृदये ॥४॥ हं बीजाय नमः मूलाधारे ॥४॥ सः शक्तये नमः
पादयोः ॥४॥ सोऽहं कीलकाय नमः नाभौ ॥४॥ ॐकाराय तत्त्वाय नमः हृदये ॥४॥ नभसे स्थानाय नमः मूर्ध्नि ॥४॥
हेमाय वर्णाय नमः सर्वांगे ॥४॥ उदात्तस्वराय नमः कंठे ॥ इति विन्यस्य मम मोक्षार्थे अजपाविनियोगः ॥ इ
कृतांजलिर्वदेत् ॥ ततः ॐ ऐं ह्रीं श्रीं ह्रां सूर्यात्मने स्वाहा अंगुष्ठाभ्यो हृदयाय नमः ॥४॥ हंसां सोमात्मने स्वाहा
शिरसे स्वाहा तर्जनीभ्यां ॥४॥ ह्रूं निरंजनात्मने स्वाहा शिखायै वषट् मध्यमाभ्यां ॥४॥ ह्रैं निराभासात्मने स्वाहा कं

सौ·र·क·
४

वषाय हुं अनामिकयोः ।४ ह्रौं अनंततनुः सत्तमं देवी प्रचोदयात् स्वाहा नेत्रत्रयाय वौषट् कनिष्ठिकयोः ।४ ह्रः अ[illegible]
बोधात्मने स्वाहा अस्त्राय फट् करतलपृष्ठयोः। इति करयोर्विन्यस्य हृदयादिषडंगेष्वप्येतानेव मंत्रान् [illegible] विन्यस्य सप्त-
नं कुर्यात्। तद्यथा। द्यौर्मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे॥ दिग्भ्यः श्रोत्रे यस्य पादौ क्षिति-
च ध्याता तयोऽसौ सर्वभूतांतरात्मा॥१॥ इति विराट्स्वरूपं स्वात्मानं ध्यात्वा तदनुसंधायी प्राणवायोर्निर्गमप्रवेशा-
लकमजपामंत्रं हंसः पदं पंचविंशति २५ वारं जपित्वा समर्प्य गुरूपदिष्टमार्गेण नादानुसंधानपूर्वकं नि-
रस्तसमस्तोपाधिना केनापि चिद्विलासेन प्रवर्त्तमानोऽस्मीति विभाव्य स्वकार्यानुष्ठानाय॥ ॐ समुद्रमे-
खले देवि पर्वतस्तनमंडिते। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥१॥ इति भूमिं प्रार्थ्य स्वाचारानुसारेण
तत्सोपादं निधायोच्छाय पदे पदे स्तवमुच्चरन् गृहाद्बहिर्निर्गत्य ग्रामाद्बहिर्नैर्ऋत्यां याम्यां वा दिशि शरक्षे-
पमात्रं गत्वा मूत्रपुरीषं दूरे गत्वा मलमूत्रोत्सर्गं शौचाचमनादिकं यथाविधि विधायोत्तिष्ठन्दिने कृति-
तकाष्ठेन ॐ क्लीं कामदेवाय सर्वजनप्रियाय नम इति मंत्रेण दंतान्विशोध्य जिह्वां मुखं विशोध्य तत्काष्ठं प्रक्षाल्य
पुरतः प्रदेशे परित्यज्य वक्ष्यमाणचतुर्द्दशं विधानं मुखं प्रक्षाल्य च मृत्तिकाकुशकुसुमगंधाक्ष-
तास्त्राभिमंत्रितशंकुनालं स्नानार्थं वस्त्र क्रोमय धौतवस्त्राण्यादाय नद्यादौ गत्वा अस्त्राभिमंत्रित-
वारिणा तीरं प्रक्षाल्य तत्रास्त्राभिमंत्रितं कुशादिकं निधायोद्धृतजलेन तीर्थाद्बहिः कटिशौचं स्नानं

राम
४

ॐ
वैदिकस्नानं विधाय नाभिमात्रे जले स्थित्वाऽऽचम्य घेत्पा दिक्ष्वा परदेवताप्रीत्यर्थं तांत्रिकविधिना॥१४

मलकापुहृतिमलापकर्षणस्नानं मृत्तिकामयादिभिः स्वशाखोक्तविधिना स्नानमहं करिष्य इति संकल्प्य
मूलविद्यया प्राणायामत्रयं कृत्वा मूलविद्यया करन्यासादिकरषडंगन्यासौ च विधाय स्वपुरतो जले हस्त-
मात्रं चतुरस्रं तीर्थं परिकल्प्य॥ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे। तेन सत्येन देवेश तीर्थं देहि
दिवाकर॥१॥ इति सूर्यात्तीर्थं प्रार्थ्य क्रोमित्यंकुशमुद्रया सूर्यमंडलं भित्त्वा। गंगे च यमुने चैव गो-
दावरि सरस्वति। नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु॥ सूर्यमंडलात्तीर्थमाकृष्य तज्जले
पुरुकल्पिततीर्थमंडले मूलविद्यया संयोज्य पुनः सूर्यमंडलाद्देवीं ॐ ऐं ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः
सर्वानंदमयी तीर्थशक्ते एह्येहि स्वाहा। इति तीर्थशक्तिमाकृष्य तस्मिंस्तीर्थमंडले समध्ये तां ध्याये-
त्। तद्यथा। सर्वानंदमयीमशेषदुरितध्वंसां मृगांकप्रभां त्र्यक्षां चोर्ध्वकरद्वयेन दधतीं पाशं स्व-
र्णचक्रमातृ॥ दोर्भ्यां चामृतपूर्णहेमकलशं मुक्ताहमालावरं गंगासिंधुसरिद्वरादिसहितां
श्रीतीर्थशक्तिं भजे॥१॥ इत्याह्वायधियोनिमध्यस्थायां कलशं दद्यात्पद्मस्य योरन्ये इत्यायुध

लौ.र.क.
५

ध्यात्वाभितिध्यात्वा तद्विद्यायां धारादिपंचोपचारैर्जलमये स्तां संपूज्य ॐ नमो भगवति अंबे अंबा-
लिके अंबिके महामालिनी एह्येहि भगवति अशेषतीर्थालवाले ह्रीं श्रीं त्रिपुरजटाघे रूढे गंगे गंगांबिके
स्वाहा ॥ इति मंत्रेण सप्तधाभिमंत्र्य ह्रींकारेणावगुंठ्य धेनुमुद्रयामृतीकृत्य मूलविद्यायाः
प्रथमकूटमुच्चार्य आत्मतत्त्वं शोधयामि आत्मने नमः । द्वितीयकूटमुच्चार्य विद्यातत्त्वात्मने नमः ।
तृतीयकूटं शिवतत्त्वात्मने नमः इति तत्तत्त्वं चुलके विन्यस्य । तत्र श्रीचक्रं विभाव्य हृदयकमलाद्देवी-
मावाह्य षडंगन्यासेन सकलीकृत्य तां सावरणां तर्पयित्वा मूलविद्यया योनिमुद्रया तज्जलं सप्तधा-
भिमंत्र्य तस्मिन् जले देवतां मंत्रस्मरणपूर्वकं त्रिर्निमज्योन्मज्य कुंभमुद्रया मूलविद्यया स्वशि-
रसि त्रिरभिषिच्याचम्य मूलविद्यया देवीं त्रिः संतर्प्य देवान् विसृज्य वस्त्रमालाप्रकारेण तत्त्वैराच-
म्य तीरमागत्य धौते वाससी परिधायाचम्य तीर्थमृत्तिकादिनोर्ध्वपुंड्रं विधाय सकुंकुमेन चंदनेन त्रि-
पुंड्रं विधाय वैदिकसंध्यां निर्वर्त्य तांत्रिकसंध्यां कुर्यात् ॥ सा च चतुर्विधा ॥ प्रातर्मध्याह्नसायाह्नमध्य-
रात्रिभेदात् । तथा चोक्तं त्रिपुरार्णवे ॥ संध्या चतुर्विधा ज्ञेया बाह्यकौलरयोर्बना ॥ प्रोक्ता च निष्कला राम १५

चेति संध्या देवि प्रकीर्तिता ॥१॥ प्रातःकाले महादेवि विद्या वाग्भवरूपता । कामेश्वरी च मध्याह्ने सायाह्ने पुरभैरवी ॥ म-
ध्यरात्रे महादेवि विज्ञेया त्रिपुरसुंदरी इति । तत्र विधिवदाचम्य मूलविद्यया शिखां बद्ध्वा तथैव प्राणायामत्रयं कृत्वा मू-
लविद्ययाऽऽत्र्यादिकरषडंगन्यासौ कृत्वा स्वपुरतो धेनुमुद्रया जलममृतीकृत्य मूलविद्यया शिखां बद्ध्वा ॥ एका-
रमभिमंत्र्य तेन जलेन कुशै रकारादिह्रींकारैः तैः सबिंदुभिर्मार्जिकाहरैः प्रत्यहरं स्वशिरः प्रोक्ष्य मूलविद्यया चत्रि-
ः प्रोक्ष्य सूर्यमंडले देवीं यथोक्तरूपां ध्यात्वा दक्षिणहस्तेन जलमादाय लं वं रं यं हं इति योनिकैर्भौतिकैर्मंत्रैः स-
प्तवारं अभिमंत्र्य मूलविद्यया चत्रिरभिमंत्र्य तज्जलबिंदुभिर्वा भोः शुष्णनामिकाभ्यां मूलविद्यया स्वशिरसि त्रि-
ः प्रोक्ष्यावशिष्टं जलं वामहस्ते निधाय तेजोरूपं तज्जलमिडया कृष्य स्वदेहांतस्थितं सकलकलुषं प्रक्षा-
ल्य तज्जलं कृष्णवर्णं पिंगलया बहिर्निर्गतं मत्वा तज्जलं पुनर्दक्षिणहस्ते कृत्वा स्ववामभागे ज्वलद्वज्रशिलां
ध्यात्वा ॐ खीं पशु हुं फट् इति पाशुपतास्त्रमंत्रेण तस्यां शिलायामास्फाल्य हस्तौ प्रक्षाल्य मूलविद्यया
जलमादाय ब्रह्मरंध्रस्थ सहस्रदलकमलगतपरमामृते तेजोरूपे ते विभाव्य राजदंतविवरांतर-
मार्गेण निर्गमय्य तज्जलं वामकरे निधाय तेन जलेनाप्लावनमार्द्रिना स्वाहेति मंत्रेण कृतैः स्वशि-
रसि प्रोक्षेत् ॥ ॐ ऐं ह्रीं श्रीं प्रथमकूटमुच्चार्य आत्मतत्त्वं शोधयामि स्वाहा ॥ ॐ ऐं द्वितीयकूटमुच्चा-

यविघानत्वं शोधयामि स्वाहा॥ ॐ २ तृतीयकूटमुच्चार्य शिवतत्वं शोधयामि स्वाहा। इतित्रिराचम्य॥ पुरे तद्वैपरी
त्यनत्रिराचमेत्॥ तद्यथा॥ ॐ २ तृतीयकूटमुच्चार्य शिवतत्वं शोधयामि स्वाहा॥ ॐ २ द्वितीयकूटमुच्चार्य
विद्यातत्वं शोधयामि स्वाहा॥ ॐ २ प्रथमकूटमुच्चार्य आत्मतत्वं शोधयामि स्वाहा॥ पुनः ॐ २ समस्त
विद्यामुच्चार्य सर्वतत्वं शोधयामि स्वाहा॥ इतित्रिधा॥ एवं नवधा ऽ३ आचमनेन त्रिराचम्य ऽ३मा
दायोच्चाय॥ ॐ २ प्रथमकूटमुच्चार्य वागीश्वरी विद्महे द्वितीयकूटमुच्चार्य कामेश्वरी धीमहि। तृती
यकूटमुच्चार्य तन्नः शक्तिः प्रचोदयात्॥ श्रीमहात्रिपुरसुंदरी श्रीपादुकायै अर्घ्यः स्वाहेतीत्रिरर्घं दत्वा
मूलेन त्रिः संतर्प्य॥ ह्रां ह्रीं हंसः श्रीसूर्याय एष तेर्घ्यः स्वाहेति सूर्याभिमुखमर्घांजलित्रयं दत्वा॥ ह्रां ह्रीं हं
सः सूर्यं तर्पयामि नमः इतित्रिः संतर्प्य॥ मूलाधारे प्रथमकूटं तडित्कोटिसमप्रभं मूलादिब्रह्मरंध्रां
तं संचिंत्य तत्तेजः सुषुम्नावर्त्मना ब्रह्मरंध्रं गत्वा वहंनासाध्वना॥ आकाशस्थ वह्निमंडले समावा
ह्य तत्तेजःसोम्यर्तां वा गीश्वरीं ध्यायेत्॥ तद्यथा॥ पानीयपानंवरं पातसत्स्विन्मूषानुलेपनं॥ तडित्कोटि
समाभासां वागामेद्यस्यांकुशां॥ पुस्तकाद्यक्षरं भोजां वह्निपाठ निवेदुषे॥ वाग्भवं वाग्भवोद्भ्तां

श्रीहुतांसमस्थितां स्मरेत्॥ इत्याकाशस्थ वह्निमंडले ध्यात्वा। ॐ २ प्रथमकूटमुच्चार्य त्रिपुरा ॰ वागीश्वरी
श्रीपादुकां पूजयामिति गंधपुष्पाद्यैस्त्रिः संपूज्य पुनर्वह्निमात्मा वाग्भवगायत्रीमुच्चार्य त्रिपुरा वागीश्व
री श्रीपादुकायै अर्घ्यं कल्पयामि स्वाहा इतित्रिरर्घांजलिमुत्क्षिप्य पुनः ॐ २ प्रथमकूटमुच्चार्य त्रिपुरा वा
गीश्वरी श्रीपादुकां तर्पयामि नमः इतित्रिः संतर्प्य श्रीगुरूं प्रणम्य पूर्ववत्प्राणायाम ऋष्यादिकरषडंगन्यासा
न्विधाय मातृकान्यासस्थानेषु प्रणवत्रितारमूलं चिद्यादिनित्याविद्या हंसः ॐ नमः इत्यादिना मातृकां
विन्यस्य पूर्वोक्तां तुरीयां गायत्रीं यथाशक्तिं जपित्वा वाग्भवकूट गायत्रीं जपेत्। सा यथा। ऐं त्रिपुरादेवि विद्महे वागीश्व
री धीमहि तन्नो मुक्तिः प्रचोदयात्। इति वाग्भवगायत्रीं यथाशक्ति जपेत्। ततो मूलविद्यां प्रान्तरिक्षं जपेत्। यथा
तत्रप्रातर्मूलाधारे गते कमले वह्निमंडले॥ वाग्बीजरूपां नित्यां तां विद्युत्पातलभासुरां॥ पुष्पबाणेक्षुकोदंडपाशां
कुशलसत्करां। स्वच्छस्फटिकवत्पूर्वयुगनित्याहृदर्पितां। घटिकावरणोपेतां परितः प्रोज्वलन्तया ह्रानमुद्रवर
करा वाग्भवोपास्तितत्स्वरान्। नवनाथां स्मरे मूलेपंकजे वह्निमंडले॥ ॰ इहाधःकरमारभ्य इहोर्ध्वकरपर्यंतमा
युधध्यानं इ छं संध्याचतुष्टये वि। इतिध्यात्वा प्रणवत्रितारा ध्यात्मूलविद्यादि नित्याविद्यां हंसः ॐ आं इ
ई ऊ ऊं ऋं ॡं प्रकाशानंदनाथरूपिणी श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामि। १। ॐ ऐं क्लीं मूलवि

सौ॰ र॰ क॰
८

यामुच्चार्य प्राग्वद्दिननित्याविद्यां च चं लं ऐं ऐं क्रों श्रौं श्रं अः ह्रीं श्रीं विमर्शानंदनाथरूपिणी श्रीमहात्रिपुरसुंदरी श्रीपादु
कां पूजयामि॥१॥ ॐ ऐं ह्रीं श्रीं मूलं द्दिननित्याविद्येऽच्चार्य कं खं गं घं ङं श्रों ह्रीं आनंदानंदनाथरू॰ पा॰ पू॰॥२॥ ॐ ऐं ह्रीं श्रीं
मूलं द्दिननित्याविद्येऽच्चार्य चं ४ ह्रीं श्रीं श्रीज्ञानानंदनाथरूपिणी श्रीमहा॰ पादुकां पूजयामि॥३॥ ॐ ऐं ह्रीं श्रीं मूलं द्दि
दिननित्याविद्येऽच्चार्य टं ४ ह्रीं श्रीं सत्यानंदनाथरूपिणी पादुकां पूजयामि॥४॥ ॐ ऐं ह्रीं श्रीं मूलं द्दिननित्याविद्ये
ऽच्चार्य तं ४ ह्रीं श्रीं पूर्णानंदनाथरू॰ पादुकां पूजयामि॥५॥ ॐ ऐं ह्रीं श्रीं मूलं द्दिननित्याविद्येऽच्चार्य पं ४ स्वभावानं
दनाथ श्रीमहात्रि॰ पादुकां पूजयामि॥६॥ ॐ ऐं ह्रीं श्रीं मूलं द्दिननित्याविद्येऽच्चार्य यं ४ ह्रीं श्रीं प्रतिभानंदनाथरू
पिणी श्रीमहात्रि॰ श्रीपादुकां पूजयामि॥७॥ ॐ ऐं ह्रीं श्रीं मूलं द्दिननित्याविद्येऽच्चार्य षं ४ ह्रीं श्रीं सुभगानंदनाथ
रूपि॰ श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामि॥८॥ इति नवनाथात्मकत्वेन मूलविद्यां जपेत्। ततस्तद्दिननि
त्याविद्यां यथाशक्ति जपेत्। इति कालनित्यार्चनं॥ ततो मूलाद्विब्रह्मरंध्रांतं मूलविद्यामयं स्वयं सहस्रसमप्र
भं ध्यायन्मूलविद्यामष्टोत्तरशतं जपित्वा बहिराकाशस्थाग्निमंडले पूर्वोक्तरूपां वाग्भवेश्वरीं ध्यायन् प्रातर्वाग्भ
वकूटमष्टोत्तरशतं जपेत्। ततः प्राणायामत्रयं करन्यासादिकं षडंगन्यासौ च विधाय कृतं जपं देव्यै निवे
द्य प्रणम्य स्तुत्वा सूर्यमंडलाद्धृदि मंडलार्चं मूलदेवीं वाग्भवेश्वरीं च स्वहृदये मूलाधारे च विसृज्य श्री
गुरुं ब्रह्मरंध्र इति प्रातःसंध्याविधिः॥ ॥ अथ कर्मकाले गुरुरूपध्यानमुक्तं रुद्रयामले॥ ॥ॐ हौं को राम

७

ऽयं यथारूपं स्वस्यानुग्रहकर्मणि। दृष्टं तेनैव भावेन ध्यायन्नाह्निकमाचरेत्। इति गुरोरिति शेषः। एतद्गुरुध्यानं प्रात
:स्मरणातिरिक्तस्थलेषु ज्ञेयं। प्रातःसंध्येयमीशाना सर्वकर्मसु सर्वदा। कर्तव्या मंत्रिणा नित्यं मंत्रसिद्धि
समृद्धये॥१॥ प्रातःसंध्यां परित्यज्य कर्म कुर्वन्व्रजत्यधः। प्रातःसंध्यां परित्यज्य देवतापूजनं चरेत्॥२॥
अशुद्धः सद्गुराचारः सर्वकर्मबहिष्कृतः॥ प्रातःसंध्यां परित्यज्य देवपूजादिकं चरेत्॥३॥ मोहात्कश्चि
महेशानि नारकी जायते नरः। प्रातःसंध्यां परित्यज्य होमध्यानतर्पणं शिवे। न कुर्वन्नरकारण्ये विप्रांत
जनस्थानो भवेद्ध्रुवं। पिशाचो जायते देवि अपि वेदांतपारगः॥५॥ संध्यानामपि सर्वासां प्रातःसंध्या
गरीयसी। तस्मात्तां न त्यजेद्विप्रस्त्यजन्नरकमाप्नुयात्॥६॥ इति त्रिपुराणविवचनादियमवश्यं
कर्तव्येति शिवशासनं॥ अथ घटिकापारायणं येन वर्षं जपं कुर्यात्तच्च पंचभिर्दिवसैर्मातृका
याः षडावृत्तिरूपः। तथाच तंत्रराजे। आरभ्य भानोरुदयमेकशो घटिकाक्रमात्। एकैकं मातृका
वर्णाः पंचाशत्परिवृत्तितः। दिवसैः पंचभिस्तस्याः षडावृत्तिरुदीरितेति। तस्याः मातृकायाः
अयमर्थः। चतुर्युगापित तद्युग प्रथमदिने सूर्योदयकाले अकारादि क्षेति। ततो द्वितीयघ

सौ॰र॰क॰ ८

घटिकाद्विपंचाशत्घटिकाः पर्यंतास्तु घटिकास्तु आकारादिहकारांता वर्णा विसर्गस्वररहिता
स्वस्वघटिकोदयकाले समुद्यंति। ततः एकार पंचाशत्घटिकामारभ्य त्रिषष्टिघटिकास्तु
अकारादिहकारांताः दश वर्णाः स्वस्वघटिकोदयकाले समुद्यंति। द्वितीयदिने सूर्योद
यकाले एकार उदेति। ततः स्वघटिकोदयकाले ऐकारादयः एकोनचत्वारिंशद्वर्णा अकारांता विंशतिवर्णा
श्च समुद्यंति। तृतीयदिने सूर्योदये चकार उदेति। स्वस्वघटिकोदयकाले छकारादिहकारांता अकारादि
णकारांता एकोनषष्टिवर्णाः समुद्यंति। चतुर्थदिवसे सूर्योदये तकार उदेति। ततः स्वस्वघटिकोद
यकाले थकारादिहकारांता अकारादितकारांता एकोनषष्टिवर्णाः समुद्यंति। पंचमदिवसे सूर्यो
दयकाले पकार उदेति। ततः स्वस्वघटिकोदयकाले फकारादिहकारांता अकारादिपकारांताश्चै
कोनषष्टिवर्णाः समुद्यंति। एवं पंचभिर्दिवसैर्मातृकायाः षष्ट्यावृत्तिर्भवति। एवं क्रमेणैव नित्यं तैः
घटिकापारायणरूपषष्टिजपः कार्यः। तत्प्रकारः प्रदर्श्यते। तत्र अकारादिहकारांताः पंचाशद्वर्णा वि
सर्गरहिताः दश दशात्मकाः पंचवर्गाः अं ऐं चैं तैं पैं नामानो भवंति तैः षष्टिजपः कार्यः। तत्प्रकारः स्यात्।
मूलं तद्दिननित्याविद्या हं सः अं मूलं तद्दिननित्याविद्या हं सः अं एवं ह्रां तावत् पंचाशद्वर्णानावर्त्य पुन राम ८

॥ ८ ॥

रादिवर्गमावर्तयेत्। एवं षष्टिरावृत्तयो मूलविद्याया भवंति। द्वितीयदिने ॐ मूलं तद्दिननित्याविद्या हं सः ऐं पु
नस्तथा जप्त्वा ऐं एवं ह्रां तावच्चतुरो वर्गानावर्त्य पुनराद्यद्वितीयवर्गावावर्तयेत्॥ एवं षष्टिरावृत्तयः। तृतीयदिने
ॐ मूलं तद्दिननित्याविद्या हं सः चैं एवं ह्रां तावत्त्रीन्वर्गानावर्त्य पुनराद्यांस्त्रीनावर्तयेत्॥ एवं षष्टिरावृत्तयो मूल
विद्याया भवंति। चतुर्थदिने ॐ मूलं तद्दिननित्याविद्या हं सः तैं एवं ह्रां तावद्द्वौ वर्गावावर्त्य पुनराद्यांश्चतुरो
वर्गानावर्तयेत्। पंचमदिने ॐ मूलं तद्दिननित्याविद्या हं सः पैं एवं ह्रां तावदेकं जपित्वा पुनरकाराद्यान्
ह्रांतान्पंचाशद्वर्णानावर्तयेत्। एवं ६० ततः षष्ठे षष्ठे दिने पुनरकारादित आरभ्योक्तरीत्या घटिका
पारायणजपमनवरतं कुर्यात्। अथ रविधुनावर्तमानसमये साधकैर्ज्योतिःशास्त्रोक्तप्रकारेण गणित
न कलियुगस्य गतदिनादि ज्ञात्वा स्वकुमारं भद्दिनपर्यंतं गणयित्वा पंचभिराहृत्योर्वरितद्दिने
नोदयाहरं ज्ञात्वा यस्मिन्दिने उदयाहरमकारो भवति तस्मिन्दिने प्रारभ्य घटिकापारायणं प्रोक्त
क्रमेण कार्यमिति घटिकापारायणजपः प्रातरेव कार्यः॥ ॥ अथ प्रथमदिनसंध्या॥ ॥ तत्र प्रा
णायामादि सर्वं तर्पणांतं प्रातःसंध्यादेव विधाय वारुणसंध्यां कुर्यात्। तद्यथा। तत्र मध्याह्ने अ
नाहतचक्रे मूलविद्यायाः कामकलाकूटं रक्तवर्णं ध्यायन् ततो ऊः सुषुम्नामार्गेण वरुणासाधु

सो० २० ८०
२

ध्यानी नित्यः सायं सूर्यमंडले समाकृष्य तद्रूपां कामेश्वरीं ध्यायेत्। तद्यथा। रक्तां रक्तांबरां रक्त-
वर्णाढ्यां पाशांकुशशरासनं वरं दधानां। श्रुतिविलसितां मुकुटयोगमाद्यां कामेश्वरीं संस्मरत त्रिनेत्रां॥१॥
इति ध्यात्वा। ॐ ऐं ह्रीं श्रीं कामराजकूटमुच्चार्य श्रीत्रिपुरकामेश्वरी श्रीपादुकायै अर्घ्यं परिकल्पया-
मि स्वाहेति त्रिरर्घांजलिं मुक्त्वा पुनः कामराजकूटमुच्चार्य श्रीत्रिपुरकामेश्वरी श्रीपादुकां तर्पया-
मि नम इति त्रिः संतर्प्य प्राणायामादि पुरःसरं सर्वं विन्यस्य सर्वविह्वरीय विद्यागायत्रीं
जपित्वा कामकूटगायत्रीं जपेत्। सा यथा। ॐ क्लीं त्रिपुरदेवि विद्महे कामेश्वरि धीमहि तन्नः [redacted]
क्लिन्ना प्रचोदयात्। इति कामकूटगायत्रीं यथाशक्ति जपित्वा पादूर्ध्वं त्रिंशत्तत्वात्मकत्वेन मूलविद्यां
जपेत्। तद्यथा। तत्र मध्याह्ने हृदयांभोजे कर्णिके सूर्यमंडले कामराजात्मिकां देवीं मलकृतसु-
कारुण्यां। प्रसन्नबालार्कपुंद्रे हेमचापपाशांकुशान्वितां परिश्वात्ममुख्याभिषकू त्रिंशत्तत्वशक्तिभिः।
रक्तमाल्यांबरालेपनभूषाभिः परिवारितां। गुरुनित्याहारमयां घटिकावरणां स्मरेत्। पुष्पावा-
लिद्रुके दंडधराः शोभवपुर्धराः। हृत्वं कजैतेः कामराजोपास्तिपरायणाः। इति देवीं ध्यात्वा॥ राम
२

ॐ ऐं मूलविद्यां दिननित्याविद्यां हंसः पदं चोच्चार्य अं शिवतत्त्वरूपिणी श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजया-
मि। ४ मू० ऐं० दि० नि० हंसः कं शक्तितत्त्वरूपिणी श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामि। ४ मू० दि० नि० हंसः
खं सदाशिवतत्त्वरूपिणी श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामि। ४ मू० दि० नि० हंसः गं ईश्वरतत्त्व-
रूपिणी श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामि। ४ मू० दि० नि० हंसः घं शुद्धविद्यारूपिणी श्रीमहात्रि-
पुरसुंदरी श्रीपादुकां पूजयामि। १५॥ ४ मू० दि० नि० हंसः ङं मायातत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः
चं कलातत्त्वरूपिणी श्री० ०। १५। ४ दि० नि० हंसः छं विद्यातत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः जं रागतत्त्वरूपि-
णी श्री० ०। १५। ४ मू० दि० नि० हंसः झं कालतत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः ञं नियतितत्त्वरूपिणी श्री०
०। १५। ४ मू० दि० नि० हंसः टं पुरुषतत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः ठं प्रकृतितत्त्वरूपिणी श्री० ०। १५।
४ मू० दि० नि० हंसः डं अहंकारतत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः ढं बुद्धितत्त्वरूपिणी श्री० ०। १५।
४ मू० दि० नि० हंसः णं मनस्तत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः तं श्रोत्रतत्त्वरूपिणी श्री० ०। १५।
४ मू० दि० नि० हंसः थं त्वक्तत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः दं चक्षुस्तत्त्वरूपिणी श्री० ०। १५।
४ मू० दि० नि० हंसः धं जिह्वातत्त्वरूपिणी श्री० ०। १५। ४ मू० दि० नि० हंसः नं घ्राणतत्त्वरूपिणी श्री० ०। १५।

सौ०र०क०
१०

४म्र०ह्रि०हंसः पंचाकृततत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः ॐपाणितत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः वंपाद
तत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः अंपायुतत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः मंउपस्थतत्त्वरूपिणि आ०१५।
४म्र०ह्रि०हंसः शंशब्दतत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः स्पंस्पर्शतत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः रूंरूपतत्त्वरू
पिणि आ०१५। ४म्र०ह्रि०हंसः रंरसतत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः गंगंधतत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः
अंआकाशतत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः वंवायुतत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः तंतेजतत्त्वरूपिणि आ०१५
४म्र०ह्रि०हंसः अंअप्तत्त्वरूपिणि आ०१५। ४म्र०ह्रि०हंसः पृंपृथिवीतत्त्वरूपिणि आ०१५। इति षट्
त्रिंशत्तत्त्वात्मकयोगेनमूलविद्यां जपित्वा ततः कामकलाविद्यामष्टोत्तरशतं जपित्वा प्राग्वन्मूलविद्या
मष्टोत्तरशतवारं जपित्वा हृदयकमले कामराजकूटं बालार्ककोटिसमं हृदयादि ब्रह्मरंध्रपर्यंतं हृ
दयाद्भिन्नाधारं तेच ध्यात्वा तत्रिभिके दं ... ध्यायन् कामराजकूटमष्टोत्तरशतवारं जपित्वा प्राणाया
मादिपूर्वकं जपं समर्प्य स्तुत्वा प्रणम्य मूलदेवीं कामेश्वरींच प्राग्वत् हृदये विसर्जयेदिति मध्याह्नसं
ध्याविधिः॥ ॥अथ सायंसंध्याविधिः॥ ॥ततः प्राणायामादिस्वयनिपूर्णं तं प्राग्वद्विधाय योग
संध्यां कुर्यात्। तद्यथा। सायंकाले [struck through] चके हृत्पुंडरीकमंडले मूलविद्यायास्तृतीयकूटं राम १०

शुद्धस्फटिकसंकाशं प्रज्वलंतं ब्रह्मरंध्रस्थं ऐंद्रमंडलपर्यंतं ध्यात्वा चन्द्रनासापुटेनाकाशस्थसोममंडलेसमावाह्य त
दुक्तां देवीं हृदि ध्यायेत्। यथा। शुक्लां शुक्लांबरालेपस्रग्विभूषाविभूषितां। जटाजूटधरां नेत्रत्रयोद्भासि
तुंगस्तनां देवीं हृद्ध्यायेत्। यथा। शुक्लां शुक्लांबरालेपस्रग्विभूषाविभूषितां। जटापलितसंकीर्णां वमानपयोधरां। पाशांकु
मुखांबुजां।१। इयत्स्फटितदं पूर्णचन्द्रैरवीरूपमास्थितां। जरापलितसंकीर्णां ... ध्यायेत्। ध्यायेदक्षपरां शक्ति
शोपुस्तकं चस्फुटिकाहस्तैः करैः। दधानां शक्तिबाक्षौ चोपरागे सोममंडले स्थितां।२। ध्यायेदक्षपरां शक्ति
शक्तिमभिविवेचितां। योगमोहूर्णपद्मासनां तामनंतामम्रतेश्वरीं। भावामायूर्ध्वपोराघोतदघधस्थपोरन्येर
त्वायुधध्यानं। इतिध्यात्वा। मूलविद्यायास्तृतीयकूटमुच्चार्य त्रिपुरामृतेश्वरी श्रीपादुकां पूजयामि
तिगंधादिभिस्त्रिः संपूज्य पद्ममाएतानत्र्यकूटमायत्रीमुच्चार्य त्रिपुरामृतेश्वरी श्रीपादुकायै अर्घ्यं
परिकल्पयामि स्वाहेति त्रिरर्घ्यं दत्वा दत्वा पुनस्तां तृतीयकूटमुच्चार्य त्रिपुरामृतेश्वरी श्रीपादुकां तर्प
यामि नमः इति त्रिः संतर्प्य प्राणायामादिपूर्वकं तुरायविद्यागायत्रीं प्राग्वज्जपित्वा शक्तिकूटगायत्रीं
जपेत्सा यथा। ॐ ऐं क्लीं सौः त्रिपुरे देवि विद्महे शक्तीश्वरि धीमहि तन्नोम्बा ता प्रचोदयात्। इति शक्ति
गायत्रीमष्टाविंशतिवारं जपित्वा सायाह्ने षोडशानित्यात्मकत्वेन मूलविद्यां जपेत्। तद्यथा। तत्र सा

हृदि नीयमानां श्रीसरोजस्थे चन्द्रे चन्द्रसमप्रकृतिः शक्तिं वा मालिकां चापबाणपाशांकुशान्वितां। पुनर्नित्यां हृदये
देवीं घटिकावरणां परां। चिंतयित्वा भगवतीं नित्याभिः परिवारितां पुस्तकं चाक्षसूत्रं च दधानाः स्मेरवक्त्रकाः।
नित्या षोडश चान्यां सायंकाले समुत्सृजेत्। इति देवीध्यानं। ऊं ऐं ह्रीं श्रीं मूलविद्यां दिननित्याविद्यां चोच्चार्य
हंसः अं कामेश्वरी नित्याविद्यामुच्चार्य अं कामेश्वरीनित्यारूपिणी श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामि। मूल॰
दिन॰ हंसः आं भगमालिनी नित्यामुच्चार्य आं भगमालिनीनित्यारूपिणी श्री॰१५। मूल॰ दिन॰ हंसः इं नित्यक्लिन्नावि
द्यामुच्चार्य इं नित्यक्लिन्नानित्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः ईं भेरुंडा नित्यामुच्चार्य ईं भेरुंडानि
त्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः उं वह्निवासिनी विद्यामुच्चार्य उं वह्निवासिनीनित्यारूपिणी श्री॰१५
४मू॰ दिन॰ हंसः ऊं महावज्रेश्वरीविद्यामुच्चार्य ऊं महावज्रेश्वरी नित्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः
ऋं शिवदूतीविद्यामुच्चार्य। ऋं शिवदूतीनित्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः ॠं त्वरिताविद्यामुच्चार्य।
ॠं त्वरितानित्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः लृं कुलसुंदरीविद्यामुच्चार्य। लृं कुलसुंदरीनित्यारूपिणी श्री॰
१५। ४मू॰ दिन॰ हंसः ॡं नित्यानित्याविद्यामुच्चार्य ॡं नित्यानित्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः एं नीलप
ताकाविद्यामुच्चार्य एं नीलपताकारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः ऐं विजयाविद्यामुच्चार्य ऐं विजयानित्यारूपिणी
श्री॰१५

ऊं ४मू॰ दिन॰ हंसः ओं सर्वमंगलाविद्यामुच्चार्य ओं सर्वमंगलानित्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः औं ज्वालामालिनी
विद्यामुच्चार्य औं ज्वालामालिनीनित्यारूपिणी श्री॰१५। ४मू॰ दिन॰ हंसः अं चित्राविद्यामुच्चार्य अं चित्रानित्यारू
पिणी श्री॰१५। ४मू॰ दिन॰ हंसः अः मूलं पंचदशीविद्यामुच्चार्य अः श्रीमहात्रिपुरसुंदरीनित्यारूपिणी श्री॰१५॥
इति षोडशनित्यात्मकत्वेन जपित्वा पूर्ववत् कालनित्याविद्यां मूलविद्यां च जपित्वा भ्रूमध्यादि हृदयांतं तृतीयकूटं
शरच्चन्द्रकोटिनिभं ध्यायन् तत्र तत्र रश्मिधारं तार्तीयकूटं जपेत्। ततः प्राणायामं पूर्ववत् कृत्वा जपं समर्प्य स्तुत्वा देवीं प्रण
म्य सूर्यमंडलाच्चंद्रमंडलाच्च मूलदेवीमन्ते ध्येयं हृदिकमध्ये च विसर्जयेदिति सायंसंध्याविधिः॥ ॥ततो
र्धरात्रे। तूर्यसंध्यामुपासीत। तद्यथा। अर्कमंडले देवीध्यानं विना प्राणायामाद्याचमनपर्यंतं पूर्ववत् विधाय स
हस्रारकमले तुरीयकूटं मूलविद्यायोद्दशाहरं रूपं पद्मरागसमप्रभं ध्यात्वा वहन्नासापुटेन नारक्षमंड
लान्तर्बहिः परमाकाशे लम्बमानां प्रसर्पंतीं भगवतीं यथोक्तरूपां ध्यायन् तुरीयकूटमुच्चार्य श्रीमहात्रिपु
रसुंदरी श्रीपादुकां पूजयामीति त्रिः संपूज्य पुनस्तुरीयविद्या गायत्रीमुच्चार्य श्रीमहात्रिपुरसुंदरी श्रीपादुकां
यै अर्घ्यं परिकल्पयामि स्वाहेति त्रिरर्घ्यं दत्वा पुनस्तुरीयकूटमुच्चार्य श्रीमहात्रिपुरसुंदरी श्रीपादुकां तर्पयामि इति त्रिः

मूलविद्यां जपित्वा गुरुक्रमकीर्तनमधिकाराभवतांतिशिवसामतं स्नानसंध्यार्चनाजोपे जपेदष्टोत्तरं ॥४

सौ॰र॰क॰ १२

संतर्प्य प्राणायामादिपूर्वकं देवीकोनुरीयगायत्रीं यथाशक्ति जपित्वा कालनित्याविद्यामप्यष्टोत्तरशतवारं तुरीय
बीजे चाष्टोत्तरशतवारं जपित्वा प्राणायामादि पूर्वं ॐ जपं समर्प्य देवीं स्वकीयपरमाकाशसहस्रदलकमलकर्णिका
यामुद्धस्य कामकलारूपमात्मानं ध्यायेदिति तुरीयसंध्याविधिः॥ ॥एतत्संध्याचतुष्टयमेतद्विद्योपासकानां
मावश्यकं वा यद्यशक्तौ ध्यानरूपमप्यत्र संध्योपासनं कार्यमिति। अकृते द्वितीयदिने प्रायश्चित्तार्थम
ष्टोत्तरं शतं शतमिति तेन ऋतजवचनात्। जपेन्मूलविद्यायामित्रिशेवः॥ अत्र संध्यालोपो न कर्तव्यः शंभोरा
ज्ञैवमस्ति। हाहितः संध्यया हीनो न हाहा फलमश्नुते इति वचनात् संध्याचतुष्टयं साधकैरवश्यं कर्तव्यमि
ति संदेहपः॥ अत्र प्रमादाद्यदि संध्यालोपो भवति तदान्यसंध्या समये प्रोक्तप्रायश्चित्तं पूर्वकं पूर्वसं
ध्याक्रियां विधाय तत्कालसंध्यां कुर्यात्। उक्तं च त्रिपुरार्णवे। संध्याहीनोन्यसंध्यायां पूर्वसंध्याक्रियामथ।
विधायोत्तरसंध्यायाः क्रियां कुर्यात्समाहितः॥ इति॥ ॥श्रीविद्यानंदनाथेन शिष्ययोः प्रियसूनुना। कृते सौ
भाग्यरत्नाब्धौ तरंगः प्रथमो गमत्॥ ॥इति श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्री
विद्यानंदनाथेन विरचिते श्रीसौभाग्यरत्नाकरे प्रथमस्तरंगः॥ ॥द्वितीयः संध्याविधायप्रकृतेः प्रातःसंध्या राम १२

नंतरं पितृतर्पणं निर्वर्त्य तांत्रिकतर्पणं कुर्यात्॥ तत्र प्राणायामत्रयं कृत्वा ऋष्यादिन्यासपूर्वकं स्वपुरतो जले सर्वतीर्थमा
वाह्य वमितिधेनुमुद्रया अमृतीकृत्य मूलेनाष्टवारमभिमंत्र्य तत्र श्रीचक्रं विभाव्य तन्मध्ये वक्ष्यमाणप्रकारेण पाठपूजापुरः
सरं देवीमावाह्य षोडशोपचारैर्जलैर्देवीं संपूज्य वक्ष्यमाणविधिना गावरणदेवतां संपूज्य पुनर्मूलेन देवीं संपूज्य
मूलविद्यामुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकां तर्पयामि नमः। इत्यष्टोत्तरशतं तदर्धं विंशतिवारं वा य
थाशक्ति तत्तीर्थजलैः परदेवतामुखकमले परमामृतबुद्ध्या संतर्प्यावरणदेवता यथाक्रमं स्वस्वमंत्रैः स्वजायमा
तिस्थाने तर्पयामा त्यंतेरेकैकांजलिना तर्पयित्वा तदन्ते बटुकादिचतुष्टयषडंगयुवतीः गुरुपंक्तित्रयसहित
शक्तित्याभिः सहितां चतुरस्रवृत्तोदे त्रिकोणमध्यस्थां सायुधत्रिकोणावरणशक्तियुतां महादेवीं त
र्पयेत्। तत्राप्यशक्तौ संस्कृतजले देवीं ध्यात्वा संपूज्य देवीमेव तर्पयेदिति तर्पणविधिः॥ ॥अथैवं कृतः
प्रातःसंध्यावंदनादिक्रियः स्वगुरूपदिष्टविधिना षट्त्रिंशदुत्तरसहस्रताधिकविंशतिसहस्रसंख्या
भिः कालनित्याविद्याभिः सह मूलविद्यायाः पारायणजपं कुर्यात्। कालनित्याविद्यास्तु तंत्रराजोक्ता
उद्ध्रियते। तत्र अकारादिक्षान्ताः षट्त्रिंशत्तत्ववर्णाः षोडशनित्याभिः षोडशस्वरैः प्रत्येकं संयो

श्रो॰र॰क॰

१२ नांगाणुल संख्या गमे केके को वर्णः षट्त्रिंशत्षट्त्रिंशद्वर्णानामादिवर्णादि तिसर्वे वर्णा वाग्भवाख्या भवंति। प्रागुक्त
षट्त्रिंशत्तत्ववर्णस्य सर्वासां विद्यानां मकारेण हतसंधिकाः पुनः पुनः क्रमेण कामराजाख्या द्वितीयवर्णा
भवंति। ईकारस्तु सर्वासां विद्यानां शक्तिकूटाख्यस्तृतीयवर्णो भवति। अथैतां विद्यां क्रमेण पा
रायणजपपरिपाटीं च प्रदर्श्यते। तत्रादौ साधको नित्यविधिकेन घादितीरे एकांते स्वगृहे वा स्वा
सनमास्थाय ह्रीं आधारशक्तिकमलासनाय नमः। इत्यासनं संपूज्य तत्र प्राङ्मुखः स्वस्ति
काद्यासने नोपविश्य गुरुगणपतीष्टदेवताः प्रणम्य प्राणायामत्रयं षडंगं कृत्वा तत्र
शुद्धिं प्राणप्रतिष्ठां मातृकान्यासं च कुर्यात्। समस्तांक दक्षिणबाहुमूलादि षट्त्रिंशत्स्था
नेषु प्रतिस्थानं षोडशपत्रं दलं विभाव्य तेषु ककारादि हकारांतान् षट्त्रिंशद्वर्णान् प्र
त्येकं षोडशस्वरपुटितान् विभाव्य मध्ये तत्प्रथमाहारं विन्यस्य पूर्वादिदलेषु तत्तद्दलाक्षरे वि
तत षोडशवर्णान् हृदादिकान्विन्यसेदित्येवं पूर्णं षोडशान्विन्यस्य पुनस्तत्तद्दिननित्यावि
द्यया सहितमूलविद्यया प्राणायामत्रयं कृत्वा दक्षिणामूर्तिऋषये नमः शिरसि [illegible]
छंदसे नमः मुखे कालनित्यारूपिण्यै श्रीमहात्रिपुरसुंदर्यै देवतायै नमः हृदये। राम १२

इति न्यासादिकं विन्यस्य मम मोक्षार्थे नित्यपारायणजपे विनियोग इति संकल्पं जपं कृत्वा तत्तद्दिन
नित्याविद्याक्षरैस्त्रिखंडित्रिरावृत्त्या यथा विकरषडंगन्यासं वक्ष्यमाणचतुरासनन्यासं भागदेवता
एकन्यासं च विधाय। रक्तांबरां रक्तांबरां रक्तस्रग्विभूषानुलेपनां। पाशांकुशेक्षुकोदंडप्रसूनवि
शिखां स्मरेत्। इति काम्यनित्याहृदये ध्यात्वा वक्ष्यमाणविधिना हृदये मानसैः काममध्यग
तं विभाव्य तत्र देवीं सावरणां कामेश्वरनित्याविद्यां त्रिकोणपरिवृतां ध्यात्वा मानसैरुपचारैः संपू
ज्य पारायणजपमारभेत्। तत्रादावंगविद्याजपः। तत्र ॐ मूलं तद्दिननित्यावि
द्या अं सौः हंसः। ॐ मूलं तद्दिननित्याविद्या आं सौः हंसः। ॐ मूलं तद्दिननित्याविद्या इं सौः
हंसः। ॐ मूलं तद्दिननित्याविद्या ईं सौः हंसः। ॐ मूलं तद्दिननित्याविद्या उं सौः हंसः। ॐ मूलं
तद्दिननित्याविद्या ऊं सौः हंसः। ॐ मूलं तद्दिननित्याविद्या ऋं सौः हंसः। ॐ मूलं तद्दि
ननित्याविद्या ॠं सौः हंसः। ॐ मूलं तद्दिननित्याविद्या ऌं सौः हंसः। ॐ मूलं तद्दिननि
त्याविद्या ॡं सौः हंसः। एवं हं सौः हंसः। इत्येवं एकपंचाशद्विद्याभिः सह मूलविद्यां
जपित्वा ततः केवलमूलविद्यां त्रिर्जपित्वा ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय [illegible]

सौ॰ र॰ क॰
॥१४॥

मः ह्रौं ओंं कुरुकुरु क्लीं सौः सोऽहं कुरु कुरु स्वाहा ह्सौं । इति विद्यां विना विद्यामेकवारं जपित्वा । ततो वक्ष्यमाण गुरुपादुका
विद्याम्प्येकवारं जपित्वा । पुनश्चत्वारिंशद्विद्याभिः सह मूलविद्यां जपेत् ॥ ॐ मः आ ह्रां ई हंसः ॥ ॐ
मः इं आ ह्लां ई हंसः ॥ मः हां ह्लां ई हंसः ॥ मः ऋ ह्सां ह्सां ई हंसः ॥ मः ऌ बां ह्लां ई हंसः ॥ मः ऐं शां ह्लां ई
हंसः ॥ मः औं वां ह्सां ई हंसः ॥ मः अः ळां ह्लां ई हंसः ॥ इत्यष्टधा जपित्वा । पुनः ॐ मः आ ह्रां ई हंसः ॥
मः अ ह्रां ई हंसः ॥ पुनः मः इ आं ई हंसः ॥ मः इ ळां ई हंसः ॥ मः ऊ षां ई हंसः ॥ मः उ ळां ई हंसः ॥ मः
ऋ सां ई हंसः ॥ मः ऋ सां ई हंसः ॥ मः ऌ षां ई हंसः ॥ मः ॡ बां ई हंसः ॥ मः ऐ शां ई [illegible] हंसः ॥ मः
ए शां ई हंसः ॥ मः औं वां ई हंसः ॥ मः ओं यां ई हंसः ॥ मः अः यां ई हंसः ॥ मः अं यां ई हंसः ॥ इति
षोडशधा जपित्वा । पुनः मः अ कां ई हंसः ॥ एवं इ चां ई हंसः ॥ उ टां ई हंसः ॥ ऋ तां ई हंसः ॥ ऌ
पां ई हंसः ॥ ए यां ई हंसः ॥ ओ शां ई हंसः ॥ अं ळां ई हंसः ॥ इत्यष्टधा जपित्वा । पुनः मः आ ई हंसः ॥ एवं ई
ळां ई हंसः ॥ ऊ रां ई हंसः ॥ ॠ सां ई हंसः ॥ ॡ वां ई हंसः ॥ ऐं शां ई हंसः ॥ औं वां ई हंसः ॥ अः ळां ई राम
इत्यष्टधा जपित्वा । पश्चात्काञ्चनित्याविद्याभिः सह मूलविद्यां जपेत् ॥ अथ पञ्चाशद्विधा जपो यथा ॥१४॥

व्यस्ताव्यस्तैः समस्तैः कार्यः ॥ ततः प्रथमं दिने ॐ मः विद्यास्त्वाचार्यः अ आ ई हंसः ॥ मः अ कां ई हंसः ॥ मः अ खा
ई हंसः ॥ मः अ गां ई हंसः ॥ मः अ घां ई हंसः ॥ मः अ ङां ई हंसः ॥ मः अ चां ई हंसः ॥ मः अ छां ई हंसः ॥ मः
जां ई हंसः ॥ मः अ झां ई हंसः ॥ मः अ ञां ई हंसः ॥ मः अ टां ई हंसः ॥ मः अ ठां ई हंसः ॥ मः अ डां ई हंसः
मः अ ढां ई हंसः ॥ मः अ णां ई हंसः ॥ मः अ नां ई हंसः ॥ मः अ थां ई हंसः ॥ मः अ दां ई हंसः ॥ मः अ
धां ई हंसः ॥ मः अ नां ई हंसः ॥ मः अ पां ई हंसः ॥ मः अ फां ई हंसः ॥ मः अ बां ई हंसः ॥ मः अ भां ई
हंसः ॥ मः अ मां ई हंसः ॥ मः अ यां ई हंसः ॥ मः अ रां ई हंसः ॥ मः अ लां ई हंसः ॥ मः अ वां ई हंसः ॥
मः अ शां ई हंसः ॥ मः अ षां ई हंसः ॥ मः अ सां ई हंसः ॥ मः अ ळां ई हंसः ॥ मः अ क्षां ई हंसः ॥ मः
अ ह्रां ई हंसः ॥ इति जपित्वा पुनः मः अ आ ई हंसः ॥ मः आ कां ई हंसः ॥ मः आ खां ई हंसः ॥
पुः मः आ गां ई हंसः ॥ मः आ घां ई हंसः ॥ मः आ ङां ई हंसः मः आ चां ई हंसः इत्यादि मः अं आ ह्रां ई हंसः
इत्येवं जपित्वा । पुनः मः इ आ ई हंसः ॥ मः इ कां ई हंसः ॥ मः ई पां ई हंसः ॥ मः ई गां ई हंसः ॥ मः इ घां ई
हंसः इत्यादि ॥ इ ह्रां ई हंसः ॥ इत्येवं जपित्वा । पुनः मः उ आ ई हंसः ॥ मः उ कां ई हंसः ॥ मः उ खां ई हंसः

सौ॰ र॰ क॰
१५

मू॰ उगाई हं सः ॥ मू॰ उखाई हं सः इत्यादि॰ उङाई हं सः । इत्यंतं जपित्वा पुनः मू॰ ऊआई हं सः ॥ ऊकाई हं सः ।
ऊखाई हं सः ॥ ऊगाई हं सः इत्यादि मू॰ ऊङाई हं सः । इत्यंतं जपित्वा पुनः मू॰ ऋआई हं सः ॥ मू॰ ऋकाई
हं सः ॥ मू॰ ऋखाई हं सः ॥ मू॰ ऋगाई हं सः इत्यादि मू॰ ऋङाई हं सः ॥ इत्यंतं जपित्वा पुनः मू॰ ॠआई हं सः
मू॰ ॠकाई हं सः ॥ मू॰ ॠखाई हं सः ॥ मू॰ ॠगाई हं सः इत्यादि मू॰ ॠङाई हं सः इत्यंतं जपित्वा पुनः मू॰
ऌआई हं सः ॥ मू॰ ऌकाई हं सः ॥ मू॰ ऌखाई हं सः ॥ मू॰ ऌगाई हं सः इत्यादि मू॰ ऌङाई हं सः इ
त्यंतं जपित्वा पुनः मू॰ ॡआई हं सः ॥ मू॰ ॡकाई हं सः ॥ मू॰ ॡखाई हं सः ॥ मू॰ ॡगाई हं सः इत्यादि
मू॰ ॡङाई हं सः इत्यंतं जपित्वा ॥ पुनः मू॰ एआई हं सः ॥ मू॰ एकाई हं सः ॥ मू॰ एखाई हं सः ॥ मू॰ ए
गाई हं सः इत्यादि मू॰ एङाई हं सः इत्यंतं जपित्वा पुनः ॥ मू॰ ऐआई हं सः ॥ मू॰ ऐकाई हं सः ॥ मू॰
ऐखाई हं सः ॥ मू॰ ऐगाई हं सः इत्यादि मू॰ ऐङाई हं सः इत्यंतं जपित्वा पुनः मू॰ ओआई हं सः ॥ मू॰ ओ
काई हं सः ॥ मू॰ ओखाई हं सः ॥ मू॰ ओगाई हं सः ॥ इत्यादि ओङाई हं सः इत्यंतं जपित्वा पुनः मू॰ औ
आई हं सः ॥ मू॰ औकाई हं सः ॥ मू॰ औखाई हं सः ॥ मू॰ औगाई हं सः इत्यादि मू॰ औङाई हं सः इत्यं
जपित्वा पुनः मू॰ अंआई हं सः ॥ मू॰ अंकाई हं सः ॥ मू॰ अंखाई हं सः ॥ मू॰ अंगाई हं सः इत्यादि मू॰ अंङाई हं सः राम १५

इत्यंतं जपित्वा । पुनः मू॰ अःआई हं सः ॥ मू॰ अःकाई हं सः ॥ मू॰ अःखाई हं सः ॥ मू॰ अःगाई हं सः इत्यादि अःङाई हं सः
इत्यंतं जपित्वा एवं षट्सप्तत्युत्तरं पंचाशत्संख्याको जपो भवति । मूलविद्यायाः अत्र पारायणे प्रथमे तद्दिने यु
गाहरस्य षोडशस्वरभिन्नाद्युत्पन्नषट्सप्तत्युत्तरपंचाशन्मितविद्याभिः सह मूलविद्यां मूलविद्यां जपित्वा पश्चा
त्तद्दिनाहर्गणजनितविद्याभिस्तावत्संख्याभिः सह प्रोक्तक्रमेण मूलविद्यां जपेत् । युगाहर्दिनाहरेषु तद्दि
ननित्याविद्यायाः प्रथमाहरं द्वितीयाहरं च बोध्यं ॥ युगाहरे स्वविद्याजपे विशेषस्तु यस्मिन्दिने यत्स्व
रयुतं युगाहरं भवति । तत्स्वरमारभ्य प्रतिस्वरं षट्त्रिंशत्क्रमेण तद्दिनगोतिमविद्यापर्यंतं जपित्वा पुन
स्तद्दिनस्य प्रथमस्वरमारभ्य आरब्धस्वरस्य पूर्वस्वरं तिमविद्यां विधिवज्जपेत् । तदा मूलविद्यायाः ष
ट्सप्तत्युत्तरपंचाशत्संख्याको जपो भवति । अत्र युगस्य षट्त्रिंशद्दिनात्मको भवति । प्रागुक्तप्र
णालिंगछेदवशे युषट्सप्तत्युत्तरपंचाशत्संख्याके व्येकैकस्याहरस्यैकैकयुगं प्रतियुगाहरत्वं
च भवति । एतत्सर्वं गुरुमुखात्सम्यग्विज्ञाय पारायणप्रयोगः कार्यः । दिननित्याविद्याक्रमस्तु रुद्र
स्वादिवर्गं त्यक्त्वा इति । एवं द्विपंचाशदुत्तरैकादशशतसंख्याको जपो भवति । मूलविद्यायाः अं
गविद्याजपस्त्वेकैकवर्णादिवेकनवतिसंख्याकस्तेन वर्गद्वयादेरपात्यद्यशीत्युत्तरशतसंख्या
को जपो भवति । केवलमूलविद्याजपे पिशाचतुर्थ्यंते त्रिस्त्रिरावृत्त्या द्वादशया भवति संख्य
षट्च सप्ति द्व्युत्तरत्रिशताधिकसहस्रसंख्याको जपो भवति । मूलविद्यायाः ॥ एवमु

सौ॰र॰क॰
१५

लसंख्याकं जपमुक्तविधिना कृत्वा पुनः केवलां मूलविद्यां त्रिर्जपित्वा प्रातःकल्पितनाविद्यां गुरुपादुकां
विद्यां च सकृत्सकृज्जपित्वा डरलकसहैं हसकलह्रीं सहकलह्रीं नमः इत्युक्तोल्लविद्यां सकृ
ज्जपित्वा मम सकलमनोरथान्साधय रक्तेभ्यो नमः। इति प्रार्थनीविद्यां सकृत्सकृत्वा जपित्वा इति
वर्णद्वयस्यार्थं तत्त्वबोधकं इत्थं पारायणजपं कृत्वा इदं स्तोत्रं पठेत्। तद्यथा। ह्रीं रसात्मा
द्युपष्टप्राययुगस्वरैः। मातृकेश्वरेश्वरांगं वंदे देवीं त्रिपुरभैरवीं।१। कादिचमीन्यकाकारसमस्तार्ह
एकविंशति। अष्टशतयोद्वत्तां वंदे देवीं त्रिपुरभैरवीं।२। स्वरषोडशकान्तं तु षट्त्रिंशत्भिःस्व
रायरैः। षट्त्रिंशत्तत्त्वगां वंदे देवीं त्रिपुरभैरवीं।३। षट्त्रिंशत्तत्त्वसंस्थाव्यशिवचंद्रकलाव्यपि
कादिवलांतरं वंदे देवीं त्रिपुरभैरवीं।४। आद्यमायाद्ययोपाधिविचित्रं षट्कलावतीं। सवालिको
परां वंदे देवीं त्रिपुरभैरवीं।५। षड्धापिंडयोनिस्थां मेडध्वजरूपकुंडलां। लिंगत्रयात्मिकां वंदे देवीं
त्रिपुरभैरवीं।६। स्वयंभू इत्यं बाणभूकामं तद्धितेतरं। प्रासप्रत्यक्चितिं वंदे देवीं त्रिपुरभैरवीं।७।
अहरंतगतिःशेषनामरूपक्रियापरां शक्तिं चिद्वंवरां वंदे देवीं त्रिपुरभैरवीं।८। पठ्यमानं स्तोत्रं पठितव्यं
स्यात्स्तोत्रमेतत्सप्ताहिते॥ इति स्तोत्रादि नित्यपुस्तकं मूलविद्यया प्राणायामत्रयं कृत्वा प्राण
नकर्षणादिन्यासं तद्दिननित्याविद्यायाः प्राग्वत्करषडंगन्यासं च कृत्वा कृत्वा एवं देवी समर्पयेदिति।
एवं द्वितीयदिने प्राग्वत्सतत्सप्ताघंतविद्याजपं कृत्वा विद्यायां। मं॰ कआई हंसः। मं॰ ककाई हंसः। मं॰ कखाई हंसः राम १५

मं॰ कगाई हंसः। मं॰ कघाई हंसः। इत्यादि। मं॰ कहाई हंसः इत्यंतं जपित्वा पुनः। मं॰ का आई हंसः। मं॰ काका
ई हंसः। काखाई हंसः। मं॰ कागाई हंसः। मं॰ काघाई हंसः। इत्यादि। मं॰ काहाई हंसः। इत्यंतं जपित्वा पुनः।
मं॰ कि आई हंसः। मं॰ किकाई हंसः। मं॰ किखाई हंसः। मं॰ किगाई हंसः। मं॰ किघाई हंसः इत्यादि। मं॰ किहा
ई हंसः। इत्यंतं जपित्वा पुनः मं॰ की आई हंसः। मं॰ कीकाई हंसः। मं॰ कीखाई हंसः। मं॰ कीगाई हंसः।
मं॰ कीघाई हंसः। इत्यादि। मं॰ कीहाई हंसः। इत्यंतं जपित्वा पुनः मं॰ कु आई हंसः। मं॰ कुकाई हंसः।
इत्यादि मं॰ कुहाई हंसः। इत्यंतं जपित्वा पुनः मं॰ कू आई हंसः इत्यादि मं॰ कूहाई हंसः इत्यंतं जपित्वा
पुनः मं॰ कृ आई हंसः इत्यादि मं॰ कृहाई हंसः इत्यंतं जपित्वा पुनः मं॰ कॄ आई हंसः इत्यादि मं॰ कॄ
हाई हंसः इत्यंतं जपित्वा। पुनः मं॰ कॢ आई हंसः इत्यादि मं॰ कॢहाई हंसः। इत्यंतं जपित्वा पु
नः मं॰ कॣ आई हंसः। मं॰ कॣकाई हंसः इत्यादि मं॰ कॣहाई हंसः इत्यंतं जपित्वा।३५। एवं के आई हंसः। के
काई हंसः। इत्यादि ३५ एवं कै आई॰ कै काई॰ इत्यादि॰ ३५ एवं को आई हंसः। को काई॰ इत्यादि। ३५ ए
वं कौ आई हंसः। कौ काई॰ इत्यादि॰ ३५ पुनः मं॰ कं आई॰ कं काई॰ इत्यादि ३५ एवं मं॰ कः आई॰ कः काई॰
इत्यादि ३५ एवं जपित्वा। प्राग्वन्मूलविद्यां जपित्वा ह्रीं इत्यादिस्तोत्रपाठं तेन सर्वं समर्पयेदिति॥ तत

तृतीयदिने प्राग्वदासनमष्टन्यासं गविधानजपांतं विधाय मूः खआर हंसः मूः खकार हंसः। मूः खगार हंसः इ
त्यादि। खकार हंसः। इत्येतं ५७५ जपित्वा प्राग्वच्छेषं समापयेत्। पुनः चतुर्थदिने। मूलं गआर हंसः। मूलं ग
कार हंसः इत्यादि। गः कार हंसः। इत्येतं ५७५ जपित्वा प्राग्वच्छेषं समापयेत्। पुनः पंचमदिने मूः घआर हंसः
इत्यादि घाः कार हंसः। इत्येतं ५७५ जपित्वा प्राग्वच्छेषं जपेत्। ततः षष्ठे मूः ङ आर हंसः इत्यादि ङः कार हंसः इत्येतं ५७५
जपेत्। ततः सप्तमदिने ॐ मूः चआर हंसः इत्यादि चकार हंसः इत्येतं ५७५ जपेत्। ततः अष्टमदिने मूः छआर
हंसः इत्यादि छः कार हंसः इत्येतं ५७५ जपेत्। ततः नवमदिने ॐ मूः जआर हंसः इत्यादि जः कार हंसः इत्येतं
५७५ जपेत्। दशमदिने ॐ मूः झआर हंसः इत्यादि झकार हंसः इत्येतं ५७५ एकादशदिने ॐ मूः ञआर
हंसः इत्यादि ञकार हंसः इत्येतं ५७५ जपेत्। द्वादशदिने टआर हंसः इत्यादि टकार हंसः इत्येतं ५७५ जपेत्
त्रयोदशदिने ॐ मूः ठआर हंसः इत्यादि ठकार हंसः इत्येतं ५७५ जपेत्। चतुर्दशदिने मूः ॐ डआर हंसः
इत्यादि डकार हंसः इत्येतं ५७५ जपेत्। पंचदशदिने ॐ मूः ढआर हंसः ढकार हंसः इत्येतं ५७५ जपेत्।
षोडशदिने ॐ मूः णआर हंसः इत्यादि णः कार हंसः इत्येतं ५७५ जपेत् सप्तदशदिने मूः तआर हंसः
इत्यादि तकार हंसः इत्येतं जपेत् ५७५ अष्टदशदिने ॐ मूः थआर हंसः इत्यादि थकार हंसः इत्येतं ५७५ राम
१७

एकोनविंशतिमे दिने ॐ मूः दआर हंसः इत्यादि दः कार हंसः इत्येतं ५७५। विंशतिमे दिने ॐ मूः धआर हंसः इत्यादि
धकार हंसः इत्येतं ५७५ एकविंशतिमे दिने ॐ नआर हंसः इत्यादि मूः नकार हंसः इत्येतं ५७५। द्वाविंशतिमे दिने
ॐ मूः पआर हंसः पकार हंसः इत्येतं ५७५ त्रयोविंशतिमे दिने ॐ मूः फआर हंसः इत्यादि मूः फकार हंसः इत्ये
तं ५७५ चतुर्विंशतिमे दिने ॐ मूः बआर हंसः इत्यादि बकार हंसः इत्येतं ५७५ पंचविंशतिमे दिने ॐ मूः भआ
र हंसः भकार हंसः इत्येतं ५७५ षड्विंशतिमे दिने ॐ मूः मआर हंसः इत्यादि मकार हंसः इत्येतं ५७५ सप्तवि
शतिमे दिने यआर हंसः इत्यादि यकार हंसः इत्येतं ५७५ अष्टाविंशतिमे दिने रआर हंसः इत्यादि रकार हंसः इत्ये
तं ५७५ एकोनत्रिंशद्दिने ॐ मूः लआर हंसः इत्यादि लः कार हंसः इत्येतं ५७५ त्रिंशद्दिने ॐ मूः वआर हंसः
वकार हंसः इत्येतं ५७५ एकत्रिंशद्दिने ॐ मूः शआर हंसः इत्यादि शः कार हंसः इत्येतं ५७५ द्वात्रिंशद्दिने
ॐ मूः षआर हंसः षकार हंसः इत्येतं ५७५ त्रयस्त्रिंशद्दिने ॐ मूः सआर हंसः इत्यादि सकार हंसः इत्येतं ५७५
चतुस्त्रिंशद्दिने ॐ मूः हआर हंसः इत्यादि हकार हंसः इत्येतं ५७५ पंचत्रिंशद्दिने ॐ मूः ळआर हंसः इत्यादि
ळकार हंसः इत्येतं ५७५ षट्त्रिंशद्दिने ॐ मूः क्षआर हंसः इत्यादि क्षकार हंसः इत्येतं जपेत्। अत्र षट्त्रिंश
दिनेषु चमामुक्ते परिपाघमलहे षट्चत्वारिंशल्लक्षत्रयोदशशतसंख्यं यथा भवति तथा जपं कुर्यात

लौ॰र॰कं
१८

सर्गद्वयस्याप्यं ते स्तोत्रपाठं च कुर्यात्॥ अत्र पारायणे पर्यायभेदः पंचधा भवति। तथा च तंत्रराजे दिनतो वारतो
पक्षान्मासात् षट्त्रिंशतादिभिः जपं ते वारनैकं तु विधानि स्यात्त्रिकास्तु ताः॥१॥ आ पुरा रे प्रभेण्य यं विजयं
वांछितः क्रमात्। लभते ललिता याभिः संप्रदायवती भवेत्॥२॥ एकस्मिन्दिवसे त्वेकवारावृत्तौ विधित्वयं
मध्यांके तु समारभ्य मध्यरात्रे समापयेत्॥३॥ वारेषु चैक [illegible] पे प्रथमे रविवासरे। वसिन्याः प्रथमं व
र्गकामेन्त्वर्या द्वितीयकं॥४॥ तस्मा वर्गद्वयं मंत्री सोमवारादि दिनषट्स्वपि। दिनेषु मोदिनी वर्गादेकैकं प्र
जपेत्सुधीः॥५॥ पक्षेपि चैकदा जपे प्रथमादितिथिस्वथ पंक्ति द्वयोरावृत्त्या विधा तु प्रजपेत्प्रतिवासरं। द्वी
पंचमा दशमी पंचदशी तिथिषु क्रमात्। एकैकां प्रजपेद्विधा चतुःपंक्ति भवा सुधीः मासे प्रतिदिनं वि
द्वानेकैकां योनिमेव तु। पूर्णा सुधि द्वियोन्यावृत्त्या जपेद्विधा षट्स्वपि ताः क्रमात्॥ षट्त्रिंशत्सु दिने
ष्वेव मेकैकां योनिमेव तु। जपेत्प्रतिदिनं विद्वानेवं पर्णा भवंति ताः॥९॥ नैताभिः सदृशी कापि विद्या लोकेषु
विद्यते। तस्माद्दाभिरुपायैस्तैः साधयेत्सर्वमीप्सितं॥१०॥ यद्यप्यल्पजपो मंत्रिस्तत्तद्दुष्करं सुकरं भवेत्। जप
तर्पणहोमार्चाभिषेकैः संतर्पयेत्स्थिरः॥११॥ पंचाशद्वारमावर्त्य विद्या भक्तिसमन्वितः। मुच्यते निगडै
र्वैरिरोधैः सुदारुणैः॥१२॥ शतवारं समावर्त्य विद्या विविधवैभवाः। लभते तनयान्धीमानपि सर्वगु

रत्न॰
१८

होमार्चाभिषेकैः संतर्पयेत्स्थिरः ११ पंचाशद्वारमावर्त्य विद्यां भक्तिसमन्वितः मुच्यते निगडैश्छेद्यैर्वैरिरोधैः
सुदारुणैः १२ शतवारं समावर्त्य विद्यां विविधवैभवाः लभते तनयान्धीमानपि सर्वगुणान्वितान् १२
अष्टोर्द्धशतवारं तु विद्यामावर्त्य भक्तितः गुणरूपादिसंपन्नां भार्यां विंदत्ययत्नतः तावदावर्त्य कन्यायाप
तिं सर्वगुणान्वितं लभते पुत्रपौत्राद्यैरेधंते संपदान्विताः द्विशतं ताः समावर्त्य दारिद्र्यान्मुच्यते ध्रुवं त्रिशि
तैस्त्रिभिः स्यात्स चतुर्भिश्च शतैर्धनी पंचभिस्तु भवेद्भूपो भवेत्षड्भिः शतैर्नृपः सप्तभिस्तु शतैस्तस्य नमंत्यस्य
न्वयेसमा अष्टभिस्तु शतैस्तासां तत्पाः सर्वे स्युः किंकराः नवभिस्तु शतैरेवं कंदर्पो वनिताजने एवं नवशतं जप्त्वा स
र्वान्कामानवाप्नुयात् समस्तभजनेनास्या मुक्तिः सर्वार्थसिद्धिदमिति अथैतेषां विषमपदव्याख्या दिनतः स्यादि
भवेदिमं तः सार्द्धद्वयस्तोकस्यार्थः एकवारावृत्तौ षट्त्रिंशदुत्तरसप्तशताधिकविंशतिसहस्रसंख्याभिः काल
निर्मा विद्याभिः सह मूलविद्यायास्तावत्संख्याजपे प्रोक्तविधिना प्रत्यहं क्रियमाणे इत्यर्थः वारेषु रविवारादिश
निवारांतेषु सप्तसु वशिन्यादीनां वर्गास्त्वग्रे न्यासप्रकरणे स्फुटीकरिष्यामः वर्गाः पंक्तियोनिरिति पर्यायः सके

षट्चत्वारिंशद्वृत्तरत्रयोदशशतसंख्यं यथा भवति तथा जपं कृत्वा वर्गद्वयस्याप्यंते स्तोत्रपाठं च कुर्यात्॥ अत्र पा
रायणे पर्यायभेदः पंचधा भवति॥ तथा च तंत्रराजे॥ दिनतो वारतः पक्षान्मासात्षट्त्रिंशता दिनैः॥ जपो नैवारभे
कं तु विद्या नित्यात्मिकास्तुता॥१॥ आयुरारोग्यमैश्वर्यं विजयं वांछितं क्रमात्॥ लभते ललिताभिः संप्रदाय
वती भवेत्॥२॥ एकस्मिन्दिवसे चैकवारावृत्तौ विधिस्त्वयं॥ मध्याह्ने तु समारभ्य मध्यरात्रे समापयेत्॥ वारेषु
चैकदा जापे प्रथमे रविवासरे॥ वसिन्याः प्रथमं वर्गं कामेश्वर्या द्वितीयकं॥४॥ जप्त्वा वर्गद्वयं त्वंची सोमवारा
दिषट्स्वपि॥ दिने शुभोदिने वर्गादेकैकं प्रजपेत्सुधीः॥५॥ पक्षेपि चैकदा जापे प्रथमादितिथिष्वथ॥ पंक्तिद्वयो
ध्या विद्यास्तु प्रजपेत्प्रतिवासरं ६ पंचमीदशमीपंचदशीषु तिथिषु क्रमात् पूर्णासु प्रजपेद्विद्याचतुःपंक्तिदै
भवास्सुधीः मासे प्रतिदिनं विधानेकैकां योनिमेव तु पूर्णासु द्विद्वियोन्युत्थां जपेत् षट्स्वपि ताः क्रमात् षट्त्रिं
शत्सु दिनेष्वेवमेकैकां योनिमेव तु जपेत्प्रतिदिनं विधानेवं पूर्णा भवंति ताः ९ नैताभिः सदृशी कापि विद्या लो श्री०
केषु विद्यते तस्मादाभिरुपायैस्तैः साधयेत्सर्वमीप्सितं १० मध्याह्निजेप्सितं नत्रदुष्करं सुकरं भवेत् जपतर्पण ९

अभिषेकः स्थिरा निश्चलभक्तिमान् पंचाशदित्यादिभिः श्लोकैः प्रपंचितः काम्यजपः केवलकालनित्याविद्याना
मेव अन्येपि काम्यप्रयोगा बहवः संति ते त्वत्र ग्रंथगौरवभयान्नास्माभिर्लिखिताः गुरुतः शास्त्रतश्चावोद्धव्याः
अथ कालचक्ररचनाप्रकारः तत्र प्रथमतः क्वचिद्भित्तौ लिखितं परितः षडंगुलमानेन वृत्तं लिखित्वा तद्बहिः प्रत्येकै
कांगुलांतरालमानतः षोडश वृत्तानीति प्रथमवृत्तेन सह सप्तदश वृत्तानि निष्पाद्य तानि वृत्तानि षट्त्रिंशद्रेखा
भिर्विभज्य षोडश षोडश कोष्ठयुक्ताः षट्त्रिंशद्वीथीः निष्पाद्य तासु प्रागवीथ्यां सर्ववाद्यस्य कोष्ठमारभ्य प्रवे
शगत्या अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः इति विलिखेत् ततः प्रादक्षिण्यक्रमशस्तद्द्वितीयवीथ्यां तथै
व वाद्यकोष्ठमारभ्य क का कि की कु कू कृ कॄ कॢ कॣ के कै को कौ कं कः तृतीयवीथ्यां ख खा खि खी खु खू खृ खॄ खॢ खॣ
खे खै खो खौ खं खः चतुर्थवीथ्यां गकारादि इति गवर्गः पंचमवीथ्यां घवर्गः षष्ठवीथ्यां ङवर्गः सप्तमवीथ्यां च
वर्गः अष्टमवीथ्यां छवर्गः नवमवीथ्यां जवर्गः दशमवीथ्यां झवर्गः एकादशवीथ्यां ञवर्गः द्वादशवीथ्यां
टवर्गः त्रयोदशवीथ्यां ठवर्गः चतुर्दशवीथ्यां डडा इत्यादि डवर्गः पंचदशवीथ्यां ढवर्गः षोडशवीथ्यां ण

वर्गः सप्तदशवीथ्यांनवर्गः अष्टादशवीथ्यांथवर्गः एकोनविंशतिवीथ्यांदवर्गः विंशतिवीथ्यांधवर्गः एकविंश
तिवीथ्यांनवर्गः द्वाविंशतिवीथ्यांपवर्गः त्रयोविंशतिवीथ्यांफवर्गः २४वीथ्यांबवर्गः २५वीथ्यांभवर्गः२६वीथ्यां
मवर्गः २७वीथ्यांयरैवर्गः २८वीथ्यांरवर्गः २९वीथ्यांलवर्गः ३०वीथ्यांववर्गः ३१वीथ्यांशवर्गः३२वीथ्यांषवर्गः
३३वीथ्यांसवर्गः३४वीथ्यांहवर्गः ३५वीथ्यांळवर्गः ३६वीथ्यांक्षवर्गः एवंषट्त्रिंशद्वीथीषुषट्सप्तत्युत्तरपंचश
तसंख्याकान्प्रणमेत्उनवर्णानाखिलकर्णिकायां अ आ ई हंसः इतिवर्णचतुष्टयंविलिख्यसर्वासुद्धाहद्दि
र्देत्रयंनिष्पाद्यसकेसरमष्टदलकमलंविरच्यतद्बहिश्चतुरस्रंचकुर्यात् अत्रवर्णविन्यासेमध्यस्थदेवताभि
मुखाःसर्वेवर्णायथासंभवंतितथालेख्या इतिकीलचक्ररचनाप्रकारः एतच्चक्रस्यषट्सप्तत्युत्तरपंच
शतभेदाःसंति तत्सर्वंतत्रद्रष्टव्याः पूजनप्रकारंतत्फलानिचगुरुतःशास्त्रतश्चबोद्धव्यं ग्रंथगौरवभयाद
त्रनलिखितमिति एवंपारायणजपंविधायततोरुद्रिक्यनित्यहोत्रप्रणम्यशुद्धोदकपूर्णपात्रमादायरुद्रि श्री०
त्वेष्टदेवतास्मरन्मूलमंत्रंस्तोत्रंवाजपन्मौनीस्वपदमात्रद्बहिःस्वगृहंगत्वाद्धरिस्थित्वासानाताज्ञातंस्वपापं
२

स्मरन्प्रणवमुच्चार्य देवत्वंप्रहृतंविघ्नंपापाक्रांतमन्नमम तंनिःसारयचिन्नान्मेपापंफट्फट्फट्तेनमः सर्वः
सोमोयमःकालोमहाभूतानिपंचच एतेशुभाशुभस्येहकर्मणोममसाक्षिणः इतिपठित्वा हुंफट्इतिक्रोधदृष्ट्या
पार्श्वेदयमन्धमधस्थाजोक्यमुमनाभूत्वागृहांतःप्रविश्यहस्तौपादौप्रक्षाल्याचम्यगृहांगणेसुसमेगोमयोपलि
तेभूप्रदेशेसिंदूरादिनाष्टदलपद्ममुल्लिख्य तत्रासनमास्तीर्य ह्रीं आधारशक्तिकमलासनायनम इतिआसनंसं
पूज्यतत्रप्राङ्मुखउपविश्यवक्ष्यमाणमार्तंडभैरवमंत्रेणप्राणायामत्रयंकृत्वाशिरसिदेवभागायऋषये
नमः मुखेषट्देवीगायत्रीछंदसेनमः हृदयेश्रीमार्तंडभैरवायदेवतायैनमः इतिविन्यस्यममसर्वाभीष्टसिद्ध
येसूर्यार्घ्यदानेविनियोगः इतिकृतांजलिर्वदेत् ततः ॐ घ्रांस्त्रांघ्रांहृदयायनमः घ्रींस्त्रींघ्रींशिरसेस्वाहा घ्रूं
स्त्रूंघ्रूंशिखायैवषट् घ्रैंस्त्रैंघ्रैंकवचायहुं घ्रौंस्त्रौंघ्रौंनेत्रत्रयायवौषट् घ्रःस्त्रःघ्रःअस्त्रायफट् इत्यंगमंत्रा
तं न्गुष्ठादिकरयोर्विन्यस्यहृदयादिष्वपिन्यसेत् ततोध्यानं हेमांभोजप्रवालप्रतिमनिजरुचिंचारुखट्वांगप
द्मे चक्रंशक्तिंचपाशंसृणिमपिरुचिरामक्षमालांकपालं हस्तांभोजैर्दधानंत्रिनयनविलसद्वेदवक्त्राभिरामं

सौ॰र॰क॰ मार्त्तंडं वस्त्रभांकं मणिमयमुकुटं हारहीतैर्भजामः १ दक्षाद्यूर्ध्वयोरभयेन दाघधस्त्ययोरपरेन दाघधस्त्ययोरितिर
इत्तायुधध्यानं इति संध्येन ध्यात्वा मनसा पूजयित्वा ताम्रादिपात्रे सिंदूरकुंकुमादिना त्रिकोणवृत्तकर्णिकं सकेस
रमिष्टदलकमलं निर्माय तद्बहिर्वृत्तं चतुर्द्वारोपेतं चतुरस्रं च कृत्वा तद्बहिर्वृत्तत्रयं च्चामयेदिति पूजामंडलं कृत्वा
तत्र सूर्यमंत्रेण पुष्पं दत्वा वक्ष्यमाणविधिना सामान्यार्घ्यं विधाय तेनैव द्वादशधाभिमंत्रितेनोदकेन मंडलं संस्था
प्यानेनैवोपकरणानि चाभ्युक्ष्य तत्र ॐ मंडूकाय नमः कालाग्निरुद्राय नमः मूलप्रकृत्यै नमः आधारशक्त्यै न
मः कूर्माय नमः अनंताय नमः वराहाय नमः पृथिव्यै नमः क्षीरसमुद्राय नमः श्वेतद्वीपाय नमः मणिमंडपा
य नमः रत्नवेदिकायै नमः रत्नसिंहासनाय नमः इति उपर्युपरि संपूज्य चतुरस्रे पूर्वादिचतुर्दिक्षु मध्ये च
प्रभूताय नमः विमलाय नमः साराय नमः समाराध्याय नमः परमसुखाय नमः तत्र आग्नेयादिकोणेषु शि॰
धर्माय नमः ज्ञानाय नमः वैराग्याय नमः ऐश्वर्याय नमः ततः प्राच्यादिचतुर्दिक्षु अधर्माय नमः अज्ञाना
य नमः अवैराग्याय नमः अनैश्वर्याय नमः मध्ये अनंताय नमः पद्माय नमः आनंदकंदाय नमः संविन्नाला

३

य नमः प्रकृतिमयपत्रेभ्यो नमः विकारमयकेसरेभ्यो नमः पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै
नमः सं सत्त्वाय नमः रं रजसे नमः तं तमसे नमः आं आत्मने नमः अं अंतरात्मने नमः पं परमात्मने नमः ह्रीं
ज्ञानात्मने नमः मं वह्निमंडलाय नमः उं सोममंडलाय नमः अं सूर्यमंडलाय नमः ततो अष्टदलकेसरेषु
मध्ये च रां दीप्तायै नमः रीं सूक्ष्मायै नमः रूं जयायै रें भद्रायै रैं विभूत्यै रों विमलायै रौं अमोघायै रं वि
द्युतायै रः सर्वतोमुखायै नमः इति पीठशक्तीः संपूज्य ॐ ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय न
मः इति पीठं संपूज्य तत्कर्णिकायां पूर्वादिचतुर्दिक्षु उं उषायै नमः प्रं प्रज्ञायै नमः प्रं प्रभायै सं संध्या
यै इति चतुःशक्तीः संपूज्य मार्तंडभैरवमूर्तये नमः इति मूर्तिं संपूज्य कराभ्यां पुष्पांजलिमादाय हृदयकमले
तेजोरूपं ध्यात्वा सुषुम्नामार्गेण वहन्नासापुटाध्वना तत्तेजः करस्थपुष्पांजलौ विनाय सूर्यमंत्रमुच्चार्य भगवन्सूर्य
मंत्रमुच्चार्य भगवन्सूर्य इहागच्छागच्छेति तत्सामग्रीं पुष्पांजलिं विक्षेपेण तत्तेजः समावाह्य यथोक्तरूपं देवं ध्यात्वा

ह्रीं षडंगन्यासेन संकलीकृत्य प्राणप्रतिष्ठां विधाय पश्चाद्बिंबमुद्रां दर्शयेत् सूर्यमंत्रमुच्चार्य श्रीमार्तंडभैरव एतत्ते आस
नं नमः एवमेवनेर्घः स्वाहा मधूर्ध्वि एतत्ते पाद्यं नमः पादयोः एतत्ते आचमनीयं सुधेति मुखे एष ते मधुपर्कः सुधे
ति मुखे एतत्ते आचमनीयं सुधेति मुखे एवं स्नानं नमः आचमनीयं सुधा वाससी नमः पुनः आचमनीयं
सुधा॥ उपवीतं नमः आचमनीयं सुधा अलंकारो नमः गंधो नमः पुष्पाणि वौषट् इति पुष्पांजलीरुपचारा
न्दत्वा आवरणपूजां कुर्यात् मायया कर्णिकायां पूर्वादिचतुर्दिक्षु ह्रां सूर्याय नमः ह्रीं भास्कराय नमः ह्रूं भा
नवे नमः ह्रैं रवये नमः ततः आग्नेय्यादिचतुर्दिक्षु ह्रौं दिवाकराय नमः इति पंचमूर्तीः से पत्राष्टदलकेस
रेषु आग्नेये ध्रां ध्रां ध्रां हृदयाय नमः नैर्ऋत्ये ध्रीं ध्रीं ध्रीं शिरसे नमः वायव्ये ध्रूं ध्रूं ध्रूं शिखायै नमः
ईशाने ध्रैं ध्रैं ध्रैं कवचाय नमः पूर्वादिचतुर्दिक्षु धः धः धः अस्त्राय नमः देवाग्रे ध्रौं ध्रौं ध्रौं नेत्राय नमः ततो श्री०
ष्टदलेषु देवाग्रदलमारभ्य सें सोमाय नमः मं मंगलाय नमः बुं बुधाय नमः बृं बृहस्पतये नमः शुं शुक्राय नमः

शं शनैश्चराय नमः रां राहवे नमः कें केतवे नमः ततो दिक्पालांस्तदायुधानि च पूजयेत् लं इंद्राय नमः रं अग्न
ये नमः टं यमाय नमः क्षं निर्ऋतये नमः वं वरुणाय नमः यं वायवे नमः सं सोमाय नमः हं ईशानाय नमः इंद्रे
शानयोर्मध्ये निर्ऋतिवरुणयोर्मध्ये च आं ब्रह्मणे नमः ह्रीं अनंताय नमः ततो दिक्पालानां पार्श्वेषु वज्राय नमः
शक्त्यै नमः दंडाय खड्गाय नमः पाशाय अंकुशाय नमः गदायै त्रिशूलाय पद्माय चक्राय नमः इत्यावरणा
नि संपूज्य धूपदीपनैवेद्यादीनि दत्वा स्वपुरतो वज्राकारे मंडले निर्माय मार्तंडभैरवार्घमंडलाय नमः इति मंडलं संप्र
ज्यपस्य मात्रगन जग्राहिताम्रार्घ्यमत्र मम स्वसाजितं पात्रं साधारं तत्र निधाय सूर्यमंडलत्वेन ध्यायन् सूर्यमंत्रं जपन् शुद्धो
दकैः संपूर्य कुशतिलयवशालिश्यामाक कुंकुमचंदनरोचनाकरवीरपुष्पाणि निक्षिप्य कुशैराछाद्य सूर्यमंत्रमष्टोत्त
रशतवारं तस्मात्तं स्पृशन् जपित्वा मार्तंडभैरवं ध्यायन् जानुभ्यामवनीगतः करांभ्यां तत्पात्रमामस्तकमुत्थाप्य घृ
ह्रौं घृं इति मार्तंडभैरवमंत्रमुच्चार्य मार्तंडभैरवाय प्रकाशशक्तिसहिताय द्वादशकालात्मने सग्रहशशिनक्षत्र
तिथिवारयोगकरणपरिवृतासनसंस्थिताय श्रीसूर्यायार्घ्यं समर्पयामि स्वाहेति मंत्रेणार्घ्यं दत्वा महामुद्रया स्व

पार्थिवार्चाविधिः पूर्वं मंत्रैर्लिंगं सर्वकामदमित्यागमोक्तेः

इति प्रथमाञ्जलिमंत्रः ॐ भैरवं तदर्घामृतपरिप्लुतं विभावयन् पूर्वोक्तमूलमंत्रेण पुष्पांजलिं दत्वा प्राणायामादि
पूर्वकं सूर्यमंत्रं यथाशक्ति जपित्वा प्राणायामादि पूर्वकं जपं समर्प्य स्तुत्वा प्रणम्य स्वमस्तके तिमांत्रैः ॐ भैरवं सपरि
वारं रविं विसृज्य इशाने तेजश्चंडाय नमः इति निर्माल्यं क्षिपेत् ॥ इति सूर्यार्घदानविधिः ॥ अयं मुख्यकल्पः ॥ त
दशक्तौ सूर्यमंडल एव योगिनिसावरणं मात्रैः ॐ भैरवं ध्यायन् यथोक्तविधिनार्घं दद्यादिति मध्यमः ॥ कल्पः के
वलमंत्रमात्रेणार्घदानं त्वापकल्पः ॥ एवं पूजायाः सूर्यार्घदानमावश्यकमिति ॥ ततः शिवपूजां कृत्वा मंडप
द्वारपूजां कुर्वीत ॥ तत्र पार्थिवं सर्वसिद्धदमिति आगमोक्तेः ॥ पार्थिवलिंगपूजनं प्रशस्तं ॥ तत्र पूजनप्रकारस्तु
गोमयेनोपलिप्ते शुचौ देशे प्राक्सूर्यपूजोक्तविधिनास्वासनं संपूज्य स्वर्णतौ दक्षुरवउपविश्य भुद्धेसादिति अमुखो
स्वकल्पोक्त मुख्यं शतेश्वापरदेवतार्चनाधिकारार्थं पार्थिवशिवलिंगपूजनमहं करिष्ये इति संकल्प्य ॥ सर्वाधारे धरे देवि त्व
फलत्वा स्पर्श्य द्योन्मृत्तिकामिमां ॥ ग्रहिष्यामि प्रसन्ना त्वं लिंगार्थं भव सुप्रभे ॥ इति मन्त्रं प्रार्थ्य ॥ हराय नमः इति शुचिस्थाना श्रि०
दगुष्ठां शुद्धिं ग्धां मृदमादाय संशोध्य महेश्वराय नमः इति लिंगसंग्रहणं विधाय स्वपुरतः पीठादौ संस्थाप्य

शूलपाणये नमः इति

शिवपंचाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि वामदेवाय ऋषये नमः मुखे पंक्तिछंदसे नमः हृदये सदा
शिवाय देवतायै नमः इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः इति कृतांजलिरुक्त्वा ॐ हृदया
य नमः नं शिरसे स्वाहा मं शिखायै वषट् शिं कवचाय हुं वां नेत्रत्रयाय वौषट् यं अस्त्राय फट् इति ष
डंगमंत्रानंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य मृगटंकाभयवरैर्युक्तं व्याघ्राजिनं ध्यायेन्नि॥त
वरं दशभुजं त्रिनेत्रं च पंचवक्त्रं शिवं भजेत् इति ध्यात्वा मनसा पूजयित्वा वक्ष्यमाणसामान्यार्घपात्रे पाद्यादिपा प्रथा॥
पी त्राणि च संस्थाप्य वक्ष्यमाणविधिना शैवं संपूज्य पुष्पांजलिमादाय हृदि तेजोरूपं देवं ध्यात्वा वहन्नसाध्वना विधिनाशि
बहिर्निःसार्य करस्थपुष्पांजलौ तत्तेजः संयोज्य पिनाकधृक् इहागच्छागच्छेति तस्मिंल्लिंगे पुष्पांजलिं क्षेपणे वपंचाक्षर मंत्रेणार्घ
क्षेति वाह्य शूलपाणे इह तिष्ठ इति संस्थाप्य प्रागुक्तषडंगन्यासयोगेन सकलीकृत्य पशुपतये नमः इत्यर्घादि वस्त्रांतानु
पचारानुपचर्य शिवाय नमः इति गंधपुष्पं निवेद्य वेद्यां वामावर्तेन स्वाग्रमारभ्य ॐ शर्वाय क्षितिमूर्तये नमः ॐ
भवाय जलमूर्तये नमः ॐ रुद्राय अग्निमूर्तये नमः ॐ उग्राय वायुमूर्तये नमः ॐ भीमाय आकाशमूर्तये नमः

सौ॰ र॰

ॐ पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशानाय सूर्यमूर्त्तये नमः इति संपूज्य प्र
णालिकायां ॐ उमायै नमः इति पूजयेत् ततः सांगाय सपरिवाराय श्रीशिवाय नमः इति त्रिः संपूज्य शिवा
य नमः इति धूपादितांबूलांतानुपचारान् दत्वा पंचाक्षरमंत्रं यथाशक्ति जपित्वा जपं समर्प्य ॐ सर्वज्ञ ज्ञानवि
ज्ञानप्रदानैकमहात्मने नमस्ते देवदेवेश सर्वभूतहिते रत ॥१॥ अनंतकीर्त्तिसंपन्न अनंतासनसंस्थित ।
अनंतकांतिसंभोग परमेश नमोस्तु ते ॥२॥ परापरपरातीत उत्पत्तिस्थितिकारक ॥ सर्वार्थसाधनोपाय विश्वे
श्वर नमोस्तु ते ॥३॥ स्वभावनिर्मलाभोग सर्वव्याधिविनाशन योगियोगिमहायोगि विश्वेश्वर नमोस्तु ते ॥४॥ स्तवा
लिंगप्रतिष्ठोक्तस्तवमेनमुदीरयेत् लिंगस्तवं महापुण्यं यः श्रृणोति सदा नरः ॥५॥ नो मग्नो च संसारे स्थानं
प्राप्नोति शाश्वतं तस्मात्सर्वप्रयत्नेन श्रृणुयाल्लिंगसंस्तवं ॥६॥ पापकंचुकनिर्मुक्तः प्राप्नोति परमं पदं ॥ इति
स्तुत्वा एकाग्रमना मंत्रमिमं पठेत् अंगहीनं क्रियाहीनं विधिहीनं महेश्वर ॥ पूजितोसि मया देव तत्क्ष या
मस्व ममाहृतं ॥ पशुपहतैः पुष्पैः पात्रैर्भावदूषितैः केशकीटापविद्धैश्च पूजितोसि मया प्रभो ॥ अ

च न्यच्चासक्तचित्तेन क्रियाहीनेन वा प्रभो मनोवाक्कायदुष्टेन पूजितोसि त्रिलोचन ॥३॥ यच्चोपहतपात्रेण ग
तमर्घ्यादिकं मया तामसेन स्वभावेन तत्क्षमस्व मे प्रभो ॥४॥ मंत्रेणाक्षरहीनेन पुष्पेण विकलेन वा पूजि
तोसि महादेव तत्सर्वं क्षम्यतां मम ॥५॥ इदं संपूर्णतां यातु फलं चाक्षयमस्तु मे इति पठित्वा प्रदक्षिणान
मस्कारैः सम्यक् परितोष्य श्रीमहादेवं स्वात्मनि संहारमुद्रया विसृज्य निर्माल्यमादाय चंडेश्व
राय नमः इति ईशानकोणे निक्षिप्य तल्लिंगं निर्माल्यपुष्पादिकं च जलमध्ये नद्यादौ विसृजेत् अत्र पा
र्थिवलिंगपूजायां पार्थिवलिंगं यथा यथा वृहत्तथा तथा फलबाहुल्यं यथा स्वल्पं तथा फलमल्पं स्व
ल्पेपि फलं च यावद्भवनं कार्यमिति इति पार्थिवपूजनप्रकारः अथ द्वारपूजा तत्र स्वर्णप्राकारस्य पूर्वद्वारे
णैव तः प्रविश्य प्रादक्षिण्येन मणिमंडपस्य पश्चिमद्वारं गत्वा तदारभ्य मणिमंडपं प्रदक्षिणीकृत्य पश्चिम
द्वारेण मणिमंडपांतः प्रविश्य साधकः पूजयेद्देवान् इति क्रमस्तेनैव तेनैव क्रमेण द्वारपूजनमिति याग
मंडपस्य प्राकारो संभवे मंडपस्य पूर्वद्वाराभावतः तदसंभवे यागमंडपस्य पश्चिमे द्वारे मंडपासंभवे गोम
योपलेपितायाः यागभूम्याः पश्चिमभागे कल्पितद्वारे सामान्यार्घ्यं विधायैवं कल्पयित्वा क्रमेण पूजयेत्

तद्यथा कोटिकोटियोजनविस्तीर्णसुधार्णवचतुष्क्यांतर्गतकोटिकोटिविस्तारायामंमहाद्भुतं
रत्नमयद्वीपंसहस्रादित्यतेजसंविचिंत्यतन्मध्येरतीयांद्रोमदनोन्मादनंनामनानापुष्पलताकुलं
कंदर्पकाननगर्भंनंदनोद्यानंविचिंत्य तन्मध्येरतीयांद्रोसूर्यकोटिप्रतीकाशांज्वलत्स्वर्णप्राकारवेष्टि
तंनानासुरभिशालिनोरणद्वारंनानारत्नमंडितंपरितः सेवासमायातैर्आदिदेवतागणसमाकुलं
मणिमयंश्रीमंडपंध्यात्वासामान्यार्घ्योदकेनाभ्युक्ष्यपुष्पादिभिःक्रमेणपूजयेत् तद्यथा ४ सुधार्ण
वचतुष्क्यायनमः ४ ॐ५१ नवखंडविराजितायनवरत्नमयद्वीपाय० ४ नंदनोद्यानाय० ४ स्वर्ण
प्राकाराय० तद्द्वारस्यदक्षिणोत्तरद्वारशाखयोरूपर्यधश्च ४ गंगणेशायनमः ४ क्षंक्षेत्रपालायनमः ४
द्वांद्वारश्रियैः ४ देंदेहल्यै० ४ इतिसंपूज्यदक्षपादपुरःसरंप्राकारांतःप्रविश्यप्रदक्षिणक्रमेणइंद्रादिद
शदिक्पालान्स्वस्वदिक्षुसंपूज्यमणिमंडपस्यपश्चिमद्वारंगत्वासामान्यार्घ्यवक्ष्यमाणविधिनासंस्था
प्यतेनोदकेनतास्त्रमंत्रेणतोरणद्वारमभ्युक्ष्यसामान्यार्घ्यंकरणाद्राक्षौनाचादिपात्रस्यजलंमुखेना
द्वारमभिमंत्र्यधेनुमुद्रयामृत।

कृत्यतेनोदकेनद्वाःप्रोक्षयेत् ततः ४ कंदर्पकाननायनमः तद्दक्षिणेकामदेवरतिभ्यांनमः तदुत्तरेवसंतश्री
भ्यांनमः इतिसंपूज्यश्रीरत्नमंडपायनमः इतिमंडपंसंपूज्यतोरणद्वारस्यपश्चिमभागेद्वाराभिमुखमुप
विश्यवाराहीवक्ष्यमाणरूपंध्यात्वातद्विद्ययातांसंपूज्यद्वारमस्त्रेणाभ्युक्ष्यद्वारस्योर्ध्वशाखायांदक्षिणे
४ मांमहालक्ष्म्यैनमः सांसरस्वत्यैनमः मध्ये ४ दुंदुर्गायैनमः ४ द्वांद्वारश्रियैनमः द्वारस्यदक्षिणवामशा
खयोरधोधःक्रमेण ४ शंशंखनिधिवसुधाराभ्यांनमः ४ पंपद्मनिधिवसुमतीभ्यांनमः ४ गंगणप
ये० ४ क्षंक्षेत्रपालाय० ४ मांमायाशक्त्यै० ४ चिंचिच्छक्त्यै० ४ गंगंगायै० ४ यांयमुनायै० ४ धंधात्रेनमः ४
विंविधात्रेनमः ४ देंदेहल्यैनमः द्वाराग्रे ४ वंवरुणायनमः इतिपश्चिमद्वारंसंपूज्य ततउत्तरद्वारंगत्वातयै
वाभ्युक्ष्यतस्योर्ध्वशाखायांदक्षिणवामपार्श्वयोः प्राग्वन्महालक्ष्मीसरस्वत्यौसंपूज्यमध्ये ४ वंवटुकायनमः
द्वांद्वारश्रियैनमः पुनःपूर्ववच्छंखनिध्यादिदेहल्यंतंसंपूज्यद्वाराग्रे ४ संसोमायनमः इतिसंपूज्य ततःपूर्व
द्वारंगत्वातयैवाभ्युक्ष्यतस्योर्ध्वशाखायांदक्षिणवामपार्श्वयोः प्राग्वन्महालक्ष्मीसरस्वत्यौसंपूज्यमध्येसौं

ऽ: ह्स्रौं वरामिति॥ ह्स्र वर्णं प्रकृष्टं ... विवस्त्रनाम षोडशस्वर रहितो॥ स्वर्णगौरी कुंभधारिणी स्वर्णगौरी रसभरितकुंभधारिणीमिति अर्थः
रत्नाद्यूर्ध्वयोरधोऽधस्थयोः कुंभमिति ८

सा.र.क. क्षेत्रपालायनमः श्रांद्वारश्रियैनमः पुनःप्राग्वच्छंखनिध्यादिदेहल्यंतंसंपूज्यद्वाराग्रे ४ लंइंद्रायनमः ततोदक्षि
णद्वारंगत्वाग्रेदकेवासुकुस्यतऊर्ध्वशाखायांदक्षिणवामयोःप्राग्वन्महालक्ष्मीसरस्वत्यौसंपूज्यमध्ये ४ रौं
गणेशौं नाथायनमः ४ श्रांद्वारश्रियैनमः इतिसंपूज्य द्वारशाखयोःप्राग्वच्छंखनिध्यादिदेहल्यंतंसंपूज्य
द्वाराग्रे ४ यंयमायनमः ततःपुनःपश्चिमद्वारंगत्वावामपादपुरःसरंतत्तोरणांतःप्रविश्य ४ रत्नसो
पानपंक्तयेनमइतिसोपानपंक्तिंसंपूज्यतामारुह्यमंडपस्थस्यपश्चिमद्वारादिचतुर्द्वारेषुपंचस्यादेव
ताःपूजयेत् तत्रप्रथमंतिरस्करिणीं श्यामवर्णांमहाघूर्णारक्तनेत्रत्रयान्वितां हस्तौ वेरांगेदोस्वंदूंदध
तीचतुर्जवये दोर्भ्यां मनोहराभ्यां वरखर्परीकुंभधारिणीं नीलेतुरंगमारूढां पीनघनस्तनी मुक्तके
शांविवसनांसर्वालंकारभूषितां स्वयोनिदर्शनात्सुप्तपशुवर्गांमनुस्मरेत् एवंध्यात्वापश्चिम
द्वाराग्रेकिंचिद्दक्षि ४ ऐंनमोभगवतिमाहेश्वरिपशुजनमनश्चक्षुस्तिरस्करणंकुरुकुरुस्वाहाति शि०
रस्करिणीदेविश्रीपा० इतिसंपूज्यमंचस्थदेवताःपूजयेत् तत्क्रमाक्रममाह ऊर्ध्वीशामते सरस्वतीर

८

मांचैवपश्चिमेपरिपूजयेत् मायांदुर्गांदक्षिणेतुपूजयेत्परमेश्वरि १ भद्रकालींततस्स्वस्तिंपूर्वेचपरिपू
जयेत् स्वाहांशुभंकरींगौरीयक्षेचपरिपूजयेत् वागीशींलोकधात्रींचदद्यात्पश्चिमद्वारके एतामंचस्थिता
पूज्याइति अथैतासांपूजांयथा पश्चिमद्वारस्यवामभागे ४ सांसरस्वतीश्रीपा० दक्षिणभागे ४ मांमहाल
क्ष्मीश्रीपा० ततोदक्षिणद्वारेवामे ४ मांमायाश्रीपा० दक्षे ४ दुंदुर्गाश्रीपा० ततःपूर्वद्वारेवामे ४ भंभद्रका
लीश्रीपा० दक्षे ४ स्वंस्वस्तिश्रीपा० ततउत्तरद्वारेवामे ४ स्वांस्वाहाश्रीपा० दक्षे ४ शुंशुभंकरीश्री
पा० द्वाराग्रे ४ गौंगौर्यैश्रीपा० पुनर्दक्षिणद्वारंगत्वा तद्वाराग्रेलोंलोकधात्रीश्रीपा० ततःपश्चिमद्वारंगत्वा
तद्वाराग्रेवांवागीश्वरीश्रीपा० इतिसंपूज्य पालितंबहिरिंद्राद्यैःपरमैश्वर्यशोभितं प्रपद्येपश्चिमद्वारंभवा
न्याःमंदिरंमहत् इतिध्यात्वापश्चिमद्वाराग्रमालिमंडपायनमइतिमंडपंसंपूज्यतालत्रयपूर्वकंतद्वारमुद्घाट्य
सिद्धार्थास्तनमस्कुराकुशुमानिनाराचास्त्रप्रयोगेण ४ अपक्रामंतुभूतानिपिशाचाप्रेतगुह्यकाः येचात्र
निवसंत्यन्येदेवताभुविसंस्थिताः अपसर्पंतुयेभूतायेभूताभुविसंस्थिताः येभूताविघ्नकर्तारस्तेनश्यं

गुरुशिवाज्ञया इमं मंत्रमुच्चरन्मंडपान्तः प्रविश्य तस्मान्निर्गच्छतां विघ्नभूतसंघानां स्ववामांगसंकोचे
न मार्गं दत्वा त्रिविधविघ्नानुत्सारयेत् तद्यथा पार्षदकारिणो ये भूतानां भूमौ ये चांतरिक्षगाः दिवि लोके
स्थिता ये च तेन मंत्रं गुरुशिवाज्ञया इमं मंत्रमुच्चरन्वामपार्ष्णिघातत्रयेण भौमान् ऊर्ध्वदृष्ट्या तालत्रयेणां
तरिक्षगान् स्त्रीसंहारदृष्ट्यावलोकनेन दिव्यान्विघ्नानुत्सार्य वामपादपुरःसरं मंडपान्तः प्रविशेदिति द्वार
पूजा अत्र प्रतिद्वारगमनासंभवे पश्चिमद्वार एवास्थित्वा तत्र द्वाराणि कल्पयित्वा पूजयेत् अ
थ यथाक्रमं द्वारदेवतानां ध्यानं लिख्यते पद्मद्वयवराभीतिभास्वत्पाणिचतुष्टयं पद्मवर्णां भजेल्लक्ष्मीं प
द्माख्यां पद्मवासिनीं अक्षस्रक्पुस्तकधरा पूर्णचंद्रसमद्युतिः विश्वविद्यामयी देवी भारती भासतां मयि
शंखचक्रांकितकरा कुमारी कुटिलालका मृगेंद्रवाहना देवी दुर्गा दुर्गाणि हंतु मे ३ तप्तकार्त्तस्वरभासा
दिव्यरत्नविभूषिता. द्वारश्रीरूर्ध्वपद्मस्था वराभयकरांबुजा ४ मुक्तामाणिक्यसंकाशौ किंचित्स्मित
मुखांबुजौ अन्योन्यालिंगनपरौ शंखपंकजधारिणौ ५ विलसद्रत्नवर्षाभ्यां शंखाभ्यां मूर्ध्नि जोक्षितौ

शंखासनसमासीनौ विघ्नसंकल्पकल्पकौ ६ तुंदिलं कंबुकनिधिं वसुधारोघनस्तनी वामतः पंकजनिधिं
प्रियया सहितं यजे ७ सिंदूराभौ भुजाश्लिष्टौ रक्तपद्मोत्पलान्वितौ निःसरद्रत्नवर्षाभ्यां पद्माभ्यां मूर्ध्नि जो
क्षितौ ८ पद्मासनसमासीनौ विघ्नसंकल्पकल्पकौ तुंदिलं पंकजनिधिं तन्वीं वसुमतीमपि ९ पलाशपारल
छायं रमणीयं रतिप्रियं पुंड्रेक्षुचापपुष्पेषुमंतं वंदे मनोभवं १० षट्पद्मेशीनिदयिनं प्रणौं त्रिशाद्दशं विभुं च
संतनेदनोद्यानेव मतेसंततोत्सवं ११ पाशांकुशफलांभोजपाणिपालनतुंदिलं वीरविघ्नेश्वरं वंदे गजव
क्त्रं त्रिलोचनं १२ कपालमल्लौ विभ्राणं क्षपांगं क्षत्रविग्रहं नीरजोद्भवसंभवं समवामिसेत्रसंसेचविद्विषं १३
वराभयकरां सौम्यां सोमकोटिसमप्रभां भजे गंगां महादेव्याः पाद्योदकतरंगिणीं १४ वामपादार्घसं
स्तां परदेव्यास्तरंगिणीं वीराभयकरां वंदे कालिंदीं कीलविग्रहां १५ भर्त्तारं जगतां वंदे शंखचक्रगदां
भुजे विभ्राणं गरुडारूढधातारं क्षत्रविग्रहं १६ रक्तारविंदस्थं वराभयकमंडलुं हंसारूढं विधाता
रं वंदे अक्षसूत्रान्वितं १७ सिंहारूढां शूलपाशांकुशां खड्गखेटकधारिणीं अथ स्याद्देहलीं वंदे पश्चिमास्यां सुर

सौं.र.क. ज्झिणी १८ पाशाभयधरं वंदे प्रसन्नं दुग्धशच्छविं वरुणं मकरारूढं ध्यायेच्छ्रीपार्ववैरदैवते १९ करकलितकपा
लः कुंडली दंडपाणिस्तरुणतिमिरनीलव्यालयज्ञोपवीती क्रतुसमयसपर्याविघ्नविच्छेदहेतुर्जयति वटु
कनाथः सिद्धिदः साधकानां २० धूम्रवर्णो गदाहस्तः कुबेरनरवाहनः सौम्यद्वाराधिपः पायात्सरदेव्याध
नेश्वरः २१ व्यालव्यग्रजटाधरं त्रिनयनं नीलांजनाद्रिप्रभं दोर्दंडात्तगदाकपालमरुणस्रग्वस्त्रगंधोज्ज्वलं
घंटाघुर्घुरमेखलाध्वनिमिलद्धुंकारभीमं विभुं वंदे हं सितसर्पकुंडलधरं तं क्षेत्रपालं सदा २२ सितोगजास्थः
परशुं दंतं पाशं त्रिशूलकं भुजैश्चतुर्भिर्बिभ्राणो मूषकोपरि संस्थितः २३ पूर्वद्वाराधिपः शक्रः परदेव्याः सु
पीतकः वज्रहस्तः सहस्राक्षः पायादैरावतस्थितः २४ गणेशं श्यामवर्णं च चतुर्बाहुं दिगंबरं वामद
क्षोर्ध्वबाहुभ्यां पाशांकुशधरं तथा २५ दक्षिणाधः करे लैवमधुपूर्णकपालकं दधानं वामहस्तेन देव्या
मदनमंदिरं २६ स्पृशन्वामांगसंस्थायाः रक्तायाः दक्षपाणिना आत्मयोनौ मस्तलिंगं पद्मवामेन पा शि.
णिना २७ दधत्सोऽकुंठपायोनिजिघ्रन्ध्यात्वा प्रपूजयेत् नीलांजनचयप्रख्यं यमं महिवाहनं २८ दंडमं

डितदोर्दंडं दक्षद्वाराधिपं भजे अथ मंत्रस्य देवताध्याने अक्षस्रक्पुस्तकाभीतिर्दधानां बाहुभिर्वरं त्रिलो
चनां स्मरे देवीं सर्वशुक्लां सरस्वतीं पद्मद्वयवराभीतिभास्वत्पाणिचतुष्टया सिंदूरहेमगौरांगी महाल
क्ष्मीस्त्रिलोचनी वरांकुशपाशमभीतिमुक्तैः करैर्दधानां भवभावमुक्तां घनाघनौघप्रभदेहकांतिं मा
याचित्रनेत्रामनिशं स्मरामि १ शंखचक्रधनुर्बाणान्धारयंतीं त्रिलोचनां दूर्वादलनिभां वंदे दुर्गां दुर्ग
तिनाशिनीं २ कपालं खेटकं खड्गं त्रिशूलं बिभ्रतीं करैः भिन्नांजनचयप्रख्यां भद्रकालीं नमाम्यहं ३
शक्तिस्वस्तिकमुद्राभिर्हस्तां चंद्रसमप्रभां त्रिनेत्रां संस्मरे देवीं स्वस्तिं स्वस्तिकरीं परां ४ रक्तोत्पलं दधवरा
भयानि करैर्वहंतीं स्मितशोभिवक्त्रां रक्तां त्रिनेत्रामरुणांबराढ्यां स्वाहां भजे देवगणैकवंद्यां ५ शालि
कुंतलनाशार्ङ्गबाणपाणिचतुष्टया ज्वलत्कांचनवर्णाभां सुभं कुर्यात्शुभंकरी ६ पाशांकुशवराभी
तिकां मरुणचनप्रभं त्रिनेत्रां मातरं वंदे गौरीं रक्तांबरोज्ज्वलां ७ नसुमज्जवराभीतीर्बिभ्रतीं कांचन
प्रभां मातरं दिव्यरत्नांगीं लोकधात्रीं नमाम्यहं ८ श्वेतांश्वेतांबरां श्वेतभूषणास्रग्विलेपनां पद्मद्वय

सौ०र०क० वरादर्शकरां वागीश्वरीं भजे ऐं इति श्रीपरदेवताया मंडपद्वाराधिदेवतानां ध्यानं इत्थं द्वारदेवताध्या
यन्पूजयेदिति श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना कृते सौभाग्यरत्नाब्धौ तरंगोगाद्वितीयकः इ
ति श्रीमत्सच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे द्वि
तीयस्तरंगः २ ततो मंडपांतः प्रविश्य वस्त्रेण द्वारमाच्छाद्य घंटावादनपूर्वकं पंचगव्यार्घ्यतोयाभ्या
मस्त्रमंत्रेण मंडपांतः प्रोक्ष्य नानावर्णरजश्चित्रैः पुष्पमालावितानाद्यैः मंडपमलंकृत्य जालासिंदूरा
दिभिर्निस्तंभादिकमरुणीकृत्य वेदीपरितः चिरस्थायिनः प्रदीपान्संस्थाप्य कालागुर्वादिभिर्धूपयित्वा तद्
भावेनादृशं ध्यात्वा ततो मंडपस्य नैर्ऋतिकोणे ४ वास्तुपुरुषाय नमः ४ वास्त्वधीश्वराय ब्रह्मणे नमः ईशा
नभागे ४ कुलनाथपादुकां पूजयामि ४ रक्तवर्णरक्तद्वादशशक्तिसहितश्रीदीपनाथपादुकां पूजयामि इ
ति दीपनाथं संपूज्य अस्मिन्नक्षे चेदीपनाथ निर्विघ्नं सिद्धिहेतवे श्रीचक्रमम पूजार्थमनुज्ञां दीयतां
मयि इति दीपनाथाज्ञां प्रार्थ्य ततः पश्चिमादिद्वारचतुष्टये मध्ये च ४ इतर्यै वाश्रीपा० ४ सुंदर्यै वाश्री०

पा० ४ सुमुख्यै वाश्रीपा० ४ विरूपायै वाश्रीपा० ४ विमलायै वाश्रीपा० ४ अंतर्यै वाश्रीपा० ४ वदर्यै वाश्रीपा०
४ पुरंदर्यै वाश्रीपा० ४ इति द्वारस्य वामदक्षिणयोर्द्वे द्वे संपूज्य मध्ये ४ पुष्पमर्दिन्यै वाश्री० ४ इति पूज
येत् तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि इति पठि
त्वा भैरवाज्ञामादाय अस्त्राय फट् इति पूजावेदीं गत्वा शिरसि मेरुपृष्ठऋषये नमः मुखे सुतलछं
दसे नमः हृदये पृथिव्यै देवतायै नमः इति विम्बस्य पृथिवी प्रार्थने विनियोगः इति कृतांजलिः ॥
पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनं इति पृथिवीं प्रा
र्थ्य जपस्थाने मूलमंत्रेण वीक्ष्यास्त्रेण प्रोक्ष्यास्त्रेण प्रोक्ष्यास्त्रेणैव कुशैः संताड्य कवचमंत्रेणाभ्यु
क्ष्य वक्ष्यमाणपीठपूजाक्रमेण मंडूककालाग्निरुद्रादिवेदिकांतं संपूज्य तस्यां वेदिकायां यथोक्तमास
नं स्वासनस्थाने आस्तीर्य तदस्त्रेण प्रोक्ष्य ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य
ततस्तस्याग्नेयादिकोणेषु ४ गं गणपतये नमः ४ दुं दुर्गायै नमः ४ सं सरस्वत्यै नमः ४ क्षं

 श्रीचपात्राय नमः इति संपूज्य तत्र प्राङ्मुखः पश्चादासनेनोपविश्य रक्तगंधांबरस्रगाभरणभूषितस्तो
ष्णाल्पपरितसुखः कर्पूरमृगनाभिसुवासितांबरास्यांगः प्रमुदितचित्तः शिवोहमिति भावयन्
गुरूपदेशविधिना स्वपुरतः समे भूतले निर्मितसौधादिस्थंडिले सिंदूरादिना वक्ष्यमाणं श्रीचक्रराज
मुद्धरेत् अथवा स्वर्णादिपट्टे निर्मितं तत्र वक्ष्यमाणविधिना प्रतिष्ठितं चंदनादिपीठे पुरितः स्वे-
स्वाप्य वक्ष्यमाणसमष्टियोगिनीमंत्रेण पुष्पांजलिं निक्षिपेत् तत्प्रतिष्ठाप्रकारस्तु श्रीतंत्रराजे चक्रे
देव्यां तथा शिष्ये प्रतिष्ठा त्रिविधोच्यते सा च तत्त्वविदा कार्या संप्रदायानुरोधिना चक्रपूजा च चक्रे देव्यां दे
वीमंत्रैस्तत्त्वविदा प्रतिष्ठाविधिज्ञेन पूर्णाभिषिक्तेन गुरुतः प्राप्तानुज्ञेन तदुक्तं तंत्रराजे गुर्वनुज्ञा
प्रतेमोहाद्योभावाकुरुतेयदि सपुत्रदारो निधनं प्राप्नुवन्निरयं व्रजेत् तस्मात्पूर्णाभिषेकेण प्रा
प्तानुज्ञा समाचरेदिति एवं विधेन क्रियमाणायां प्रतिष्ठायां कालविशेषस्तत्रैव स्थिरे शुभयुक्तेऽपेते
नुकूले गुणशालिनि मुक्तैर्वा कारयेद्वा पूर्णायां वा शुभोदये अक्षरत्रयसंपातदिने पर्वदिनत्रये

प्रोक्तेषु पंचस्वन्येषु सर्वदा वा शुभोदये २ अस्यार्थः । पूर्णायां पौर्णमास्यां ॥ अक्षरत्रयसंपातदिने ॥ एकस्यैवाक्षर
स्य दिनाक्षरत्वेनोदयाक्षरत्वेन च स्थितिर्यस्मिन्दिने अन्येषु पंचसु पर्वसु । गुरोर्जन्मदिनविद्याप्राप्तिदिनस्वज
न्मदिनदर्शगुरुमरणादिनेष्विति । पूर्णायां विशेषमाह । यद्वेति । पूर्वोक्तलक्षणयुतदिनासिद्धौ पूर्णायामेव स्वा
त्मनः स्वास्यशुभोदये कुर्यादित्यर्थः । पक्षांतरमाह । सर्वदा वा शुभोदये इति तत्त्वविदा तात्पर्यमात्राका
स्वा रेण प्रोक्ततिथिवारादिकं सर्वमवेक्ष्य स्वात्मनः स्वास्यशुभोदये एवेत्यर्थः । अयं पक्षः सिद्धविषयः । नान्यैः का
र्यः । कुर्यात्स्थितिरिति सिद्धात्मा न त्वात्मोज्ञानगर्वित इति तत्रैवोक्तत्वात् । तत्रापि संप्रदायानुरोधिना विदितत्वे-
नापि नित्यनैमित्तिकोपास्तिनिरतेन । तत्रादौ श्रीचक्राधिकरणानि श्रीरुद्रयामले । ततः कुंकुमसिंदूरैः
कार्यं यंत्रं तु योनिना । सौवर्णे राजते ताम्रे स्फाटिके वैद्रुमे तथा ॥ चक्रे यथोक्तविधिना पूजा देवीनरोत्तमेरिति ॥
तथा च तंत्रराजे । रत्नैर्हेमनि रूप्ये वा ताम्रे दृषदि चक्रमातन् ॥ कृत्वा चक्रस्य निर्माणं स्थापयेत्सज्जयेदपि । लक्ष्मीकांति
यशःपुत्रधनारोग्यादिसिद्धये ॥ दृषदि गंडकीशिलायां गंडकीभवपाषाणे स्वर्णे रजतताम्रयोः शितिदक्षिण

सौं॰ र॰ क॰ मर्त्रिसंहितावचनात्। अथधातुविशेषेपूज्यकालसंख्याविशेषमाह। रत्नसागरे। यावज्जीवंसुवर्णेस्याद्रूप्येवा
विंशतिप्रिये। ताम्रेद्वादशवर्षाणिलदर्द्धंभूर्जपत्रकेऽइति। सारसंग्रहे। ताम्रेद्वादशकंवर्षंस्फाटिकादौतुसर्वदा
॥ तेषांमध्येस्फाटिकेतुसर्वसिद्धिप्रदंभवेत्। श्रीचक्रमितिशेषः॥ अथाधिकरणविशेषेफलविशेषमाह। जद्रसा
गरे। हेमौसिंदूररजसारचितंसर्वकामदं। सुवर्णरचितंयंत्रंसर्वराजवशंकरं। २। रजतेनकृतंयंत्रमायुरारोग्य
कामदं॥ ताम्रेतुरचितंयंत्रंसर्वैश्वर्यप्रदंमतं। ३। यंत्रंहिस्फाटिकेदेविमनोभिलषितप्रदं। माणिक्यखचितंयंत्रं
राज्यदंमुक्तिदंमतं। गोमेदरचितंयंत्रंसर्वैश्वर्यप्रदंमतं। कृष्णेमरकतेयंत्रंसर्वशत्रुविनाशनं। लोहौत्रयोद्भवंयं
त्रंसर्वसिद्धिकरंमतं। देव्युवाच। लोहत्रयोद्भवंयंत्रंकथंकार्यंमहेश्वर। तन्मेवदस्वरूपायायद्यहंतववल्लभा। ई
श्वरउवाच॥ ॥ नागादशसुवर्णस्यरजतस्यचषोडश॥ ताम्रस्यरविभागेनपीठंकुर्यान्मनोहरं। तस्मान्मीहे
तुनिर्माणंश्रीचक्रस्यतुकारयेत्॥ शांतिदंपुष्टिदंशोकंसर्वशत्रुनिवारणं॥ आयुरारोग्यजनकंकांतिदंपुष्टि
दंमतंमिति॥ अथचक्रस्यप्रस्तारभेदेनत्रैविध्यंचतत्रैव। त्रैविध्यंतुश्रीचक्रस्यभूप्रस्तारोर्ध्वमेरुकं॥ पाता

लवासिनांदेविप्रस्तारोनिम्नरेखकः। ऊर्ध्वरेखंमहेशानिमर्त्यलोकनिवासिनां। स्वर्गलोकाधिवासानांयंत्रराज
ड्मेरुसंज्ञकः। मधुरंतुसमारभ्यवैंदवांतंमहेश्वरि। क्रमात्समुन्नतंसर्वंमेरुरूपमयोदितं॥ समोर्ध्वरेखंनव
कूर्मर्ध्वरेखंप्रकीर्तितं। निम्नरेखोसमायोगाद्भूप्रस्तारोमयोदितः॥ यंत्रराजस्वरूपंतेमयास्नेहात्प्रकाशितं
त्र ॥ गोपितव्यंमयाभद्रेस्वगुह्यमिवसंततमिति। अथैतत्प्रस्तारस्यफलानिप्रस्तारांतरंचतंत्रराजे। चतुरस्रंसमार
भ्यनवचक्राण्यनुक्रमात्। उन्नतोन्नतमामध्याच्चक्रंस्यात्रिधनंधनं। त्रिक्रमादुन्नतंतदब्जत्वंश्रियंलभेत्॥
एकद्विषट्क्रमोच्चांमध्येयैंकीर्मंचकल्प्यते॥ नवानिसमरूपाणिसर्वाभीष्टार्थसिद्धये॥ तथाकुलमूलावतारे।
उद्धितंक्रमणेदेविविचित्रंप्राप्तिस्कतोमतिः। कृत्वचक्रंषोडशारंचाप्यष्टारंचसमेभवेत्। मुपश्रान्तमीशानिचा
प्रीप्सुप्रजदंभवेत्॥ चतुरस्रंसमंदेविषोडशारादिबिंदुकं। मिथ्यसमुन्नतंदेविश्रियेकीर्मंचकल्प्यते। च
तुरस्रसमारभ्याबिंदुंतंसमरेखकं। तथाश्रीकीर्तिआरोग्यममरतायोपकल्प्यतेइति। अथश्रीचक्राधिकरणे
निषिद्धधातूनप्यानिनिषिद्धाधिकरणानिचाह॥ तंचराजे। सीसकांस्यादिषुपुनःस्त्रर्वोऽप्यविपरीतफलत्॥

सौ॰र॰क॰ फलकायां परे भित्तौ स्थापयेन्न कदाचन। स्थापितं यदि मोहेन लोभेनाज्ञानतोपि वा। कुलं वित्तमपत्यं च निर्मूलय
ति सर्वथेति। तथा ज्ञानसागरे। वंगे व्यसीसके लोहेन कर्त्तव्यं तु कदाचनेति। श्रीचक्रस्य पीठमानं द्रव्यप्रमाणं
चाह। कुलमल्लावतारे। अग्निरंगुलविस्तारं प्राकृप्रस्फुरदृशिलोत्तरं पञ्चप्रमाणं कर्त्तव्यमर्चापीठमनोहरं। य
वार्द्धं च प्रकुर्वीत चतुरस्रं समंततः। तस्मिन्पीठे च निर्माणं श्रीचक्रस्य तु कारयेत्। सौत्रामणितंत्रे। कृजुरेखा
भवेत्तस्मीवं करे रवादरिजता। अग्निरंगुलविस्तारो यवार्द्धो नोच्छ्रि निर्भवेदिति। ज्ञानसागरे। अग्निरंगुल
देमस्परजतस्पलथैव च। ताम्रस्पर्वमं रथैव मालिका दौयथेच्छया। अग्निरंगुलविस्तारमिति दिव्यत्वात्॥
अंगुलविस्तारायामिन र्थः। पलं विंशतु त्ररत्रिंशत्तैगुंजा परिमितं च आदिपदेन पुष्पनीलादयोरत्नविशेषाग्र
ह्यंते। अंगुलविस्तारस्तु मानांतरांगुलमानेन। वेदिकापीठशिखिकारथादीनां विधिः पुनः मानांतरांगुले
नैव भवेन्नान्येन केनचिदिति महाकपिलपंचरात्रवचनात्। श्रीचक्राधिकरणस्य पीठशब्दवाच्यत्वात्। पी
ठत्राष्ट प्रतिपादकानि वचनानि तु प्रागेव लिखितानि। मानांतरांगुललक्षणं कपिलपंचरात्र एव। विन्य

४

सैत्तिर्यगष्टाभिर्यवैर्मानांतरांगुलं। शालिभिर्वा कृजुन्यस्तैस्त्रिभिर्मानांतरं भवेदिति। अथैतत्स्थापनप्रकारः॥
तत्रैव तंत्रराजे सौभाग्यस्य दुग्धैः प्रथमं नारिकेलांभसा ततः। अभिषिंच्याथ तोयेन क्वाथितेनाष्टरोषधैः। आवा
ह्याभ्यर्च्य तत्रैव चक्रे संस्थाप्य पूजयेत्। नित्यातत्वाति कालो हि विद्यया भ्यर्च्यताः क्रमात्। स्वशक्त्या जपेत्करा
ग्रेण श्रीचक्रं पूजयेदपि एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत्। गंधैः पुष्पैर्मैर्वैधूपैर्दीपैर्नैवेद्यतर्पणैः॥
त्रिरात्रं पूजयेद्देवी योगिनी योगिभिः समं। एवं देवि प्रतिष्ठायां क्रमः सान्निध्यकारकः इति। अथैतत्प्रयोगः॥ त
त्र यथोक्तमानेन निर्मितं च चक्रं स्वर्णादिधातुनिर्मितं चेदम्लरसेन सुष्ठु प्रक्षालितं वेदोक्तविधिना कृतास्तुता
रणं शुचि स्थाने संस्थाप्य तत्रायेदी साधक रणे वक्ष्यमाणे शुभमासे पक्षतिथिवारयोगकरणमुहूर्ते
विशिष्टे साधकस्य चंद्रताराद्यनुकूले दिवसे स्थिरलग्ने मध्याज्य दुग्धनारिकेलजलैः पृथक् पृथक् अभि
षिच्य पुनः सुगंधसलिलेनाप्यभिषिच्य पंचाशदष्टरोषधिक्वाथजलेनाप्यभिषिच्य पुनः सुगंधसलिलैः
प्रक्षाल्य पूर्ववत्द्वारपूजादिपीठपूजां तं कृत्वा तस्मिन्पीठे तच्चक्रे संस्थाप्य तथैव पीठमंत्रोक्तं संपूज्य तस्मिं

स्यांके देवीमावाह्य तद्दिने नित्याविद्यया विद्यात्रितीयकूटेन महान्विद्यया च प्रत्येकं त्रिवारमभ्यर्च्य यथोक्तवि
धिनां गावरणपूजां विधाय पूर्वोक्तषट्त्रिंशदुत्तरसप्तशताधिकविंशतिसहस्रसंख्याभिः कांचनित्या विद्याभि
भिः चक्रं स्पृशन्नभिमंत्र्य पुनः श्रीचक्रपूजाक्रमेण संपूज्य धूपदीपादिना नाविधभक्ष्यभोज्यैर्देवीशक्तिसाम
यिकांश्च संतर्प्य परितोषयेदित्येवं दिनत्रयं महोत्सवं कृत्वा। द्वितीयपाठाद्देवीं विसृज्य शक्तिसामयिकांश्च
चतुर्थदिने नित्यपूजानंतरं तथैव संपूज्य प्रणम्य विसर्जयेत् दिनत्रयं देवीं न विसर्जयेत्। प्रसहं त्रिसंध्यं
क्रमार्चनं कुर्यात्। इति प्रतिष्ठिते चक्रे नित्यार्चनादि कुर्यादिति। मूर्त्तिप्रतिष्ठायामप्येवमेव विधिर्ज्ञेयः। तत्र
स्थिरायां विसर्जनं नास्तीति विशेषः। इति चक्रराजं समुद्धृत्य स्ववामाग्रे वक्ष्यमाणविधिना सर्वभूतवजिंद
त्वावजिस्यानाउन्नरतः। अष्टापदं यस्ततिमल्लराजदंष्ट्राकुरं हाटकपञ्चकूटं। हेमोगमेगी कृतपद्मराग
वंशं च पर्णे शासिमुखारविंदं। सर्वार्थलंकुद्युतिराजमाननेत्रत्रयोशासितपद्मरागं। नीलाश्मदीप्त
विजरोमसंघसीतांशुखंडोज्ज्वलितोत्तमांगं॥२॥ विशाहिकंठवकोत्तमकपिशजटाभारसेचारिगंगा

+ स्फुयोरत्नागवंधक्रमघटितफणाग्रंथिपंचांगुलोद्यत्पुच्छस्य ग्रंथिवाकुण्डलभुजगुरुगयुगोशासिमालाभिरामं॥१॥

भंगाक्रांतोत्तमांगाक्रमगजितपृषत्संघहाराभिरामं कक्षासंवद्धवैश्यादिपयुगलललसच्छुं इतीत्रांशुलील
घंटाटोपाकुलाशादशकपतिकुलैर्वैरिसंवे कपालं॥३॥ पाशाकारांसलोलद्वयवलकुलभवाशीविषाधीशभोग
स्फूर्जत्फूत्कारघोरं खुरपुटनिकरक्षुण्णसर्वमहीतं। भक्ष्यंतं पक्षिरूपं भक्तानां वैरिसंचयं॥ शलभं सात्वरूसंच
ध्यायेदेकाग्रमानसः॥ इति सलभरूपं ध्यात्वा॥ ॐ नमो भगवते शलभशाल्वाय पक्षिराजाय मम शत्रून्नाशय २
घे घे हुं फट् स्वाहा। श्रीशलभरुद्रश्रीपादुकां पूजयामि। शलभस्य वामपार्श्वे शलभसदृशीमेव शालभीं ध्यात्वा॥ ॐ
नमो भगवति शालभि शाल्वि मम शत्रून् त्रासय २ हुं फट् स्वाहा। श्रीशलभीदेवी श्रीपा०। इति सलभमिथुनं संपूज्य चक्र
स्य पूर्वे दिशि। कल्पांतार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयंतं रक्ताक्षं पिंगकेशं रिपुकुलभयदं भीमदंष्ट्रा
ट्टहासं। चक्रं शंखं गदाब्जे पृथुतरमुशलं चापपाशांकुशान्स्वैर्बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावये चक्रसं
ज्ञं। दक्षादूर्ध्वयोराद्येन दाघधस्ययोरन्येन दाघधस्ययोरपरे न दाघधस्ययोरितरेरस्त्रायुधध्यानं॥ इति श्रीसु
दर्शनं ध्यात्वा ॐ सहस्रार हुं फट् श्रीसुदर्शनाय नमः॥ इति संपूज्य दक्षिणस्यां दिशि। शि। सजलघनसमानं भी

सौ॰र॰रू॰ मदं हुं त्रिनेत्रं भुजमैगधरमघोरं रक्तवर्णांगरागं ॥ परशुडमरुखड्गान् खेटकं बाणचापौ त्रिशिखनर
कपाले बिभ्रतं भावयामि ॥ इत्यूर्ध्वयो राधेन दायधस्य योरन्येन दायधस्य योरपरेन दायधस्य योरि
तरेणायुधध्यानं ॥ इत्यघोररुद्ररूपं ध्यात्वा ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतर तनुरूप चट चट प्रचट
कह कह वम वम बंध बंध घातय घातय हुं फट् अघोररुद्राय नमः ॥ इत्यघोररुद्रं संपूज्य ॥ पश्चिमे ॥ सौवर्णां
बुजमध्यगां त्रिनयनां सौदामिनीसंनिभां शंखचक्रवराभयानि दधतीमिंदोः कलां बिभ्रतीं ॥ ग्रैवे
यांगदहारकुंडलधरामाखंडलाद्यैः स्तुतां ध्यायेद्विंध्यनिवासिनीं शशिमुखीं पार्श्वस्थपंचाननां ॥ वामोर्ध्व
करमारभ्य वामाधः करांतमायुधध्यानं ॥ इति दुर्गां ध्यात्वा उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थि
तं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥ श्रीदुर्गायै नम इति संपूज्य स्वदक्षिणभागे गं
धपुष्पादि पूजोपकरणं निधाय ह्रां फट् इति मंत्रेण स्मरन् नाराचमुद्रया दिव्यदृष्ट्या च पुष्पादिकं
विलोक्य वामभागस्थं जलपूर्णकुंभं ओं इति वामहस्तेन स्पृष्ट्वा ह्रौं इति दक्षिणकराग्रेण कुं

भस्थं जलं स्पृष्ट्वा रं इति दीपशिखां स्पृशेत् ॥ ततः करं प्रसार्य वामे ऐं गुरुभ्यो नमः ॥ दक्षिणे गं गणपतये नमः ॥ अ
ग्रे श्रीपरदेवतायै नमः ॥ इति कृतांजलिः प्रणम्य मूर्ध्नि मध्ये हंसं विधाय स्त्रौं हसक्षमलवयरां हसक्षम
लवयरीं स्त्रौं हसक्षमलवयरूं श्रीपरपावकसर्वाराध्य सर्वमूर्त्ति ईं पुरनाथ सर्वगु
लवयरूं हसक्षमलवयरीं स्त्रौं हसक्षमलवयरूं श्रीपरं रीं हसक्षमलवयरूं हसक्षम
रुस्वयं गुरु श्रीगुरुनाथ रहसक्षमलवयरूं स्त्रौं हसक्षमलवयरूं श्रीपरं रीं हसक्षमलवयरूं हसक्षम
लवयरां श्रीशंभुगुरु हस्त्रौं श्री अमुकानंदनाथ श्रीपादुकां पूजयामिति स्वशिरसि श्रीपादुकां विन्यस्य पु
नरन्यैव विधाय गंधाक्षतकुसुमैः संपूज्य गंधादि पंचमुद्राः प्रदर्श्य नमोस्तु गुरवे इत्यादिना नम
स्कारमुद्रया प्रणम्य ओं श्रीं सौः इति करशुद्धिं विधाय सुगंधद्रव्यमर्दनेन करौ सुरभीकृत्य स्त्रैं इति मं
त्रेण सुगंधपुष्पाण्यादाय मर्दयित्वा वामकरेण निर्मुत्या घ्राय ॐ ह्रौं ते सर्वे विलयं यांतु ये मां हिंसं
ति हिंसकाः मृत्युरोगभयक्लेशाः पतंतु रिपुमस्तके इति पठित्वा नाराचमुद्रया तत्पुष्पमुत्तरस्यां दिशि क्षि
पेत् ॥ ततः पुनः करशुद्धिं विधाय करावन्योन्यमर्दनेन संशोध्य मध्यमयोः ॐ नमः अनामिकयोः ॐ नमः

सौ·र·क· कनिष्ठिकयोः ४ सौः नमः अंगुष्ठयोः ४ ऐं नमः तर्जन्योः ४ क्लीं नमः करतलपृष्ठयोः ४ सौः नमः इति विन्यस्य
ऐं क्लीं सौं नमः त्रिपुरसुंदरि मां रक्ष रक्ष इति मंत्रेण मूर्द्धादिपादांतं त्रिव्यापकं विन्यस्य पुनरुच्चार्योर्ध्वाधोर्ध्वता
लत्रयं तर्जन्यंगुष्ठाभ्यां ह्रीं दशदिग्बंधनं त्रिः प्रज्वालाकारयोर्व्यतस्तयोः करयोः स्वमस्तकोपरि तत्त्रिर्भ्रामणे
न वह्निप्राकारत्रयं च कृत्वा मूलविद्यया प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात्। तद्यथा। पादादिजानुप
र्यंतं पृथिवीस्थानं चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्मदैवतं निवृत्तिकलाधिष्ठितं लं बीजयुतं ध्यात्वा
जान्वादिनाभिपर्यंतमपांस्थानमर्द्धचंद्राकारं शुक्लवर्णं शृंगद्वये विपद्मलांछितं विष्णुदैवतं प्रतिष्ठा
कलाधिष्ठितं वं बीजयुक्तं ध्यात्वा नाभ्यादिकंठपर्यंतं त्र्यस्रं वह्निमंडलं स्वस्तिकोपेतं त्रिकोणाकारं रक्तव
र्णं रुद्रदैवतं विद्याकलाधिष्ठितं रं बीजयुक्तं ध्यात्वा कंठादिभ्रूमध्यपर्यंतं वायुमंडलं षट्कोणाकारं
षड्बिंदुलांछितं वृत्तोपेतं धूम्रवर्णं ईश्वरदैवतं शांतिकलाधिष्ठितं यं बीजयुक्तं विचिंत्य भ्रूमध्यादिब्रह्म
रंध्रांतमाकाशस्थानं वृत्ताकारं ध्वजलांछितं स्वच्छवर्णं सदाशिवदैवतं शांत्यतीतकलाधिष्ठितं हं बीजयु

क्तं ध्यात्वा तत्र पंचभूतमये देहे धर्मकंदसमुद्भूतं ज्ञाननालकमैश्वर्याष्टदलोपेतं परं वैराग्यकर्णिकं स्वहृदया
रविंदं विभाव्य तत्कर्णिकायां जीवात्मानमाराध्यमात्रं दीपकलिकाभासुरमनादिमलसंछन्नं परं चिद्रूपं
संचिंत्य च गुरुरूपेण मूलाधारात् कुंडलिनीमुत्थाप्य सुषुम्नावर्त्मना मूलाधारादिनाहतांतचक्रस्थ
वर्णवर्णादिदेवतायसंती हृदयकमलमानीय तया कवलीकृतं जीवात्मानं ध्यात्वा सुषुम्नावर्त्मना विशुद्ध्या^
दिचक्रस्थवर्णादिदेवतायसंती ब्रह्मरंध्रं नीत्वा तत्रस्थितसहस्रदलकमलकर्णिकामध्यवर्तिनि परमा
त्मज्योतिषि सवर्णवर्णदेवताकदेवकं जीवात्मानं हंसः इति मंत्रेण संयोज्य कुंडलिनीं स्वस्थानमानीय
तत्संहारं कुर्यात्। तत्र पृथिवीस्थाने पादेंद्रियगमनक्रियागंतव्यगंधघ्राणपृथिवीब्रह्मनिवृत्तिसमान^
वायून् संस्मृत्य ॐ ह्रां ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने हुं फट् स्वाहा। इति मंत्रेण तान्सर्वान्
कुंडलिनीद्वारा जलरूपांमध्ये संहरेत्। ततोऽपांस्थाने हस्तादानदातव्यरसरसनाजलविष्णुप्रतिष्ठोदानान्सं
चिंत्य ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुं फट् स्वाहा। इति तान्सर्वान्कुंडलिनीद्वारा वह्नितत्वे सं

सौंद्र.क. हरेत्।ततोवह्निस्थानेपायुविसर्जनीयरूपचक्षुर्वह्निरूपविद्याख्यानान्नंस्मृत्वॐहूंरुद्रायतेजोधिपतयेविद्याकला
त्मनेहुंफट्स्वाहाइतिमंत्रेणतान्सर्वान्वायुमंडलेसंहरेत्।ततोवायुस्थानेउपस्थानंदंतद्विषयस्पर्शस्त्वह
स्ववायुमीश्वरंसौशांत्यपानान्नंस्मृत्वॐक्षेंईश्वरायवाय्वधिपतयेशांतिकलात्मनेहुंफट्स्वाहाइतितान्स
र्वानाकाशस्थानेसंहरेत्।ततश्चाकाशस्थानेवाग्वदनवक्तव्यशब्दश्रोत्राकाशसदाशिवशांत्यतीतप्रा
णान्नंस्मृत्व ॐह्रौंसदाशिवायाकाशाधिपतयेशांत्यतीतकलात्मनेहुंफट्स्वाहाइतितान्सर्वान्कुंडलि
न्यांसंहृत्यतांविंदुशक्तौविंदुशक्तिंनादशक्तौनादशक्तिंपरशक्तौक्रमेणसंहृत्यॐह्रींहुंफट्स्वाहाइति।
तांपरशक्तिंएवंक्रिपरमात्मनिसंयोज्यकेवलशरीरेवामकुक्षौपापपुरुषंचिंतयेत्।तद्यथा।वामकुक्षिस्थि
तंपापपुरुषंकज्जलप्रभं।ब्रह्महत्याशिरस्कंधंस्वर्णस्तेयभुजद्वयं।।सुरापानहृदायुक्तंगुरुतल्पकटि
द्वयं।तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं।उपपातकरोमाणंरक्तश्मश्रुविलोचनं।खड्गचर्मधरंक्रुद्धंकु
क्षौपापंविचिंतयेत्।इतिपापपुरुषंविचिंत्यवामनासारंध्रेणयंवीजेनसहवायुमापूर्यनाभिस्थषट्कोणा

कारेवायुमंडलेसंयोज्यतत्रयमितिवायुवीजंधूम्रवर्णंसंचिंत्यकुंभकेनयंवीजमावर्त्तयन्तदुत्थितेन
महावायुनासहपापपुरुषंस्वशरीरंसंशोष्यतेवायुंदक्षिणनासयाविरेच्यपुनर्दक्षिणनाशयारंवीजे
नसहवायुमापूर्यमूलाधारेसंयोज्यतत्रवह्निमंडलेरमितिवह्निवीजंरक्तवर्णंविचिंत्यकुंभकेनरमिति
वीजमावर्त्तयन्तदुत्थितेनमहावह्निनासपापपुरुषंसंदेहंदग्ध्वापापपुरुषभस्मनासहतंवायुंवामना
सयाविरेच्यपुनर्वामनासयावंवीजेनसहवायुमापूर्यब्रह्मरंध्रेसंयोज्यतत्रस्थितविचिंद्रमंडलेवमित्यमृ
श्रावितं तवीजंशुक्लवर्णंसंचिंत्यकुंभकेनवंवीजमावर्त्तयन्तन्निःसृतामृतधारयास्वदेहभस्मसंसिंच्यवायुंदक्षि
णनासयाविरेच्यपुनर्दक्षिणनासयालंवीजेनसहवायुमापूर्यमूलाधारस्यपार्थिवमंडलेसंयोज्यतत्रल
मितिपृथ्वीवीजंपीतवर्णंसंचिंत्यकुंभकेनलंवीजमावर्त्तयन्तदुद्भूतेनतेजसामृतस्रावितंभस्मघनीकृत
तंवायुंवामनासयाविरेच्यपुनर्वामनासयामायावीजेनसहवायुमापूर्यमूलाधारस्यविंदुमध्येमायावी
जंस्फुरत्कालार्कवर्णंसंचिंत्यकुंभकेनमायावीजमावर्त्तयन्तेनकरचरणाद्यवयवसमेतंस्वदेहंनिष्पन्नं।

सौ॰रं॰कृ॰ विभाव्यतं वायुं दक्षिणनासया विरेचयेदिति स्थूलशरीरं निष्पाद्य सूक्ष्मशरीरं निष्पादयेत्। तद्यथा। लंमंत्रेण इ
वीजेन अमृतं चिंतयेत्सुधीः। मंत्रेण चंद्रवीजेन गाजयेदमृतं ततः। चंद्रवीजं मकारः। सोऽहं मंत्रेण पृथ्वीवी
जेन दृढीकरणमुद्दिशेत्। प्रत्येकं षोडशावृत्तिं न चिंतयेद्यत्नपूर्वकं। देहमुत्पादयेद्धस्तान् हृदये तत्त्वमादिशेत्
। तत्र पूर्वोक्तसहस्रारकमलस्थपरमात्मनः सकाशात्सकलजगत्सिसृक्षाविजृंभितपरब्रह्मेच्छारूपि
णीं परशक्तिं ॐ ह्रीं नमः इति परमात्मनः सकाशात्स्वस्थानमानीय ततो नादशक्तिं ततो विंदुशक्तिं प्रणवेन स
ह विंदुशक्तेः सकाशात्सकलजगत्सृष्टिहेतुभूतां कुंडलिनीं प्रणवेन निःसार्य ततः ॐ ह्रौं सदाशिवाय
काशाधिपतये शांत्यतीतकलात्मने नमः इति प्राणशांत्यतीतसदाशिवाकाशश्रोत्रशब्दवक्तृत्ववदनवाचि
आकाशस्थाने स्थापयेत् ततः आकाशमंडलात् ॐ ह्रीं ईश्वराय वाय्वधिपतये शांतिकलात्मने नमः इति मंत्रे
ण पान शांतीश्वरवायुस्त्वक्स्पर्शत्वग्विषयानंदोपस्थान्वायुस्थाने स्थापयेत्। ततः ॐ रुं रुद्राय तेजोऽधिपत
ये विद्याकलात्मने नमः इति मंत्रेण व्यान विद्यारुद्र तेजश्चक्षू रूप विसर्जनीय विसर्ग पायून् अग्निस्थाने स्थाप

येत्। ततः ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने नमः इति मंत्रेण उदान प्रतिष्ठा विष्णु जल रसना रस
दान त्याग आदान हस्तान् पां स्थाने स्थापयेत्। ततः ॐ क्रां ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने नमः इति मंत्रेण
समान निवृत्ति ब्रह्म पृथिवी घ्राण गंध गमन क्रिया पादेंद्रियाणि पृथिवीस्थाने स्थापयेत्। ततः प्रणवे
न कुंडलिनीं स्वस्थाने स्थापयित्वा नादशक्तिं विंदुशक्तिं परशक्तिं च प्रणवेन स्वदेहे व्याप्तिं विभाव्य ब्रह्मरं
ध्रस्थपरमात्मनः सकाशात् कुंडलिन्या जीवात्मानं संहृत वर्णवर्णाधिदेवतासहितमाज्ञादिचक्रेषु तत्तद्
वर्णादिधिदेवताः स्थापयन् हृदयकमलमानीय सोऽहमिति मंत्रेण हृदयकमले जीवात्मानं स्थापयि
त्वा कुंडलिनी सुषुम्नामार्गेण मणिपूरकादिचक्रेषु तत्तद्वर्णवर्णाधिदेवताः स्थापयन् मूलाधारे नीत्वा तत्र तां स्था
पयेत्। ततः स्वशरीरं निरस्तसकलकल्मषं तेजोरूपं देवताराधनयोग्यं विभाव्य प्राणप्रतिष्ठां कुर्यात्। न्या
यथा। शिरसि ब्रह्मविष्णुशिवेभ्यो ऋषिभ्यो नमः। मुखे ऋग्यजुःसामअथर्वछंदोभ्यो नमः। हृदये पराप्राण
शक्त्यै देवतायै नमः। गुह्ये आं बीजाय नमः। पादयोः ह्रीं शक्तये नमः। नाभौ क्रौं कीलकाय नमः। इति विन्य

सौ.र.क. मम प्राणप्रतिष्ठार्थे विनियोगः॥ इति कृतांजलिर्वदेत्॥ ॐ आं ह्रीं क्रौं ईं चं शं ॐ आं ह्रीं क्रौं अं कं ध्य आकाशवाय्वग्नि
सलिलपृथिव्यात्मने आं हृदयाय नमः॥ इं चं शब्दस्पर्शरूपरसगंधात्मने शिरसे स्वाहा॥ ॐ आं ह्रीं क्रौं उं टं श्रोत्र
त्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्॥ ॐ आं ह्रीं क्रौं एं तं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं॥
ॐ आं ह्रीं क्रौं ओं पं वचनादानविसर्गगमनानंदात्मने औं नेत्रत्रयाय वौषट्॥ ॐ आं ह्रीं क्रौं अं यं ष मनोबुद्ध्य
हंकारचित्तात्मने अः अस्त्राय फट्॥ इति मंत्रान् गुह्यादितलांतं विन्यस्य हृदयादि षडंगेषु विन्यसेत्॥ ततो नाभ्या
दिपादहृदयांतं ओं नमः॥ हृदयादिनाभ्यंतं ह्रीं नमः॥ मूर्धादिहृदयांतं क्रौं नमः॥ हृदयकमध्ये यं त्वगात्मने नमः॥ पू
र्वदले रं असृगात्मने नमः॥ पश्चिमदले लं मांसात्मने नमः॥ आग्नेयदले वं मेदात्मने नमः॥ वायव्यदले शं अ
स्थ्यात्मने नमः॥ ईशानदले षं मज्जात्मने नमः॥ नैर्ऋतिदले सं शुक्रात्मने नमः॥ उत्तरदले हं प्राणात्मने नमः॥
दक्षिणदले ळं जीवात्मने नमः॥ पुनः कर्णिकायां क्षं परमात्मने नमः॥ इति न्यसेत्॥ ततो ध्यानं॥ रक्ताब्धि
पोतारुणपद्मसंस्थां पाशांकुशाविक्षुशरासबाणान्॥ शूलं कपालं दधतीं कराब्जैः रक्तां त्रिनेत्रां प्रणमामि

देवी॥ इति ध्यात्वा हृदि हस्तं निधाय ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं हंसः सोहं मम प्राणा इह प्राणा आमित्या
दि मम सर्वेंद्रियाणि आमित्यादि मम वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ इ
ति प्राणप्रतिष्ठामंत्रं त्रिर्जपित्वा निजवपुर्मूर्तिर्मयं ध्यायेदिति प्राणप्रतिष्ठाविधिः॥ श्रीविद्यानंदनाथेन शि
वयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ तरंगोऽगात्तृतीयकः॥ ॥इति श्रीसच्चिदानंदनाथचरणारवि
दद्वंद्वांतेवासिना श्रीविद्यानंदनाथेन विरचिते श्रीसौभाग्यरत्नाकरे तृतीयस्तरंगः॥ ॥अथ मातृकान्यासः॥
सा चात्र विद्यायां शुद्धकलामूर्तिप्रपंचयागभेदाच्चतुर्विधः॥ शुद्धादयोप्यस्यां विद्यायां त्रयोदशविधाः॥ शुद्धो बिंदु
युक्तो विसर्गयुक्तो बिंदुविसर्गयुक्तो हस्खेरवाद्यो लस्म्याद्यः कामबीजाद्यो मायाद्यः श्रीकामबीजाद्यो बाला संपु
टितः परासंपुटितः श्रीविद्यान्वितो हंसादिकः परमहंसादिकश्चेति॥ कलायुक्तो षड्विधः॥ तारोल्लकला
न्यासस्तेनान्वितः षोडशकलामातृकान्यासश्चेति॥ मूर्तिन्यासोपि द्विविधः॥ केशवादिः श्रीकंठादिभेदात्॥ चतु
र्धा प्रपंचयागः॥ तत्रादौ मातृकायाः प्राणायामत्रयं कृत्वा न्यासं समारभेत्॥ तत्र स्वरैः षरकः पंचवर्गैः कु

सौ॰र॰क॰ रकोयादिरिरेचकइतिमातृकाप्राणायामः॥इत्थंप्राणायामत्रयंकृत्वान्यासंकुर्यात्॥तत्रप्रथमंशुद्धमातृ
कान्यासः॥अस्यश्रीशुद्धमातृकान्यासस्यब्रह्माऋषिःगायत्रीछंदःश्रीमातृकासरस्वतीदेवताहलोबी
जानिस्वराःशक्तयःअव्यक्तंकीलकंममश्रीविद्यांगत्वेनन्यासेविनियोगः॥इतिऋष्यादिकंस्मृत्वान्यश्वादिषुविन्य
सेत्।यथाशिरसिब्रह्मणेऋषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदयेश्रीमातृकासरस्वत्यैदेवतायैनमः
गुह्येहल्भ्योबीजेभ्योनमः॥पादयोःस्वरेभ्यःशक्तिभ्योनमः॥नाभौअव्यक्तायकीलकायनमःइतिविन्यस्यममश्री
विद्यांगत्वेनन्यासेविनियोगइतिकृतांजलिर्वदेत्।ततःदक्षकरतलेअंनमःवामेआंनमः॥दक्षकरभेइंनमः॥वामे
ईंनमः॥दक्षकरतले[illegible]।वामेऊंनमः॥दक्षिणांगुष्ठमारभ्यवामांगुष्ठावधिदशस्वंगुलिषुऋकारायोकारांतान्
न्विन्यस्यवामकरभतलदक्षतलेषुऔकारादिविसर्गांतंन्यसेत्।अयंकेवलोन्यासः॥ततोवामकरतलादिद
क्षकरतलांतेविसर्गान्तृकारांतान्स्वरान्न्यसेत्।अयंसंहारन्यासः॥दक्षकरतलादिवामकरतलांदिवा
तंविसर्गान्स्वरान्न्यसेत्।संस्थितिन्यासः॥वामकनिष्ठादितर्जन्यंतमष्टौस्वरान्ऋकारादीन्बिंदुविसर्ग

सहितान्विन्यस्यदक्षकरतलादितर्जन्यंतंकनिष्ठांतंनमकारादिऋकारांतानष्टौस्वरान्बिंदुविसर्गयुक्ता
न्न्यसेत्॥इतिस्थितिन्यासः॥इतिमातृकास्वरान्विन्यस्यतकारादीन्शांतान्वामकनिष्ठामूलादितदंगु
ष्ठाग्रपर्यंतेषुपंचदशस्थानेषुविन्यस्यदक्षांगुष्ठादितत्कनिष्ठायांतेषुकादिङांतान्विन्यस्यकारद्वयेपं
गुष्ठादिकनिष्ठांतंयुगपदेवषादिक्षांतान्पंचवर्णान्व्यापकत्वेनन्यसेदिति।मातृकाक्षरैःकरशुद्धिंवि
धाय॥ॐऐंह्रींश्रींअंकंखंगंघंङंआंहृदयायनमः॥इत्यादिकंअग्रेवर्त्तते।ततःदक्षकरतलेअंनमः
॥दक्षकरपृष्ठेआंनमः॥इंवामे॰ईंदक्षकरभेउंवामेऊंदक्षिणांगुष्ठमारभ्यवामांगुष्ठावधिदशस्वंगुलि
षुऋकारादिविसर्गांतान्विन्यस्यपुनर्वामांगुष्ठा॥दक्षिणांगुष्ठपर्यंतेषुदशस्वंगुलिषुऋकारादिवि
सर्गांतान्दशस्वरान्संहारन्यासविद्न्विन्यस्यपुनर्दक्षिणांगुष्ठादिवामांगुष्ठपर्यंतेषुदशस्वं
गुलिषुऋकारादिविसर्गांतान्विन्यस्यपुनर्दक्षिणांगुष्ठादितत्कनिष्ठिकांतेषुपंचस्वंगुलिषुऋ
कारादिपंचस्वरान्बिंदुविसर्गयुक्तान्विन्यस्यपुनर्वामांगुष्ठादितत्कनिष्ठांतेषुपंचस्वंगुलिषुए

सौ.र.क. कारादिपंचस्वरान्बिंदुविसर्गयुक्तान्विन्यस्य पुनर्दक्षिणांगुष्ठस्य मूलपर्वाग्रस्य वामकनिष्ठाग्रपर्वणीविधिपुटि
शत्स्थानेषु ककारादिशकारांतांस्त्रिंशद्वर्णान् प्रतिपर्व एकैकशो विन्यस्यावशिष्टषकारादिक्षकारांतान्पंच
वर्गान्करद्वयस्यांगुष्ठादिकनिष्ठांतेष्वंगुलिष्वंगुलिद्वयेंगुलिद्वये युगपदेवैकैकमक्षरमिति सबिंदुविस
र्गान्न्यसेदिति मातृकाक्षरैः करशुद्धिं विधाय ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं हृदयाय नमः ॥ इं चं छं जं झं ञं ईं
शिरसे स्वाहा ॥ उं टं ठं डं ढं णं ऊं शिखायै वषट् ॥ एं तं थं दं धं नं ऐं कवचाय हुं ॥ ओं पं फं बं भं मं औं नेत्रत्र-
याय वौषट् अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट् । इति षडंगमंत्रानंगुष्ठादितलांतेकरयोर्विन्यस्य-
हृदयादिषडंगेष्वपि न्यसेत् । तत्र ध्यानं ॥ तत्र प्रथमं सूक्ष्मरूपां ध्यात्वा तन्मातृकान्यसेत् । तद्यथा ॥ व्योमैर्दो दो
रसनालं कर्णिकमध्ये चौर्वद्वैः स्फुरत्केसरं पत्रांतर्गतपंचवर्गयशलार्णादिचिवर्गक्रमात् ॥ आशास्वश्रिषु
लोतलांगलयुजाक्षोणीपुरेणावृतं वर्णाब्जं शिरसि स्थितं विषगदप्रध्वंसि मृत्युंजयं ॥ २ ॥ इति ब्रह्मरंध्रे सहस्रद लकमलो परि
वर्णारविंदं ध्यात्वा ॥ मूलाधारध्वनिं श्रुत्वा प्रबुद्धा शक्तिकुंडली ॥ ज्वलत्पावकसंकाशी सूक्ष्मतेजःस्वरू-

पिणी ॥ मूलाधारास्थिरःपद्मं संस्पृशंती विद्युदाकृतिः ॥ तथा सूक्ष्मशिरःपद्मादमृतौघस्वरूपिणः ॥ २ ॥ निर्गतान्मा
तृकावर्णान्सुषुम्नावर्त्मना नतु । आप्लावयित्वा स्थितान्सर्वानेवं ध्यात्वा प्रविन्यसेत् ॥ ३ ॥ इति सूक्ष्मरूपां ध्यात्वा न्यसे
त् । तत्र विशुद्धौ षोडशदलकमलमूर्ध्वमुखं ध्यात्वा तद्दलेषु प्रागादि प्रादक्षिण्येन ॐ ऐं ह्रीं श्रीं अं नमः । ॐ ऐं ह्रीं
च श्रीं आं नमः । एवं षोडशस्वरान्न्यसेत् । ततो हृदये अनाहतकंदे द्वादशकमले ध्यात्वा ॐ ऐं ह्रीं श्रीं कं नमः । इतिक
कारादिठकारांतान्द्वादशवर्णान् प्रणवचितारादिनमोंतान् प्रादक्षिण्येन न्यसेत् । ततो नाभौ मणिपूरकं च
के दशदलकमले ध्यात्वा तद्दलेषु डकारादिफकारांतान्दशवर्णान्पूर्ववन्न्यसेत् । ततो लिंगमूले स्वाधिष्ठानं च
के षड्दलकमले ध्यात्वा तद्दलेषु प्राग्वद्बकारादिलकारांतान्षोडशवर्णान्न्यसेत् । ततो लिंगाधो मूलाधारे चतुर्द
लकमले ध्यात्वा तद्दलेषु वादींश्चतुरो वर्णान्विन्यसेत् । ततो भ्रूमध्ये आज्ञाचक्रे द्विदलकमले ध्यात्वा तद्दलयोर्द्व
यौ पूर्ववन्न्यसेत् । इत्थमंतर्मातृकान्यासं कृत्वा बहिर्मातृकान्यासं कुर्यात् । तत्र ध्यानं । तद्यथा । पंचाशद्वर्ण-
र्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां ॥ अक्षस्र

सौ॰ र॰ क॰

ह्रुं न चिंतालिखितवरकरांचीरुणांपद्मसंस्थामछाकल्पामतुछस्तनजघनभरां भारतीं तां नमामि॥ दक्षोर्ध्व-
करमारभ्य दक्षाधःकरपर्यंतमायुधध्यानं। चिंतालिखिते पुस्तके। इति प्राग्वत्केवर्णारविंदेध्यात्वान्यसेत्। तत्राद्यौ
सौं अं आं इत्यादिसमस्तमातृकामुच्चार्य सौं॥ नमः इति मूर्धादिपादांतं विव्यापकं विन्यस्य शिरसि। ह्रुं ऐं ह्रीं श्रीं
इत्यादि सर्वत्र। अं नमः॥ मुखवृत्ते आं नमः॥ दक्षनेत्रे इं नमः॥ वामनेत्रे ईं नमः॥ दक्षकर्णे उं नमः॥ वामकर्णे ऊं नमः॥
दक्षनासायां ऋं नमः॥ ॠं। वामनासायां ॠं नमः॥ दक्षकपोले ऌं नमः॥ वामकपोले ॡं नमः॥ ऊर्ध्वोष्ठे एं नमः॥ अ-
धरोष्ठे ऐं नमः॥ ऊर्ध्वदंतपंक्तौ ओं नमः॥ अधोदंतपंक्तौ औं नमः॥ तालुनि अं नमः॥ जिह्वायां अः नमः॥ दक्षबाहुमू-
ले कं नमः॥ दक्षकूर्परे खं नमः॥ दक्षमणिबंधे गं नमः॥ दक्षांगुलिमूले घं नमः॥ दक्षांगुल्यग्रे ङं नमः॥ एवं वामबाहुमू-
लकूर्परमणिबंधांगुलिमूलाग्रेषु चवर्गं न्यसेत्। ततो दक्षिणोरुमूलजानुगुल्फांगुलिमूलाग्रेषु टवर्गं न्यसेत्। त-
तो वामोरुमूलजानुगुल्फांगुलिमूलाग्रेषु तवर्गं न्यसेत्। दक्षवामपार्श्वपृष्ठनाभिजठरेषु पवर्गं न्यसेत्। ततो
हृदयदक्षांसककुद्वामांसेषु यवर्गं न्यसेत्। ततो हृदादिपाणिद्वये हृदादिपादद्वये हृदादिनाभौ हृदादिब्रह्मरंध्रे

सवर्गं न्यसेत्। इति शुद्धमातृकान्यासः॥ अत्र शुद्धत्वेऽपि बिंदुयुक्तत्वं वर्णानां वीर्ययोजनार्थमिति संप्रदायः॥ अथ
बिंदुयुक्तमातृकान्यासः॥ तत्र ऋष्यादिकं प्राग्वत्। ध्याने परं विशेषः॥ तद्यथा। पंचाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां
कंबिंदुयुतां करैरविरतं दधतीं त्रिनेत्रां। अच्छेंदुमौलिमरुणामरविंदवासां वर्णेश्वरीं प्रणमत स्तनभारनम्रां॥ २॥
दक्षाधःकरमारभ्य वामाधःकरपर्यंतमायुधध्यानं। विद्या पुस्तकं टंकः आयुधविशेषः। इति वर्णारविंदे ध्या-
त्वा न्यसेत्॥ तद्यथा। हृदयादिब्रह्मरंध्रपर्यंते क्षं नमः॥ हृदयादिनाभ्यंते लं नमः॥ इत्यादि शिरसि अं नमः॥ इ-
त्यादि संहारक्रमेण तत्र स्थानेषु न्यसेत्। इति बिंदुमातृकान्यासः॥ अथ विसर्गमातृकान्यासः॥ तत्र ऋष्या-
दिध्यानौ तु शुद्धमातृकावदेवान्यासे वर्णेषु विसर्गान्वितत्वं विशेषः॥ इति विसर्गमातृकान्यासः॥ अथ बिंदु-
विसर्गमातृकान्यासः॥ तत्रापि ऋष्यादिकं शुद्धमातृकावदेव। ध्याने परं विशेषः॥ तद्यथा। सिंदूरकांतिम-
मिताभरणां त्रिनेत्रां विद्याक्षसूत्रमृगपोतवरं दधानां। पार्श्वस्थितां भगवतीमपि कांचनाभां ध्यायेत्कराब्ज-
धृतपुस्तकवर्णमालां॥ ३॥ वामाधःकरमारभ्य वामोर्ध्वकरपर्यंतमायुधध्यानं। शिवस्य पार्श्वे तु वामादि

मो॰र॰क॰ करद्वये॥इतिध्यात्वान्यसेत्॥तद्यथा॥दक्षिणांगुष्ठे॥ॐ ऐं ह्रीं श्रीं डं नमः॥अंगुलिमूले ॐ ऐं ह्रीं श्रीं ढं नमः इत्यादि
पूर्ववत्तारादिस्त्रं नमः इत्यंतं पुरुमातृकास्थानेष्वेव विन्यस्य अं नमः इत्यादि ठं नमः इत्यंतं मन्त्रीदिदक्षि
णान्त्यं तं पुरुमातृकास्थानेष्वेव न्यसेदिति स्थितिरूपो बिंदुविसर्गो मातृकान्यासः॥अथ हंसखेरवादि
मातृकान्यासः॥तत्र शक्तिऋषिः गायत्री छंदः हंसखेरवारूपिणी मातृका सरस्वती देवता॥इतिऋष्यादिकं स्मृ
त्वा विन्यस्य ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं ह्रां हृदयाय नमः॥इं चं ईं ह्रीं शिरसे स्वाहा॥उं टं ऊं ह्रूं शिखा
यै वषट्॥एं तं ऐं ह्रैं कवचाय हुं॥ओं पं औं ह्रौं नेत्रत्रयाय वौषट्॥अं यं अः ह्रः अस्त्राय फट्॥इति करषडंग
न्यासः॥ततो ध्यानं॥उद्यत्कोटिदिवाकरप्रतिभटां भ्रंगोरुपीनस्तनीं वक्त्राहेंदुकिरीटहाररशनामंजीरसंशोभि
ता॥विभ्राणां करपंकजैर्जपवटीपाशांकुशौ पुस्तकं दिश्यात्वोजगदीश्वरीत्रिनयना पद्मे निषण्णा सुखं॥१॥
दक्षाधःकरमारभ्य वामाधःकरपर्यंतमायुधध्यानं इति वर्णशविंदे ध्यात्वा॥ॐ ऐं ह्रीं श्रीं ह्रीं अं नमः॥ॐ ऐं ह्रीं श्रीं
श्रीं ह्रौं नमः॥ॐ ऐं ह्रीं श्रीं ह्रीं इं नमः॥ॐ ह्रौं ऐं ह्रीं श्रीं ह्रीं ईं नमः॥एवं सकारांतान्वर्णांन्पुरुमातृकास्थानेषुन्य
श्रो

२५

सेदिति हंसखेरवामातृकान्यासः॥अथ श्रीबीजादिमातृकान्यासः॥तत्र भृगुऋषिः गायत्री छंदः मातृकामयी देवता
लक्ष्मीन्यासे विनियोगः॥इति ऋष्यादिकं स्मृत्वा यथाविधि विन्यस्य अं कं खं गं घं ङं आं श्रीं हृदयाय नमः इत्यादि
षट्दीर्घयुक्तश्रीबीजांतैः षड्भिः करषडंगन्यासं विधाय॥विद्युद्दामसमप्रभां हिमगिरिप्रख्यैश्चतुर्भिर्ग
जैः शुंडादंडसमुद्धृतामृतघटैरासिच्यमानामिमां॥विभ्राणां करपंकजैर्जपवटीपद्मद्वयं पुस्तकं भास्व
त्तत्समुच्चलत्कुचनतां ध्यायेज्जगत्स्वामिनीं॥१॥दक्षाधःकरमारभ्य वामाधःकरपर्यंतमायुधध्यानं॥इतिध्या
त्वा॥श्रीं अं नमः॥श्रीं आं इत्यादि न्यसेत्॥अथ कामबीजादिमातृकान्यासः॥तत्र संमोहनऋषिः गायत्री छंदः
मातृकामयी संमोहिनी देवता न्यासे विनियोगः॥इति विन्यस्य षट्दीर्घयुक्तकामबीजांतैः षड्भिः प्राग्वत्कर
षडंगन्यासं विधाय॥बालार्ककोटिरुचिरां स्फटिकाक्षमालां कोदंडमिक्षुजनितं स्मरचापबाणान्॥विभ्रां
च हस्तकमलैर्दधतीं त्रिनेत्रां ध्यायेत्समस्तजननीं नवचंद्रचूडां॥१॥वामाधःकरमारभ्य दक्षाधःकरपर्यंत
मायुधध्यानं चकारादक्षमालापुस्तकयोर्व्यत्यासः कयोर्बोद्धव्यः॥इतिध्यात्वा॥ॐ ऐं ह्रीं श्रीं क्लीं अं नमः॥क्लीं आं

सौ॰र॰क॰ नमः इत्यादि न्यसेत्। अथ त्रिबीजादिमातृकान्यासः। तत्र महासंमोहन ऋषिः गायत्री छंदः मातृकामयी महा
संमोहिनी देवता न्यासे विनियोगः॥ इति विन्यस्य हृदि रूढत्रिबीजां तैः षड्दीर्घैः स्वरवत्कर षडंगन्यासं विधाय॥
ध्यायेयमक्षवलयेक्षुशरासपाशपद्मद्वयांकुशशरान्नवपुस्तकं च। आबिभ्रतीं निजकरैररुणौ कुचाढ्यां संमो
हिनीं त्रिनयनां नवचंद्रचूडां॥१॥ वामाधःकरमारभ्य दक्षाधःकरपर्यंतमायुधध्यानं। अत्रापि पूर्ववद्व्यत्ययो
बोद्धव्यः। इति ध्यात्वा ॐ ऐं ह्रीं श्रीं ह्रीं श्रीं क्लीं अं नमः॥४ ह्रीं श्रीं क्लीं आं नमः इत्यादि विन्यसेत्। अथ बालासंपुटितमातृ
कान्यासः। तत्र दक्षिणामूर्त्तिः ऋषिः गायत्री छंदः बालारूपिणी मातृका सरस्वती देवता। इति ऋष्यादिकं स्मृत्वा।
विन्यस्य करांगन्यासं कुर्यात्। तद्यथा। ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं ऐं हृदयाय नमः। इं चं छं जं झं ञं ईं क्लीं शिरसे
स्वाहा॥४ उं टं ठं डं ढं णं ऊं सौः शिखायै वषट्॥४ एं तं थं दं धं नं ऐं सौः कवचाय हुं॥४ ओं पं फं बं भं मं औं क्लीं नेत्रत्रया
य वौषट्॥४ अं यं रं लं वं शं षं सं हं ळं क्षं अः ऐं अस्त्राय फट्। इति करांगन्यासं विधाय ध्यानं कुर्यात्। तद्यथा॥ मु
क्ताहारवरेकुंडलांगदमणिग्रैवेयहारोर्मिकां विद्योतद्वलयादिकं कणत्करीस्त्रचां स्फुरन्नूपुरां। माणिक्योद

रबंधुरस्तनभरां भिन्नोरु कलां बिभ्रतीं पाशं सांकुशपुस्तकाक्षवलयान् दक्षोर्ध्वबाह्वादितः॥२॥ पूर्णेंदुप्रतिमप्रस
न्नवदनां नेत्रत्रयोद्भासितां भिंदुक्षीरवलक्षगात्रविलसन्माल्यानुलेपांबरां। पंचाशल्लिपिलंछितां रविलसज्जग
द्वाग्देवता देवतां मुक्ताधारसमुज्ज्वलां भगवतीं वर्णांबुजे चिंतयेत्॥३॥ इति वर्णारविंदे ध्यात्वा न्यसेत्। तद्यथा॥
ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः अं सौः क्लीं ऐं नमः॥४ ऐं क्लीं सौः आं सौः क्लीं ऐं नमः॥४ ऐं क्लीं सौः इं सौः क्लीं ऐं नमः। एवं ह्सका
रांतान् बालासंपुटितान् शुद्धमातृकास्थानेषु न्यसेत्। इति बालासंपुटितमातृकान्यासः। तत्र ब्रह्मा ऋषिः गाय
त्री छंदः परारूपिणी मातृका सरस्वती देवता न्यासे विनियोगः। ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं सां हृदयाय न
मः॥४ इं चं छं जं झं ञं ईं सीं शिरसे स्वाहा॥४ उं टं ठं डं ढं णं ऊं सूं शिखायै वषट्॥४ एं तं थं दं धं नं ऐं सैं कवचाय हुं॥
४ ओं पं फं बं भं मं औं सौं नेत्रत्रयाय वौषट्॥४ अं यं रं लं वं शं षं सं हं ळं क्षं अः सः अस्त्राय फट्। एवं षडंगन्यासं कृ
त्वा ध्यानं कुर्यात्॥ तद्यथा॥ अकलंकशशांकाभा त्र्यक्षा चंद्रकलावती। मुद्रापुस्तकसद्बाहुः पातु मामपरा क
ला। इति वर्णारविंदे ध्यात्वा न्यसेत्। तद्यथा॥ ॐ ऐं ह्रीं श्रीं सौः अं सौः नमः॥४ सौः आं सौः नमः॥४ सौः इं सौः न

सौ.र.क.

मः॥ सौः ईं सौः नमः॥ एवं मातृकास्थानेषु न्यसेत्॥ इति परासंपुटितमातृकान्यासः॥ अथ श्रीविद्यापुटमातृका
न्यासः॥ तत्र दक्षिणामूर्त्तिरृषिः॥ गायत्री छंदः॥ श्रीमातृकासुंदरी देवता॥ इति ऋष्यादिकं सत्वा विन्यस्य
करांगन्यासं कुर्यात्॥ ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं प्रथमकूटमुच्चार्य आं हृदयाय नमः॥ ॐ ऐं ह्रीं श्रीं इं चं छं जं झं
ञं द्वितीयकूटमुच्चार्य ईं शिरसे स्वाहा॥ ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं तृतीयकूटमुच्चार्य ऊं शिखायै वषट्॥ ॐ एं
तं थं दं धं नं प्रथमकूटमुच्चार्य ऐं कवचाय हुं॥ ॐ ओं पं फं बं भं मं द्वितीयकूटमुच्चार्य औं नेत्रत्रयाय वौषट्॥ ॐ
अं यं रं लं वं शं षं सं हं ळं क्षं तृतीयकूटमुच्चार्य अः अस्त्राय फट्॥ ततो ध्यानं॥ आरक्ताभां त्रिनेत्रां मणिमुकुटवतीं
रत्नताटंकरम्यां हस्तांभोजैः सपाशांकुशमदनधनुःसायकैर्विस्फुरंतीं॥ आपीनोत्तुंगवक्षोरुहतटविलु
ठत्तारहारोज्वलांगीं ध्यायेदंभोरुहस्थामरुणनिवसनामीश्वरीमीश्वराणां॥ १॥ वामाद्यूर्ध्वकरयोराद्येन
ताधःस्थयोरन्येरित्यायुधध्यानं॥ इति वर्णशरीरां देवीं ध्यात्वा न्यसेत्॥ तद्यथा॥ ॐ ऐं ह्रीं श्रीं मूलविद्यामुच्चार्य
अं नमः॥ एवं प्रणवत्रितारादि श्रीविद्यादि नमोंतान् आकारादिक्षकारांतान्वर्णान्मातृकास्थानेषु न्यसेत्।

इति श्रीविद्यामातृकान्यासः॥ अथ हंसमातृकान्यासः॥ तत्र ब्रह्मा ऋषिः गायत्री छंदः॥ हरगौरीस्वरूपिणी मा
तृका सरस्वती देवता॥ इति ऋष्यादिकं सत्वा विन्यस्य करांगन्यासं कुर्यात्॥ ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं हां सां
हृदयाय नमः॥ ॐ इं चं छं जं झं ञं ईं हीं सीं शिरसे स्वाहा॥ ॐ उं टं ठं डं ढं णं ऊं हूं सूं शिखायै वषट्॥ ॐ एं तं थं
दं धं नं ऐं हैं सैं कवचाय हुं॥ ॐ ओं पं फं बं भं मं औं हौं सौं नेत्रत्रयाय वौषट्॥ ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः
हः सः अस्त्राय फट्॥ इति विन्यस्य ध्यायेत्॥ तद्यथा॥ उद्यद्भानुस्फुरिततडिदाकारमर्धांबिकेशं पा
शाभीतिवरदपरशुं संदधानं कराब्जैः॥ दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं सौम्याग्नेयवपुर
वतु नश्चंद्रचूडं त्रिनेत्रं॥ १॥ वामोर्ध्वादिदक्षोर्ध्वकरपर्यंतमायुधध्यानं॥ इति ध्यात्वा न्यसेत्॥ ॐ ऐं ह्रीं श्रीं
हंसः अं नमः॥ ॐ हंसः आं नमः॥ एवं क्षांतान्वर्णान्न्यसेत्॥ इति हंसमातृकान्यासः॥ अथ परमहंस
मातृकान्यासः॥ तत्र परमहंस ऋषिः गायत्री छंदः॥ परमात्मस्वरूपिणी मातृका सरस्वती देवता॥
इति ऋष्यादिकं सत्वा विन्यस्य करांगन्यासं कुर्यात्॥ ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं ॐ हृदयाय नमः

ऋ

सौ॰र॰क॰ ॥ ॐ ईं चं छं जं झं ञं ईं ॐ शिरसे स्वाहा ॥ ॐ उं टं ठं डं ढं णं ऊं ॐ शिखायै वषट् ॥ ॐ एं तं थं दं धं नं ऐं ॐ कवचाय हुं

॥ ॐ ओं पं फं बं भं मं औं ॐ नेत्रत्रयाय वौषट् ॥ अं यं रं लं वं शं षं सं हं ळं क्षं अः ॐ अस्त्राय फट् ॥ इति विन

स्य ध्यानं कुर्यात् । तद्यथा ॥ श्रीमत्सरात्ममनुजंमितवर्णरूपं मानैरगम्यपदवीपरिधीयमानो विद्यात्

स्रुत्त्रकलशान् दधतीं चतुर्भिर्ध्यायेत्समस्तजननीं विशदां त्रिनेत्रां ॥१॥ वामाद्यधः करयोराद्येन दाद्यूर्ध्व

योरन्येऽस्त्रायुधध्यानं । मुद्राज्ञानमुद्रा इति ध्यात्वा न्यसेत् । तद्यथा ॥ ॐ ऐं ह्रीं श्रीं सोऽहं हंसः नमः ॥ सोऽहं अं

नमः । एवं अकारांतान्वर्णान्सर्वसंहाररीत्या न्यसेत् ॥ इति परमहंसमातृकान्यासः ॥ इति चतुर्दशवि

धमातृकान्यासः ॥ अथ प्रणवोत्थकलामातृकान्यासः ॥ तत्र प्रजापतिरृषिः ॥ गायत्री छंदः ॥ कलामयी

मः ॥ त्रिकोणस्याग्रकोणे ४ प्रथमकूटमुच्चार्य अग्निचक्रे कामगिरिपीठे मित्रीशनाथात्मिके जाग्रद्दशा
धिष्ठायके इच्छाशक्त्यात्मकरुद्रात्मशक्तिः श्री कामेश्वरी देव्यै नमः ॥ त्रिकोणस्य वामकोणे ४ द्वितीय
कूटमुच्चार्य सूर्यचक्रे जालंधरपीठे षष्ठीशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्ण्वा
त्मशक्तिः श्री वज्रेश्वरी देव्यै नमः ॥ दक्षकोणे ४ तृतीयकूटमुच्चार्य सोमचक्रे पूर्णगिरिपीठे उड्डीश
नाथात्मिके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मशक्तिः श्री भगमालिनी देव्यै नमः ॥
इति विन्यस्य हृदये ४ ह्स्रैं ह्स्क्लीं ह्स्रौः त्रिपुराम्बिकाचक्रेश्वर्यै नमः ॥ तस्याः दक्षिणे ४ इच्छासिद्ध्यै नमः ॥
वामे ॥ ४ ह्स्रौः बीजमुद्रायै नमः ॥ इति विन्यस्य ४ एताः परापररहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे
समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः संतु नम इति व्यापकं कु त्रिवा॰
र्यात् इत्यष्टमावरणन्यासः ॥ ततः तुरीयविद्यामुच्चार्य सर्वानंदमयचक्राय नम इति व्यापकं विन्य

स्य हृदयत्रिकोणमध्यस्य बिंदुमध्ये ४ तुरीयविद्यामुच्चार्य ब्रह्मचक्रे उड्याणपीठे श्री चर्यानाथात्मके
तुर्यतुर्यातीतदशाधिष्ठायके परब्रह्मात्मशक्तिः श्री महात्रिपुरसुंदर्यै देव्यै नमः ॥ हृदय एव मूलमंत्र
मुच्चार्य श्री महात्रिपुरसुंदरी चक्रेश्वर्यै नमः ॥ तस्याः दक्षिणे ४ प्राप्तिसिद्ध्यै नमः ॥ वामे ऐं योनिमुद्रा
यै नमः ॥ इति विन्यस्य ४ एताः परापररहस्ययोगिन्यः सर्वानंदमये महाचक्रे परब्रह्मस्वरूपिणी परा
मृतशक्तिः सर्वमंत्रेश्वरी सर्वविद्येश्वरी सर्वपीठेश्वरी सर्ववीरेश्वरी सर्वयोगेश्वरी सर्ववागीश्व
री सर्वसिद्धेश्वरी सकलजगदुत्पत्तिमातृका सचक्रा सदेवता समुद्रा ससिद्धिः सायुधा सासना सवा
हना सपरिवारा साङ्गेकाराः सर्वोपचारैः श्री महात्रिपुरसुंदरी परया चापरया परापरया च सपर्य
या पूजिता अस्तु नमः ॥ इति व्यापकं विन्यस्य पुनर्हृदय एव मूलमुच्चार्य समस्तचक्रेश्वरी श्री महात्रिपु
रसुंदर्यै देव्यै नमः ॥ तस्याः दक्षिणे ४ सर्वकामसिद्ध्यै नमः ॥ वामे ४ ह्सैं ह्स्क्लीं ह्सौः त्रिखंडामुद्रायै नमः
॥ इति हृदय एव विन्यस्य हृदयत्रिकोण एव वाग्यादि वामावर्तेन प्रणव त्रितारादि चतुर्थी नमोंतेन न्य

सौ॰र॰क॰

त्रिपुरानाम्नीं ततस्तन्नित्याविद्यया नित्याषोडशकं विन्यस्य हृदयत्रिकोणस्य पृष्ठभागे रेखात्रयं विभाव्य
तत्र पूर्वाप्रकारेणैव वक्ष्यमाणगुरुपंक्तित्रयं न्यसेत्। ततो हृदयत्रिकोणस्यास्य कोणस्य च चांतराले
पुष्पाप्रकारेणैव वक्ष्यमाणप्रकारेण षडंगयुवतीर्विन्यस्य बिंदुचक्रमध्ये वक्ष्यमाणप्रकारेण पंचपं
चकदेवताविन्यस्य द्रांसरष्टतत्कर्णपृष्ठे तत्क्लेशवतत्राजनंदरिनाम्ना पुटचिबुकहृदयावधि च षड्
दर्शनदेवताविन्यस्य बिंदुचक्र एव वक्ष्यमाणप्रकारेण चतुःसमयदेवताविन्यस्य तुरीयविद्यायाः सर्वां
गव्यापकं विन्यस्य ततो मूलविद्यामुच्चार्य महोग्राणपीठनिलय सर्वचक्रेश्वरी आनंदचर्या पंचकोश
पंचकल्पलता पंचकामदुघा पंचरत्नवृंदमंडितासनसंस्थित सर्वदर्शनसेवित षडंगयुवतीस्तुत
चतुःसमयदेवतापूजित महासौभाग्यजनन महामोक्षप्रद मन्मथान्यविवर्जित शक्तिसच्चिदा
नंदपरब्रह्मश्रीमन्महात्रिपुरसुंदरी श्रीपादुकायै नमः इति मूर्धादिपादपर्यंतं च व्यापकं न्यसेत्।
ततो ब्रह्मरंध्रे स्वगुरुपादुकां विन्यस्य मूलाधारे स्वगुरुकृतस्वनाम विन्यस्य तत्रैव महाकामकला।

ध्याने कुर्यात्॥ इति संहाराख्यश्रीचक्रन्यासः॥ अथ महाश्रीचक्रन्यासः॥ तत्र शिरसि त्रिकोणं विभाव्य ॐ ऐं
ह्रीं श्रीं तुरीयविद्यामुच्चार्य सर्वानंदमयचक्राय नमः इति व्यापकं विन्यस्य तत्र शिरस्त्रिकोणस्य महाबिं
दौ तुरीयविद्यामुच्चार्य ब्रह्मचक्रे महोग्रानपीठे इत्यादि पूर्ववद्विन्यस्य तन्मध्ये मूलविद्यामुच्चार्य शाम्भवशाम्भ
व चक्रेश्वरी विन्यस्य तद्दक्षिणवामपार्श्वयोः शांतिसिद्धिं सर्वकामसिद्धिं योनिमुद्रां चिरवंडमुद्रां च शाम्भ
न्यस्य ॐ ऐं ह्रीं श्रीं ऌनाः परापरातिरहस्ययोगिन्यः सर्वानंदमये महाचक्रे इत्यादि पूर्ववत् व्यापकं विन्यसेत्॥
इति बिंदुचक्रन्यासः॥ ततः शिरस्त्रिकोणपृष्ठभागे रेखात्रयं विभाव्य तत्र पूर्वाप्रकारेणैव वक्ष्यमाणगुरुपं
क्तित्रयं न्यसेत्। ततो मातृकायाः षोडशस्वरन्यासस्थानेषु प्रणवत्रितारादिचतुर्थीनमोंतं तत्र त्रिपुरा
नाम्नीं तया तत्र नित्याविद्यया नित्याषोडशकं विन्यस्य ध ह्सैं हस्क्लीं ह्सौः सर्वसिद्धिप्रदचक्राय नमः इति
व्यापकं विन्यस्य त्रिकोणस्य कोणयोरंतराले चतुष्षष्ट्यायुधदेवता न्यसेत्॥ तद्यथा॥ दर्शन
लत्रेभ डोडीक्लीं ह्सः नेनने मः कामेश्वरबाणेभ्यो नमः। वाम भ्रुवि नेत्रे भ यां री लोवो सो अं मनेमः का

सौ॰र॰क॰ मेश्वरबाणेभ्योनमः॥दक्षस्तनुविधंमोहनायकामेश्वरचापायनमः॥वामस्तनुविधंमोहनायका-
मेश्वरीचापायनमः॥दक्षकर्णेधंआंवशीकरणायकामेश्वरपाशायनमः॥वामकर्णेधंह्रींवशी
करणायकामेश्वरीपाशायनमः॥दक्षनासायांधंक्रोंस्तंभनायकामेश्वरांकुशायनमः॥वामनासा
यांधंक्रोंस्तंभनायकामेश्वर्यंकुशायनमः॥इत्यायुधदेवताविन्यस्यत्रिकोणस्यकोणत्रयपूर्वोक्त
कामेश्वर्यादिदेवीत्रयंप्राग्वद्विन्यस्य॥हृदयेप्राग्वत्त्रिपुरांबिकांचक्रेश्वरींविन्यस्यतद्दक्षिणवामयो
र्महिमासिद्धिंवीजमुद्रांचविन्यस्यधएताःपरापररहस्ययोगिन्यःसर्वसिद्धिप्रदेचक्रेसमुद्राइत्यादिव्या
पकंकुर्यात्॥ततःह्रींश्रींसौःसर्वरोगहरचक्रायनमइतिव्यापकंविन्यस्यशिरःपुरोभागमारभ्यमु
द्रमाजाक्रमेणप्रादक्षिण्येनाष्टसुस्थानेषुपूर्वोक्तंवशिन्यादिवाग्देवताष्टकंविन्यस्यमणिपूरकच
क्रेपूर्वोक्तं॥त्रिपुरासिद्धांचक्रेश्वरींविन्यस्यतद्दक्षिणवामयोर्भुक्तिसिद्धिंखेचरीमुद्रांचविन्यस्य
धएताःरहस्ययोगिन्यःसर्वरोगहरेचक्रेसमुद्राइत्यादिव्यापकंन्यसेत्॥ततःह्रींक्लींब्लेंसर्वरक्षाक

रचक्रायनमः॥इतिव्यापकंविन्यस्यदक्षनेत्रेत्रैमलतदपांगदक्षश्रोत्रतत्पृष्ठवंशगुह्यपस्थदक्षपार्श्ववाम
पार्श्ववामश्रोत्रपृष्ठवामश्रोत्रवामापांगवामनेत्रैमलेषुदशसुस्थानेषुप्रागुक्तसर्वज्ञादिदशश-
क्तिर्विन्यस्याधिष्ठानेचक्रेपूर्वोक्तांत्रिपुरमालिनींचक्रेश्वरींविन्यस्यतद्दक्षिणवामयोःप्राकाम्य
सिद्धिंमहांकुशामुद्रांचप्राग्वद्विन्यस्यधएताःनिगर्भयोगिन्यःसर्वरक्षाकरेचक्रेसमुद्राइत्यादिव्या
पकंन्यसेत्॥ततःह्सैंह्स्क्लींह्सौःसर्वार्थसाधकचक्रायनमः॥इतिव्यापकंविन्यस्यकंठेविशुद्धिच
क्रेषोडशदलेषुएकस्मिन्दलत्रयेपुनरेकस्मिन्पुनर्दलत्रयेपुनरेकस्मिन्पुनर्दलत्रयेपुनरे
कस्मिन्इत्येवंक्रमेणशास्त्रमीशक्तिपर्यंतविन्यस्यावशिष्टदलत्रयेशेषशक्तित्रयंन्यसेदितिप्राद
क्षिण्येनसर्वसिद्धिप्रदादिदशशक्तीर्विन्यस्यमूलाधारेत्रिपुराश्रीचक्रेश्वरींप्राग्वद्विन्यस्यदक्षि
णवामयोर्वशित्वसिद्धिमुन्मादिनीमुद्रांचप्राग्वद्विन्यस्यधएताःकुलकौलयोगिन्यःसर्वार्थसाध
केचक्रेसमुद्राइत्यादिव्यापकंन्यसेत्॥ततःहैंह्क्लींह्सौःसर्वसौभाग्यदायकचक्रायनमः॥इति

सौ॰र॰क॰

व्यापकं विन्यस्य हृदये अनाहतचक्रे द्वादशदलकमले द्वादशदलेषु सर्वसंक्षोभिण्यादि द्वादश शक्तीर्विन्य-
स्य तन्मध्ये दलद्वये प्रतिदले शक्तिद्वयं शक्तिद्वयमिति शिष्टशक्तिचतुष्टयेन्यसेदिति चतुर्दश शक्तीर्वि-
न्यसेत् हृदये ऐं क्लीं सौः त्रिपुरवासिनी चक्रेश्वरीं आवहिन्यस्य तद्दक्षवामयोरीशित्वसिद्धिं वश्यमुद्रां च
वाग्वह्निन्यस्य एताः संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राः स्यादि व्यापकं न्यसेत्
ततः ह्रीं क्लीं सौः सर्वसंक्षोभणचक्रायनमः॥ इति व्यापकं विन्यस्य पृष्ठवंशवामपार्श्वोदरदक्षिण-
वामपार्श्वेषु चतुर्षु स्थानेषु ऐं क्लीं अनंगकुसुमाद्याश्चतुःशक्तीर्विन्यस्य पृष्ठवामपार्श्वयोर्मध्ये
वामपार्श्वयोर्मध्ये उदरदक्षिणपार्श्वयोर्मध्ये दक्षिणपार्श्वपृष्ठवंशयोर्मध्ये च स्थानचतुष्टये अ-
नंगरेखादि चतुः शक्तीर्विन्यस्य जानुद्वये ऐं क्लीं त्रिपुरसुंदरीचक्रेश्वरीं पूर्ववद्विन्यस्य तद्द-
क्षिणवामपार्श्वयोर्महिमासिद्धिं आकर्षिणीमुद्रां च विन्यस्य एताः गुप्ततरयोगिन्यः सर्वसंक्षो-
भकारके चक्रे समुद्राः स्यादि व्यापकं न्यसेत् ततः ऐं क्लीं सौः सर्वाशापरिपूरकचक्रायनमः॥

५५

इति व्यापकं विन्यस्य स्वाधिष्ठाने षड्दलकमले स्वाग्रादि प्रादक्षिण्येन पंचसु दलेषु प्रतिदले शक्तिद्व-
यं मेतिमदले त्वेकां शक्तिमिति कामाकर्षिण्यादि षोडश शक्तीर्विन्यस्य जंघयोः ऐं क्लीं त्रिपुरेश्वरीं
विन्यस्य तद्दक्षिणवामयोर्लघिमासिद्धिं द्राविणीमुद्रां च विन्यस्य एता गुप्तयोगिन्यः सर्वाशाप-
रिपूरके चक्रे समुद्राः स्यादि व्यापकं न्यसेत्॥ ततः ऐं अं आं सौः त्रैलोक्यमोहनचक्रायनमः इति
व्यापकं विन्यस्य अंतश्चतुरस्ररेखायै नमः इति व्यापकं विन्यस्य मूलाधारे चतुर्दलकमलस्य
दलचतुष्टये तदंतरालचतुष्टये पूर्वदलेशानांतरालयोर्मध्ये पश्चिमदलनैरृत्यंतरालयोर्म-
ध्ये च ऐं क्लीं संक्षोभिण्यादि दशमुद्राः क्रमेण न्यसेत्॥ ततः मध्यचतुरस्ररेखायै नमः॥ इति व्या-
पकं विन्यस्य दक्षिणजंघायाः पश्चिमादि चतुर्दिक्षु वायव्यादि चतुष्कोणेषु प्रादक्षिण्ये-
न ब्राह्म्याद्यष्टौ विन्यसेत्॥ ततः बाह्यचतुरस्ररेखायै नमः इति व्यापकं विन्यस्य वामजं-
घायां दिग्विदिक्क्रमेण अणिमादिसिद्ध्यष्टकं विन्यस्य दक्षपादे प्राप्तिसिद्धिं वामपादे सर्वका

मसिद्धिं च बिम्बस्य पादद्वये प्राग्वत्त्रिपुरा चक्रेश्वरीं बिम्बस्य तद्दक्षिणवामयोरणिमासिद्धिं सर्वसं
क्षोभिणीमुद्रां च बिम्बस्य एताः चक्रयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्रा इत्यादि व्यापकं बिम
स्य सर्वस्मिंश्चक्रे श्रीमहात्रिपुरसुंदर्यभेदेन स्वात्मानं ध्यायेदिति। सृष्टिन्यासचक्रन्यासः॥ अथ स्थिति
श्रीचक्रन्यासः सर्वविद्याचक्रचक्रेश्वरीसंगत्रयात्मकः॥ तत्र प्रथमं संप्रदायात्सर्वं वत्करस्तु
द्धिं विधाय तथैतां बिम्बस्य तथैवात्मशरीरे कृत्वा न्यासं समारभेत्॥ तत्रादौ विद्यान्यासः॥ स यथा॥ मूर्ध्नि
प्रथमं कूटं नमः॥ मुखे द्वितीयकूटं नमः॥ हृदये तृतीयकूटं नमः॥ दक्षनेत्रे प्रथमकूटं न
मः॥ वामे द्वितीयकूटं नमः॥ भाले तृतीयकूटं नमः॥ दक्षकर्णे प्रथमकूटं नमः॥ वामे द्विती
यकूटं नमः॥ मुखे तृतीयकूटं नमः॥ दक्षांसे प्रथमकूटं नमः॥ वामांसे द्वितीयकूटं नमः॥ पृष्ठे
तृतीयकूटं नमः॥ दक्षजानुनि प्रथमं नमः॥ वामे द्वितीयं नमः॥ नाभौ तृतीयं नमः॥ पादयोः
अं आं सौः नमः॥ जंघयोः ऐं क्लीं सौः नमः॥ जान्वोः ह्रीं क्लीं सौः नमः॥ ऊर्वोः हैं हक्लीं हसौः नमः॥

स्फिचोः हैं हक्लीं हसौः नमः॥ लिंगाग्रे ह्रीं क्लीं ब्लें नमः॥ मूलाधारे ह्रीं श्रीं सौः नमः॥ इति मन्त्रीं विद्यां बि
म्बस्य तत्स्थाने हसैं हस्क्लीं हसौः नमः॥ इमां वाहनीविद्यां बिम्बस्य मूलविद्यायां मूर्ध्नादि पादांतं पादादि
हृदयांतं व्यापकं न्यसेत्॥ ततो मूलाधारोर्ध्वः स्थितोर्ध्वमुखरक्तसहस्रदलकमलकर्णि
कायां अं आं सौः त्रैलोक्यमोहनचक्राय नमः॥ मूलाधारे ऐं क्लीं सौः सर्वाशापरिपूरक
चक्रासनाय नमः॥ स्वाधिष्ठाने ह्रीं क्लीं सौः सर्वसंक्षोभणचक्राय नमः॥ मणिपूरे हैं हक्लीं
हसौः सर्वसौभाग्यदायकचक्राय नमः॥ अनाहते हसैं हस्क्लीं हसौः सर्वार्थसाधकचक्राय नमः
विशुद्धिचक्रे ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्राय नमः॥ लंबिकाग्रे ह्रीं श्रीं सौः सर्वरोगहरचक्रा
य नमः॥ आज्ञायां हसैं हस्क्लीं हसौः सर्वसिद्धिप्रदचक्राय नमः॥ बिंदौ मूलदेशे पंचदशाक्ष
रे मुख्यार्थसर्वानंदमयचक्राय नमः॥ इति नवचक्राणि बिम्बस्य नवचक्रेश्वरीस्तासु कुर्यात्
॥ तत्र मूलाधाराधः प्रथमस्तत्र त्रैलोक्यमोहनचक्रे अं आं सौः त्रिपुराचक्रेश्वर्यै नमः॥ मूला

धारस्य सर्वाशापरिपूरकचक्रे ऐं क्लीं सौः त्रिपुरेश्वरीचक्रेश्वर्यै नमः॥ स्वाधिष्ठानस्थित सर्वसंक्षो
भणचक्रे ह्रीं क्लीं स्रौंः त्रिपुरसुंदरीचक्रेश्वर्यै नमः॥ मणिपूरस्थित सर्वसौभाग्यदायकचक्रे
हैं ह्क्लीं ह्सौः त्रिपुरवासिनीचक्रेश्वर्यै नमः॥ अनाहतस्य सर्वार्थसाधकेचक्रे ह्सैं ह्स्क्लीं ह्सौः
त्रिपुराश्रीचक्रेश्वर्यै नमः॥ विशुद्धिस्थिति सर्वरक्षाकरेचक्रे ह्रीं क्लीं ब्लें त्रिपुरमालिनिचक्रेश्वर्यै न-
मः॥ लंबिकाग्रस्य सर्वरोगहरेचक्रे ह्रीं श्रीं सौः त्रिपुरासिद्धाचक्रेश्वर्यै नमः॥ आज्ञाचक्रस्य सर्व-
सिद्धिप्रदचक्रे ह्स्रैं ह्स्क्लीं ह्स्रौः त्रिपुरांबिकाचक्रेश्वर्यै नमः॥ महाबिंदुस्थबिंदुचक्रे मूलपंचदशा-
क्षरी मुद्राय महात्रिपुरसुंदरी महाचक्रेश्वरी श्रीपादुकायै नमः॥ इति विन्यस्य। तत्र चक्रे परस्प-
रसंलग्नं तत्र चक्रेश्वर्यधिष्ठितं सम्यग्ध्यात्वा पुनः करशुद्धिं विधाय विन्यस्य वाग्भवं मूलाधारे
कामराजं हृदये तृतीयं भ्रूमध्ये तुरीयविद्यां ब्रह्मरंध्रे च विन्यस्य धसमस्तशकटगुप्तगुप्ततर
संप्रदायकुलकौलिनिगर्भरहस्यपरापररहस्यपरापरातिरहस्य श्रीचक्रयोगिनी श्रीपादुभ्-
केभ्यो नम इति स्वसरीरं श्रीचक्ररूपं ध्यायन् व्यापकं कुर्यात्॥ इति स्थितिश्रीचक्रन्यासः॥

अथ श्रीचक्रन्यासफलं। तत्र रुद्रयामले। य एवं विन्यसेद्देहे साधकः स्थिरमानसः॥ समुच्चमानुषं भावं स सद्यः
शिवतां व्रजेत्॥ त्रिकालं धारयेद्यस्तु तस्य सर्वांगसंततं। ससंतं भासते देवि समस्तयोगिनीपदं॥२॥ भू-
तप्रेतपिशाचाद्यैर्वीक्षितुं नैव शक्यते। सिद्धवज्ज्वरते जोके तापत्रयविवर्जितः॥ तापत्रयो गिन्धरो न्य
स्तस्तस्मादारम्य सर्वतः। धरणीं क्षेत्रतां याति यावद्द्वादशयोजनं॥४॥ एतत्ते कथितं भद्रे न्यासं सर्वे लोक-
दुर्लभं। शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत्॥५॥ खलेभ्यः साधकेभ्यो वा बांधवेभ्यो न दर्शये-
त्। दत्ते चेत्सिद्धिहानिः स्यादित्याज्ञा शांकरी मता॥६॥ मंत्राः पराङ्मुखा यांति क्रुद्धा भवति सुंदरी॥ अ-
गुप्ते च भवेत्तस्मात्सर्वेन गोपयेत्॥७॥ इति त्रिविधश्रीचक्रन्यासः॥ श्रीविद्यानंदनाथेन शिवयोः प्रि-
यसूनुना॥ कृते सौभाग्यरत्नाब्धौ तरंगो सप्तमो गमत्॥ ॥इति श्रीसच्चिदानंदनाथचरणारविंदद्वंद्व-
सेवासिनाम्नी श्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे सप्तमस्तरंगः॥७॥ अथ करशुद्ध्यादि-
न्यासः॥ तत्र प्रथमं प्राग्युक्तप्रथमचक्रेश्वरीविद्यया प्राग्वत्करयोः स्थितिक्रमेण मध्यमादितर्जनी

सौ.र.क.

तेविमस्यासनन्यासं कुर्यात्॥ स चद्विविधः॥ चतुरासनेन्यासः षडासनेन्यासश्चेति॥ तत्रादौ चतुरास-
नन्यासः॥ सयथा॥ पादयोः॥४ ह्रीं क्लीं सौः त्रिपुरसुंदरी देव्यात्मासनाय नमः॥ जंघयोः॥४ हैं ह्क्लीं ह्सौः त्रि-
त्रिपुरवासिनी सर्वचक्रासनाय नमः॥ जान्वोः॥४ ह्सैं ह्स्क्लीं ह्स्सौः त्रिपुराश्री सर्वमंत्रासनाय नमः॥ मूला-
धारे ह्रीं क्लीं ब्लें त्रिपुरमालिनी साध्यसिद्धासनाय नमः॥ अथ षडासनेन्यासः॥ तत्र पादयोः॥४ अं-
आं सौः त्रिपुरासुधार्णवासनाय नमः॥ जान्वोः॥४ ऐं क्लीं सौः त्रिपुरेश्वरी पोतांबुजासनाय नमः॥ ऊ-
र्वोः॥४ ह्रीं क्लीं सौः त्रिपुरसुंदरी देव्यात्मासनाय नमः॥ स्फिचोः॥४ हैं ह्क्लीं ह्सौः त्रिपुरवासिनी सर्व-
चक्रासनाय नमः॥ गुदे॥४ ह्सैं ह्स्क्लीं ह्स्सौः त्रिपुराश्री सर्वमंत्रासनाय नमः॥ मूलाधारे॥४ ह्रीं क्लीं ब्लें
त्रिपुरमालिनी साध्यसिद्धासनाय नमः॥ अथ षडंगन्यासः॥ स च त्रिविधः॥ रत्नाषडंगन्यासः॥
मूलषडंगन्यासः॥ षडंगयुवतिन्यासश्चेति॥ तत्रादौ रत्नाषडंगन्यासः॥ स च त्रिविधः॥ यथा॥
ऐं क्लीं सौः नमस्त्रिपुरसुंदरि मां रक्ष रक्ष हृदयाय नमः॥ एवं षडंगेषु तत्तन्मुद्रयासह तत्तन्मं-

त्रेण न्यसेत्॥ अथ मूलषडंगन्यासः॥ स च मूलकूटत्रयस्य द्विरावृत्या षडंगस्थानेषु प्राग्वन्न्यासो ते-
यः॥ षोडशीलोपासकैस्तु आद्यबीजपंचकेन हृदयं तदुत्तरबीजत्रयेण शिरः॥ तदूर्ध्वगतकूटत्रयेण
शिखादि नेत्रांतमेगत्रये अंतिमबीजपंचकेनास्त्रमिति मूलषडंगन्यासः कार्यः॥ अथ षडंगयुव-
तीन्यासः॥ स च द्विविधः॥ बालामूलविद्ययोर्योगभेदात्॥ तत्रादौ बालायोगन्यासः॥ तत्र॥४ ऐं स-
र्वज्ञातायै हृदयाय नमः॥४ क्लीं नित्यतृप्तायै शिरसे स्वाहा॥४ सौः अनादिबोधायै शिखायै वषट्॥४
ऐं स्वतंत्रायै कवचाय हुं॥ क्लीं नित्यमलुप्तायै नेत्रत्रयाय वौषट्॥४ सौः अनंतायै अस्त्राय फट्॥ अथ
मूलषडंगयुवतिन्यासः॥४ तत्र॥४ प्रथमकूटं श्रीमहात्रिपुरसुंदरि सर्वज्ञताशक्तिधाम्ने हृदया-
य नमः॥ द्वितीयकूटं श्रीमहात्रिपुरसुंदरी नित्यतृप्तिशक्तिधाम्ने सिरसे स्वाहा॥४ तृतीयकू-
टमुच्चार्य श्रीमहात्रिपुरसुंदरि अनादिबोधशक्तिधाम्ने शिखायै वषट्॥४ पुनराद्यं श्रीमहा-
त्रिपुरसुंदरि स्वतंत्रताशक्तिधाम्ने कवचाय हुं॥४ द्वितीयं श्रीमहात्रिपुरसुंदरि नित्यमलुप्तश-

सौ·र·क·

क्लिंधाम्ने नेत्रत्रयाय वौषट् ध्रुव तृतीये श्रीमहात्रिपुरसुंदरि अनंतशक्तिधाम्ने अस्त्राय फट्। इतिष
डंगयुवतिन्यासः॥ अथ कामकलापारंपर्यन्यासः॥ तत्र प्रथमे वाग्भवस्थशिरसि गुरुपादुकां
ध्यात्वा संस्मृत्य प्रणम्य दक्षिणांसे। ॐ ऐं ह्रीं श्रीं प्रथमकूटे हंसः प्रकाशचरणाभ्यां नमः॥ वामां
से ध्रुव द्वितीयकूटे सोहं विमर्शचरणाभ्यां नमः॥ हृदये ध्रुव तृतीयकूटे हंसः सोहं प्रकाशविमर्श
श्री चरणाभ्यां नमः॥ मूर्ध्नि ध्रुव तुरीयविद्यां तुर्यहंसः शिवः सोहं निर्वाणचरणाभ्यां नमः॥
इति कृतांजलिश्चरणचतुष्टयं प्रणम्य कामेश्वर ऋषिः पंक्तिश्छंदः परसंवित्कला श्रीमहात्रिपुरसुं
दरी देवता श्रीपरदेवताप्रसादसिद्ध्यर्थे विनियोगः। इति ऋष्यादिकं न्यस्त्वा बिम्बस्य ध्रुव ओं ईं इत्यादि
षड्दीर्घस्वरैः करषडंगन्यासं कृत्वा प्रणवसंपुटितया कामकलारूपया श्रीमन्त्रविद्यया व्यापकं
बिम्बस्य ध्यानं कुर्यात्। तद्यथा॥ प्रकाशमध्यस्थितबिम्बरूपो हराननये संदधती त्रिनेत्रो। सिंदू
रवर्णामतिकोमलांगीं मायामयीं तत्त्वमयीमुपासे॥ इति ध्यात्वा मूलादिब्रह्मरंध्रांतं श्रीमन्

४६

त्र पंचदशाक्षरी श्रीगुरुरूपो ध्यात्वा तस्माद् एकैकाक्षरलयेन तुर्यस्वररूपामंतिमकलां ब्रह्मरं
ध्रगतामवशेषयेत्। ततस्तामेव पंचदशाक्षरगर्भां स्वात्मानुभवरूपसच्चिदानंदरूपिणीं तु
र्यस्वरत्वेन परिणतां कामकलां नाभौ ध्यायन्न्यसेत्। तत्र नाभौ ध्रुव ईं नमः इत्यं गुह्ये तर्जनीमध्यमा
नामाभिर्न्यसेत्। ततो नाभेर्वामपार्श्वे ध्रुव सच्चिदानंद परमसंवित् ईं नमः। नाभेर्दक्षिणे ध्रुव सच्चिदा
नंद परमसंवित् ईं नमः। इत्येतत् हृदये मध्यमानामाभ्यां गुह्ये न्यसेत्। ततश्चरणचतुष्टयन्यासः। तत्र
शिरसि त्रिकोणस्याग्रकोणे ध्रुव ईं प्रथमकूटे हंसः प्रकाशचरणाभ्यां नमः। वामकोणे ध्रुव ईं द्विती
ये सोहं विमर्शचरणाभ्यां नमः। दक्षकोणे ध्रुव ईं तृतीये हंसः सोहं प्रकाशविमर्शचरणाभ्यां नमः। म
ध्ये ध्रुव ईं तुरीयविद्यां समुच्चार्य हंसः शिवः सौः सोहं निर्वाणचरणाभ्यां नमः। इति चरणचतुष्टये शि
वशक्त्यात्मकदक्षिणवामकरधृतसंपुटमुद्रया बिम्बस्य ततस्त्रिकोणपरःसरे स्वायां ध्रुव सकलानंद
नाथश्रीपादुकां पूजयामि नमः। ध्रुव निष्कलानंदनाथश्रीपादुकां पूजयामि नमः। ध्रुव नवात्मानंदना

सौ॰र॰क॰

थश्रीपादुकां पूजयामि नमः ॥ ४ अक्रूरानंदनाथश्रीपादुकां पूजयामि नमः ॥ इति गुरुचतुष्टये पं-
क्तिक्रमेण स्वदक्षिणादिवामांतं विन्यस्य शिरस्त्रिकोणमध्ये ५ ई परमसंवित्कलाश्रीमहात्रिपुरसुं-
दरीश्रीपा॰ पू॰ नमः ॥ मुखमंडले ५ ई सपरार्द्धकलानंदनाथोर्ध्वविंदुचक्राय नमः ॥ स्तनद्वये ५ ई सप-
रार्द्धकालानंदनाथाधोरुविंदुद्वयस्तनाय नमः ॥ इत्येतत् द्वयमंगुष्ठमध्यमानामिकाभिर्विन्यस्य
योनिस्थाने ५ ई सपरार्द्धकालानंदनाथव्यंजितरेखायोनये नमः ॥ इति योनित्रिकुटयान्यसेत् ॥ ततः श्री-
गुरुक्रमादिनामानु षडंगकरन्यासादिक्रमेण वैपरीत्येन शय्यमं षडंगन्यासः ॥ पश्चात्करन्यासः प-
श्चात् न्यासादिरिति विन्यस्य पूर्वोक्तमवनीरूपे स्वात्मानं ध्यात्वा यथाशक्ति कामकलाविद्यां ज-
पेदिति कामकलाविद्यां जपेदिति कामकलापारे पर्यन्यासः ॥ अथांतः कामकलान्यासः ॥ सच परापश्यं-
श्यंतीमध्यमावैखरीभेदात् चतुर्विधः ॥ तत्रादौ परान्यासः ॥ सयथा ॥ ब्रह्मरंध्रे अरुणाधोमुख-
सहस्रदलकमलकर्णिकायामरुणं पूर्णचंद्रमंडलं विभाव्य तन्मध्ये उद्यदादित्यसंकाशस्वशि-

खात्मलाग्रे शृंगाटं ध्यात्वा तदंतर्गतमकथादिक्रमेण समस्ताक्षरमयमकुलासनं वाग्भवं ध्यात्वा
तन्मध्ये हंसपार्श्वमादिवर्णकं देवकेंदीतमवर्णरूपमनुत्तरमनच्कं तरहात्मके विचिंत्य तन्म-
ध्यातुग्रेतीविसतंतुनिभां मितां हार्धकलारूपिणीं महाकामकलाममृतकुंडलिनीं ध्यात्वा मूलाधारे च-
तुर्दलकमलकर्णिकायामपि वह्निमंडले त्रिकोणस्याग्रकोणाग्रे पूर्ववत् शृंगाटं ध्यात्वा तदंतः पूर्वव-
द्वाग्भवं कुलासने विभाव्य तत्र पूर्वोक्तमनच्कं विचिंत्य तन्मध्ये तु द्योतीं सपरार्द्धकलामयीं मग्निकुंडलि-
नीं कामकलां ज्वलदग्निनिभां मध्यमार्गं प्रविश्य ग्रंथिसंचयं भित्वा तदकुलपादाब्जं ध्यायामा ध्याता-
अकुलोर्द्धमध्यगतदंडाकारतरदंडलिंगेन प्रवेशयित्वा तयोरमृतानलकुंडलिन्योर्योनिलिं-
गरूपयोर्मथनसंभवैर्निरंतरनिविडस्तवदरुणामृतपूरैरात्मानं पूरयित्वा तयोः सामरस्यादेक-
नादरूपिणीं परां शक्तिं भावयेदिति परान्यासः ॥ तदुक्तं तु भैरवयामले ॥ तरस्येतरमध्यस्यांत-
रस्येतरमध्यगं ॥ तरंगरंडमध्यस्थं यो जानाति स कौलिकः ॥ १ ॥ शीर्षपालिचरत्रैर्विवर्जितं सुस-

सौ॰र॰कृ॰ रं भवरुजापहं परं ॥ यस्य हृत्कुहरगं स्वबर्त्तितेन मृत्युरपि भस्मसात्कृतः ॥२॥ शैवं चैव तथा शाक्तं
सामरस्यं तु मध्यमे । एकीकृतं यदा काले तदानंदमनुत्तमं ॥३॥ स्थूलात्सूक्ष्मतरं सूक्ष्मं च परं प-
मकात्मकं ॥ अकारात्तत्त्वमुत्पन्नं विश्वं यत्र व्यवस्थितं ॥४॥ ध्यानस्थानविहीनो यो रूपोच्चार-
विवर्जितः ॥ अनाहतो नदंस्तत्र सुखात्सुखपदे स्थितः ॥५॥ धामत्रयातिरिक्तो यो योगेशीनो मुखे
स्थितः ॥ स सर्वं तु कथितं नाभिः स्वयमुच्चरितेतु सः ॥६॥ अस्माच्छंनुस्तनच्छक्तिः शाक्ते धामत्रयात्म-
कं ॥ प्रभवेच्च ततः सर्वं मातृवर्णकदंबकं ॥७॥ अनुत्तरं नदेवीकं सद्यः कौलिकमिष्टिदं । तरं
हं च तदेव स्यात्तत्र भास्करमध्यगं ॥८॥ तकारः सोमधामेव स्याद्घोरे फः स तु भास्करः दंडवदमनेव
क्रिरेकीकृतं तदात्मकमिति ॥९॥ अथ पशुपतिन्यासः ॥ तत्र ज्ञानुक्ता कुलपद्मे ब्रह्मरंध्रे ब्रह्मरस-
भरितमातृवर्णकदंबकध्यात्वा तत्सामरस्यादेकादशरूपं पशुपतिरसभरितं स्थात्वा-
मेत् । तत्र शिरसि रेखानि मुखाग्रे त्रिकोणं विभाव्य तत्सव्यामरेखाग्राद्दक्षिणरेखाग्रपर्यंतं

त्रिकोणे पंच कं चिक्रमिति क्रमेण वामाद्येकादशकलान्यसेत् ॥ तद्यथा ॐ वामायै नमः ॥ ॐ ज्येष्ठायै नमः ॥ ॐ रौद्र्यै न-
मः ॥ इति वामरेखायां ॥ ॐ अंबिकायै नमः ॥ ॐ इच्छायै नमः ॥ ॐ ज्ञानायै नमः ॥ ॐ क्रियायै नमः ॥ ॐ शांतायै नमः ॥ इति
दक्षरेखायां ॥ ॐ अकारात्मिकायै नमः ॥ ॐ हंकारात्मिकायै नमः ॥ ॐ अहरसात्मिकायै नमः ॥ इति दक्षिणरे-
खायां न्यसेदिति पशुपतीन्यासः ॥ अथ मध्यमान्यासः ॥ स च द्विविधः ॥ सूक्ष्मस्थूलभेदात् । तत्र ब्रह्मरंध्रे ॐ
अनकात्मने अविकृतनादाय नमः ॥ ललाटे ॐ अकारात्मने अस्मनादाय नमः ॥ भ्रूमध्ये ॐ बिंदुद्वयात्म-
ने स्पर्शनादाय नमः ॥ लंबिकाग्रे ॐ षट्कोणात्मने नादनादाय नमः ॥ विशुद्धौ ॐ अर्द्धचंद्रात्मने ध्वनिना-
दाय नमः ॥ हृदये ॐ वक्रात्मने बिंदुनादाय नमः ॥ नाभौ ॐ एकारात्मने शक्तिनादाय नमः ॥ स्वाधिष्ठा-
ने ॐ ईंशात्मने बीजनादाय नमः ॥ मूलाधारे ॐ हं सात्मने अक्षरनादात्मने नमः ॥ इति सूक्ष्ममध्यमे मा- ५
न्यासः ॥ अथ स्थूलमध्यमान्यासः ॥ तत्र ब्रह्मरंध्रे ॐ अं इं उं ऋं लृं नमः ॥ ललाटे ॐ एं ऐं ओं औं नमः ॥ भ्रू-
मध्ये ॐ हं यं रं लं वं नमः ॥ लंबिकाग्रे ॐ ङं ञं णं नं मं नमः ॥ विशुद्धौ ॐ कं चं टं तं पं नमः ॥ हृदि ॐ खं छं ठं थं फं

सौ·र·क·
ख

नमः॥नाभौ७धं झें टें थंभं नमः स्वाधिष्ठाने ७ गं जें डं वं नमः मूलाधारे७ शं षं सं नमः॥ इति मध्यमान्यासः॥ अथ
वैखरीन्यासः॥ तत्र षडाधारेषु त्रिधा विभज्य त्रिबीजसंगतं कुर्यात्॥ तद्यथा॥ यथोक्तरूपाणि मूलाधाराद्या
ंतानि षट् चक्राणि ध्यात्वा तत्र चतुर्दलाम्बुजस्थं योनिमूलं विद्याया वाग्भवं विद्युत्प्रभं विचिंत्य तद्दलेषु स्वा
द्यादि प्रादक्षिण्येन तद्वर्णान् शिवशक्तियोगेन न्यसेत्॥ तद्यथा ७ वं ऐं नमः शं ऐं नमः॥ ७ षं ऐं नमः॥ ७
सं ऐं नमः॥ इति मूलाधारे॥ ततः॥ ७ बं ऐं नमः॥ ७ भं ऐं नमः॥ ७ मं ऐं नमः॥ ७ यं ऐं नमः॥ ७ रं ऐं नमः॥ ७
लं ऐं नमः॥ इति स्वाधिष्ठाने॥ ततोऽपि कण्ठाद्ब्रह्मयोः कामराजकूटेश्चक्रे ध्यात्वा तद्दलेषु तद्वर्णान् पूर्वव
न्न्यसेत्॥ तद्यथा मणिपूरे दशदलेषु पूर्वादि प्रादक्षिण्येन ७ डं क्लीं नमः॥ ७ ढं क्लीं नमः॥ ७ णं क्लीं नमः
७ तं क्लीं नमः॥ ७ थं क्लीं नमः॥ दं क्लीं नमः॥ ७ धं क्लीं नमः॥ ७ नं क्लीं नमः॥ ७ पं क्लीं नमः॥ ७ फं क्लीं नमः॥ ततोऽना
हते॥ द्वादशदलेषु स्वाद्यादि प्रादक्षिण्येन ७ कं क्लीं नमः॥ ७ खं क्लीं नमः॥ ७ गं क्लीं नमः॥ ७ घं क्लीं नमः॥ ७ ङं
क्लीं नमः॥ ७ चं क्लीं नमः॥ ७ छं क्लीं नमः॥ ७ जं क्लीं नमः॥ ७ झं क्लीं नमः॥ ७ ञं क्लीं नमः॥ ७ टं क्लीं नमः॥ ७ ठं क्लीं नमः

॥ ततः अमृतहृदयाब्जयोस्तार्तीयकूटं शुक्लवर्णं ध्यात्वा तद्दलेषु न्यसेत्॥ तद्यथा॥ विशुद्धौ षोडशदलेषु पू
र्वादि प्रादक्षिण्येन॥ ७ अं सौः नमः॥ ७ आं सौः नमः॥ ७ इं सौः नमः॥ ७ ईं सौः नमः॥ ७ उं सौः नमः॥ ७ ऊं सौः नमः॥ ७ ऋं
सौः नमः॥ ७ ॠं सौः नमः॥ ७ ऌं सौः नमः॥ ७ ॡं सौः नमः॥ एं सौः नमः॥ ऐं सौः नमः॥ ७ ओं सौः नमः॥ ७ औं सौः नमः
॥ ७ अं सौः नमः॥ ७ अः सौः नमः॥ ततो भ्रूमध्ये आज्ञाख्यस्य द्विदलवामदलयोः॥ ७ हं सौः नमः॥ ७ क्षं सौः नमः॥ इ
ति वैखरीन्यासं विधायांतः सुधाशक्तिं पद्मरागप्रभं वर्णैकदंडकं ध्यायेदिति वैखरीन्यासः॥ इतं ततः का
मकलान्यासः॥ अथ वह्निकामकलान्यासः॥ तत्र कामकलात्मनस्सबिंदुतुर्यस्वरस्यादिबिंदुं देवीरूप
स्यात्मनः॥ केशनेत्रकर्णनासिकाद्यवयवसमेतं वक्त्रं परिकल्प्य तस्याधोबिंदुद्वयं वाक्कुचतुष्ट्याद्यव
यवसमेतं स्तनद्वयं ध्यात्वा तस्य हार्धकलां पादद्वयाद्यवयवसमेतां तायोनिं विचिंत्य ७ वाग्भवकूटमुच्चार्य ई
कारस्योर्ध्वबिंदुात्मने श्रीमहात्रिपुरसुंदर्याः वाक्कुचतुष्ट्याद्यवयवसहितवक्त्रायनमः॥ ७ कामकूटमुच्चार्य
ईकारस्याधोबिंदुद्वयात्मने श्रीमहात्रिपुरसुंदर्याः वाक्कुचतुष्ट्याद्यवयवसहितस्तनद्वयायनमः॥ तार्तीयकू

रमुच्चार्य ईकारस्य हार्धकलात्मने श्रीमहात्रिपुरसुंदर्याः पादद्वयाद्यवयवसहितयोनये नमः। इति मूर्धादिप
र्यंतं कंठादिनाभ्यंतं नाभ्यादिपादद्वयाग्रपर्यंतं व्यापकत्वेन विन्यस्य ध्मलविद्यामुच्चार्य समस्तकामकलात्म
कश्रीमहात्रिपुरसुंदर्याः सर्वावयवेभ्यो नमः। समष्टिकामकलाभूतपरमाह्लादमयसर्वावयवसंपूर्णापर
मसौंदर्यवंतीं कामेश्वरांकनिलयां सर्वाभरणसंपन्नां देवीं स्वात्मानं ध्यायेदिति वह्निः कामकलान्यासः। अ
थायुधन्यासः। तत्र दक्षिणाधःकरे द्रांद्रींक्लींब्लूंसः यां रां लां वां सां जंभनेभ्यः कामेश्वरकामेश्वरीबाणेभ्यो न
मः। वामाधःकरेषु धं थं मोहनाभ्यां कामेश्वरकामेश्वरीचापाभ्यां नमः। वामोर्ध्वहस्तेषु आं ह्रीं वशीकरणाभ्यां
कामेश्वरकामेश्वरीपाशाभ्यां नमः। दक्षोर्ध्वहस्ते। क्रोंक्रों स्तंभनाभ्यां कामेश्वरकामेश्वर्यंकुशाभ्यां नमः।
इत्यं न्यासमस्तन्मुद्रयाकार्यः। इत्यायुधन्यासः। अथ भूषणन्यासः। तत्र तत्तदंगं भूषणधियामातृका
वर्णान्वक्ष्यमाणेषु न्यसेत्। तद्यथा। शिरसि षु अं नमः। ललाटेषु आं नमः। दक्षभ्रुवि षु इं नमः। वामभ्रुवि षु
ईं नमः। दक्षकर्णे षु उं नमः। वामकर्णे ऊं नमः। दक्षनेत्रे षु ऋं नमः। वामे षु ॠं नमः। नासायोः षु ऌं नमः। दक्षगंडेषु

ॡं नमः। वामे षु एं नमः। ऊर्ध्वौष्ठे षु ऐं नमः। अधरे षु ओं नमः। ऊर्ध्वदंते षु औं नमः। अधोदंतेषु अं नमः। जिह्वायां
अः नमः। चिबुके षु कं नमः। गले षु खं नमः। कंठे षु गं नमः। दक्षपार्श्वे षु घं नमः। वामपार्श्वे षु ङं नमः। दक्षस्त
ने षु चं नमः। वामे षु छं नमः। दक्षांसे षु जं नमः। वामे षु झं नमः। दक्षकूर्परे षु ञं नमः। वामे षु टं नमः। करतलयोः
षु ठं नमः। करपृष्ठयोः षु डं नमः। नाभौ षु ढं नमः। लिंगे षु णं नमः। दक्षोरौ षु तं नमः। वामे षु थं नमः। दक्षजानु
नि षु दं नमः। वामे षु धं। दक्षजंघायां षु नं नमः। वामायां षु पं नमः। दक्षस्फिचि षु फं नमः। वामायां षु बं नमः। दक्षपा
दतले षु भं नमः। वामे षु मं नमः। दक्षपादांगुष्ठे षु यं नमः। वामे षु रं नमः। कट्यां षु लं नमः। ग्रैवेयके षु वं नमः। व
लये षु शं नमः। हृदि षु षं नमः। गुदे षु सं नमः। दक्षकुंडले षु हं नमः। वामे ळं नमः। मुकुटे षु क्षं नमः। इति भूषण
न्यासः। अथ कामरतिन्यासः। तत्र ध्यानं। अथ कामान्स्मरेद्देवि दाडिमीकुसुमोपमान्। वामोरुशक्तिस
हितान्पुष्पबाणेक्षुकार्मुकान्। १। पाक्रयत्कुंकुमनिभाः सर्वाभरणभूषिताः। नीलोत्पलकराध्येयास्त्रैलो
क्याकर्षणक्षमाः। २। इति ध्यात्वा न्यसेत्। तद्यथा। षु अं कामाय रत्यै नमः। षु आं कामदाय प्रीत्यै नमः। षु इं कां

सौ॰र॰क॰ तायकामिन्यैनमः॥४ईंकांतिमतेमोहिन्यैनमः॥४उंकामगायकमलायैनमः॥४ऊंकामचारायविलासिन्यैनमः
॥४ऋंकामिनेकल्पलतायैनमः॥४ॠंकामुकायश्यामायैनमः॥४ऌंकामवर्द्धनायसुचिस्मितायैनमः॥४ॡंवामाय
विस्मितायैनमः॥४एंरामायविशालास्यैनमः॥४ऐंरमणायलेलिहानायैनमः॥४ओंरतिनाथायदिगंबरायै
नमः॥४औंरतिप्रियायवामायैनमः॥४अंरात्रिनाथायकुब्जिकायैनमः॥४अः रमाकांतायकांतायैनमः॥
४कंरमणायनिमायैनमः॥४खंनिशाचरायकल्याण्यैनमः॥४गंनंदकायभोगिन्यैनमः॥घं ४ घंनंदनाय
कामदायैनमः॥४ङंनंदिनेसुलोचनायैनमः॥४चंनंदयित्रेसुलापिन्यैनमः॥४छंपंचवाणायमर्दिन्यैनमः
॥४जंरतिसखायकलहप्रियायैनमः॥४झंपुष्पधन्वनेवरास्यैनमः॥४ञंमहाधनुषेसुमुखायैनमः॥४
टंभ्रामणायनलिन्यैनमः॥४ठंभ्रमणायजटिन्यैनमः॥४डंभ्रममाणायपालिन्यैनमः॥४ढंभ्रमाय
शिवायैनमः॥४णंभ्रांतायसुरभ्यायैनमः॥४तंभ्रामकायपरमायैनमः॥४थंभृंगायभ्रमायैनमः॥४दं
भ्रांतचारायलोलायैनमः॥४धंभ्रमावहायचंचलायैनमः॥४नंमोहनायदीर्घजिह्वायैनमः॥४पंमो

५४

हकारायरतिप्रियायैनमः॥४फंमोहायलोलास्यैनमः॥४बंमोहवर्द्धनायभंगिन्यैनमः॥४भंमदनायपाटला
यैनमः॥४मंमन्मथायमदनायैनमः॥४यंमातंगायमालायैनमः॥४रंभृंगनायकायहंसिन्यैनमः॥४लंगा
यकायविम्बमुख्यैनमः॥४वंगीतिज्ञायजगदानंदिन्यैनमः॥४शंनर्त्तकायरमण्यैनमः॥४षंखेलकायक
कोल्यैनमः॥४संउन्मत्तायकलकंठ्यैनमः॥४हंमत्तकायवृकोदर्यैनमः॥४ळंविलासिनेमेघश्यामायैनमः
॥४क्षंलोभवर्द्धनायस्रघोन्नमायैनमः॥इत्येकपंचाशन्मिथुनानिसुरुमातृकास्थानेषुन्यसेदितिकाम
रतिन्यासः॥अथपंचाशत्त्रिपुरान्यासः॥तत्र४अंकामिनीत्रिपुरायैनमः॥४आंमोदिनीत्रिपुरायैनमः॥
इंमदनात्रि॰॥४ईंउन्मादिनीत्रिपु॰॥४उंद्राविणीत्रिपुरायै॰॥४ऊंखेचरीत्रिपु॰॥४ऋंघंटिकात्रि॰॥४ॠं
कलावतीत्रिपु॰॥४ऌंक्लेदिनीत्रिपु॰॥४ॡंशिवदूतीत्रिपुरायैनमः॥४एंसुभगात्रिपु॰॥४ऐंभगात्रि॰
पु॰॥४ओंविद्येशीत्रिपु॰॥४औंमहालक्ष्मीत्रिपु॰॥४अंकौलिनीत्रिपु॰॥४अः सुरेश्वरीत्रिपु॰॥४कं
कुलमालिनीत्रिपु॰॥४खंव्यापिनीत्रिपु॰॥४गंभगनंदात्रिपु॰॥४घंवागीश्वरित्रिपु॰॥४ङंवष

सौ.र.क. ह्रारी त्रिपु०॥४ चं पिंगला त्रिपु०॥४ छं भगसर्पिणी त्रिपु०॥४ जं सुंदरी त्रिपु०॥४ झं नीलपताका त्रिपु०॥४
ञं त्रिपुरा त्रिपुरायै नमः॥४ टं क्षिप्रेश्वरी त्रिपु०॥४ ठं अमोघा त्रिपु०॥४ डं रत्नमालिनी त्रिपु०॥४ ढं मंग
ला त्रिपु०॥४ णं भगमालिनी त्रिपु०॥४ तं नित्या त्रिपु०॥४ थं रौद्री त्रिपु०॥४ दं व्योमेश्वरी त्रिपु०॥४ धं अंबि
पु०४नेभ का त्रिपु० [illegible] द्रुहा त्रिपु०॥४ पं आप्यायनी त्रिपु०॥४ फं वज्रेश्वरी त्रिपु०॥४ बं शोभिनी त्रिपु०॥४ भं
शो[illegible]वी त्रिपु०॥४ मं स्तंभिनी त्रिपु०॥४ यं अनामिका त्रिपु०॥४ रं रक्ता त्रिपु०॥४ लं शुक्ला त्रिपु०॥४ वं अपरा
जिता त्रिपु०॥४ शं संवर्तिका त्रिपु०॥४ षं विमला त्रिपु०॥४ सं घोरा त्रिपु०॥४ हं अघोरा त्रिपु०॥४ ळं विंदुभै
रवी त्रिपु०॥४ क्षं सर्वाकर्षिणी त्रिपुरायै नमः॥ इत्येता मातृकास्थानेषु न्यस्तव्या॥ इति पंचाशत्त्रिपु
रान्यासः॥ अथ षोडशकामकलान्यासः॥ तत्र दक्षिणपादे४ अं श्रद्धाकलायै नमः। दक्षजंघायां४ आं प्री
तिकलायै नमः॥४ दक्षजानुनि४ इं रतिकलायै नमः। दक्षोरौ४ ईं धृतिकलायै नमः। दक्षवक्षसि४ उं कां
तिकलायै नमः। दक्षबाहुमूले४ ऊं मनोरमाकलायै नमः। मुखदक्षिणे४ ऋं मनोहराकलायै नमः॥

६५

दक्षमूर्ध्नि४ ॠं मनोभवाकलायै नमः। वामशिरोभागे४ ऌं मदनोन्मादिनीकलायै नमः। मुखवामे४
ॡं मोहिनीकलायै नमः॥ वामबाहुमूले४ एं दीपिनीकलायै नमः। वामवक्षसि४ ऐं शोषणीकला
यै नमः॥ वामोरौ४ ओं वशंकरीकलायै नमः। वामजानुनि४ औं रंजिनीकलायै नमः। वामजंघायां
४ अं सुभगाकलायै नमः। वामपादे४ अः प्रियदर्शनीकलायै नमः॥ इति विमर्श्य। एताः शुक्लवर्णा
सोमजकराध्येयाः। इति षोडशकामकलान्यासः॥ अथ सोमकलान्यासः। तत्र पृष्ठदक्षिणभागे४
अं पृषाकलायै नमः। दक्षांसपृष्ठे४ आं वसाकलायै नमः। दक्षग्रीवापृष्ठे४ इं सुमनाकलायै नमः।
दक्षकर्णे४ ईं रतिकलायै नमः। दक्षनेत्रे४ उं प्रीतिकलायै नमः। दक्षनासायां४ ऊं धृतिकलायै नमः
दक्षललाटे४ ऋं ऋद्धिकलायै नमः। दक्षमूर्ध्नि४ ॠं सौम्याकलायै नमः। वाममूर्ध्नि४ ऌं मरीचिक
लायै नमः। वामललाटे४ ॡं अंशुमालिनीकलायै नमः। वामनासायां४ एं अंगिराकलायै नमः। वा
मनेत्रे४ ऐं शशिनीकलायै नमः। वामकर्णे४ ओं छायाकलायै नमः। वामग्रीवापृष्ठे४ औं संपूर्णमंड

सौ.र.क.

ज्योत्स्नाकलायैनमः॥वामांसपृष्ठे४अंतुष्टिकलायैनमः।वामपृष्ठे४अःअमृताकलायैनमः।एताःशु-
भ्राःसोमजकलाध्येयाः॥इतिसोमकलान्यासः॥अथवशिन्यादिवाग्देवतान्यासः।तत्रशिरसि
४अंआंरद्द्रूंवशिनीवाग्देवतायैनमः।ललाटे४कंखंगंघंङंक्लींकामेश्वरीवाग्देवतायैनमः॥
भ्रूमध्ये४चंछंजंझंञंज्म्रींमोदिनीवाग्देवतायैनमः।कंठे४टंठंडंढंणंज्रूंविमलावाग्देवतायैनमः
।हृदये४तंथंदंधंनंज्म्रींअरुणावाग्देवतायैनमः।नाभौ४पंफंबंभंमंहस्लव्यूंजयिनीवाग्देवतायैनमः
॥मूलाधारे४यंरंलंवंझ्म्र्यूंसर्वेश्वरीवाग्देवतायैनमः॥मूलाधारादिपादांते४शंषंसंहंळंक्षंक्ष्म्रींकौ-
लिनीवाग्देवतायैनमः॥इतिवाग्देवतान्यासः॥अथचतुःपीठन्यासः।तत्रमूलाधारेप्रथमकू-
टमुच्चार्यअग्निचक्रेकामगिरिपीठेमित्रीशनाथात्मिकेजाग्रद्दशाधिष्ठायिकेइच्छाशक्त्यात्मकरु-
द्रात्मशक्तिश्रीकामेश्वरीदेव्यैनमः।हृदये४द्वितीयकूटमुच्चार्यसूर्यचक्रेजालंधरपीठेषष्ठीश-
नाथात्मकेस्वप्नदशाधिष्ठायिकेज्ञानशक्त्यात्मकविष्ण्वात्मशक्तिश्रीवज्रेश्वरीदेव्यैनमः।भ्रूमध्ये४

तृतीयकूटमुच्चार्यसोमचक्रेपूर्णगिरिपीठेउड्डीशनाथात्मकेसुषुप्तिदशाधिष्ठायकेक्रियाशक्त्यात्म-
कब्रह्मात्मशक्तिश्रीभगमालिन्यैनमः।ब्रह्मरंध्रे४तुर्यविद्यामुच्चार्यब्रह्मचक्रेउड्यानपीठेश्रीचर्या-
नाथात्मकेतुर्यतुर्यातीतदशाधिष्ठायकेपरब्रह्मात्मशक्तिश्रीत्रिपुरसुंदरीदेव्यैनमः।इतिचतुःपी-
ठन्यासः॥अथकामेश्वर्यादिन्यासः।तत्रवामपादांगुष्ठादिनाभिपर्यंते४ऐंप्रथमकूटंकामेश्वर्यै
नमः।नाभेःकंठपर्यंते४क्लींद्वितीयकूटंवज्रेश्वर्यैनमः।कंठाच्छिरःपर्यंते४सौःतृतीयकूटंभ-
गमालिन्यैनमः।इतिवामभागेविन्यस्यदक्षिणपादांगुष्ठान्नाभिपर्यंते४स्रैंआत्मतत्त्वाधिपतयेब्रह्मणे
नमः।नाभेःकंठपर्यंते४क्लींविद्यातत्त्वाधिपतयेविष्णवेनमः।कंठादिशिरोंते४स्रौःशिवतत्त्वा-
धिपतयेरुद्रायनमः।इतितत्त्वाधिदेवतान्यासः॥अथचतुस्तत्त्वन्यासः।नाभ्यादिपादांते४प्रथमकू-
टमुच्चार्यआत्मतत्त्वात्मनेश्रीमहात्रिपुरसुंदर्यैनमः।कंठादिनाभ्यंते४द्वितीयकूटमुच्चार्यविद्यात-
त्त्वात्मनेश्रीमहात्रिपुरसुंदर्यैनमः।मस्तकादिकंठांते४तृतीयकूटमुच्चार्यशिवतत्त्वात्मनेश्रीमहा-

सौ.२२. त्रिपुरसुंदर्यै नमः॥ मूर्धादिपादांतं ४ तुरीयविद्यामुच्चार्य सर्वतत्त्वात्मने श्रीमहासुंदर्यै नमः॥ इति व्यापकं
कुर्यात्॥ इति चतुस्तत्त्वन्यासः॥ अथ मूलाधारे ४ प्रथमकूटेन नमः। हृदि ४ द्वितीयेन भ्रूमध्ये ४ तृतीयेन ब्रह्म
रंध्रे ४ तुरीयविद्यामुच्चार्य शाम्भवसमस्तविद्याव्याप्त्वेन न्यसेत्। इति मूलविद्यान्यासः॥ अथ नवयोनिन्या
सः॥ स च बालयैव कार्यः॥ तद्यथा॥ वामकर्णे ४ ऐं नमः। दक्षकर्णे ४ क्लीं नमः। चिबुके ४ सौः नमः॥ एवं वामशंखे
४ ऐं नमः। दक्षशंखे ४ क्लीं नमः। मुखे ४ सौः नमः। द्वितीया योनिः॥ वामनेत्रे ४ ऐं नमः। दक्षनेत्रे ४ क्लीं नमः। ना
सिकायां ४ सौः नमः। तृतीया योनिः॥ वामांसे ४ ऐं नमः। दक्षांसे ४ क्लीं नमः। हृदये ४ सौः नमः। चतुर्थी यो
निः॥ वामकूर्परे ४ ऐं नमः। दक्षकूर्परे ४ क्लीं नमः। नाभौ ४ सौः नमः। पंचमी योनिः॥ वामजानुनि ४ ऐं नमः।
दक्षजानुनि ४ क्लीं नमः। लिंगे ४ सौः नमः। षष्ठी योनिः॥ वामपादे ४ ऐं नमः। दक्षपादे ४ क्लीं नमः। गुदे ४
सौः नमः। सप्तमी योनिः॥ वामपार्श्वे ४ ऐं नमः। दक्षपार्श्वे ४ क्लीं नमः। वक्षसि ४ सौः नमः। अष्टमी यो
निः॥ वामस्तने ४ ऐं नमः। दक्षस्तने ४ क्लीं नमः। कंठे ४ सौः नमः। इति नवमी। इति वह्निर्नवयोनिन्यासः

अथांतर्नवयोनिन्यासः॥ तत्र मूलाधारादिषट्चक्रजातसीमंतब्रह्मरंध्रेषु नवस्थानेषु चतुरस्रवे
ष्टितान् नवयोनीः परिकल्प्य तासु स्वा आदिपादक्षिणक्रमेण प्राग्रूपबीजत्रयं मनसा ध्यायन् न्यसेदि
त्यंतर्नवयोनिन्यासः॥ अथ शृंखलान्यासः॥ तत्र शिखायां प्रथमकूटेन नमः। एवं चतुष्के द्वितीयं॥
पुनर्मुखे प्रथमं। कंठे द्वितीयं। चिबुके तृतीयं। पुनश्चिबुके प्रथमं। हृदये द्वितीयं। कंठे तृतीयं। पुनः कंठे प्रथमं।
नाभौ द्वितीयं। हृदये तृतीयं। पुनर्हृदये प्रथमं। स्वाधिष्ठाने द्वितीयं। नाभौ तृतीयं। पुनर्नाभौ प्रथमं। मूलाधारे
द्वितीयं। स्वाधिष्ठाने तृतीयं। पुनः स्वाधिष्ठाने प्रथमं। ऊर्वोर्द्वयोर्द्वितीयं। मूलाधारे तृतीयं। इति शृंखला
न्यासः॥ अथ चक्रदेवतान्यासः॥ तत्र मूलाधारे ४ अं आं सौः त्रैलोक्यमोहनचक्रस्वामिन्यै प्रकटयोगिनी
भ्यो नमः॥ स्वाधिष्ठाने ४ ऐं क्लीं सौः सर्वाशापरिपूरकचक्रस्वामिन्यै गुप्तयोगिनीभ्यो नमः॥ मणिपूरे। ह्रीं
क्लीं सौः सर्वसंक्षोभणचक्रस्वामिन्यै गुप्ततरयोगिनीभ्यो नमः॥ हृदये ४ हैं ह्क्लीं ह्सौः सर्वसौभाग्यदायक
चक्रस्वामिन्यै संप्रदाययोगिनीभ्यो नमः॥ विशुद्धौ ४ हसैं हस्क्लीं हसौः सर्वार्थसाधकचक्रस्वामिन्यै कुलकौ

सौ॰र॰क॰

लयोगिनीभ्यो नमः॥ आज्ञायां ॥ ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्रस्याम्यो निगर्भयोगिनीभ्यो नमः॥ ललाटे ॥
ह्रीं श्रीं सौः सर्वरोगहरचक्रस्याम्यो रहस्ययोगिनीभ्यो नमः॥ शिरसि ॥ ह्स्रैं ह्स्क्लीं ह्स्सौः सर्वसिद्धिप्रद
चक्रस्याम्यः परापररहस्ययोगिनीभ्यो नमः॥ ब्रह्मरंध्रे ॥ मूलपंचदशीमुच्चार्य सर्वानंदमयच
क्रस्याम्यः परापरातिरहस्ययोगिनीभ्यो नमः॥ इति विन्यस्य समस्तप्रकटेसादियोगिनीसमष्टि
विद्यया सर्वांगे व्यापकं विन्यसेदिति प्रकटादिन्यासः॥ अथामथन्यासः॥ तत्र शिरसि ॥ ऐं स
रस्वत्यै नमः॥ ललाटे ॥ ह्रीं पार्वत्यै नमः॥ दक्षनेत्रे ॥ अंसविचे नमः॥ वामनेत्रे ॥ धमेअययेन
मः॥ मुखवृत्ते ॥ हूं चंडमसे नमः॥ मुखे ॥ श्रीं श्रियै नमः॥ कपोलयोः ॥ स्वाहा द्वितीने नमः॥
इत्यष्टन्यासः॥ अथैतन्न्यासफलं॥ त्रिकालं यस्त्रिवारं वा पंचवारं च सप्तधा॥ कुर्याद्वा
दशधा वा यस्सद्गुत्तस्य फलं शिवो॥१॥ कांतिमेधायशः सौख्यसुखश्रीस्तस्य जायते इति॥ श्रीवि
द्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाख्यौत तरंगोगमदष्टमः ८ इति श्री

मन्निर्वाणंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे अष्टम
स्तरंगः॥ ॥ अथ महाशक्तिन्यासः॥ तत्र प्रथमं जगच्छमाकारं निशाजं बध्वा लाडूं पृथिव्यै नमः॥ इति भू
स्वासनाधः॥ पृथिवीं संपूज्य स्वासनं वामहस्तेन स्पृशन् भुवनेश्वरीबीजं सप्तवारं जपित्वा॥ ॐ ऐं ह्रीं श्रीं जयायै
नमः॥ ॐ ऐं ह्रीं श्रीं विजयायै नमः॥ ४ जयंत्यै नमः॥ ४ अपराजितायै नमः॥ ४ संगमायै नमः॥ ४ रंभायै नमः॥ इति
स्वासने सप्तशक्तिः संपूज्य मूलविद्यया प्राणायामत्रयं कृत्वा॥ अस्य श्रीमहाशक्तिन्यासस्य परमशिव ऋ
षिः॥ अतिजगती छंदः॥ श्रीपराशक्तिर्देवता॥ ऐं बीजं श्रीं शक्तिः सौः कीलकं श्रीविद्यांगत्वेन महाशक्ति
न्यासे विनियोगः॥ इति ऋष्यादिकं स्मृत्वा॥ यथाविधि न्यस्य त्रिताराद्वितारा रत्नाकरषडंगन्यासं विधा
य न्यासं कुर्यात्॥ तत्र योनौ ॐ ३ ऐं ह्रीं श्रीं नमः॥ नाभौ ॐ ३ क्रां क्रीं क्रूं नमः॥ कराग्रयोः ॐ ३ क्रां क्रीं क्रूं न
मः॥ हृदि ॐ ३ क्रां क्रीं क्रूं नमः॥ ललाटे ॥ सां सीं सूं नमः॥ कर्णयोः ॥ क्रां क्रीं क्रुं नमः॥ ध्वजमूले ॥ ड्रां ड्रीं ड्रूं
नमः॥ चिबुकाग्रे ॥ सौः श्रीं सौ नमः॥ ब्रह्मरंध्रे ॥ ऐं ह्सौः अं नमः॥ इति विन्यस्य अकारादिक्षकारांतानां

सौ·र·क· सर्वेषां वर्णानां मूलभूतमकारं सर्वेषु वर्णेषु दुग्धस्य सर्पिवत्तत्स्वरूपेण स्थितं विभावयन् तन्म
यानन्यवर्णान्वक्ष्यमाणेषु स्थानेषु न्यसेत्॥ तत्र तालुके ४ ऐं ह्रीं सौः ओं नमः॥ नासाग्रे ४ ऐं ह्रीं सौः ईं नमः॥
पश्चिमलिंगे सौविन्यो मूलाधारगतज्योतिर्लिंगे वा ४।३ ईं नमः॥ गुदे ४।३ उं नमः॥ पृष्ठमध्ये ४।३ ऊं नमः॥ क
टिसंधौ ४।३ ऋं नमः॥ सर्वांगे ४।३ ॠं नमः॥ वृषणांते ४।३ ऌं नमः॥ पृष्ठमध्ये ४।३ ॡं नमः॥ लिंबिकास्था
ने ४।३ ऌं नमः॥ सर्वांगे ४।३ एं नमः॥ पुनर्विंदुपरिगतत्रिरेखायां योनौ न्यासभावनया सर्वांगे ४।३ ऐं न
मः॥ इति विमर्शयोनिरित्युच्यते शक्तिरेषा ब्रह्मांडभेदिनी॥ जयं चित्रा जये देहे रेतो विंदुरिति स्मृतः॥ काम
सप्ततिसहस्रेषु नाडीभेदेषु पंजरं॥ व्याप्य सा नाम हाशक्तिः कामिनीनां ऋतुक्रमे॥ नाडीचक्रागतं रक्तं
योनिमार्गे निपातयेत्॥ पुष्पभूते भगे पुष्पं मासपक्षादिषु क्रमात्॥ योनिरेखागतं विंदुरक्तं जानीहि
पंकजे॥ माकृतोपि भगाकारे ऐंकारे संस्थितो विंदुः॥ ऐंकारोपि स्वयं योनिर्नाचिकार्या विचारणा॥ न्यस्तं
चाप्यत्र देवेशि त्रैलोक्यं सचराचरं॥ इत्यंतश्लोकसमुदायस्यार्थं चिंतयन् महाकामकलायां ब्रह्मरंध्रस्था

योन्ययं भावयित्वा ब्रह्मदंडे ४।३ ॐ नमः॥ नादमध्ये ४।३ औं नमः॥ नादांते ४।३ अं नमः॥ कंठस्थाने ४।३
अः नमः॥ हृदि ४।३ कं नमः॥ मस्तके ४।३ खं नमः॥ जंघयोः ४।३ गं नमः॥ स्तनयोः ४।३ घं नमः॥ नासिकांते ४।३
ङं नमः॥ आज्ञायां ४।३ चं नमः॥ वामकुक्षौ ४।३ छं नमः॥ दक्षिणकुक्षौ ४।३ जं नमः॥ ऊरुमूले ४।३ झं नमः॥ दंतपं
क्तौ ४।३ ञं नमः॥ जिह्वाग्रे ४।३ टं नमः॥ चुबुके ४।३ ठं नमः॥ कक्षयोः ४।३ डं नमः॥ अस्थिसंधिषु ४।३ ढं नमः॥ चि
त्ते ४।३ णं नमः॥ नाभौ ४।३ तं नमः॥ ललाटे ४।३ थं नमः॥ कर्णरंध्रयोः ४।३ दं नमः॥ कपोलमूलयोः ४।३ धं
नमः॥ नयनयोः ४।३ नं नमः॥ श्वेतसहस्रदलकमले ४।३ पं नमः॥ हृत्पद्मे ४।३ फं नमः॥ स्कंधयोः ४।
३ बं नमः॥ भ्रूद्वये ४।३ भं नमः॥ हनुमूले ४।३ मं नमः॥ तालुमूले ४।३ यं नमः॥ लिंगगुदयोर्मध्ये ४।
३ रं नमः॥ जिह्वायां ४।३ लं नमः॥ सर्वांगे ४।३ वं नमः॥ वामादिदक्षिणशिरःपर्यंतमापादतलं वे
ष्टकेन ४।३ शं नमः॥ तालुमूले ४।३ षं नमः॥ सर्वांगे ४।३ सं नमः॥ ब्रह्मरंध्रे ४।३ हं नमः॥ हस्तपाद
योः सर्वांगुलीषु ४।३ ळं नमः॥ भागुरुमूलाधारस्थितकुंडलिन्यां ४।३ इति विमर्श ४।३ समस्त

गौ॰र॰क॰ मात्रकामुखस्थतां कुंडलिनीं सुषुम्नावर्त्मना षट्चक्रभेदक्रमेण ब्रह्मरंध्रं नीत्वा तत्रस्थाकुलसहस्रद
लकमलकर्णिकामध्यस्थित परमात्मनि शिवे विलीनां विभाव्य ॐ ३ ह्रः रसरसम्प्लाविनि त्रैलोक्यानंद
दायिनि ॥ रसमांत्रिपुरे देवि रस मां त्रिपुरेश्वरी ॥ १ ॥ रसरसमहादेवि मस्मदीयमिदं वपुः ॥ ऐं ह्रीं श्रीं
क्लीं सौः सौः हसक्फ्रें श्रीं ह्रीं ऐं ममयिनि मदिरानंद सुंदरि समस्तसुरासुरवंदिते भुजंगमपाशमालाजं
कृतचरणकमले विकटदंतरवटाटोपनिवारिणि मदीयं शरीरं रक्ष रक्ष परमेश्वरि हुं फट् स्वाहा ॥ ॐ भूः स्वा
हा ॥ ॐ भुवः स्वाहा ॥ ॐ स्वः स्वाहा ॥ ॐ भूर्भुवः स्वः स्वाहा । नरांचमौमाजा भरणभूषिते महाकौलिनि महा
ब्रह्मवादिनि महाधनोन्मादनकारिणि महाभोग्यप्रदे अस्मदीयं शरीरं वज्रमयं कुरु कुरु दुर्जनान् ह
न नर दुष्टमहीपालान् भक्षय परचक्रं भंजय २ जयंकरि गगनगामिनि त्रैलोक्यस्वामिनि यमज्वर
ऐरमज्वर यं ज्जमज्वर यं वमज्वर यं शमज्वर यं श्रीभैरवि प्रसीद स्वाहा ॥ कुलांगनाकुलं स्वं मम
दीयं मदिरानंदे आपादतलमस्तकं ॥ इत्यात्मरक्षां कृत्वा ॥ त्रिपुराख्या महादेवी भुक्तिमुक्तिफलप्रदा ॥ च

३०

गुरोः सदृशं वस्तु न देवः शंकरोपमः । न च कैलाससदृशो योगो न विद्या त्रैपुरी समा । न च शांतेः परं ज्ञानं न च सौ
ते परं सुखं ॥ न वै शक्तिसमो मासो न विद्या त्रैपुरी समा । दर्शनेषु समस्तेषु पाषंडेषु विशेषतः ॥ दिव्यरूपा म
हादेवी सर्वत्र परमेश्वरी । इति मंत्रविद्यायोर्महिमानं स्मृत्वा पीठोपपीठशिरस्था गगनगिरि भुवनगोकुल
निवासिनी जयति कुलशक्तिर्महीतलपाताल निवासिनी कुलकौलविभेदिनी सकलजनमनआनं
दकारिणि करोतु मम चिंतितं कार्यं भैरवीशतमेकं पुनातु परमेश्वरी मदन मंडलाजं जे विनीसमकोटि
सहस्रालंमंत्रालं परमेश्वरी इति मंत्रं सहस्रं जपित्वा ॥ ॐ ऐं नमो भगवति त्रिकोणे त्रिधावर्त्ते महा
त्रिंशाजेत्र तेत्रैलोक्योत्पत्तिस्थितिप्रलयकारिणि सहजकी केदर्पा नंददायिनि सह क्लीं ब्लें
दंडुरे रवेसद ह्रौं चित्स्वरूपे पाशांकुशाजं कृते वद वद वाग्वादिनि श्रीं दुष्टमहीपाल राज्य
प्रदे लेवरदाश्रितह स्ते समस्तजनानंदकारिणि क्लीं ह्रीं कामराजबीजाश्रये ह्रां ह्रीं ह्रीं ब्लूं सः क्षोभय
२ क्षोभिणि सौः सौः सौः मथ मथ भ्रमय प्रदायिनि चतुर्भुजे त्रिनेत्रे प्रेतासनोच्चारिणि महाकपाल

सौ॰र॰क॰ माजालंधरे तेचंद्र ह्व तशेखरे त्रिपुरे भुक्तिमुक्तिफलप्रदे ॐ ऐं ॐ नमः सिद्धं भकारादिसकारांते ५१ लका
रादिअकारांतं विलोमेन ५१ हं सिमः न ॐ ऐं ॐ सर्ववीजमातः श्रीसमयिनि मम मनोरथं देहि देहि स्वा
हा॥ एवं जपित्वा॥ ऐं ईं सौः श्रीमंत्रराजाय नमः॥ इति त्रैपुरमंत्रस्य पूजां विधाय त्रिपुराद्या महानाम्नात्र
योदश महाविद्याः पूजयेत्॥ यथा॥ ॐ ३ ऐं सहौः सहक्लीं सहह्रीं ऐं सह ह्रीं सहहुं कामत्रिपुरायै नमः॥
ॐ ३ ऐं ह्रीं क्लीं ह्सौः त्रिपुरभैरव्यै नमः॥ ॐ ऐं ह्रीं सः वाक् त्रिपुरायै नमः॥ ॐ ३ ऐं ह्रीं श्रीं सौः महालक्ष्म्यै त्रि॰
पुरायै नमः॥ ॐ ३ ऐं ह्रीं सौः वह्निःत्रिपुरायै नमः॥ ॐ ३ ऐं क्लीं सौः मोहिन्यै त्रिपुरायै नमः॥ ॐ ३ ऐं क्लीं ह्रूं॰
स्त्रीं भ्रामरीत्रिपुरायै नमः॥ ॐ ३ ऐं ह्रीं श्रीं फें ह्सौः त्रैलोक्यस्वामिन्यै त्रिपुरायै नमः॥ ॐ ३ ऐं डां डीं डूं डैं डौं
डः हं स्यै त्रिपुरायै नमः॥ ॐ ३ ऐं ऐं सौः कौलिकायै त्रिपुरायै नमः॥ ॐ ३ ऐं ऐं सौः चंडिकायै त्रिपुरायै न
मः॥ ॐ ३ ऐं ऐं सौः तालुमध्यमायै त्रिपुरायै नमः॥ ॐ ३ ऐं ऐं सौः कपालांकुरवासिन्यै त्रिपुरायै नमः॥ ॐ
ठः ठः ३ यथाशक्तिं जपित्वा रक्तपुष्पैः स्वशिरसि ऐं ईं सौः आत्मदेहाय नमः॥ इति गंधाक्षतैश्च समधा

संपूज्य धूपदीपौ निवेद्य तस्मिन् त्रैपुरे देहे ऐं ईं सौः इति वनिताक्षोभकरी महाकामकलां ध्याये।
ततः श्लोकशतन्यासानुसंधानेपठेत्। तत्र शक्तिरूद्रमयं देहं मदीयं त्रैपुरे कुरु देहि मे देवदेव वेशि
न्यंत्रिस्तम भी श्रितो मस्तकं मे गच्छादेवी ललाटं कुरुसुंदरी॥ नेत्रयुग्मं महाकाली करोतीर स्तु
कुंडली। कपाली कर्मगर्भे तु कपोलौ कमलावती॥ दंतान्नरस्तु चामुंडा चिबुकं मेरुवासिनी॥ ३॥ श्रम
धंकं ठदेशं च रक्षेन्मे भुवनेश्वरी॥ जिह्वां मरस्वती रक्षेत्तालुकं तालुवासिनी॥ ४॥ स्याद्वमे कपिला॰
स्कंधे स्कंधा ते कुलमालिनी॥ कुक्षौ विनायकी स्यात्तु जयानंदस्तनद्वये॥ ५॥ कंठकूपे महालक्ष्मीर्हृदये भै
रवी भैरवी॥ ब्रह्माणिना भिदेशे तु स्यात्तु ज्वालाबलीगुदे॥ ६॥ जिंगे लिंगप्रभा चैव सुंदिनी भेदमंडले॥ नाडी
चक्रे महावेगा इडादक्षिणे करे॥ ७॥ वामहस्ते महामाया विद्या हस्तांगुलीषु च॥ वैष्णवी वामपादे च स्या॰
त्तु चक्रायुधान्विता॥ ८॥ तथा दक्षिणपादांले रक्तपादासुरेश्वरी। पादांगुलीषु कौवेरी रोमकूपे महोज्ज्वला॥
९॥ मेदजीनरवमले तु वाराही मेदमंडले॥ जलेश्वरी जलस्थाने कामाक्षिका मम धर्मगा॥ १०॥ उड्डा॰

सौ॰र॰क॰

सौ.र.क.

नाभिलिंगांतेनासाग्रे पूर्णपीठगा॥ एष्वंशे जयादेवी अस्थिसंधिषु चर्चिका॥११॥ चर्मधारी त्वचायां तु स्था
तु नित्यं महायशा॥ रक्तमध्ये मनोन्तेव स्यात्तु मे हंसिनी शुभा॥१२॥ माहेश्वरी च कौमारी देहे ते स्यात्तु चां
गयोः॥ वामदक्षिणयोश्चैव धीराली कटिसंधिषु॥१३॥ देवी रक्षतु मे गात्रं मस्तके कुलकामिनी॥ पृ
थिव्यापस्तथा तेजो वायुराकाशमेव च॥१४॥ पंचभूतेषु भूतेशी सदा रक्षतु मे कुलं॥ रात्र्यं सदा तु मे
चंडी प्रजां चैव प्रजार्त्ती॥ माया ददातु मे नित्यं धनं धान्यं यशस्तथा॥१६॥ रणे राजकुले चैव शत्रुम
ध्ये महावने॥ रक्तनेत्रा महादेवी करोतु मम चिंतितं॥१७॥ समयासमयं रक्षेद्दिव्यां विद्यां कुलागम
मे॥ साधकानां जगन्नाथ भुक्तिमुक्तिफलप्रदा॥१८॥ धारणाः करोतु मे सिद्धिं त्रैलोक्यविजया सुखं
॥ वेताली या महाविद्या सा मे यच्छतु मंगलं॥१९॥ सप्तकोटिसहस्राणां मंत्राणां नायिका तु या॥ सा
मे सुरेश्वरी देवी सदा सिद्धिं प्रयच्छतु॥२०॥ त्रिकोणं च त्रिधावर्त्तं त्रैपुरं चक्रमुत्तमं॥ उल्कामुखी मु
खे स्यात्तु मार्त्तारी देहसंधिषु॥ भद्रकाली तु या विद्या सा मे स्यात्तु शिखामये॥२१॥ त्रिकोणं च त्रि

७२

धावर्त्तं त्रैपुरं चक्रमुत्तमं॥ मस्तके स्यात्तु मे नित्यं तस्यांते वकुरूपिणी॥२२॥ पूर्वोक्ता त्रैपुरी शक्तिः स्यात्तु
मे मन्मथे स्थिता॥ क्षोभयंति जगत्सर्वं मदिरानंदविह्वला॥२३॥ निवासं कुरु मे देहे सांप्रतं दिव्ययोगि
नी॥ ऐ ह्येहि त्वं महादेवि सिद्धियोगिनि मे कुले॥२४॥ शत्रूणां घातनार्थाय जंतूनां भोगदायिनी॥ महा
योगिनि देहस्मिन् सर्वदा निलयं कुरु॥२५॥ माहेंद्री च शिखा स्यात्तु योनिमध्ये गणेश्वरी॥ प्रेतासीना
म विख्याता करोतु कुशलं मम॥२६॥ डाकिनी पूर्वभागे च मम सौख्यं प्रयच्छतु॥ शाकिनी पश्चिमांगे
षु दक्षिणे चापि राक्षसी॥२७॥ वामभागे महामाया करोतु कुशलं मम॥ सास्मदीये शिरस्यात्तु सद
ति ष्ठतु भैरवी॥२८॥ या विशाला विशालाक्षी निर्मला मलवर्जिता॥ सा योगिनी महामाया स्यात्तु
श्री मस्तके मम॥२९॥ या कालकल्पिता काली कालरात्रीति कथ्यते॥ सा योगिनी महामाया स्या
तु श्री मस्तके मम॥३०॥ या निशाचरराजन्य पूजिता च निशाचरी॥ सा योगिनी०॥३१॥ या चार्ध्वके
शिनी नाम्ना मुक्तकेशी महाभया॥ सा योगिनी०॥३२॥ या वीरेति समाख्याता वीराणां जयदायिनी॥

को.र.ङ.

सायोगिनी०॥३३॥यामालिनी समाख्याता नासाग्रे विंदुमालिनी॥ सायोगिनी०॥३४॥याकंकालकरा
लंगी चंडकंकालकुंतला॥सायोगिनी०॥३५॥प्रचंडा चवीरूपाक्षी विरूपा विश्वरूपिणी॥सायोगि
नी०॥३६॥खट्वांगी कथ्यते या च रौद्री रुद्रेण पूजिता॥सायोगिनी०॥३७॥कलियोगिनी प्रसिद्धा च मा
लोके प्रथ्यते कलौ॥सायोगिनी०॥३८॥प्रेताक्षी कथ्यते या च फेत्कारोत्कटगर्जिता॥सायोगिनी०॥३९
धूम्राक्षी या समाख्याता शास्त्रेस्मिन्योगिनीमते॥सायोगिनी०॥४०॥घोररूपा महादेवी कथ्यते या कु
लागमे॥सायो०॥४१॥विश्वरूपा विशेषेण करोति च जगत्त्रयं॥सायो०॥४२॥भयंकरी समादिष्टा
यावोक्ता वैकुलागमे॥सायो०॥४३॥कपालमालिका प्रोक्ता योदेवी मुंडधारिणी॥सायो०॥४४॥भी
षणी भैरवी नाम या देवी भीमविक्रमा॥सायो०॥४४॥न्यग्रोधवासिनी या च कथ्यते च सुरार्चिता॥सा
योगिनी०॥४५॥भैरवी भीषणी या च भैरवाष्टकवंदिता॥सायोगिनी०॥४६॥प्रोच्यते दीर्घलंबोष्ठी म
हामाया महाबला॥सायोगिनी०॥४७॥खट्वांगी या महाशक्तिः संसारार्णवतारिणी॥सायोगिनी०॥

॥४८॥या समस्तेषु मंत्रेषु प्रोच्यते मंत्रवादिनी॥सा०॥४९॥कालघ्नी कथ्यते या च युगांते परमेश्वरी॥सा०॥५०॥
याह्लादिनि समाख्याता सुरासुरमहोरगैः॥सा०॥५१॥चक्रिणी गद्यते या च एकपादा त्रिलोचना॥सा०॥५२
या विश्ववाकुका देवी विश्वनाथप्रिया सदा॥सा०॥५३॥दर्शनेषु समस्तेषु विदिता भुवनेश्वरी॥सा०॥५४॥
कंटकोच्छेदनार्थाय शास्त्रे या कंटकी स्मृता॥सा०॥५५॥कीलकी कथ्यते या च सन्नद्धा महाबला॥सा०॥५६
संग्रामे या महादेवी महामारीति कथ्यते॥सा०॥५७॥यमदूतीति विख्याता या सुरासुरपूजिता॥सा०॥
५८॥करालिनीति या देवी महामाया महाबला॥सा०॥५९॥ललिता वा महाराज्ञी सर्वचक्रैकनायिका॥सा
६०॥नासाग्रे कौलिनी स्यात्तु मदनाक्षी तथा मुखे॥ओष्ठे घंटे कपाले च तालुके चापि हारिणी॥६१॥द्रा
॥विणी क्षोभिणी चैव स्तंभिनी मोहिनी तथा॥रौद्रकर्म महाघंटा डामरी त्वरिता मतिः॥६२॥ऐं क्रीं
श्रीं कुलमाता च काकदंष्ट्रि रधोमुखी॥कपालकुंडजा दीर्घा कपाली कुलगामिनी॥६३॥देवी र
क्षतु मे गात्रं मस्तके कुलमालिनी॥नमिरापस्तथा तेजो वायुराकाश मे वच॥६४॥पंचभूतेषु भूते

सौ॰र॰क॰ श्रीसदा रक्षतु मे कुलं ॥ राज्यं ददातु मे चैव [illegible] डीप्रजां चैव प्रजावती ॥ ६४ ॥ मायां ददातु मे नित्यं धन
धान्यं यशस्तथा ॥ रणे राजकुले चैव शत्रुमध्ये महावने ॥ ६५ ॥ रक्षते ग्राममहादेवी करोतु मम मचि
तितं ॥ समया मम पर स्रोहिंयां विद्याकुला शेभे ॥ ६६ ॥ साधकानां जगन्नाथ भुक्तिमुक्तिफलप्र
२२) दा ॥ द्विजटी त्रिजटी प्रोक्ता कंदली दरिचिला ॥ ६७ ॥ [illegible] विनता पर्वती [illegible] कौलाकमलाकमल
प्रभा ॥ मादिनी मदना भ्रावामे दारी मदनातुरा ॥ ६८ ॥ नीलमनीला एली नाम प्रेतसिद्धा विभी
षणा ॥ सुधा रस्नात चानिं स कांतिर्वृद्धिस्तथा स्तुतिः ॥ ६९ ॥ संध्यावती रतिः कांतिरत्ति निशे
परिपन्नते ॥ सुरनाथेति विख्याता नगरे नरदेवता ॥ ७० ॥ ग्रामदेवी सधिष्ठाची पीठे पीठेश्वरी
विदुः ॥ कावेरी नर्मदा चैव गंगेति यमुनोच्यते ॥ ७१ ॥ गोदावरि महापुराणे प्रोच्यते चाप्यरुं
धती ॥ त्रैलोक्येपि महादेवी स्त्रीनाम्नी या प्रकाशिता ॥ ७२ ॥ सा देवी रूपलस्यात्तु स्यात्तु सर्व
दयेमम ॥ सुवर्णरेखिणी प्रोक्ता विद्या सा प्रोच्यते किल ॥ ७३ ॥ निर्मलिनी तु जंगानां सा क

रोतु सुखं मम ॥ कुरुकुल्लेति विख्याता पद्मि राज सुखोद्भवा ॥ ७४ ॥ या विद्या सा महारूपा जिह्वाग्रे
स्यात्तु मे सदा ॥ ॐकारिणीति विख्याता देहे स्यात्तु सदा मम ॥ ७५ ॥ विद्यापहारिणी नाम कंठि
रूपविदारिणी ॥ मेरुंडा स्यात्तु मे कंठे तोतला स्यात्तु मस्तके ॥ ७६ ॥ तथा सुवज्ररेखापि मलेस्या
त्तु सदा मम ॥ जोगली विषनाशाय वाचां सिद्धिं करोतु मे ॥ ७७ ॥ सर्वसिद्धिकरी विद्या भुक्तिमुक्ति
फलप्रदा ॥ ७७ ॥ अहं ब्रह्मा अहं विष्णुरहं देवो महेश्वरः ॥ सर्वभूतनिवासोहं लोके या शक्तिचिंत
कः ॥ ७८ ॥ शक्तिमासेन पूतेन शरीरेण सुरासुराः ॥ प्रदत्ता देशमात्रेण आज्ञां कुर्वंतु मे सदा
७९ ॥ यत्किंचिद्योगिनीरूपं त्रैलोक्ये चास्ति शंकर ॥ तत्सर्वं तिष्ठते देहे शक्तिमासं प्रपासिते ॥ ८
कामिनी कुरुते वापि यान्या सा शक्तिनिर्मिता ॥ तां देवी दिव्यरूपस्थां संसारे त्रिपुरां विदुः ॥ ८१ ॥
नमोस्तु ते जगन्माता नमोस्तु भुवनेश्वरी ॥ नमो भोगप्रदे देवि नमो देवि महेश्वरि ॥ ८२ ॥ प्रकटा
गोपिताः सर्वा निर्वाणा भैरवी शिवा ॥ संत्रमा विजया हं सा स्तुभा मा मा जलदेवता ॥ ८३ ॥ यक्षिणी

मौ॰र॰क॰

चर्चकमा च तथा चाकाशगामिनी ॥ खेचरी चरिता कुंभी सर्वागमविवासिनी ॥८४॥ रंगिणी देवमे
ची च प्रसिद्धा मदिराजिका ॥ पूजिता सर्वसिद्ध्यर्थं शास्त्रेऽस्मिन्योगिनीमते ॥८५॥ स्थायिनी क
थ्यते सद्भिः सा वृंदावनवासिनी ॥ चतुःषष्ट्याश्रया देवी योगिन्यो येन चिंतिताः ॥८६॥ आधारे
जीयमाना तु सयोगी योगविद्भवेत् ॥ ललाटे मंडला स्यात्तु विरजा स्यात्तु मस्तके ॥८७॥ एका
क्षी दक्षिणस्कंधे वामे चैव त्रिलोचना ॥ जयंती स्यात्तु मे कुक्षौ कंठे कंदर्पकुंडली ॥८८॥ मालि
नी लिंगसंधौ च हृदि स्यात्तु समाधिनी ॥ अंबिका पृष्ठवंशे च पार्श्वयोः स्यात्तु मेदिनी ॥८९॥ दिगा
जांगीकराग्रे च नागेंद्री नखसंधिषु ॥ व्याघ्री चक्री च जंघायां स्यात्तु पादतले महा ॥९०॥ अम
ता शंखिनी रंध्रे लोचने च विलासिनी ॥ कालिंदी मूलजिह्वा च कर्णे रक्ता तु रंगिनी ॥९१॥ जांगली
जांगलं रक्षेद् दृस्थिनी चास्थिसंधिषु ॥ मज्जनी देहमज्जां तु शुक्रे शुक्रेश्वरी तथा ॥९२॥ त्वचं रक्षतु
वेताली मम रोमप्रकाशिनी ॥ उद्दालकु रुते शांति सदैव मम विग्रहे ॥९३॥ पादापादतले स्यात्तु

पंक्त्यां रक्षतु पंक्तिनी ॥ चोराग्निराजसर्पेभ्यो भये रक्षतु भैरवी ॥९४॥ दुष्टानां दृष्टिबंधे तु सदा करोतु बंधि
नी ॥ चोपेरी नामया विद्या सा मे करोतु मंगलं ॥९५॥ मर्कटी घंटकर्णी च हनुमंती च रावणी । घुर्घुरी की
र्त्तिविख्याता वेदविद्या चतुष्टयं ॥९६॥ चेटका मानदा विद्या कौमारी चरणावजी ॥ विप्रराजैस्तु ना
नामतुल्ला सेतानरूपिणी ॥९७॥ मूलाकाशस्थिता हंसी पातकी दजनोद्धता ॥ दशैता मंत्रविद्याः स्त
तिष्ठंतु मम मस्तके ॥९८॥ सुनामे चाग्रतः स्यात्तु जोहिता स्यात्तु दक्षिणे ॥ वामांगे रतिका जेच पश्चिमे
स्यात्तु स्पर्शखला ॥९९॥ शिखायां शंखिनी रक्षेत् कंठे वस्त्रवती शुभा ॥ कवचे कवचांगी च नेत्रे नेत्र
कृतोत्सवा ॥१००॥ तिष्ठंति योगिनीरूपा सैलोक्ये सचराचरे ॥ योगिन्यो यास्तु ताः सर्वा देहे कुर्वं
तु मे च पु ॥१॥ पुत्राणां च तथा देयं भक्तानां च विशेषतः ॥ शाकिन्या समिदं देयं न देयं यस्य कस्यचि
त् ॥२॥ मनुष्याणां महीलोके चिंतितार्थफलप्रदं ॥ यः करोति मम न्यासं सपोडान्यासादिकं प्रभो ॥३॥
समीवेच्छ कि रूपो वै चैलोक्ये न्मस्त्वनस्तमः ॥ शाकिन्या सकृते जीवे यः कश्चित् खेदको भवेत् ॥४॥

सौ·र·क·

कर्मणा मनसा वाचा तस्य पातो न भविष्यति ॥ इति शक्तिन्यासः ॥ अथ श्रीषोडशार्णा मन्त्रविद्यान्यासः ॥ म
सयथा ॥ तत्र ब्रह्मरंध्रे श्रीषोडशाक्षरी श्रीविद्यां दक्षहस्तस्य मध्यमानामिकाभ्यां प्रणवादिनमोंताम्वि
न्यस्य प्रदीपकलिकाकारां स्ववक्त्रसुधा षोडशार्णा महासौभाग्यदां ध्यात्वा पुनस्तामुच्चार्य वामहस्तेन
सौभाग्यदं डिंडीमुद्रां वामकर्णप्रदेशे भ्रामयित्वा महत्सौभाग्यं मे देहि परसौभाग्यं दद्यामीति वि
भोगदेशे मूर्धादि पादांतं विन्यस्य तां पुनरुच्चार्य ममरैश्वर्यं त्रियहामीति मत्वा रिपुजिकाग्रहां म
ज्ञां पादमूले विन्यस्य तां पुनरुच्चार्य त्रैलोक्यस्याहं कर्त्रैति ध्यायन् स्वित्रिखंडया मुद्रया ललाटे न्य
सेत् ॥ ततः पुनरुच्चार्य वदने वेष्टनत्वेन विन्यस्य पुनरुच्चार्य दक्षिणकर्णादि वामकर्णांतं वेष्टन
त्वे मुखेन विन्यस्य पुनरुच्चार्य गलोर्ध्वभागमारभ्य मुखांतं विन्यस्य पुनस्तां प्रणवसंपुटितामापा
दतलमस्तकान्तं दादिहृदयांतं च विन्यस्य योनिमुद्रां बध्वा मूलविद्यया मुखे क्षिप्त्वा तयैव प्रणमेत्
॥ इति श्रीविद्याप्रणवन्यासः ॥ अथ संमोहनन्यासः ॥ तत्र षोडशार्णा स्मरं त्रैलोक्यमोहनरूपं वर्णं ध्याय

२१

त्तनामिकांगुष्ठेन परितो भ्रामयित्वा श्रीषोडशार्णा तारादिनमोंतां मंगुष्ठानामिकाभ्यां ब्रह्मरंध्रे विन्य
स्य मालिवं ध्वयेल्लाटे च न्यसेदिति संमोहनन्यासः ॥ अथ श्रीषोडशार्णवर्णैः संहारन्यासः ॥ तत्र
पादयोः ४ प्रथमबीजं नमः ॥ जंघयोः ४ द्वितीयं ॥ जान्वोः ४ तृतीयं ॥ कट्योः ४ चतुर्थं ॥ लिंगे ४ पंचमं ॥ पृष्ठे ४
षष्ठं ॥ नाभौ ४ सप्तमं ॥ पार्श्वयोः ४ अष्टमं ॥ स्तनयोः ४ नवमं ॥ अंसयोः ४ दशमं ॥ कर्णयोः ४ एकादशं ॥ ब्र
ह्मरंध्रे ४ द्वादशं ॥ वदने ४ त्रयोदशं ॥ चक्षुषोः ४ चतुर्दशं ॥ कर्णयुग्मोः समीपे ४ पंचदशं ॥ कर्णे
वेष्टनयोः ४ षोडशं बीजं ॥ इति षोडशार्णैः संहारन्यासः ॥ अथ षोडशार्णैः सृष्टिन्यासः ॥ तत्र
ब्रह्मरंध्रे ४ प्रथमबीजं नमः ॥ ललाटे ४ द्वितीयं ॥ नेत्रयोः ४ तृतीयं ॥ कर्णयोः ४ चतुर्थं ॥ घ्राणयो
ः ४ पंचमं ॥ गंडयोः ४ षष्ठं ॥ दंतयोः ४ सप्तमं ॥ ओष्ठयोः ४ अष्टमं ॥ जिह्वायां ४ नवमं ॥ मुखांतः ४ द
शमं ॥ पृष्ठे ४ एकादशं ॥ सर्वांगे ४ द्वादशं ॥ हृदये ४ त्रयोदशं ॥ स्तनयोः ४ चतुर्दशं ॥ कुक्षौ ४ पंचद
शं ॥ लिंगे ४ षोडशं बीजं नमः ॥ प्रणवचित्ताशादि सर्वत्र इति वर्णान् विन्यस्य समस्त षोडशार्णा वि

सौ.र.क. यथाव्यापकं विन्यसेदिति सृष्टिन्यासः॥ अथ स्थितिन्यासस्तद्वर्णैः। तत्र करद्वयांगुष्ठयोः४ प्रथमं बीजं न
मः। एवं द्वितीयं४ तर्जन्योः॥ मध्यमयोः४ तृतीयं। अनामिकयोः४ चतुर्थं। कनिष्ठयोः४ पंचमं। ब्रह्मरं
ध्रे४ षष्ठं। मुखे४ सप्तमं। हृदि४ अष्टमं। नाभ्यादिपादांते४ नवमं। कंठादिनाभ्यंते४ दशमं। ब्रह्मरं
ध्रादिकंठांते४ एकादशं॥ पादांगुष्ठयोः४ द्वादशं। तर्जन्योः४ त्रयोदशं। तन्मध्यमयोः४ चतुर्दशं। म
तदनामयोः४ पंचदशं। तत्कनिष्ठयोः षोडशं बीजं नमः इति स्थितिन्यासः॥ अथ षोडशार्णाया :
पंचविधवर्णन्यासः॥ तत्र शिरसि४ प्रथमं बीजं नमः। एवं मुखे४ द्वितीयं। दक्षनेत्रे४ तृतीयं।
वामनेत्रे४ चतुर्थं। दक्षकर्णे४ पंचमं। वामे४ षष्ठं। दक्षनासायां४ सप्तमं। वामायां४ अष्टमं। द
क्षगंडे४ नवमं। वामगंडे४ दशमं। ऊर्ध्वोष्ठे४ एकादशं। अधरोष्ठे४ द्वादशं। मुखाभ्यंतरे४ त्रयो
दशं। ऊर्ध्वदंते४ चतुर्दशं। अधोदंते४ पंचदशं। वदने४ षोडशं बीजं नमः॥ इत्येकः प्रकारः। तत
तः शिरसि४ प्रथमं बीजं नमः। सीमंते४ द्वितीयं। एवं भाले४ तृतीयं। भ्रूद्वये४ चतुर्थं। नासायां४

पंचमं। वदने४ षष्ठं। दक्षबाहुमूले४ सप्तमं॥ तन्मध्यसंधौ४ अष्टमं। तन्मणिबंधे४ नवमं॥ तदंगुलिमूले४
दशमं। तदग्रे४ एकादशं। वामबाहुमूले४ द्वादशं। तन्मध्ये४ त्रयोदशं। तन्मणिबंधे४ चतुर्दशं। तदं
गुलिमूले४ पंचदशं। तदग्रे४ षोडशं। इति द्वितीयः प्रकारः। ततः शिरसि४ प्रथमं। एवं ललाटे४ द्विती
धाय प्राणप्रतिष्ठां कृत्वा वरदाभयपुस्तकाक्षमालापाशांकुशधनुर्बाणकपालकमलाख्या दशमुद्राः प्रदर्श्य। अमन्द
भ्रमरनीलाभधम्मिल्लामलपुष्पिणीं। ब्रह्मरंध्रस्फुरच्चिन्नमुक्तालेखाविराजितां। मुक्तालेखालग्नरत्नमुकुटां तिलको
ज्ज्वलां विशुद्धमुक्तावज्राद्यां चंद्रलेखाकिरीटिनीं। अमन्दभ्रमरनीलाभनेत्रत्रयविराजितां। स्वर्णमालान्वहारत्नकुंड

लालंकृतोपरां। मुक्ताकारस्फुरन्मुक्ताहारभूषणभूषितां। ग्रैवेयांगदपद्मालीस्फुरत्कोटिविराजितां। गंगातरंग
कपर्दस्मुक्तां वरविभूषितां। श्यामवदनश्रीमहदशबाहुवल्लीविराजितां। कंकणादिलसद्भूषामणिबंधलसत्प्रभां
॥प्रवालजलिताकारपाणिपद्मवशोभितां॥ वक्षोवैदूर्यमुक्तालीमेखलां विमलप्रभां। रक्तौमलदलाकारपादपद्म
वशोभितां। नक्षत्रमालासंकाशमुक्तासंचारमंडितां। वामेन पाणिनैकेन पुस्तकं चापरेण तु॥ अभयं च प्रयच्छंती
साधकाय वरानने। अक्षमालां च वरदं दक्षपाणिद्वयेन दधती। चिंतयेद्देवीं वरसौभाग्यदां कृपां। क्षीरकुंदें
दुधवलां प्रसन्नां संस्मरेत्प्रिये। इति ध्यात्वा। बालाविद्यामुच्चार्य भगवति एतत्ते आसनं नमः। एवं एतत्ते अर्घः स्वधा। ए
तत्ते पाद्यं नमः। एतत्ते आचमनीयं स्वधा। एष ते मधुपर्कः स्वधा। आचमनीयं स्वधा। एतत्ते स्नानं नमः। पुनराचमनी
यं स्वधा। एतत्ते वाससी नमः। पुनराचमनीयं नमः। इमानि ते भूषणानि ते नमः। एष ते गंधो नमः। इमानि ते पुष्पा
णि वौषट्। इति पुष्पांतैरुपचारैः संपूज्य प्राग्योनिमध्ययोरंतराले ऐं परगुरुभ्यो नमः। ऐं अपरगुरुभ्यो न
मः। ऐं परापरगुरुभ्यो नमः। इति गुरुपंक्तित्रयं विभाव्य संपूज्य योनिमुद्रां बध्वा हृदि मुखे भ्रूमध्ये ललाटे ब्रह्म
रंध्रे च संस्थाप्य प्रदर्शयेत्। तत्र त्रिकोणस्य वामकोणे ऐं रत्यै नमः। दक्षिणे क्लीं प्रीत्यै नमः। अग्रे सौः मनोभवा

सो॰ र॰ ५ येनमः॥ इतिसंपूज्याष्टदलकेसरेषुअग्नीशनिर्ऋतिवायुकोणेषु भंगचतुष्टयं देव्यग्रे नेत्रं तदग्रादिचतुर्दिक्षु स्त्रमि
प॰ निप्रादक्षिण्येन षडंगानि संपूज्याष्टकोणत्रिकोणंतरालेषु देव्यग्रमारभ्य चतुर्दिक्षु प्रादक्षिण्येन द्रां शोषिण्यै न-
मः॥ द्रीं मोहिन्यै नमः॥ क्लीं वशीकरण्यै नमः॥ ब्लूं आकर्षिण्यै नमः॥ अथ सः संमोहिन्यै नमः॥ एवं वस्यानेषु। क्लीं का
माय नमः॥ क्लीं मन्मथाय नमः॥ ऐं कंदर्पाय नमः॥ ब्लूं मकरध्वजाय नमः॥ स्त्रीं मीनकेतवे नमः॥ इति संपूज्य
पूर्वादिषु ष्टसु योनिषु ऐं क्लीं ब्लूं स्त्रीं सः सुभगायै नमः। एवं २ भगायै नमः॥ ४ भगसर्पिण्यै नमः॥ ४ अनंगमालिन्यै नमः॥ ४
अनंगायै नमः॥ ४ अनंगकुसुमायै नमः॥ ४ अनंगमेखलायै नमः॥ ४ अनंगमदनायै नमः॥ इति संपूज्याष्टदलेषु
देव्यग्रादि प्रादक्षिण्येन। अं असितांगभैरवाय नमः॥ आं ब्राह्म्यै नमः॥ इं रुरुभैरवाय नमः॥ ईं माहेश्वर्यै नमः॥ उं चंड-
भैरवाय नमः॥ ऊं कौमार्यै नमः। ऋं क्रोधभैरवाय। ॠं वैष्णव्यै। लृं उन्मत्तभैरवाय। ॡं वाराह्यै। एं कपालीभैरवा
य। ऐं इंद्राण्यै। ओं भीषणभैरवाय। औं चामुंडायै। अं संहारभैरवाय। अः महालक्ष्म्यै नमः॥ इति संपूज्याष्टद
लांतरेषु कामरूपाय। मलयाय। कोल्लगिरये। कुलांतकाय। चौहाराय। जालंधराय। उड्याणाय। देवीकोटा
य नमः इति अग्रादि प्रादक्षिण्येन संपूज्य बहिर्वृत्ते देव्यग्रादि प्रादक्षिण्येनाष्टदिक्षु हेतुकाय नमः॥ त्रिपुरांतका

य। वेतालाय। अग्निजिह्वाय। कालांतकाय। कपालिने। एकपादाय। भीमरूपाय। ईंशेशयोर्मध्ये हाटकेश्वराय॥ निर्ऋतिव
रुणयोर्मध्ये मलयाय इति संपूज्य तद्बहिः पूर्वादिदशदिक्षु इंद्रादीं स्तदायुधानि च सर्वं च क्रामद्बहिः संपूज्य धूपदीपनैवे
द्यानि समर्प्य तदभेदबुध्या हृत्स्थे हेतु समर्प्य स्वदेहे प्राणवल्लभा श्रीकंठादिमातृका विन्यस्य शिवो। ॐ हौं कंध ईं स ४ शिवा
य नमः इति दशार्णविद्यया संपूज्य शिवाग्रे ॐ ईशानाय नमः॥ तत्पूर्वभागे ॐ तत्पुरुषाय नमः॥ दक्षिणे ॐ अघोराय नमः॥
वामे ॐ वामदेवाय नमः॥ तत्पृष्ठे ॐ सद्योजाताय नमः॥ इति संपूज्य एतेषु वस्याने[illegible] निवृत्यै। प्रतिष्ठायै। शांत्यै। शांत्यती ७
तायै। इति संपूज्य क्लों कौं मित्यादि नाषडंगे बिंदुं स्वमुखयोर्मध्ये। मलविद्याम् उच्चार्य नंदिकेश्वराय नमः इति संपूज्य तन्म
ध्ये कारणं दत्वा नंदवशेषास्वादनेन स्वयं तद्रूपेण ध्यात्वा सपुरुषः तस्यास्तनयोर्मध्ये स्पर्शनं। ऐं क्लीं चपले चपलचित्ते रेतो
मुंच मुंच ब्लूं क्लीं स्त्रीं हरब्लें इति द्वाविंशाक्षरं विद्यो वारत्रयं जपित्वा तस्याः हृदयकमले प्रात्युक्तानंगकुसुमाद्यष्टशक्तिभिः परि
वृतां कामेश्वरीं रक्तवर्णां रक्तमाल्याभरणानुलेपनवसनां जंबूलनामिक्षुकोदंडपुष्पबाणधरां चेत्यशेषरयो ध्यायन् क्लीं
कामकलान्तिके रेतो मुंच मुंच स्वाहा॥ इति कामेश्वरीमंत्रं तस्याः हृदि विन्यस्य। पशुसंमोहने देवि स्वभक्तानंददायिनी। विं
दुरूपे परानंदे रेतः श्रीघृतु मो चय॥ इति हृदयं स्मरणं पठित्वा ऐं स्वों स्त्रीं ब्लूं ब्लूं॥ इति योनिमुद्राबीजं स्मरणात्रदीयमला

सौ・र・द・
प・

धारे देशे शक्तिस्तोमं चिंतयित्वा पुनस्त्वां शक्तिं मूलाधारादुद्गच्छन्तीं नीत्वा ऐं क्लीं सौः इति स्तोभित्रितयीविद्यां स्मरन् हृदये शक्ति-
स्तोमं विचिंत्य पुनस्तां शक्तिं भ्रूमध्यं नीत्वा तत्र ऐं ह्रीं ऐं क्लीं इति द्वाविंशतिविद्यां स्मरन् तथा ज्ञानचक्रे च रमणकुशलया स-
कलकमलकाननविकासी नूतं चिंतयन् पुनस्तां ब्रह्मरंध्रं नीत्वा परामृतकलास्रावपूरेण सह पुनर्मूलाधारमानी-
य ऐं गुरवे र श्रीं ह्रः ऐं क्लीं श्रीं क्लीं फ्रीं इति सर्वांगसुंदरीविद्यां नूतनं स्मरन् स्वयं परमानंदनिर्भरमनाः स्वच्छयोगं कृत्वा किय-
त्क्षणं न किंचिदपि चिंतयेत्। इत्थं निरालंबमुद्रां ततस्तत्स्मरकेतनेऽपि चिंतनीया। ततस्तस्याः शिरसि वदने हृदये गुह्ये
पादयोश्च ह्रं ह्रं ह्रूं ह्रं ह्रं इति पंचरत्नविद्यां निविश्य तदरांगांकुरं दक्षिणकराग्रेण गृहीत्वा वामकराग्रेण मन्त्रविद्या-
या वाग्भवकूटमुच्चरेन् तद्योनिपंकजे चित्स्वरूपां तत्पंकजमुखमानुमदहस्तकोटिमनुलेशीतांशुवच्छीतलेयां कोशारुणपद्म-
रागरुचिरं दृष्ट्वा वरांततः। कस्तूरीघुसृणेंदुचंदनयुतं गोरोचनालेपितं ध्यात्वा तत्परात्परा। कलां तन्मध्यगां चिंतयेदिति।
तत्पंकजं तन्मध्ये परकलां च ध्यात्वा तत्र वाग्भवकूटमवरोपरि भवदाभ्यां सरे कामराजकूटं च विलिख्य गंधास्ततर कल-
रवीप्रेक्षिः सेप्सवरांगस्य वामभागे वक्ष्यमाणगुरुपंक्तित्रयमभ्यर्च्य तस्या वामपादांगुष्ठे शां भवेन नमः। दक्षिणपादां-
गुष्ठे शं भवेन नमः। इति मन्त्रविद्यया संपूज्य तस्याः नाभिदेशे बलिनाथे भोग मइति तर्जिदेवताश्च संपूज्य तां प्रणम्य तदास्य-

१३२

पानस्वयमस्तु ऊर्ध्वः संतानाविधासनपरिष्वंगकरजरदनादि विविधविचित्रलीलाविशेषैस्तां सम्यक् परितोषय-
न् तदंगजसदनमध्यनंदनात् तदंगनिष्पीडनतन्निर्गततत्वामृतं सुगंधकुसुमेनोद्धृत्य कलशविशेषार्घ्यपात्रे पुन-
र्जविप्रयासं योजयतद्वरं देवतुनाप्रस्तावनहेतुकलशे निक्षिप्य तां प्रणम्य भोजनतांबूलवसनाभरणदक्षिणाप्रदा-
नैः परितोष्य स्वात्मानं कृतकृत्यं मत्वा श्रीगुरुं प्रणम्य पीठं प्रजामारभेत्॥ तत्र तत्वस्तोत्रमध्यमत्स्यादिविंदुशोषो
देवीयामले। कुंडोद्भवामृतं देवि उत्तमोत्तममेव च। उत्तमं रजवीर्याणि मध्यमं केवलं रजः। अधमं पौरुषं वीर्यं तथा च
त्वाधमाधमे। इति। अथैतद्यागस्य प्रशंसा देवीयामले। ईश्वर उवाच। द्वितीयागविधिं वक्ष्ये कौलधर्मेषु मोत्तमं॥ तस्यानु-
ष्ठानमात्रेण स्वयं ब्रह्मत्वमाप्नुयात्॥ संतिनानाविधा धर्मा लोके किंतु मुमुक्षुकप्रदाः॥ तत्सारं तु समालोक्य तथा सर्वमंत्रसं-
यदं॥२॥ तन्मध्ये सारभूतं च सर्वधः प्रलयकारकं। न कस्यापि वरारोहे प्रोक्तवान् त्रिदशेष्वपि॥३॥ द्वितीयागे कृते मंत्री
सर्वज्ञो जायते ध्रुवं॥ ततस्तु पुनरावृत्तिः कल्पकोटिशतैरपि॥ देवायक्षाश्च गंधर्वा ऋषयश्च मुनीश्वराः॥ ब्रह्मवि-
ष्णुमहेशाद्यास्तथा चपितृदेवताः॥४॥ द्वितीयागविधिं कृत्वा तत्रसदमवाप्नुयुः विधिवत्तुष्टती कृत्वा द्वितीयागं तु
पार्वति॥६॥ कृतकृत्यो न संदेहः सुंदरी मुप्रसीदति॥ येषां वंशे प्रजायेतेनरतीयागो महेश्वरि॥ ते धन्यास्ते समस्त्वा

सौ॰ र॰ कं॰ र्घासितेक्षणाः सुहृदः सदा॥ कायेन मनसा वाचा सर्वं तन्न प्रकाशयेत्॥ सुते पत्नि शिरोदघ्नान्तरेयमिदमुत्तमं॥ कुर्यात्स्वय
प॰ त्नतश्चैव दूतीकायजनं प्रिये॥ येः कृतं यजनं देवि तस्ते रिष्टाः कृता वोरिवला॥ सर्वतीर्थमयः प्रोक्तः सर्वदेवमयो भवे
त्॥ पुरश्चर्यादिसफलं लभते नात्र संशयः॥ अश्वमेधसहस्राणि वाजपेयशतानि च॥ आसमुद्रां च धरणीं दत्त्वा तेन
रु महेश्वरि॥ मेरुमंदरतुल्यानि सुवर्णान्यर्पितानि वै॥ गोकोटिदानाद्यत्पुण्यं तत्पुण्यं जायते प्रिये॥ तस्मात्सर्वप्रयत्नेन
न दूतीयागं समाचरेत्॥ एतत्संपूर्णदं भद्रे सर्वारिष्टप्रशामकं॥ यदनुष्ठानमात्रेण सर्वमाचरितं भवेत्॥ शा
क्तिप्रजाय कर्तव्या विधिवद्भक्तिसंयुते॥ अथ दूतीं प्रवक्ष्यामि लक्षणैश्च सुंदरि॥ अचंचला सलज्जा च कुलजा मदघू
र्णिनी॥ पटुः सुशीला प्रियवाक् गुरुशुश्रूषणे रता॥ दयाधर्मरता शांता हितदा सुरवरूपिणी॥ रूपयौवनसंपन्ना नि
त्यज्ञा मंत्रतत्परा॥ सदा तुष्टा सुपुष्टांगी सुंदरी मानिनी शुचिः॥ नातिकृष्णा च दीर्घा च चारुसर्वांगसंयुता॥ दीर्घ
केशी विशालाक्षी सुवृत्तसुस्पष्टनासिका॥ पूर्णगंडकपोला च रक्तोष्ठी च सुदंतिका॥ वर्तुलानना रंजगौरा च सुहृत्तुः
कंबुकंठिनी॥ सुबाहुवल्लीयुक्ता च वक्त्रपीनपयोधरा॥ कृशमध्या सुनाभिश्च आद्रुरुस्तंभातिमांसला॥ सरत्तांगु १८
लिकायुक्ता सर्वलक्षणसंयुता॥ कायेन मनसा वापि स्वार्थलौल्यविवर्जिता॥ एतानी यान्प्रयत्नेन पंचविंशतिल

क्षिका॥ अप्रसूता विशेषेण श्यामा चैवोत्तमा वता॥ श्यामालक्षणं तु कामशास्त्रे॥ स्निग्धनखनयनदशनानि रतुशया मानिनी स्थिर
स्नेहा॥ मृदुस्पर्शा शिशिरमांसलवरांगविवरांगना श्यामेति॥ अतऊर्ध्वं न प्रज्ञाता दिना जापा परमेश्वरी॥ पूजिताश्चैव वरारोहे तत्पूर्णफलं
निष्फलं भवेत्॥ अर्चनेषु प्रयोक्तव्याः कामिमो भक्तिचेतसः॥ सा यदा रजसंयुक्तास्ततः प्रोक्ता महाफला॥ आत्मीया च परा चैव
व पुष्पवंतीं प्रपूजयेत्॥ तत्र देषपरो मर्त्यो दारिद्र्यं समवाप्नुयात्॥ अथ पूजाफलं वक्ष्ये उत्तरोत्तरतोत्तरं॥ स्वशक्त्यां त्र्ययुतं पुण्यं
परशक्तिप्रपूजने॥ ततो वेश्याधिका ज्ञेया रजकी च ततोऽधिका॥ रजक्याः स्तु रकी श्रेष्ठा ततस्तु रकाचर्मकारिणी॥ ततोऽधिकतरा प्रो
क्ता देवि नारी वरानने॥ ततोऽधिकं समं तात चंडाली च ततोऽधिका॥ ततो मातंगिनी श्रेष्ठा मातंग्याः पुल्कसी तथा॥ पुल्कस्याश्च
स्तृताम्रेष्ठा ततो लिंसुरतीस्मृता॥ सुरंती परतः प्रोक्ता शीतिवत्सनुकारिणी॥ तस्याः परमेशानि उन्मत्ता शुभलक्षणा॥ समयाचा
रसंपन्ना पंचशाभयवर्जिता॥ विदग्धा च प्रसन्ना च धैर्यस्वातंत्र्यसंयुता॥ एवं गुणसमायुक्ताः पूजयेत्सर्वयोषितः॥ आत्मी
या च परा चैव शक्तिर्मन्त्रमहेश्वरी॥ मंत्राधिदेवता बुध्या पूज्या सर्वोपचारकैः॥ विविधैः फलतांबूलवस्त्रालंकारहेमभिः॥ संप्र
ज्यविधिवद्भक्त्या च कुदेहं तु प्रदापयेत्॥ संभोगवासनां त्यक्त्वा यः कुर्याच्छक्तिपूजनं॥ स दारिद्र्यमवाप्नोति नारकी च भवेद्ध्रुवं॥ पर
मानंदरूपेण देहभावविवर्जितः॥ शक्त्याय कुर्याद्देवेशि न दुःखे शंभवी स्वयं॥ तदाज्ञा तु प्रकर्षव्यात दाश्रेयः प्रवर्तते॥ शक्तानां

सो॰ र॰ कु॰
१॰

कोमंत्री न पश्येदेव निरर्थकं॥ कुतेनत्रोपहास्यादि कुशील वर्ति नामपा॥ तस्मात्सर्वप्रयत्नेन तदा कर्त्तु समाचरेत्॥ व्यंगांगी वीरु
तांगी चकाणाक्षी बधिरा तथा॥ मंडली विधवा भृष्टा प्रलापिस्वर्तभाविणी॥ अदीक्षिता भक्तिहीना गुरुसेवाविवर्जिता॥ द्र
षकी समयभ्रष्टा चो शक्तिं तु विचारिणी॥ वृद्धातुरा वक्रमुखी क्रोध दुर्गंधकस्तना॥ सदा निष्ठुर वाणी च अनाचारा च काकवा
क्॥ दीर्घदंता च लंबोष्ठी शुष्कस्तननितंबिनी॥ रुक्ष वर्णातिमलिना रुक्षा विकलचेतना॥ महास्थूलातिरोगार्त्ता प्रलंबितपयो
धरा॥ इष्टनासिकनेत्रा च शुष्कांगी चोर्ध्वकेशिनी॥ कनिष्ठा क्रोधदंता च सदा स्वार्थसमन्विता॥ कुष्ठिनी चैव हीनांगी पंगुवधा
चतुराजसा॥ श्वेतांगिनी रोद्रविंबा छागयोनिः पिशाचिका॥ मतिभ्रष्टातिविकला अतिदीर्घातिकुब्जिका॥ एतल्लक्षणसंयुक्ताः॥
शक्तिर्यत्नेन वर्जयेत्॥ विशेषतः प्रयत्नेन विधवाः परिवर्जयेत्॥ शक्तिपात्रं न दातव्यं विधवायै कदाचन॥ अज्ञानाद्यो भवतो
मोहाद्दत्ते पात्रं तु निष्फला॥ तस्मादिति प्रकर्त्तव्या लक्षणोक्तानु पार्वतीति॥ तथा ब्रह्मयामले॥ नारदउवाच॥ सर्वज्ञ जग
तां नाथ श्रोतुं कौतुकं हि श्रुतिचोदितं॥ मातंगी रजनं तत्र कथं मुक्तिप्रदायकं॥ अर्चने पूजिता वेश्या वेश्या सा तु रजस्वला॥ रज
स्वला च मातंगी सा द्रुती सर्वमंगला॥ इति श्रोतुं त्वया सर्वं निशानी तद्विपर्ययतः॥ तव वाक्यमनं श्रुत्वा तेन हृदपितामह॥ ब्र
ह्मोवाच॥ मा कुरु पुत्र संदेहो वेदोक्तं शास्त्रमुत्तमं॥ अस्ति सर्वज्ञ कल्पोऽसौ मतंगो मुनिसत्तम॥ वर्णाश्रम प्रतेव्यसतप

१२४

श्चचार ह॥ तेन प्रीता महादेवी देवानां हितकारिणी॥ वरं वृणीष्व भगवन् यास्मापि तव वांछितं॥ तच्छ्रुत्वा द्विजवर्यस्तां प्रत्या
चे धर्मसाधनं॥ हे देवि जगतां मातः प्रीता चेद्यदि सा प्रति॥ अपश्य तां समासाद्य मत्कुले जैव मे कुरु॥ इत्यर्थ मुनिश्रेष्ठेन
न यामास तां शुभां॥ श्यामलांगी चारुवदनां वीणा शुक समन्वितं॥ सारिका ज्ञानसंपन्नां पद्मालोकरां बुजैः॥ धारयंती विशा
लाक्षीं शंखताटंकशोभिनीं॥ ६॥ स्वाव भवन्महादेवी मतंगकुलनंदिनी॥ मातंगीति तदा देवी विख्याता वरदायिनी॥ लो
विलोक्य सदा शंभुर्ईतीच चक्रे सुलक्षणं॥ त्रिपुरं जेतु कामेन योनिरूपा तदा कृता॥ पूजालीला स्थिता देवी रजो ख्रीकृतानि
ष्टला॥ तदा दृष्ट्वा रजो नृत्यान्तां भद्रेशं करप्रियं॥ तदा प्रभृति संजातो ह्रनियागो मनोहरः॥ प्रणवेन तदा शंभुस्तया सार्द्धं र
तं भजेत॥ प्रणवो लक्षणं मंत्रं मातंगाख्यं विनिर्मितं॥ सर्वसौभाग्यजननं मा जा मंत्रमनन्तदा॥ रमा वाग्निपदं दिव्यं मनिष्टं लोकरंजनं
॥ मातंगी मंत्रमतर्थमन्यत्प्रतिपादकं॥ आद्यं तत्र समासादेवी तस्मात् ख्याता तदंतजा॥ मातंगी भंत वर्णस्यात् तदा सा अंत्यजा भवेत्
॥ अंत्यजानां द्विजानां च चक्रे ऐक्यं प्रशस्यते॥ सा देवी सर्ववर्णानां वरं दत्वा निरुत्तरं॥ कृत्वा संकेतसमयं चक्रे मातंगमुत्तमं॥ तदो
षः सर्ववर्णानामिति दत्वा वरं तदा॥ न दोषं तत्र विज्ञेयं सर्वेषां श्रुतिचोदितं॥ देवी मुद्रीश्यमो सार्द्धं कृतं यद्दोषवर्जितं॥ एत
च्छास्त्रमिदं दिव्यं न वाच्यं श्रुतिचोदितं॥ अंत्ययागमिदं ज्ञेयं बहिर्यागं च वैदिकं॥ मंत्रं तंत्रं समायुक्तं तद्द्वयं ब्रह्मबोधकं॥ चक्रसं

सौ॰र॰क॰
प॰

केतसमयंसर्वतुष्टिप्रकाशितं॥गोपनीयंप्रयत्नेननवाच्यंपशुसंनिधौ॥स्पर्शनंकामदाभागसस्मेतन्नमयोदितं॥मातंगी
पूजनंश्रेष्ठंदूतीयागेमनोहरे॥योनिपूजांविनापूजाकृताअप्यफलाभवेत्॥स्पृष्ट्वाकेनापिसर्वज्ञःसमवेद्विगतामयः॥आ
पुरारोग्यविभवानमितंलभतेनरः॥अनेनैवविधानेनविप्रानैश्चिर्विघ्नोभवेत्॥पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनं॥
मातंगीशक्तिमभ्यर्च्यतयासाकंसमर्चयेत्॥मातंगीमन्त्रयोपेतासर्वकामार्थसिद्धये॥शाल्मलीशाकेसदाप्रभ्रामातंगीमंत्र
देवता॥सादेवीशक्तिहीनातुनददातिमनोरथं॥निःशंकांनिर्मलांतन्वींश्यामांचारुपयोधरां॥कौलिकान्वयसंभूतांदी
क्षितांक्रोधवर्जितां॥दीक्षितांकौलिकेयोगेसुशीलांचदृढव्रतां॥त्रिंशद्वत्सराधस्थांषोडशाब्दाधिकामपि॥पूजयेत्परयाभक्त्यातम
स्यायोनिंसुनिर्मलां॥योनिमध्यगतांदेवींकालरात्रिमनुस्मरेत्॥तत्रभोगंसमासाद्यदेवींसंतर्पयेत्सदा॥सहस्रजपेनसंसिद्धि
द्धिर्विनात्रसंशयः॥पशुस्त्रीसंगमेप्राप्तेशुद्धिःस्यात्पशुबंधने॥अथवागृहिणींप्राप्यतांपुष्पवतींयदि॥अर्चनेकन्यकाःश्रे
ष्ठाःपमासाद्यविशेषतः॥तासांभोज्यंप्रकर्तव्यमितिशास्त्रस्यनिश्चयः॥शास्त्रमुल्लासकरंभोगमानंदंमोक्षउच्यते॥इतरस्यभगि
नीपुत्रीपौत्रीनप्त्रीतथास्नुषा॥रजकीचर्मकारीचमातंगीगृहिणीवरा॥अर्चनेप्रथितावेश्यामंत्रयुक्तामनोहरा॥मातंगीयदि
चेद्देश्यावेश्यासापिप्रियारजस्वला॥रजस्वलातदाचासीत्सर्वोत्कृष्टाइतिस्मृता॥इत्यादि॥तथाकुलचूडामणौ॥तरुणोल्लाससंयुक्तां १२५

१२४

प

पर्यंकेतुनिवेशयेत्॥भयलज्जादिसर्वाणिपरित्यज्यौघ्रतिका॥कंचुकंचपरित्यज्यतथावस्त्रंचपार्वति॥आचार्यानुचरीरक्ताम
नसःसुखदायिनी॥देहभावंपरित्यज्यसंस्पृष्टभुजकौप्रिये॥चुंबनालिंगनेचैवनखदंतक्षतानिच॥बकुनाचकिंशुकेनप्राणे
नैकंसमाचरेत्॥इतियस्यसुसंज्ञातासफलंतस्यजीवितं॥वंशद्वयसमुद्भूतलभतेशाश्वतंपदं॥सर्वदासुखमाप्नोतिसर्वैश्व
र्यंचलभ्यते॥नतस्यद्वरितेकिंचित्सचमारिभयंभवेत्॥चुंबनेपरमैश्वर्यंनखदंतक्षतायुषः॥संभोगेचसुखंप्राप्तःसिद्धिसोः
परमंपदं॥नदद्याच्चुंबनंयस्तुदरिद्रोजायतेध्रुवं॥आलिंगनंविनादेवीकुष्ठीभवतिपार्वति॥विनादंतक्षतंदेविलोकेभ
वतिनिंदितः॥पंचमीतुसकृद्दत्वासावित्रीजायतेसती॥द्वितीयेनतुलक्ष्मीस्यात्तृतीयेपार्वतीभवेत्॥ततोदद्यात्सुखा
धिक्यंतस्याःपुण्यंनगण्यते॥आलिंगनेदरिद्रोगान्धनधान्यादिचुंबने॥नखदंतक्षतादैश्वर्यंतदामोक्षःप्रजायते॥सा
युज्यंसंगमेनस्यात्सत्यमेवनसंशयः॥ ॥इतिपंचमयागप्रशंसा॥ ॥अथयोगपीठमोक्षःपूजा॥तत्राद्यौदकेश्री
चक्रेमध्यस्यवामतःपीठोपरिॐऐंह्रींश्रींगुरुपादुकांविद्यामुच्चार्यश्रीअमुकानंदनाथश्रीपादुकांपूजयामिइतिसंपूज्यदक्षिण
भागेॐ ऊंगंगणपतिश्री॥इतिसंपूज्यसर्वाधस्तादारभ्यानलादिसप्तपातालभावनयोपर्युपरिध्रुवंमंडूकायनमः॥एवंमंडूकादि
रथितंतंसंपूज्यपृथिव्यांइक्षुरसमदिराघृतदुग्धदर्भसमुद्रचतुष्टयंपश्चिमदक्षिणपूर्वोत्तरदिक्षुध्यात्वाॐऐंह्रींश्रीइक्षुर

सौ॰र॰कु॰ ७

ससमुद्रायनमः॥४ मदिरासमुद्रायनमः॥५ घृतसमुद्रायनमः॥६ दुग्धसमुद्रायनमः॥ इति संपूज्य तेषां मध्ये रत्नद्वीपं ध्या
त्वा संपूज्य तथैव स्वायंभारस्य विलोमेन नवरत्नानि संपूज्य ततः स्वर्णपर्वतादि विचित्रं नमेत् संपूज्य नत्वा स्वायंभार
मध्यांतं विलोमेन पूर्वोक्तकालचक्रेश्वर्यादिनवचक्रेश्वरीनमः॥ स्थाने स्थीमस्तावृक्षसंपूज्य कल्पलतापरिधिं स्वर्णप्राकारं मणि
मंडपं च ध्यात्वा संपूज्य मंडपांतर्निर्ऋत्यादिकोणचतुष्टये मध्ये च कालरूपिण्यादिशक्तिचतुष्टयं संगीतयोगिन्यादिकं च श्रीसमास
या संपूज्य तन्मध्ये रत्नवेदिकां तदुपरि श्वेतछत्रं तदधो रत्नसिंहासनं च संपूज्य श्रीचक्राधारपीठं रत्नसिंहासनत्वेन परिकल्प्य त
त्सिंहासने पंचप्रेतमयं ध्यात्वा तस्य वायव्यादिकोणचतुष्टये जातपादचतुष्टयत्वेन स्थितान् ब्रह्मविष्णुरुद्रेश्वरान् पीतश्यामसि
ताकँपभोम्भतुर्भुजान् उपविष्टान् तेषां स्कंधेषु संलग्नं उत्तानशायिनमुदक्शीर्षं सदाशिवमिंदुप्रभं च ध्यात्वा पूजयेत्॥ तद्य
था वायव्ये॥ ॐ ऐं ह्रीं श्रीं लीं पृथिव्यधिपतये ब्रह्मणेनमः॥ ब्रह्मप्रेतासनश्रीपादुकां पूजयामि॥ ईशाने ॐ ३ वां अपामधिपतये
विष्णवे नमः विष्णुप्रेतासनश्रीपा॰॥ आग्नेये ॐ ३ रां तेजोधिपतये रुद्राय नमः रुद्रप्रेतासनश्रीपा॰॥ नैरृत्ये ॐ ३ यां वाय्वधिपतये
ईश्वराय नमः ईश्वरप्रेतासनपादुकां॰॥ मध्ये ॐ ऐं ह्रीं श्रीं स्लौः वियदधिपतये सदाशिवाय नमः सदाशिवमहाप्रेतासनश्रीपादु
कां पूजयामि॥ इति पंचप्रेतासने संपूज्य तस्य वायव्यादिकोणचतुष्टये धर्मादिचतुष्टयं तस्य पश्चिमादिदिक्षु अधर्मादिचतुष्ट

१२६

यं च प्रादक्षिण्येन संपूज्य तन्मध्ये मायाविद्ये संपूज्य तदुपरि पंचदशफणविराजितानंतायनमः इत्यनंतं संपूज्य तन्मध्ये मौला
ष्टदलकमलं कामेश्वरीपीठं ध्यात्वा पद्मायनमः॥ इति पद्मं संपूज्य अष्टदलकेसरेषु मध्ये च मोहिन्यादिनवशक्तीरात्मपूजो॰
क्ताः स्वाग्रादिप्रादक्षिण्येन संपूज्य स्वासोक्तपीठमंत्रेण समस्तं पीठं संपूज्य तदुपरि श्रीचक्रं बिंद्वाद्यष्टसमस्तप्रकटेत्यादि समष्टि
योगिनीमंत्रेण समस्तचक्रं संपूज्य बिंदुचक्रे मूलविद्यां ॐ ह्रीं सः क्लीं भगवति ब्लूं नित्ये कामेश्वरि स्त्रीं सर्वसत्ववशंकरि म
त्रिपुरभैरवि ऐं विच्चे ह्रीं श्रीं महात्रिपुरसुंदर्यै श्रीपा॰॥ इति पूर्णविद्यया त्रिः संपूज्य पुनर्मूलेन त्रिः संपूज्य श्रीचक्रं पुरत्र
यात्मकं ध्यात्वा चतुरस्रषोडशारदलाष्टदलात्मके प्रथमचक्रे ४ प्रथमकूटस्वरूपाय शरीरात्मने नमः॥ चतुर्दशारद्वयात्मके मध्य
चक्रे द्वितीयं तु ध्यात्मने नमः॥ अष्टारत्रिकोणबिंद्वात्मकोत्तमचक्रे ४ तृतीये प्राणात्मने नमः॥ इति संपूज्य पुनर्वा त्रित्रितयेवा प्र
मध्यांतरभेदेन प्रोक्तक्रमेण कूटत्रयेण संपूज्य तथा मध्यचक्रत्रये च प्राग्वत् कूटत्रयेण संपूज्य अष्टारचक्रे वशिन्यादिवाग्देवता
ष्टकं संपूज्य त्रिकोणचक्रस्य कोणत्रये मध्ये च प्राग्वत् पीठचतुष्टयं योगपीठं वा सोक्तं संपूज्य बिंदुचक्रे महोड्याणपीठे हिरण्म
यमहत्सदलकमलायनमः इति महत्सदलकमलं संपूज्य चतुरस्रः पद्मद्वय॰ चतुर्दशारदशारद्वयाष्टारसत्रिकोणबिंदु
चक्रेषु पूर्वोक्तपदार्थानि संपूज्य चतुरस्रे ॐ ऐं ह्रीं श्रीं नादिशक्तिश्रीपा॰॥ षोडशारदले ४ बिंदुशक्तिश्रीपा॰॥ अष्टदले ४ कला
श्रा

शक्तिश्री॰। चतुर्दशारे ४ ज्येष्ठाशक्तिश्रीपा॰। वाह्यदशारे ४ रौद्रीशक्तिश्रीपा॰। अंतर्दशारे ४ वामाशक्तिश्रीपा॰। अष्टकोणे ४ विषघ्नीश
क्तिश्रीपा॰। त्रिकोणे ४ दूतरीशक्तिश्रीपा॰। बिंदौ ४ सर्वानंदाशक्तिश्रीपा॰। इति नवशक्तीः संपूज्य षट्त्रिंशत्तत्त्वात्मकं श्रीचक्रं ध्यात्वा
॥ ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं शिवशक्तिसदाशिवेश्वरशुद्धवि
द्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्द
स्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मने श्रीमहात्रिपुरसुंदर्या योगपीठाय नमः। इति समस्तपीठं पुष्पांजलिना संपूज्य
तदुपरि भस्मत्रिलिंगं कल्पयामीति मध्ये पुष्पं निक्षिप्य तदुपरि ॐ ऐं ह्रीं श्रीं ह्रीं श्रीं सौः श्रीमहात्रिपुरसुंदर्याः सकलचैतन्यानंदम
यीं श्रीकामेश्वरकामेश्वरीमूर्तिं कल्पयामीति पुष्पादि प्रक्षेपेण ध्यानोक्तमूर्तिं भावयन् शंखमुद्रया पंचमुद्राः प्रदर्श्य मूलमुच्चार्य
परस्यै कामेश्वरकामेश्वरीमूर्तये नमः इति कल्पितमूर्तिं पूजयेत्। इति योगपीठपूजा। अथ पंचायतनमीचेत्॥ ॥श्रीपरदेवता
या योगपीठस्य ईशानादिकोणचतुष्टये गणेशादि चतुरो देवान् श्रीपरदेवतायाः पौरुषरूपविष्णुतिथिग्रहान्तत्पीठे पुनरुक्त
ज्योक्तविधिना तत्तदंगावरणैः सार्द्धं संपूज्य तत्तन्मंत्रजपादिभिः स्तोत्रैः प्रणामैश्च परितोष्य मध्ये देवस्य तत्तः श्रीपरदेवतायाः प
रब्रह्मस्वरूपायाः प्रकृतिभूतां श्रीभुवनेश्वरीमाम्नायभूतां श्रीमातंगेश्वरीं तदंगभूतां बालां अन्यां शक्तिं वा तत्पीठपूजापूर्वकं

तदंगावरणैः सार्द्धं संपूज्य तत्तन्मंत्रजपादिभिः परितोष्य श्रीपरदेवतापूजामारभेत्॥ अथ पंचायतनपूजायां
तत्तत्प्रोक्तविधिना पृथक्पृथक् अर्घ्यादिपात्राणि संस्थाप्य पूजयेत्॥ इति पंचायतनपूजां विधाय श्रीचक्रपूजामारभेत्॥
अथात्र गणेशसूर्यविष्णुशिवानां मंत्रभेदबाहुल्येपि तत्रपीठभेदाभावात्॥ तेषां पीठपूजाविधिः प्रदृश्यते॥ तत्रादौ गणेशपी
ठपूजाप्रकारः॥ तत्र श्रीचक्रपीठपूजावदेव मंडूकादिपृथिव्यंतं संपूज्यानंतरं इक्षुरससमुद्राय नमः। रत्नद्वीपाय नमः। नंदनो
द्यानाय नमः। स्वर्णप्राकाराय नमः। कल्पवृक्षेभ्यो नमः। मणिमंडपाय नमः। स्वर्णवेदिकायै नमः। रत्नसिंहासनाय नमः।
सिंहासनस्य पादचतुष्टये स्ववामाद्य पादमारभ्य धर्माय नमः। ज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्याय॰। सिंहासनस्य
मध्ये। मायायै नमः। विद्यायै नमः। अनंताय नमः। पद्माय नमः। आनंदकंदाय नमः। संविन्नालाय नमः। प्रकृतिमयपत्रेभ्यो
नमः। विकृतिमयकेसरेभ्यो नमः। पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै नमः। अं अर्कमंडलाय नमः। उं सोममंडला
य॰। मं वह्निमंडलाय॰। सं प्रबोधात्मने सत्त्वाय नमः। रं प्रकृत्यात्मने रजसे नमः। तं मोहात्मने तमसे नमः। आं आत्मने नमः।
अं अंतरात्मने नमः। पं परमात्मने नमः। ह्रीं ज्ञानात्मने नमः। स्वाग्न्यादिचतुर्दिक्षु मध्ये च ज्ञानतत्त्वात्मने नमः। मायातत्त्वात्म
ने नमः। कलातत्त्वात्मने नमः। विद्यातत्त्वात्मने नमः। परमात्मतत्त्वात्मने नमः। इति संपूज्याष्टदलकेसरेषु स्वाग्न्यादि प्रादक्षि

ण्येन तीव्रायै नमः॥ ज्वालिन्यै नमः॥ नंदायै नमः॥ भोगदायै नमः॥ कामरूपायै नमः॥ उग्रायै नमः॥ तेजोवत्यै नमः॥ सत्यायै नमः॥ विघ्नना-
शिन्यै नमः॥ इति मध्यांतं संपूज्य॥ गं सर्वशक्तिकमलासनाय नमः॥ इति समस्तं पीठं संपूज्य तत्र स्वोपास्यगणेशमंत्रेण मूर्तिं परिक-
ल्प्यावाहनादि तत्कल्पोक्तविधिना कुर्यादिति॥ अथ सौरपीठपूजा॥ सा तु प्रागेवार्घ्यदानप्रकरणे मार्तंडपूजायां निरूपितात
त्रापि मंडूकादिनआरंभः॥ अथ वैष्णवपीठपूजा॥ तत्र मंडूकादिपरतत्त्वांतं गणेशपीठपूजावदेव इक्षुरससमुद्रस्थाने क्षीरस
मुद्रं रत्नद्वीपस्थाने श्वेतद्वीपं च पूजयेदिति विशेषः॥ पीठशक्तयस्तु विमलायै नमः॥ उत्कर्षिण्यै॰॥ ज्ञानायै॰ क्रियायै॰ योगायै॰ स
त्यायै॰ प्रह्व्यै॰ ईशानायै॰॥ अनुग्रहायै नमः॥ इति केसरेषु प्राग्यादि मध्यांतं प्रादक्षिण्येन संपूज्य ॐ नमो विष्णवे सर्वभूतात्मने वासु
देवाय सर्वात्मसंयोगपद्मपीठात्मने नमः॥ इति समस्तं पीठं संपूज्य॥ तत्र मूलेन मूर्तिं कल्पनादि सर्वं कुर्यादिति॥ अथ शैवपीठ
पूजा॥ तत्रापि गणेशपीठवदेव मंडूकादिपरतत्त्वांतं पूजयेत्॥ इक्षुरससमुद्रस्थाने सुधार्णवं पूजयेत्॥ ततोष्टदलकेसरे पूर्वं
वामायै नमः॥ ज्येष्ठायै नमः॥ रौद्र्यै नमः॥ काल्यै नमः॥ कलविकरण्यै नमः॥ बलविकरिण्यै नमः॥ बलप्रमथिन्यै नमः॥ सर्वभूतदमन्यै
नमः॥ मनोन्मन्यै नमः॥ इति मध्यांतं प्रादक्षिण्येन संपूज्य॥ ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने न
मः॥ इति संपूज्य मूर्तिकल्पनादिकं कुर्यादिति॥ अथ शक्तिपीठपूजा॥ तत्र शक्तीनां भेदबाहुल्यात् पीठभेदाश्च बहवः संति तत्र केचन्मे
त्रे

पुडरूपाः॥ तेषु चानेकशक्तिसाधारणत्वान्मत्स्यसूक्तोक्तं भुवनेश्वर्याः पीठपूजा लिख्यते॥ तत्रापि मंडूकादिपरतत्त्वांतं शैवपीठवदे
व संपूज्य अष्टदलकेसरेषु प्रागाद्यारभ्य प्रादक्षिण्येन जयायै नमः॥ विजयायै नमः॥ अजितायै॰॥ अपराजितायै॰॥ नित्यायै॰ वि
लासिन्यै॰ दोग्ध्र्यै॰ अघोरायै॰ मंगलायै॰॥ इति संपूज्य ह्रीं सर्वशक्तिकमलासनाय नमः॥ इति समस्तं पीठं पूजयेत्॥ मूर्तिक
ल्पनादि प्राग्वत्॥ इति पंचायतनपूजाविधिः॥ मातंगेश्वर्यास्तु पीठं प्राग्वदेव तच्छक्तयस्तु विभूतिरुन्नतिः कांतिः सृष्टिः की
र्तिः सन्नतिः॥ पुष्टिरुत्कृष्टिर्ऋद्धिश्चेति॥ ॐ ऐं क्लीं श्रीं सर्वशक्तीसादि प्राग्वत्॥ लक्ष्म्याश्चैता एव॥ बालायास्तु प्रागेवोक्तं॥ श्री
विद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ तरंगस्तिथिसंज्ञकः॥ ॥ ❀ ॥ ॥ इति श्रीसच्चि
दानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे पंचदशस्तरंगः॥ ॥ ॥
॥१५॥ ॥ अथ श्रीचक्रपूजा॥ तत्र प्रथमं प्राग्वत् श्रीगुरुपादुकाविद्यया शिरसि श्रीगुरुपादुकां संपूज्य नमोस्तु गुर
वे इत्यादिना प्रणम्य श्रीगुरोर्दक्षिणामूर्तेर्भक्त्यानुग्रहविग्रह। अनुज्ञां देहि भगवन् श्रीचक्रयजनाय मे॥ इति गुर्वाज्ञां
प्रार्थ्य मूलेन प्राणायामत्रयं कृत्वा मूलविद्यायाः कृष्यादिकरषडंगन्यासान्विधाय पादायजंघाजानुमूलाधारेषु देव्या
त्मासनादिसाध्यसिद्धासनांतानि चतुरासनानि विन्यस्य वाग्देवताष्टकं चतुःपीठं चतुस्तत्त्वन्यासान्विधाय मूलविद्य

सौ.र.क. प.

याथापकं विंन्यस्य करा भ्यां पुष्पांजलिमादाय मातृकां भोजत्वेन कल्पयित्वा त्रिखंडामुद्रां बध्वा हृदि श्रीचक्रराजे देवीं यथोक्तरू
पां सपरिवारां ध्यात्वा तेजोरूपतामापाद्य तन्मुद्राद्वययोगेन मूलाधारात्कुंडलिनीमुत्थाप्य तया सह षट्चक्राणि भेदक्रमेण हृदयां
तः स्फुरंतीं तां तेजोमयीं सुषुम्नामार्गेण ब्रह्मरंध्रं नीत्वा परतेजःसंगमेनामृतमहौघवृष्टौस्नपनं विश्राम्य शिवशक्तिसामरस्य
सुखमनुभूय ॐ ऐं ह्रीं श्रीं ह्स्त्रैं ह्स्क्लीं ह्स्त्रौंः नमः श्रीमहात्रिपुरसुंदरि महापद्मवनांतस्थे कारणानंदविग्रहे। सर्वभूतहिते मातरेह्येहि परमे
श्वरि। एह्येहि देवदेवेशि त्रिपुरे देवपूजिते। परामृतप्रिये शीघ्रं सांनिध्यं कुरु सिद्धिदे। देवेशि भक्तिसुलभे सर्वावरणसंवृते॥ या
वत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव॥ इमावाहनमंत्रमुच्चार्य ब्रह्मरंध्रपुटाध्वना त्रिखंडमुद्रामुद्रितकरस्थपुष्पांजलौ।
तत्तेजः समानीय श्रीपीठांतःकल्पितमूर्तौ शिरसि ब्रह्मरंध्रस्थाने सन्निवेश्य कामेश्वरांकस्थां सावरणां श्रीमहात्रिपुरसुंद
रीं सर्वावयवभावेन ध्यायन्॥ ॐ ऐं ह्रीं श्रीं मूलविद्यामातृकापुटमुच्चार्य श्रीमहात्रिपुरसुंदरि इह तिष्ठ तिष्ठेति स्थापन्या मुद्रया
संस्थाप्य। तथैवोच्चार्य इह सन्निधेहि इति संनिधापनीमुद्रया संनिधाप्य पुनरुच्चार्य संनिरुध्यस्वेति संनिरोधिन्या संनिरुध्य
तथैव संमुखी भवेति संमुखीकरिण्या संमुखीकृत्य तथैवावगुंठिता भवेत्यवगुंठनमुद्रयावगुंठ्य हृदयादिषडंगन्यासेन स
कलीकृत्य तथैव धेनुमुद्रयामृतधारया अभिषिंचन्नमृतीकृत्य तथैव महामुद्रया परमीकुर्यात्॥ इत्यावाहनादिनवमुद्राः

१२५
५८

प्रदर्श्य ततो मूलविद्यां पूर्वोक्तदीपिनीविद्यामकारादिक्षकारांतां मातृकां चोच्चार्य अर्घजलेन देवीं त्रिः प्रोक्ष्य श्रीं ह्रीं क्लीं हंग ६
णपकालिके सौः सकलह्रीं क्लीं ब्लूं स्त्रीं श्रीं इति जीवमातृविद्यया देव्या हृदयकमले जीवं संस्थाप्य प्राणप्रतिष्ठां कुर्यात्। न
च पूर्वोक्तप्राणप्रतिष्ठामंत्रेण मम पदस्थाने श्रीमहात्रिपुरसुंदर्या इति पदप्रक्षेपेण देवीहृदयं स्पृशन्मंत्रं त्रिः समुच्चा
पठेत्। इत्थं प्राणप्रतिष्ठां विधाय ततः संक्षोभद्रावणाकर्षवश्योन्मादमहांकुशखेचरीबीजयोन्याख्या नवमुद्राः द्रां द्रीं
क्लीं ब्लूं सः क्रों ह्स्ख्फ्रें ह्सौं ऐं इति एकैकबीजोच्चारणपूर्वकमेकैकां मुद्रां प्रदर्श्य आं ह्रीं मिति पाशमुद्रां क्रों क्रोमिति अंकुशमु
द्रां धं यं इति धनुर्मुद्रां द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां इति दशभिः बीजैः बाणमुद्रां प्रदर्श्य ॐ ऐं ह्रीं श्रीं मूलविद्यामुच्चार्य
श्रीमहात्रिपुरसुंदरीश्रीपादुकां पूजयामीति पुष्पांजलित्रयेण देवीं संपूज्य पुनरुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकां
तर्पयामि नमः इति सव्यहस्तानामिकांगुष्ठाभ्यां धृतार्घपात्रोद्धृतविशेषार्घामृतबिंदुभिस्त्रिवारान्मूलेन मस्तके त्रिरसकृद्वा
वधि यथाशक्ति श्रीपरदेवतामुखकमले तर्पयित्वा आसनादिषोडशोपचारान्कुर्यात्॥ तत्र मूलविद्यामुच्चार्य भगव
ति श्रीमहात्रिपुरसुंदरि तुभ्यमिदमासनं कल्पयामि चास्यतां भवत्विति वा हर्षपौष्यचामर्वा स्वतैजसाद्यमतममासनं
कल्पयित्वा देव्या वामभागे निवेश्य सिंहासनमुद्रां पद्ममुद्रां च प्रदर्श्य प्रणम्य ॐ ह्रं ह्रं ह्रं इदमिदमिदं गृहाण स्वाहा इति

सौ॰र॰क॰
प॰

प्रार्थनमुद्रया निवेद्य मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकां पूजयामीति पुष्पांजलिं क्षिपेत्॥ ततो मूलमुच्चार्य श्रीम-
हात्रिपुरसुंदरि स्वागतमिति कुशलप्रश्नं कृत्वा स्वागतकुशलमुद्रे प्रदर्श्य मूलमुच्चार्य प्राग्वत्पुष्पांजलिं क्षिपेत्॥ ततो मूल-
मुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकायै अर्घ्यं कल्पयामि स्वाहेति देव्याः शिरसि सामान्यार्घ्यात् किंचिज्जलमुद्धृत्य दद्यात्॥ ततः
पूर्ववन्निवेदनमंत्रेण निवेद्यार्घ्यमुद्रां प्रदर्श्य पुष्पांजलिं कुर्यात्॥ ततः पाद्यपात्राज्जलमुद्धृत्य ॐ ऐं ह्रीं श्रीं मूलं श्रीमहात्रिपुर-
सुंदरीश्रीपादुकायै पाद्यं परिकल्पयामि नम इति देव्याः पादयोः पाद्यं दत्वा प्राग्वन्निवेद्य मुद्रां प्रदर्श्य पुष्पांजलिं दद्यात्॥ ए-
वमाचमनीयं परिकल्पयामि सुधेति मुखे। मधुपर्कं परिकल्पयामि सुधेति मुखे॥ इत्याचमनीयमधुपर्कौ दत्वा तन्मुद्रे प्रद-
र्श्य। ततः पुनराचमनीयपात्रस्थशुद्धजलेन पूर्ववदाचमनीयं मुखे॥ ततो रत्नपादुके उपनीय॥ पादुके परिधायांब त्रि-
पुरे रत्ननिर्मिते। स्नानमंडपमायाहि स्नानार्थं शक्रदिग्गते॥ इति प्रार्थ्य रत्नपादुके परिधाप्य प्रधानमंडपात्स्नानमंडपं
नीत्वा स्नानवस्त्रं परिधाप्य कनकासने समुपवेश्य प्राग्वदर्घ्यपाद्याचमनीयानि दत्वा कर्पूरशकलैर्दंतधावनं कारयि-
त्वा सुगंधजलैर्गंडूषं मुखप्रक्षालनं च कल्पयित्वा मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकायै स्नानीयं कल्पयामि न-
मः॥ इति सुगंधतैलामलकादिस्नानीयद्रव्याणि परिकल्प्य प्राग्वन्निवेद्य महाराजोपचारवत् अभ्यंगोद्वर्तनकेशमा-

१३०

र्जनानि विधाय कोष्णोदकेन निर्मलस्नानं कारयित्वा वैदिकपौराणिकमंत्रैः पंचगव्यैः पंचामृतेन च स्नपयित्वा पुनः शुद्धजलेन
स्नपयित्वा इक्षुरसनालिकेरसलिलपनसाम्रादिविविधफलरसैः कर्पूरादिसुवासितैः स्नपयित्वा पुनः जलेनाभिषिंचेद्वांग-
नाभिः सुवर्णादिघटैर्नानातीर्थोपकृतैः सलिलैः स्नपयित्वा प्राग्वत्पुष्पांजलिं मूलेन दत्वा स्नानमुद्रां प्रदर्श्य आचमनीयं कल्पयि-
त्वा केशांगमार्जनार्थं वस्त्रं दत्वा जलप्रक्षालनं कारयित्वा नानारत्नखचितं रक्तदुकूलद्वयं वसनमिति श्लोकस्य मूलविद्यायाः अभिमंत्र्य व-
ह्निमतिदैवताभ्यां वासोभ्यां नम इति संपूज्य मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकायै वाससी परिकल्पयामि नम इति परिधा-
प्य वस्त्रमुद्रां प्रदर्श्य पुनराचमनीयं दत्वा प्राग्वन्निवेद्य पुष्पांजलिं नासंपूज्य पहस्तत्रभवं स्वर्णादिरचितं वा कंठे मंत्रं विसृजे दे-
वताय कंठसूत्राय नमः॥ इति पूजितं दैवैः समर्प्य उपवीतमुद्रां प्रदर्श्य मूलमुच्चार्य श्रीमहात्रिपुरसुंदरि॥ पादुके परिधायांब
त्रिपुरे रत्ननिर्मिते। आगच्छ निर्मितं यान्मामलंकारस्य मंडपं॥ इति प्रार्थ्यालंकारमंडपं नीत्वा सिंहासने समुपवेश्यालंकारा-
सुरतो निधाय ब्रह्मिति श्लोकस्य मूलेनाभिमंत्र्य विश्वदेवनेभ्यो ऽलंकारेभ्यो नम इति संपूज्य मूलमुच्चार्य श्रीमहात्रिपुरसुं-
दरीश्रीपादुकायै मुकुटाद्यलंकरणानि परिकल्पयामि नम इति सामान्यतत्तन्न्यवि विशेषतो मुकुटं परिकल्पयामि
नम इत्यादि मुकुटललाटाभरणकर्णपूरहारग्रैवेयकांगुलीयकशालेविकारत्वसरत्नावलीकर्णोत्तंसपार्श्वभ-

षणानखघोनांगुलिछदकूरत्नंबार्धहारमद्गुभारजलंतिकांगदकेयूरवलयवाकुचेष्टनसीमंतिकमंडनभूषणान्नभूषणानाभिभूष
णरत्नमालामणिमेखलाम्रंखजादेनरत्नकर्णिकनीवीरत्नजानुभूषणपादांगुलीयकनूपुरखुछकपादकटदंसकसुदघं
टिकामुखपत्रकमितिचत्वारिंशद्भिरमैभ्यरजारत्नताटंकनानाविधैस्सुलंकरणैरजंकृत्यपूर्ववन्निवेदनमंत्रेणनिवेद्यपु
ष्पांजलिंकृत्वाऽभरणमुद्रांप्रदर्श्यरत्नंपादुकेउपनीयमूलमुच्चार्यश्रीमहात्रिपुरसुंदरि॥पादुकायुगमारुह्यपंचवाद्यपुरःस
रे॥यागमंडपमायाहिपरिवारगणैःसह॥इतिशार्थ्यछत्रचामरनानोपकरणहस्ताभिःशक्तिभिःसहयागमंडपंनीत्वाकामे
श्वरांकेभगवतींसमुपवेश्यपरिवारदेवताश्चयथास्थानंसमुपवेशयेत्॥ततोलोहितांजलितांचापबाणपाशसृणी
करैःदधानांकामराजांकेयंत्रितामुदितांस्मरेत्॥इतिश्रीपरदेवतांयथोक्तरूपांध्यात्वामूलेनपुष्पांजलित्रयंदत्वाचंद
नागुरुकर्पूरकस्तुर्यादिगंधपंकचूर्णघृष्टदाहजसंमर्दजप्राण्यंगजमितिपंचविधंगंधंतदस्यतमंवाशाम्भवोस्यविस्तु
देवतायैगंधायनमइतिसंप्रत्ययमूलंश्रीमहात्रिपुरसुंदरीश्रीपादुकायैगंधंकल्पयामितिगंधंसमर्प्यशाम्भवन्निवेद्यगंधमु
द्रांप्रदर्श्यशाम्भवपुष्पांजलिंदत्वामूलंश्रीमहात्रिपुरसुंदरीश्रीपादुकायैपुष्पंपरिकल्पयामिवौषडितिपुष्पाणिसमर्प्यशाम्भवन्निवे
द्यपुष्पमुद्रांप्रदर्श्यपुष्पांजलिंदत्वाधूपपात्राद्धिरण्यंनिर्धूमांगारानादायवमितिप्रोक्ष्यधेनुमुद्रयामृतीकृत्यह्रींसुरभितेजसे

स्वाहेतिमंत्रेणदशांगंशर्कराघृतमिश्रितंगुग्गुलंवानिक्षिप्य॥ॐगंधर्वदेवतामायधूपायनमइतिधूपंसंप्रत्ययमूलमुच्चार्यवनस्प
तिरसोमन्त्रोगंधाढ्योगंधउत्तमः॥आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतांश्रीमहात्रिपुरसुंदरीश्रीपादुकायैधूपंपरिकल्पया
मिनमइतिधूपमुक्त्वाधूपमुद्रांप्रदर्श्यवामभागेघंटांनिधायास्त्रेणप्रोक्ष्यधेनुमुद्रयामृतीकृत्यपुनरस्त्रेणगंधादिभिःसं
पूज्यॐजगद्ध्वनिमंत्रमातःस्वाहेतिघंटांमंत्रेणाभिमंत्र्यतांवामहस्तेनवादयन्दक्षिणहस्तेनधूपपात्रंचालयन्नीचैर्धूपंनि
वेद्यतस्याग्रेदेव्यावामभागेनिधायदीपपात्रंगोघृतेनापूर्यतन्मध्येकर्पूरगर्भिणींवर्त्तिंनिक्षिप्यह्रीमितिप्रज्वाल्यधेनुमुद्रया
मृतीकृत्यविष्णुदेवतायदीपायनमइतिसंप्रत्ययमूलमुच्चार्य॥सुप्रकाशोमहादीपःसर्वतस्तिमिरापहः॥सबाह्याभ्यंत
रंज्योतिर्दीपोयंप्रतिगृह्यतां॥श्रीमहात्रिपुरसुंदरीश्रीपादुकायैदीपंपरिकल्पयामिनमइतिदीपमुक्त्वादीपमुद्रांप्रद
र्श्यपूर्वोक्तमनुनानिवेद्यघंटावादनपूर्वकमुच्चैर्दीपंप्रदर्श्य॥तस्याग्रेदेव्यादक्षिणभागेनिवेश्यदेव्याग्रेचतुरस्रंमं
डलंजलेननिर्मायतच्चसुवर्णादिपात्रंनानाविधान्नव्यंजनभरितंषड्रसोपेतंपंचविधनैवेद्योपेतंतस्मिन्मंडलेसाधा
रंनिधायमूलेननिरीक्ष्यास्त्रेणप्रोक्ष्यतेनैवकुशैःसंताड्यकवचेनावगुंठ्य॥ॐजूंसःवौषडितिमनेनसमाभिमंत्रितेनजलेन
पुनःप्रोक्ष्यअस्त्रमंत्रेणचक्रमुद्रांप्रदर्श्यआधोरैंमुखवामवामकरेणनैवेद्यंस्पृशन्नयमितिवायुबीजंसप्तधाजपन्॥

सौ०र०क०
प०

तकृतदोषान्संशोध्य अधोमुखदक्षकरेण स्पृशन् रमितिवह्निबीजं सप्तवारं जपन् तकृतदोषान्संदह्य अधोमुखवामकरेण स्पृ
शन् वमितिबीजेन सप्तवारमभिमंत्र्य तदमृतीकृत्य पूजेन विशेषार्घ्यबिंदुभिः प्रोक्ष्य विष्णुदैवत्याय नैवेद्याय नम इति संपूज्य
स्वमंत्रेण संरक्ष्य मूलेन सप्तवारमभिमंत्र्य ऐं ह्रीं कामदुघे अमोघे वरदे विच्चे स्फुर स्फुर श्रीं श्रीं श्रीं इति श्रीकामधेनुविद्यया
धेनुमुद्रयाऽमृतीकृत्य महामुद्रया परमीकृत्य देव्यै प्राग्वत्साद्याचमनीयं दत्वा मूलविद्यया देवीं संपूज्य पात्रांतरे जलममृ
तीकृत्य तु चुलुकेनादाय वामांगुष्ठेन नैवेद्यपात्रं स्पृशन् मूलं मुच्चार्य सांगायै सायुधायै सपरिवारायै सर्वात्मिकायै भगव
त्यै श्रीमहात्रिपुरसुंदरी श्रीपादुकायै नैवेद्यं कल्पयामि नम इति नैवेद्योपरि चुलुकोदकमर्पयेत्। ततः कृतांजलिर्मू
लमुच्चार्य श्रीमहात्रिपुरसुंदरि हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं॥ पंचधा षड्रसोपेतं गृहाण परमेश्वरि॥ इत्यनेन प्राग्
कमनुनानिवेद्य पात्रांतरे जलममृतीकृत्य देव्या दक्षिणहस्ते नत् जलं दत्वा ॐ अमृतोपस्तरणमसि स्वाहेति देव्या प्राश
इत्वा वामकरेण ग्रासमुद्रां विकचोत्पलसन्निभां दर्शयन् दक्षिणहस्तेन प्राणादि पंचमुद्राः प्रदर्शयेत्॥ तद्यथा ऐं
ॐ प्राणाय स्वाहा सं गुष्ठेन कनिष्ठानामिकस्पृशेत्। ४ ह्रीं अपानाय स्वाहेति अंगुष्ठेनानामिकामध्यमे स्पृशन्। ४ सौः व्या
नाय स्वाहेत्यंगुष्ठेनानामिकामध्यमे स्पृशन्। ४ ऐं ह्रीं उदानाय स्वाहेत्यंगुष्ठेनानामिकामध्यमातर्जनीः स्पृशेत्। ४ ऐं ह्रीं

१३२

सौः समानाय स्वाहेत्यंगुष्ठेन सर्वाः स्पृशेत्॥ इति प्राणादि पंचमुद्राः प्रदर्शयन् पंचग्रासान् याचयित्वा कृतांजलिर्मूलविद्यामु
च्चार्य ऐं आत्मतत्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु॥ पुनः मूलं ह्रीं विद्यातत्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु॥
पुनः मूलं सौः शिवतत्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु॥ पुनः मूलमुच्चार्य ऐं ह्रीं सौः सर्वतत्वव्यापिका श्रीमहात्रिपु
रसुंदरी तृप्यतु॥ इति तत्वैर्यासचतुष्टयं ग्राहयित्वा नैवेद्यमुद्रां करद्वयेन प्रदर्शयेत्॥ ४ मू० श्रीमहात्रिपुरसुंदरि। चित्साचेत्स
हृदिः सौख्यविविधानेकमस्तलंकृ॥ निवेदयामि ते देवि सानुगायै गुणार्णवत्॥ इत्यनेन मंत्रेण पुष्पांजलिं समर्प्य नैवेद्यजा
तं तादात्म्येन सपरिवारायै देव्यै निवेदयेत्॥ ततः स्वर्णादि पात्रस्थं कर्पूरादि सुवासितं जलं धेनुमुद्रयाऽमृतीकृत्य ॐ ऐं ह्रीं श्रीं म
लमुच्चार्य श्रीमहात्रिपुरसुंदरि। नमस्ते देवदेवेशि सर्वतृप्तिकरं परं॥ अमृतानिवेदितं शुद्धं गृहाण तु सुसीतलं॥ अमृतानंद
संपूर्णं गृहाण जलमुत्तमं। इति देव्यै जलं निवेद्य स्वमंत्रेण जवनिकायामोजनस्थलं संवेष्ट्य घंटां वादयन् मुंजानां प
रदेवतां ध्यायेत्॥ यथा॥ सुधैरावैः सरसमसि तैस्सुपविष्टैः समेतां सिंजद्राजन्य जनन्नीकरे वीज्यमाना सरवीभिः। नर्मक्री
डाप्रहसनपरा पङ्क्तिभोक्त्री तु कंसंतीसुं स्तुपात्रे कनकघटिते षड्रसां श्रीं शिदिलासा॥ १॥ इति ध्यात्वा मूलविद्यां दशधा जपित्वा
जपं समर्प्य भुक्तवतीं सत्कारे वीवि मायधेनुमुद्रया पात्रांतरे जलममृतीकृत्य ॐ अमृतापिधानमसि स्वाहेति दे

सौ॰र॰क॰
५॰

अर्घहस्तेन राधेशनं जलं दत्वा तथा प्राशितं विशाच्यगतसारं नैवेद्यं समुद्धृत्य तस्मात् किंचिदस्य मालोच्छिष्टमातंगीमंत्रमु
च्चार्य शेषिकायै निर्माल्यवासिन्यै इदमुच्छिष्टभोजनं परिकल्पयामि नमः इत्यैशान्यां चिक्षोणमंडलं लिपेत् ॥ नैवेद्यं सांदिशि
स्थापयेत् ॥ ततो मूलमंत्रेण तत्स्थाने प्रोक्षणादिः संशोध्य हस्तमुखपादप्रक्षालनार्थं देव्यै जलं करोद्वर्तनार्थं सुगंधचूर्णं च
दत्वा गंडूषानि कारयित्वा कर्पूरसमकलैर्दंतधावनं परिकल्प्य पुनर्गंडूषार्थं जलं दत्वा गंडूषानि कारयित्वा कर्पूररमाकलैर्दं
तधावनं परिकल्प्य पुनर्गंडूषार्थं जलं दत्वा गंडूषानि कारयित्वा देव्या स्वरूपाजनं कृत्वा आचमनीयं निवेद्य कर्पूरादि
नानासुगंधमिश्रं तांबूलमानीय प्राग्वन्मोक्षवनस्मृति दैवत्याय तांबूलाय नमः इति संप्रकल्प्य मूलमुच्चार्य श्रीमहा
त्रिपुरसुंदरी श्रीपादुकायै तांबूलं कल्पयामि नमः इति उत्सृज्य पुनर्मूलमुच्चार्य श्री महात्रिपुरसुंदरी। तमालदलक
र्पूरपूगनागरंजितं ॥ संशोधितसुगंधं च तांबूलं परिगृह्यतां ॥ इत्यनेन ॐ ह्रं ह्रं ह्रं इदमिदमिदं गृहाण स्वाहेति देव्यैतां
बूलं निवेद्य योनिमुद्रया प्रणम्य मूलमुच्चार्य श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामीति संपूज्य वस्त्रमालाप्रका
रेण प्रसन्नपूजां विधाय ह्रीं इति नमस्कारमुद्रां बध्वा मूलेन प्रदर्श्य प्रणम्य ह्रं इति जपेत् ॥ शक्त्यादनुलोमविलोमेन
मूलविद्यासंपुटितैर्मातृकाक्षरैः श्रुक्ष्मातृकान्यासस्थानेषु देव्यादेहे गंधपुष्पाक्षतैः संपूजयेत् ॥ यथा ॥ मूलेअं

१३३

पुनर्वेष्टिसेन मूलं नमः ॥ इत्यादि ॥ ततो देव्या हृदयादिषडंगस्थानेषु ॐ ऐं ह्रीं श्रीं ऐं हृदयाय नमः ॥ एवं ४ क्लीं शिरसे नमः ॥ ४ सौः
शिखायै नमः ॥ ४ ऐं कवचाय नमः ॥ ४ क्लीं नेत्रत्रयाय नमः ॥ ४ सौः अस्त्राय नमः ॥ इति न्यांगपूजां विधाय प्राग्वन्मूलमंत्रेणादि
प्रदर्श्य प्राग्वद्विशेषार्घबिंदुभिस्त्रिर्वा मूलहस्तेन संतर्प्य आवरणपूजां कुर्यात् ॥ तत्र कृतांजलिर्मूलमुच्चार्य श्रीमहात्रिपुर
सुंदरि ॥ संविन्मये परे देवि परामृतरसप्रिये । अनुज्ञां त्रिपुरे देहि परिवारार्चनाय मे ॥ इत्यनुज्ञां प्राप्य सच्चिदानंदलक्ष
णां श्रीमहात्रिपुरसुंदरी मेव परां श्रीचक्रे देवतारूपेण परिणतां ध्यात्वा तद्देवताः पूजयेत् । तत्रादौ बिंदुचक्रे ४ अः म
लपंचदशाक्षरीमुच्चार्य अः श्रीमहात्रिपुरसुंदरी नित्या श्रीपादुकां पूजयामि तर्पयामि नमः इति गंधादिभिस्त्रिः संपू
ज्य विशेषामृतबिंदुभिः संतर्प्य तस्यां मूलदेव्यामेव तत्तिथिनित्याविद्यामुच्चार्य अमुकी अमुकतिथिनित्या श्रीपादुकां
पूजयामि तर्पयामि नमः इति गंधादिभिस्त्रिः संपूज्य विशेषामृतबिंदुभिः संतर्प्य तस्यां मूलदेव्यामेव तत्तिथिनित्यावि
द्यामुच्चार्य अमुकी अमुकतिथिनित्या श्रीपादुकां पूजयामि तर्पयामि नमः इति त्रिः संपूज्य संतर्प्य पुनः पूर्ववत्त्रिपुरानित्यां
त्रिः संपूज्य तर्पयेदिति तिथिनित्यां संपूज्य नित्यामंडलं पूजयेत् ॥ तत्र तिथिनित्यापूजा यो शुक्लप्रतिपदमारभ्य पौर्णि
मास्यंतेका मेण्यर्चा दिविचित्रां तासु पंचदश नित्यासु एकस्यां तिथावेकां नित्यां तिथिनित्यात्वेन प्रोक्तविधिना पूजयेत् ॥ इस

सौ·र·क·
प·

पक्षेतुप्रतिपदमारभ्यामावास्यांतेचित्राकामेश्वर्यंतास्ताःपंचदशनित्याविलोमेनप्रोक्ताकारेणपूजयेत्॥अत्रतिथिवृद्धौएकानि
त्यादिनद्वयोःपूज्या॥क्षयेतुएकस्यांतिथौनित्याद्वयंपूजयेत्॥अत्रसूर्योदयकालवर्त्तिनीतिथिरेवाहोरात्रव्यापिनीतिज्ञेया॥त्रिकम
ध्यंतः॥इतितिथिनित्यापूजांविधायत्रिकोणेवामावर्त्तेनदक्षिणरेखायांअंआंइंईंउंइतिपंचपूर्वरेखायांऊंऋंॠंऌंॡंइति
पंचउत्तररेखायांएंऐंओंऔंअंइतिपंचाइत्यंपंचदशस्वरान्विन्यस्यतेषुस्वरेषुकामेश्वर्यादिपंचदशनित्यास्तत्रहिपूज
येत्॥तद्यथा॥ॐअंऐंसःक्लींनित्यक्लिन्नेमदद्रवेसौःअंकामेश्वरीनित्याश्रीपादुकांपूजयामितर्पयामिनमः॥ॐ३आंऐंभगभु
गेभगिनिभगोदरिभगमालेभगावहेभगगुह्येभगयोनिभगनिपातिनिसर्वभगवशंकरिभगरूपेनित्यक्लिन्नेभगस्वरूपेसर्वाणि
भगानिमेह्यानयवरदेरेतेसुरेतेभगक्लिन्नेक्लिन्नद्रवेक्लेदयद्रावयअमोघेभगविच्चेक्षुभक्षोभयसर्वसत्वान्भगेश्वरिऐं
ब्लूंजंब्लूंभेंब्लूंमोंब्लूंहेंब्लूंहेंक्लिन्नेसर्वाणिभगानिमेवशमानयस्त्रींहरब्लेंह्रींआंभगमालिनीनित्याश्रीपादुकांपू·त·नमः॥४
ईंह्रींनित्यक्लिन्नेमदद्रवेस्वाहा॥ईनित्यक्लिन्नानित्याश्रीपा·पू·त·नमः॥४ईंॐक्रोंभ्रोंक्रौंझ्रौंछ्रौंज्रौंस्वाहा॥ईंभेरुंडा
नित्याश्रीपा·पू·त·नमः॥ॐऐंह्रींश्रींॐह्रींवह्निवासिन्यैनमः॥उंवह्निवासिनीनित्याश्रीपा·पू·त·नमः॥४ऊंह्रींक्लिन्नेऐं
क्रौंनित्यमदद्रवेह्रींऊंमहावज्रेश्वरीनित्याश्रीपा·पू·त·नमः॥अत्रमहाविद्येश्वरीतिसंप्रदायांतरेपाठोनित्यायानाम॥

तदान्यसंप्रदायवह्निः॥ऊंऐंह्रींश्रींॐह्रींक्लेंसः॥नित्यक्लिन्नेमदद्रवेस्वाहेतिविंशत्यक्षरीतिसंप्रदायांतरे॥यापहीनीत्यापूज्या
॥४ॐह्रींशिवदूत्यैनमः॥ॐह्रींशिवदूतीनित्याश्रीपा·पू·त·नमः॥४ॐहुंह्रींहुंखेचछेक्षःस्त्रींहुंक्षेह्रींफट्ॐत्वरितानित्या
श्रीपा·पू·त·नमः॥४ऐंक्लींसौःकुलसुंदरीनित्याश्रीपा·पू·त·नमः॥४हसकलरडैंहसकलरडींहसकलरडौंः
नित्याश्रीपा·पू·त·नमः॥४ऐंह्रींफ्रेंस्रेंक्रौंआंक्लींऐंब्लूंनित्यमदद्रवेहुंफ्रेंह्रींनीलपताकानित्याश्रीपा·पू·त·नमः॥४ऐंभ
मरद्वंद्वैविजयानित्याश्रीपा·पू·त·नमः॥४ओंस्वौंओंसर्वमंगलानित्याश्रीपा·पू·त·नमः॥४ओंॐनमोभगवतिज्वाला
मालिनिदेवदेविसर्वभूतसंहारकारिकेजातवेदसिज्वलंतिज्वलज्वलप्रज्वलप्रज्वलह्रांह्रींहूंररररररज्वालामालिनि
हुंफट्स्वाहा॥ज्वालामालिनीनित्याश्रीपा·पू·त·नमः॥ॐऐंह्रींश्रींअंचक्रौंअंचित्रानित्याश्रीपा·पू·त·नमः॥१५॥
इतिपंचदशनित्याः॥वामावर्त्तेनसंपूज्यश्रीचक्रबिंदुभिसंतर्प्यमध्येबिंदुचक्रेविसर्गस्वरंविन्यस्यतदुपरिॐ
ऐंह्रींश्रींअः॥मूलपंचदशविद्यामुच्चार्यअः॥श्रीमहात्रिपुरसुंदरीनित्याश्रीपादुकांपूजयामितर्पयामिनमः॥
ततः॥ऊंऐंह्रींश्रींअः॥तुरीयविद्यामुच्चार्यअः॥श्रीमहासप्तदशीकलानीतानित्याश्रीपा·पू·त·नमः॥इतिप्रत्या
हृस्थंकलानीतानित्यांसंप्रत्यविशेषार्घ्यबिंदुभिःसंतर्प्यपुनःप्राग्वत्तिथिनित्यांसंपूज्यतिथिनित्यायैगंधप्र

सौ.र.क. षष्ठदीपान्निवेद्य तिथिनैवेद्यं निवेदयेत्। तत्र प्रतिपदि घृतं १ द्वितीयायां शर्करा २ तृतीयायां दुग्धं ३ अपूपं ४ कदलीफ
प. लं ५ मालिके ६ गुडं ७ नारिकेलफलं ८ लाजा ९ तिलाः १० दधि ११ पृथुकाः १२ चणकाः १३ मुद्गाः १४ पायसं १५ इति नैवेद्यं प
ञ्चदद्यादिति दिक्। इति नित्यामेरुप्रस्तारे पूजां विधाय गुरुपंक्तित्रयं पूजयेत्। ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसू
नौ। कृते सौभाग्यरत्नाख्ये तरंगे षोडशो गतः॥ ॥श्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे षोडशस्तरंगः
श्री ॥१६॥ ॥अथ गुरुपंक्तिपूजा॥ तत्र प्रथमं मूलविद्यया श्रीमत्त्रिलदेवीं त्रिः संपूज्य तन्मध्यत्रिकोणस्य पूर्वरेखाया
बहिरुत्तरेण विमलायाः अधिमोर्मध्ये स्थितौ तत्राग्नेदक्षिणोत्तरायतं रेखात्रयं विभाव्य तत्राधोधः क्रमेण दिव्यौ
घसिद्धौघमानवौघगुरून्पूजयेत्। तत्र प्रथमरेखायां ५ दिव्यौघेभ्यः परापरेभ्यो गुरुभ्यो नमः॥ इति प्रथमतः
समुदायेन पुष्पांजलिं दत्वा ५ ऐं परप्रकाशानंदनाथश्रीपादुकां पूजयामि तर्पयामि नमः। ५ ऐं परशिवानंदना
थश्रीपा. पू. त. नमः। ५ ऐं परशक्तिदेव्यंबाश्रीपा. पू. त. नमः। ५ ऐं कौलेश्वरानंदनाथश्रीपा. पू. त. नमः। ५ ऐं
शुक्लादेव्यंबाश्रीपा. पू. त. नमः। ५ ऐं कुलेश्वरानंदनाथश्रीपा. पू. त. नमः। ५ ऐं कामेश्वरीदेव्यंबाश्रीपा. पू. त. नमः।
इति दक्षिणोत्तरांतं पंक्तिक्रमेण संपूज्य द्वितीयरेखायां ५ ऐं सिद्धौघेभ्यः परापरेभ्यो गुरुभ्यो नमः इति पुष्पां

जलिं दत्वा। ५ ऐं भोगानंदनाथश्रीपा. पू. त. नमः। ५ ऐं क्लिन्नानंदनाथश्रीपा. पू. त. नमः। ५ ऐं समयानंदनाथश्रीपा. पू. त.
नमः। ५ ऐं सहजानंदनाथश्रीपा. पू. त. नमः॥ इति पंक्तिक्रमेण प्राग्वत्संपूज्य। तृतीयरेखायां ५ मानवौघेभ्यः परापरेभ्यो
गुरुभ्यो नमः॥ इति पुष्पांजलिं दत्वा ५ ऐं गगनानंदनाथश्रीपा. पू. त. नमः। ५ ऐं विश्वानंदनाथश्रीपा. पू. त. नमः। ५
ऐं विमलानंदनाथश्रीपा. पू. त. नमः। ५ ऐं मदनानंदनाथश्रीपा. पू. त. नमः। ५ ऐं भुवनानंदनाथश्रीपा. पू. त. नमः।
५ ऐं लीलानंदनाथश्रीपा. पू. त. नमः। ५ ऐं स्वात्मानंदनाथश्रीपा. पू. त. नमः। ५ ऐं प्रियानंदनाथश्रीपा. पू. त. नमः। ऐं
इति संपूज्य तत्संख्याकेव स्वगुरुपारंपर्यं निजगुरोः पूर्वं नवमगुरुमारभ्य ५ ऐं अमुकानंदनाथश्रीपा. पू. त. नमः।
इत्यादि। तत्र कुरुकुल्ले सांकेतिकनामनिजगुरोर्मुखाद्विज्ञाय तत्तन्नामसमासार्थं स्वगुरुपादुकांतं पूजयेत्॥
नवानां नाम्नामज्ञाने परमेष्ठिगुर्वादिगुरुत्रयं पूजयेत्॥ तेषामपि विशेषनामाज्ञाने स्वगुरुपादुकामेव पूजयेत्
॥ इति कामराजसंप्रदायगुरुपंक्तिपूजा दक्षिणामूर्तिसंप्रदाये॥ अथ लोपामुद्रागुरुपसंप्रदायगुरुपंक्तिपूजा
यथा॥ तत्र दिव्यौघः। ५ ऐं परमशिवानंदनाथ कामेश्वरीदेव्यंबा दिव्यौघानंदनाथ महौघानंदनाथ सर्वानंदनाथ
प्रज्ञादेव्यंबा प्रकाशानंदनाथ॥ इति दिव्यौघः॥ अथ सिद्धौघः॥ दिव्यानंदनाथ चित्रानंदनाथ। कैवल्यादेव्यं

पौ.र.क. वा॰ महोदयानंदनाथ॰ इति सिद्धौघः॥ ततः चिदानंदनाथ॰ विमर्शानंदनाथ॰ रामानंदनाथ॰ क्रमजानंदनाथ॰ परा
नंदनाथ॰ मनोहरानंदनाथ॰ स्वात्मानंदनाथ॰ प्रतिभानंदनाथ॰ इति मानवौघः॥ इत्येवं प्राग्वत् गुरुपंक्तित्रयं लोपामु
द्रागस्त्यसंप्रदायिभिः पूज्यं। अथैतद्विद्याद्वयातिरिक्तश्रीविद्योपासकानां गुरुक्रमो लिख्यते। तद्यथा॥ परप्रका
शानंदनाथ॰ परविमर्शानंदनाथ॰ कामेश्वरीदेव्यंबा॰ मोक्षानंदनाथ॰ अमृतानंदनाथ॰ पुरुषानंदनाथश्च॰ अघोरानंद
नाथ॰ इति दिव्यौघः॥ एकामानंदनाथ॰ सिद्धानंद॰ सिद्धौघानंद॰ उत्तमानंद॰ इति सिद्धौघः॥ ज्ञानानंदनाथ॰ परा
मानंद॰ सर्वज्ञानंद॰ सर्वानंद॰ सिद्धानंद॰ गोविंदानंद॰ शंकरानंद॰ मानवौघानंद॰ इति मानवौघः॥ एतद्वंदेत्रेगु
रुपारंपर्यं पूजयेत्॥ इति संप्रदायांतरगुरुक्रमः॥ अथाज्ञातगुरुपंक्तित्रयस्वपारंपर्याणामुपासकानां सामा
न्यगुरुक्रमो लिख्यते॥ यथा॥ ॐ ऐं ह्रीं श्रीं ऐं गुरुभ्यो नमः॥ ॐ ऐं ह्रीं श्रीं ऐं गुरुपादुकाभ्यो नमः॥ इति दिव्यौघः॥ ऐं पर
मगुरुपादुकाभ्यो नमः॥ इति सिद्धौघः॥ ऐं आचार्येभ्यो नमः॥ ऐं आचार्यपादुकाभ्यो नमः॥ ऐं पूर्वसिद्धेभ्यो नमः॥
ऐं पूर्वसिद्धपादुकाभ्यो नमः॥ इति मानवौघः॥ अत्रापि स्वपारंपर्यं पूजयेत्॥ तत्र विशेषनामाज्ञाने परमेष्ठिगुरु
भ्यः॥ परमगुरुभ्यः॥ अस्मद्गुरुभ्यो नमः॥ इति गुरुत्रयं पूजयेत्॥ अत्र लिखितगुरुक्रमत्रयं दक्षिणामूर्तिपारंपर्यसं

५१

प्रदायवतामेव। अन्येष्वानंदभैरवादयः संप्रदायभेदा बहवः संति॥ तत्र गुरुक्रमोपि बहुतरः स्वस्वगुरुमुखाज्ज्ञातव्यः॥ का
लिमतगुरवः संख्याप्रकरणे प्रागेव लिखिताः तत्संप्रदायिभिस्त एवात्र पूज्याः॥ तत्र स्वमंडलेषु नाथोनाः शक्त्यंता दे
विमंडले इति तंत्रराजवचनात्॥ श्रीचक्रे प्रकाशानंदशक्तिश्रीपादुकां पूजयामि स्वादिशक्तिपादांताः पूज्याः॥ तत्र
तु आद्यास्त्रयो दिव्यौघाः॥ अन्ये त्रयः सिद्धाः अपरे त्रयो मानवाः इति ज्ञेयाः॥ इति गुरुपंक्तिपूजा॥ अथ षडंगयुवति
पूजा॥ तत्र मध्यत्रिकोणबहिः आग्नेये ऐं सर्वज्ञा॰ हृदयशक्तिश्रीपा॰ पू॰ त॰ नमः॥ ऐशान्ये क्लीं नित्यतृप्ता॰ शिरःशक्ति
श्री॰ नैर्ऋत्ये सौः अनादिबोधा॰ शिखाशक्तिश्रीपा॰ वायव्ये ऐं स्वतंत्रा॰ कवचशक्तिश्रीपा॰ पू॰ त॰ नमः॥ देव्यग्रे त्रि
कोणबहिः क्लीं नित्यमलुप्ता॰ नेत्रशक्तिपा॰ पू॰ त॰ नमः॥ देव्याश्चतुर्दिक्षु सौः अनंता॰ अस्त्रशक्तिश्रीपा॰ पू॰ त॰ नमः॥
॥ इति षडंगयुवतिपूजा॥ अत्र अग्निशासुरवायव्यमध्यदिक्ष्वंगपूजनमिति संहिताज्ञानार्णववचनेन नित्यातंत्रसंकेतः
परिपाट्यादेव्यग्रस्य पश्चिमत्वेन पयोक्रमाग्नेयादिकं वदंति तन्न युक्तं॥ नवावरणपूजासु प्रारंभो देवतायत इति पद्धत्या
दिवचनेन देव्यग्र एव आरभ्यावरणपूजेयुक्तत्वादंगावरणस्याप्यावरणत्वात्॥ पश्चिमाभिमुखादेवादेवाभिमुखात्
दग्राच्चादिहरितो ज्ञेयाः पूजाहोमादिकर्मसु॥ इति सामान्यागमोक्तेरिति सदेव्यग्रस्य प्राचीकल्पनया वायव्यकोण

सौ.र.क.
प.

सिंवाग्येयत्वं पुष्पमिति तद्द्वारमोक्षक्रमेण पूजयेत्॥ इतिषडंगयुवतिपूजा॥ अथ नवावरणपूजा॥ तत्र ॐ ऐं ह्रीं श्रीं मूल
विद्यामम स्तवकट गुप्ततमुनरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यपरापराशक्तिरहस्ययोगिन्यं श्रीपादु
काः पूजयामि तिर्पयामि श्रीचक्रे पुष्पांजलिं दत्वा मातृकाक्षरमंडितमुक्ताफलपीतवर्णैर्विचित्ररत्नखचितसमस्तस्य जरू
पं चतुरस्रत्रयं ध्यात्वा ॐ अं आं सौः त्रैलोक्यमोहनचक्राय नमः॥ इति चतुरस्रत्रयसमुदायेन पुष्पांजलिना संपूज्य पु
नश्चतुरस्राग्ररेखायै नमः इति पुष्पांजलिना संपूज्य तस्मादेव याम्यद्वारचतुष्टये देवी दक्षिणादिग्कोणच
तुष्टये च ऐं ईशानयोर्मध्ये निर्ऋतिवरुणयोर्मध्ये चाणिमादिदशसिद्धिः पाशांकुशवरदाभयकराः रक्तव
र्णाः शिरसा रत्नानि बिभ्रति ताः ध्यात्वा पूजयेत्॥ तत्र पश्चिमादिद्वारचतुष्टयस्य दक्षिणभागे ॐ अणिमादिसिद्धिश्री
पा.पू.त.नमः॥ ॐ लघिमासिद्धिश्रीपा.पू.त.नमः॥ ॐ महिमासिद्धिश्रीपा.पू.त.नमः॥ ॐ ईशित्वसिद्धिश्रीपा.पू.त.नमः॥ ततो
वायव्यादिकोणे ॐ वशित्वसिद्धिश्रीपा.पू.त.नमः॥ ॐ प्राकाम्यसिद्धिश्रीपा.पू.त.नमः॥ ॐ भुक्तिसिद्धिश्रीपा.पू.त.नमः
॥ ॐ इच्छासिद्धिश्रीपा.पू.त.नमः॥ निर्ऋतिवरुणयोर्मध्ये ॐ प्राप्तिसिद्धिश्रीपा.पू.त.नमः॥ इंद्रेशानयोर्मध्ये ॐ सर्व
कामसिद्धिश्रीपा.पू.त.नमः॥ ततः चतुरस्रमध्यरेखायै नमः संपूज्य तत्र रक्तोत्पलकपालहस्ता नीलवर्णा

रक्तवस्त्राभरणा ब्राह्म्याद्यष्टमातॄर्ध्यात्वा द्वाराणां वामभागेषु आग्नेयकोणेषु च प्रागुक्तरीत्या॥ ॐ ब्राह्मीश्रीपा.
पू.त.नमः॥ ॐ माहेश्वरीश्रीपा.पू.त.नमः॥ ॐ कौमारीश्रीपा.॥ ॐ वैष्णवीश्री.॥ ॐ वाराहीश्रीपा.॥ ॐ इंद्राणीश्रीपा.
॥ ॐ चामुंडाश्रीपा.॥ ॐ महालक्ष्मीश्रीपा.॥ ॐ अत्राष्टमातरो दिग्द्वराद्याः पूज्या इति केचित्॥ ततः अंत चतुरस्र
रेखायै नमः॥ इति संपूज्य तत्र पाशांकुशखड्गमुद्रांकितचतुर्भुजारक्तास्त्रिनेत्राः साञ्जकारा दशमुद्रादे
वीर्ध्यात्वा प्रथमरेखावत्स्यादक्षिणेन पूजयेत्॥ यथा॥ ॐ द्रां सर्वसंक्षोभिणीमुद्राश्रीपा.॥ ॐ द्रीं सर्वविद्रा
विणीमुद्राश्रीपा.॥ ॐ क्लीं सर्वाकर्षिणीमुद्राश्रीपा.॥ ॐ ब्लूं सर्ववशंकरीमुद्राश्रीपा.॥ ॐ सः सर्वोन्मादिनीमुद्राश्री
पा.॥ ॐ क्रों सर्वमहांकुशमुद्राश्री.॥ ॐ ह्स्रैं ह्स्क्ल्रीं ह्स्रौः त्रिखंडामुद्राश्रीपा.॥ ॐ ह्सौं बीजमुद्राश्रीपा.॥ ॐ ऊर्ध्वे ह्स्खफ्रें
खेचरीमुद्राश्रीपा.॥ अधः ॐ ऐं योनिमुद्राश्रीपा.॥ इति चतुरस्रत्रये रिग्विदिक्क्रमेण त्रिंशतिदेवताः॥ द्वारदक्षि
णेन संपूज्य अणिमासिद्धेर्ग्रभागे पुस्तकाक्षस्रक्वरदाभयकरां स्फटिकाभां मुक्ताभरणां त्रिपुराचक्रेश्वरीं ध्या
त्वा॥ ॐ अं आं सौः त्रिपुराचक्रेश्वरीश्रीपा.पू.त.नमः॥ इति चक्रेश्वरीं संपूज्य तस्याः वामे ॐ द्रां सर्वसंक्षोभि
णीश्रीपा.॥ दक्षिणे ॐ अणिमासिद्धिश्रीपा.पू.त.नमः इति संपूज्य द्रां इति मूलदेव्यै सर्वसंक्षोभिणीमुद्रां प्रदर्श्य

सौ० र० क०
प०

गंधाक्षतकुसुमान्वितं सामान्यार्घोदकं गृहीत्वा ४ एताः प्रकटयोगिन्यस्त्रैलोक्यमोहने चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः इति चक्रेश्वर्या वामहस्ते तज्जलदानेन पूजां समर्प्य मूलविद्यया मूलं देवीं संपूज्य संतर्प्य पुष्पांजलिमादाय मूलमुच्चार्य देवीं संबोध्य ॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं ॥ इति देव्याश्चरणयोः पुष्पांजलिं दत्वा ४ प्रकटयोगिनीमयस्तवायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत् ॥ इति प्रथमावरणपूजा ॥ १ ॥ ततः षोडशदलकमलं चंद्रनिभं स्ववर्णमयरूपं ध्यात्वा ४ ऐं क्लीं सौः सर्वाशापरिपूरकचक्राय नमः ॥ इति पुष्पांजलिं निक्षिप्य तत्र पाशांकुशामृतपूर्णस्फटिकघटवशीकृतकराः शुक्लाः पीयूषवर्षिणीर्ध्यात्वा देव्यग्रदलमारभ्य वामावर्तेन षोडशनित्याकलाः पूजयेत् ॥ नमुद्रया ४ अं कामाकर्षिणीनित्याकलाश्रीपा० पू० त० नमः ॥ आं बुद्ध्याकर्षिणीनित्याकलाश्रीपा० ४ इं अहंकाराकर्षिणीनित्याकलाश्रीपा० ४ ईं शब्दाकर्षिणीनित्याकलाश्रीपा० ४ उं स्पर्शाकर्षिणीनित्याकलाश्रीपा० ४ ऊं रूपाकर्षिणीनित्याकलाश्रीपा० ४ ऋं रसाकर्षिणीनित्याकलाश्रीपा० ४ ॠं गंधाकर्षिणीनित्याकलाश्रीपा० ४ लृं चित्ताकर्षिणीनित्याकलाश्रीपा० ४ ॡं धैर्याकर्षिणीनित्याकलाश्रीपा० पू० त० नमः ॥ ४ एं स्मृत्याकर्षिणीनित्याकलाश्रीपा० ४ ऐं नामाकर्षिणीनित्याक-

लाश्रीपा० ४ ओं बीजाकर्षिणीनित्याकलाश्रीपा० ४ औं आत्माकर्षिणीनित्याकलाश्रीपा० ४ अं अमृताकर्षिणीनित्याकलाश्रीपा० ४ अः शरीराकर्षिणीनित्याकलाश्रीपा० पू० त० नमः ॥ इति संपूज्य कामाकर्षिणीपुरतः पाशांकुशवराभयहस्तां पुस्तांकुशवरदहस्ताभरणां रक्तांशुकां त्रिपुरेश्वरीं ध्यात्वा ॥ ४ ऐं क्लीं सौः त्रिपुरेश्वरीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ तस्याः वामे ४ द्रीं सर्वविद्राविणीमुद्राश्रीपा० पू० त० नमः ॥ दक्षिणे ४ लघिमासिद्धिश्रीपा० पू० त० नमः ॥ इति संपूज्य श्रीपादुकाबिंदुभिः संतर्प्य द्रीं इति मूलदेव्यै सर्वविद्राविणीमुद्रां प्रदर्श्य सामान्यार्घोदकं गृहीत्वा ४ एताः गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः इति चक्रेश्वर्या वामहस्ते तज्जलदानेन पूजां समर्प्य मूलं देवीं संपूज्य पुष्पांजलिमादाय मूलमुच्चार्य देवीं संबोध्य ॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनं ॥ इति देव्याश्चरणयोः पुष्पांजलिं दत्वा गुप्तयोगिनीमयस्तवायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत् ॥ इति द्वितीयावरणपूजा ॥ ततोऽष्टदलकमले जपाकुसुमप्रभं ध्यात्वा ॐ ऐं ह्रीं श्रीं ह्रीं क्लीं सौः सर्वसंक्षोभणचक्राय नमः ॥ इत्यष्टदले पुष्पांजलिं क्षिप्त्वा ॥ तत्र पाशांकुशनीलरत्नवीणोत्पलकरा रक्तवर्णाः ध्यात्वा

सौ·र·क·
५·

देव्याः पृष्ठभागस्य पूर्वद्वायदलमारभ्य दिग्दलचतुष्टये प्रादक्षिण्येन ४ कं खं गं घं ङं अनंगकुसुमाश्रीपा· पू· त· नमः। ४ चं
छं जं झं ञं ४ अनंगमेखलाश्रीपा। ४ टं ठं डं ढं णं ४ अनंगमदनाश्रीपा। ४ तं थं दं धं नं ४ अनंगमदनातुराश्रीपा। आग्नेय
दले ४ पं फं बं भं मं ४ अनंगरेखाश्रीपा। नैर्ऋत्ये ४ यं रं लं वं अनंगवेगिनीश्रीपा। वायव्ये ४ शं षं सं हं ४ अनंगांकुशाश्री
पा। ईशानदले ४ ळं क्षं ४ अनंगमालिनीश्रीपा· पू· त· नमः॥ इति संपूज्य श्रीपात्रबिंदुभिः संतर्प्य अनंगकुसुमाद्यष्टरक्त
वर्णाः सर्वालंकारभूषिताः पुस्तकाक्षमालावराभयकरा ध्यात्वा ४ ह्रीं क्लीं सौः त्रिपुरसुंदरीश्रीचक्रेश्वरीश्रीपा· पू· त· न
मः॥ इति चक्रेश्वरीं संपूज्य संतर्प्य तस्याः वामे ४ क्लीं सर्वाकर्षिणीमुद्राश्रीपा। दक्षिणे ४ महिमासिद्धिश्रीपा· पू· त·
नमः॥ इति संपूज्य श्रीपात्रामृतबिंदुभिः संतर्प्य क्लीं इमामाकर्षिणीमुद्रां प्रदर्श्य ४ एताः गुप्ततरयोगिन्यः सर्वसंक्षोभणकारके
चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः संतर्पिताः संतु नमः इति सामान्यार्घोदकेन चक्रे
श्वरीहस्ते पुष्पं समर्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य पुष्पांजलिमादाय मूलविद्यां ततो देवीं संबोध्य॥ अभीष्टसिद्धिं मे देहि
शरणागतवत्सले॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनं॥ इति पुष्पांजलिं दत्वा ४ गुप्ततरयोगिनीमयस्वात्मैश्रीम
ता त्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत्॥ इति तृतीयावरणपूजा॥ अथ चतुर्थावरणे अनंगकुसुमां पूर्वं दक्षि

णोनंगमेखलामित्यादितानावर्णादिषु दर्शनात्मितां तं च परिपाद्यादेव्यग्रस्य पश्चिमत्वेनास्य पूर्वपदस्य याम्यादि
न पूर्वदिक्पृष्ठदलादेव्याः पृष्ठदलमारभ्यानंगकुसुमादिपूजनमिति वदंति। तन्नाशाक्रमषडंगयुवतीपूजाप्रकरणोक्त
वचनेन देव्या इस्येव पूर्वत्वात्। न दारभ्यैव पूजनं युक्तमिति॥ ततो दाडिमीकुसुमप्रभं चतुर्दशारचक्रं ध्यात्वा ४ हैं हक्लीं
ह्सौः सर्वसौभाग्यदायकचक्राय नमः॥ इति चतुर्दशारचक्रे पुष्पांजलिं दत्वा तत्र रक्तवर्णाः सर्वाभरणभूषिताः पाशां
कुशदर्पणपानपात्रकराश्चतुर्दशशक्तीर्ध्यात्वा देव्यग्रकोणमारभ्य वामावर्त्तेन ४ कं सर्वसंक्षोभिणीशक्तिश्रीपा· पू·
त· नमः। ४ खं सर्वविद्राविणीशक्तिश्रीपा· पू· त· नमः। ४ गं सर्वाकर्षिणीशक्तिश्रीपा। ४ घं सर्वाह्लादिनीशक्तिश्रीपा।
४ ङं सर्वसंमोहिनीशक्तिश्रीपा। ४ चं सर्वस्तंभिनीशक्तिश्रीपा। ४ छं सर्वजृंभिणीशक्तिश्रीपा। ४ जं सर्ववशंकरिणी
शक्तिश्रीपा। ४ झं सर्वरंजिनीशक्तिश्रीपा। ४ ञं सर्वोन्मादिनीशक्तिश्रीपा। ४ टं सर्वार्थसाधिनीशक्तिश्रीपा। ४ ठं
सर्वसंपत्तिपूरणीशक्तिश्रीपा। ४ डं सर्वमंत्रमयीशक्तिश्रीपा। ४ ढं सर्वद्वंद्वक्षयंकरीशक्तिश्रीपा· पू· त· नमः॥ इति
संपूज्य श्रीपात्रबिंदुभिः संतर्प्य सर्वसंक्षोभिणीशक्त्यग्रे रक्तवर्णां पुस्तकाक्षमालावराभयकरां त्रिपुरवासिनीचक्रे
श्वरीं ध्यात्वा ४ हैं हक्लीं ह्सौः त्रिपुरवासिनीचक्रेश्वरीश्रीपा· पू· त· नमः॥ तस्याः वामे ४ ब्लूं वशमुद्राश्रीपा· पू· त· नमः

सौ.र.क्र.
१.

दक्षिणे ४ ईशित्वसिद्धिश्रीपा. पू. त. नमः॥ इति संपूज्य श्रीपात्रबिंदुभिः संतर्प्य सर्वसंक्षोभणीशक्त्यग्रे रक्तवर्णपुस्तकाक्ष
मालाः ४ ह्रुं इति वश्यमुद्रां प्रदर्श्य ४ एताः संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राः ससिद्धयः सवाहनाः सपरि
वाराः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः इति विशेषार्घजलेन चक्रेश्वरीहस्ते चक्रपूजां समर्प्य मूलेन मूलदेवीं सं
पूज्य विशेषार्घेण संतर्प्य पुष्पांजलिमादाय ४ मूलविद्यामुच्चार्य देवीं संबोध्य॥ अभीष्टसिद्धिं मे देहि शरणागतवत्स
ले॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनं॥ इति तदावरणपूजां देव्यै समर्प्य ४ संप्रदाययोगिनीमयरवायै श्री महा
त्रिपुरसुंदर्यै नमः इति योनिमुद्रया देवीं श्रीजलितो वरणमेव॥ इति चतुर्थावरणपूजा॥ ततो बाह्यदशारं सिंदूरवर्णं
ध्यात्वा ४ सैं क्लीं सौः सर्वार्थसाधकचक्राय नमः॥ इति पुष्पांजलिं निक्षिप्य तत्र जपाकुसुमवर्णाः पाशांकुशालं
कारपेटीहस्ताः सर्वाभरणभूषिताः सुन्नवर्णा वाध्यात्वा देव्यग्रकोणमारभ्य वामावर्तेन ४ णं सर्वसिद्धिप्रदा देवी
श्रीपा. पू. त. नमः॥ ४ तं सर्वसंपत्प्रदा देवी श्रीपा. ४ थं सर्वप्रियंकरी देवी श्रीपा. ४ दं सर्वमंगलकारिणी देवी श्री
पा. ४ धं सर्वकामप्रदा देवी श्रीपा. ४ नं सर्वदुःखविमोचनी देवी श्रीपा. ४ पं सर्वमृत्युप्रशमनी देवी श्रीपा. ४ फं स
र्वविघ्नविनाशिनी देवी श्रीपा. ४ बं सर्वांगसुंदरी देवी श्रीपा. ४ भं सर्वसौभाग्यदायिनी देवी श्रीपादुकां पू. त. न

मः॥ इति दशदेवीः संपूज्य श्रीपात्रबिंदुभिः संतर्प्य सर्वसिद्धिप्रदाग्रे उद्यद्भानुसहस्रकांतिं सर्वालंकारभूषितां मदा
घूर्णितनेत्रत्रयां पुस्तकाक्षमालावराभयकरां चक्रेश्वरीं ध्यात्वा ४ हैं ह्क्लीं ह्सौः त्रिपुराश्री चक्रेश्वरी श्रीपा. पू. त. नमः
॥ तस्याः वामे ४ सर्वोन्मादिनीमुद्राश्रीपा. पू. त. नमः॥ दक्षिणे ४ वशित्वसिद्धिश्रीपा. पू. त. नमः॥ इति संपूज्य श्रीपात्रबिंदुभिः
संतर्प्य ४ मः॥ इति सर्वोन्मादिनीमुद्रां प्रदर्श्य ४ एताः कुलकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्राः ससिद्धयः सायु
धाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः इति विशेषार्घजलेन चक्रेश्वरीहस्ते चक्रपूजां स
मर्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य मूलविद्यां तेदेवीं संबोध्य अभीष्टसिद्धिं मे देहि शरणागतवत्सले॥ भक्त्या सम
र्पये तुभ्यं पंचमावरणार्चनं॥ इति देव्यै पुष्पांजलिं दत्वा ४ कुलकौलयोगिनीमयरवायै श्री महात्रिपुरसुंदर्यै न
मः इति योनिमुद्रा प्रणमेत्॥ इति पंचमावरणपूजा॥ ततो तर्दशारचक्रं जपाकुसुमवर्णं ध्यात्वा॥ ह्रीं क्लीं ब्लें सर्वरक्षा
करचक्राय नमः इति पुष्पांजलिं निक्षिप्य तत्र बालार्कवर्णाः पाशटंकज्ञानमुद्रावरकरा मुक्ताविभूषणा दश देवी
र्ध्यात्वा देव्यग्रकोणमारभ्य वामावर्तेन ४ मं सर्वज्ञा देवी श्रीपा. पू. त. नमः॥ ४ पं सर्वशक्ति देवी श्रीपा. ४ रं सर्वैश्वर्यप्र
दा देवी श्रीपा. ४ लं सर्वज्ञानमयी देवी श्रीपा. ४ वं सर्वव्याधिविनाशिनी देवी श्रीपा. ४ शं सर्वाधारस्वरूपा देवी श्री

सौ.र.कृ. पा.।४ वं सर्वपापहरा देवी श्री पा.।४ सं सर्वानंदमयी देवी श्री पा.।४ हं सर्वरक्षास्वरूपिणी देवी श्री पा.।४ सं सर्वेप्सित-
प. फलप्रदा देवी श्री पादुकां पू.त.नमः। इति संपूज्य श्री पात्रबिंदुभिः संतर्प्य सर्वज्ञाद्ये रक्तवर्णाः पाशांकुशकपालाभयधारि
णीं त्रिपुरमालिनीं ध्यात्वा।४ ह्रीं क्लीं ब्लें त्रिपुरमालिनी चक्रेश्वरी श्री पा.पू.त.नमः।। तस्याः वामे ४ क्रों महांकुशामुद्रा श्री
पा.पू.त.नमः। दक्षिणे ४ शाकाम्बसिद्धि श्री पा.पू.त.नमः। इति संपूज्य संतर्प्य क्रोमिति महांकुशमुद्रां प्रदर्शयेत्। एताः
निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः
संतु नमः इति चक्रेश्वरीहस्ते विशेषार्घोदकेन चक्रपूजां समर्पयेत्। ले नम उत देवीं संपूज्य संतर्प्य मूलविद्यामुच्चार्य
देवीं संबोध्य।। अभीष्टसिद्धिं मे देहि शरणागतवत्सले।। भक्त्या समर्पये तुभ्यं षष्ठमावरणार्चनं।। इति देव्यै पुष्पांज-
लिं दत्वा पूजां समर्पये निगर्भयोगिनीमयरवायै श्री महात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत्।। इति षष्ठाव
रणपूजा।। ततोऽष्टारचक्रं पद्मरागप्रभं ध्यात्वा।४ ह्रीं श्रीं सौः सर्वरोगहरचक्राय नमः इति पुष्पांजलिं दत्वा तत्र रक्त
वर्णा रक्तवस्त्राभरणानुलेपनाः पंचबाणधनुःपुस्तकवरकरा ध्यात्वा देव्यग्रकोणमारभ्य वामावर्तेन ४ अं आं इं ईं उं
ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः।४ ह्लूं वशिनी वाग्देवता श्री पा.पू.त.नमः।४ कं खं गं घं ङं कल ह्रीं कामेश्वरी वाग्देवता

सौ.र.कृ. नुरूपे वामावर्तेन रक्तवर्णा वरानयकरा नवरत्नविभूषणाः स्वस्वायुधधारिणः प्रमत्तकामयौवनोन्मत्तविग्रहा ध्यात्वा ४ यां रां
प. लां वां सां द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां जं भं जंभनेभ्यः कामेश्वरबाणेभ्यो नमः।।४ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां द्रां द्रीं क्लीं
ब्लूं सः जंभनेभ्यः कामेश्वरीबाणेभ्यो नमः ४ यां रां लां वां सां धों यां रां लां वां सां मोहनाय कामेश्वरचापाय नमः।४ द्रां द्रीं क्लीं
ब्लूं सः धं द्रां द्रीं क्लीं ब्लूं सः मोहनाय कामेश्वरी चापाय नमः।४ यां रां लां वां सां ह्रीं यां रां लां वां सां वशीकरणाय कामे
श्वरी पाशाय नमः ४ द्रां द्रीं क्लीं ब्लूं सः ह्रीं द्रां द्रीं क्लीं ब्लूं सः वशीकरणाय कामेश्वरी पाशाय नमः।४ यां रां वां लां वां सां क्रों
यां रां लां वां सां स्तंभनकामेश्वरांकुशाय नमः।४ द्रां द्रीं क्लीं ब्लूं सः क्रों द्रां द्रीं क्लीं ब्लूं सः स्तंभनकामेश्वर्यंकुशाय नमः
इत्यायुधदेवताः संपूज्य त्रिकोणे वामावर्तेन कामेश्वर्यादि देवीत्रयं पूजयेत्।। तत्राग्रकोणे मुख्यकोणे अग्रकोणे वरादि
नवमणिरत्नधनुःपुष्पबाणपुस्तकाक्षमालाधरां त्रिनेत्रां चंद्रचूडां कामेश्वरीं ध्यात्वा ४ मूलविद्यायाः प्रथमकूटमुच्चा
र्य अग्निचक्रे कामरूपपीठे इच्छाशक्ति कामेश्वरी देवी श्री पादुकां पूजयामि तर्पयामि नमः। इति संपूज्य संतर्प्य त्रिकोणस्य
३७ वामकोणे नीलवर्णा रक्तवस्त्राभरणा इक्षुचापबाणवरानयकरां त्रिनेत्रां वज्रेश्वरीं ध्यात्वा ४ द्वितीयकूटमुच्चार्य सूर्य
चक्रे जालंधरपीठे ज्ञानशक्ति वज्रेश्वरी देवी श्री पादुकां पू.त.नमः। दक्षिणकोणे मुक्ताम्पाशांकुशाभयमालापुस्तककरां

श्रीपा॰पू॰त॰नमः॥४॥ चं छं जं झं ञं ब्लूँ मोदिनी वाग्देवताश्रीपा॰॥४॥ टं ठं डं ढं णं ह्ल्रीं विमला वाग्देवताश्रीपा॰पू॰त॰नमः॥४॥
तं थं दं धं नं ज्म्रीं अरुणा वाग्देवताश्रीपा॰॥४॥ पं फं बं भं मं हस्लव्यूं जयिनी वाग्देवताश्रीपा॰॥४॥ यं रं लं वं झ्मर्यूं सर्वेश्वरी वा
ग्देवताश्रीपा॰॥४॥ शं षं सं हं क्ष्म्रीं कौलिनी वाग्देवताश्रीपा॰पू॰त॰नमः इति संपूज्य श्रीपात्रबिंदुभिः संतर्प्य वशिन्यष्ट
सुन्नवर्णा पाशांकुशकपालाभयधारिणीं त्रिपुरासिद्धां चक्रेश्वरीं ध्यात्वा ४ ह्रीं क्लीं सौः त्रिपुरासिद्धा चक्रेश्वरीश्रीपा॰पू॰
त॰नमः॥ तस्याः वामे ४ ह्स्ख्फ्रें खेचरीमुद्राश्रीपादुकां पू॰त॰नमः॥ दक्षिणे ४ मुक्तिसिद्धिश्रीपा॰पू॰त॰नमः इति संपूज्य श्रीपा
त्रबिंदुभिः संतर्प्य ४ ह्स्ख्फ्रें इति खेचरीमुद्रां प्रदर्श्य एता रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्राः ससिद्धयः सायुधाः
सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः इति चक्रेश्वरीहस्ते विशेषार्घ्योदकेन चक्रपूजां सम
र्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य मूलविद्यामुच्चार्य देवीं संबोध्य॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सले॥ भक्त्या स
मर्पये तुभ्यं सप्तमावरणार्चनं॥ इति देव्यै पुष्पांजलिं दत्वा पूजां समर्प्य रहस्ययोगिनीमयरूपायै श्रीमहात्रिपुर
सुंदर्यै नमः इति योनिमुद्रया प्रणमेत्॥ इति सप्तमावरणपूजा॥ ततो त्रिकोणं बंधूककुसुमारुणं ध्यात्वा ४
ह्रीं क्लीं सौः सर्वसिद्धिप्रदचक्राय नमः इति संपूज्य त्रिकोणाष्टकोणयोरंतराले वायव्यादीशानांतकोणच

त्रिनेत्रां चंद्रशेखरां नगमालिनीं ध्यात्वा ४ त्लीं यक्ररमुच्चार्य सोमचक्रे पूर्णगिरिपीठे मादिश्री नगमालिनीदेवीश्री
पा॰पू॰त॰नमः इति संपूज्य श्रीपात्रबिंदुभिः संतर्प्य कामेश्वर्यग्रे उद्यत्सूर्यसहस्राभां त्रिनेत्रां शशांकमुकुटां रक्तांबरां
रक्तालंकारभूषितां पीनोन्नतस्तनीं शोणितपंकिलमुंडमालां पुस्तकाभयजपमालावरकरां ध्यात्वा ४ हसैं हस्क्लीं
ह्सौः त्रिपुरांबिका चक्रेश्वरीश्रीपा॰पू॰त॰नमः॥ तस्या वामे ४ हसौं बीजमुद्राश्रीपा॰पू॰त॰नमः दक्षिणे ४ इच्छासिद्धिश्रीपा॰
पू॰त॰नमः॥ इति संपूज्य श्रीपात्रबिंदुभिः संतर्प्य हसौमिति मंत्रदेवैबीजमुद्रां प्रदर्श्य एताः परापररहस्ययोगिन्यः
सर्वसिद्धिप्रदे चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः संतु इति पूजां स
मर्प्य मूलेन मूलदेवीं संपूज्य विशेषार्घ्येण संतर्प्य मूलविद्यांते देवीं संबोध्य॥ अभीष्टसिद्धिं मे देहि शरणागतवत्स
ले॥ भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनं॥ इति पुष्पांजलिं प्रदायैतदावरणार्चनं समर्प्य ४ परापररहस्ययोगि
नीमयरूपायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत्॥ इत्यष्टमावरणपूजा॥ ततो बिंदुचक्रे परब्रह्मात्म
कं ध्यात्वा ४ ऐं ह्रीं श्रीं मूलं पंचदशाक्षरीं त्रयोदशाक्षररूपं तुरीयकुरमुच्चार्य सर्वानंदमयचक्राय नमः इति पु
ष्पांजलिं क्षिप्त्वा तत्र महाज्ञानपीठे कदंबवनांतः हिरण्मयसहस्रदलकमलकर्णिकागतसाध्यसिद्धासने प्र

सौ.र.क.
प.

नत्रलिकायां स्वसमानाकारकामेश्वरांकोपस्तिकासनेनोपविष्टां प्रमुदितां श्रीललितां यथोक्तरूपां ध्यात्वा ४ तुरीयकू
टमुच्चार्य ब्रह्मचक्रे महोड्याणपीठे स्थादिश्रीमहात्रिपुरसुंदरी श्रीपा.पू.त.नमः। इति सप्त विशेषार्घ्यामृतविंदुभिः संत
र्प्य पुनः पंचदशीमुच्चार्य श्रीमहात्रिपुरसुंदरी चक्रेश्वरी श्रीपा.पू.त.नमः इति सप्त संतर्प्य तस्याः वामे ४ ऐं महायोनि
मुद्रा श्रीपा.पू.त.नमः। दक्षिणे ४ प्राप्तिसिद्धिश्रीपा.पू.त.नमः। ततः ऐं इति योनिमुद्रां प्रदर्श्य ४ एषा परापरातिरहस्य
योगिनी सर्वानंदमये बैंदवे महाचक्रे परब्रह्मस्वरूपिणी परामृतशक्तिः सर्वमंत्रेश्वरी सर्वपीठेश्वरी सर्ववीरेश्वरी
सर्वयोगेश्वरी सर्ववागीश्वरी सर्वसिद्धेश्वरी सकलजगदुत्पत्तिमातृका सचक्रा सदेवता समुद्रा ससिद्धिः सायुधा सासना
सपरिवारा सानेकाराः सर्वोपचारैः श्रीमहात्रिपुरसुंदरी परस्या चापरस्या परापरया च सपर्यया पूजिता तर्पितास्तु न
मः इति विशेषार्घ्योदकपुष्पाक्षतैर्नवमचक्रेश्वरीहस्ते चक्रराजं समर्प्य ४ सकलमुच्चार्य समस्तचक्रेश्वरी श्रीमहात्रिपुर
सुंदरी श्रीपा.पू.त.नमः। तस्याः वामे ४ ह्स्रैं ह्स्क्लीं ह्स्रौः त्रिखंडामुद्रा देवी श्रीपा.पू.त.नमः दक्षिणे ४ सर्वकामसिद्धिश्री
पा.पू.त.नमः। इति सप्त विशेषार्घ्यविंदुभिः संतर्प्य ४ ह्स्रैं ह्स्क्लीं ह्स्रौः इति त्रिखंडामुद्रां प्रदर्श्य मूलेन मूलदेवीं सप्त
संतर्प्य पुष्पांजलिमादाय सकलमुच्चार्य देवीं संबोध्य। अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं

नवमावरणार्चनं। देव्याश्चरणकमले पुष्पांजलिं निक्षिप्य ४ परापरातिरहस्ययोगिनीमयूखायै श्रीमहात्रिपुरसुंदरी
श्रीपादुकायै नमः इति योनिमुद्रया प्रणमेत्। इति नवमावरणपूजा। अत्र पूजितावरणदेवतानां च चक्रेश्वरीणां प्रा
गुक्तध्यानकरणशक्तौ कामेश्वरांकोपवेशनं विना देवीरूपध्यानमेव कार्यं। अत्र पूजिताः सर्वावरणदेवताः मूलदे
देव्यभिमुखोपविष्टा ज्ञातव्याः। इत्थं पूजयित्वा नवचक्रमेकरूपं ध्यायन् प्राग्युक्तसर्वसंक्षोभणादित्रयोदशमुद्राः प्राग्वत्प्र
दर्श्य विशेषार्घ्यामृतविंदुभिः प्राग्वद्देवीं त्रिः संतर्प्य योनिमुद्रया प्रणमेत्। एतान्नवावरणार्चनं नित्यमावश्यकं॥ ॥श्री
विद्यानंदनाथेन शिवयोः प्रियमस्तु नः। [illegible] सौभाग्य[illegible] गोत्ररंगो रत्नवारिधौ॥१॥ ॥इति श्रीसच्चिदानंदना
थचरणारविंदद्वंद्वांतेवासिना श्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे सप्तदशस्तरंगः॥ ॥१७॥ ॥अथ पंचक
पंचिकाविद्याभिः (ह्रीं) स्थितश्चैव बिंदुचक्रे सिंहासनाकारेण मध्यवायव्येशानाग्नेयनैर्ऋतेषु पंचलक्ष्मीः पंचकोशेश्वरीः पंचक
ल्पलताः पंचकामदुघाः पंचरत्नदेवताश्च तत्र स्थिताः यावत्प्रमाणविधिना पूजयेत्। तद्यथा। ॐ ऐं ह्रीं श्रीं मूलपंचदशाक्ष
रीमुच्चार्य श्रीमहालक्ष्मीश्वरी वरदमंडिता सकलसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी श्रीविद्यालक्ष्मीबा श्रीपा.
पू.त.नमः इति मध्ये सप्त विशेषार्घ्यविंदुभिः तर्पयेत्। ततो वायव्यकोणे लक्ष्मीतमकांचनकोनिंदसोर्ध्वादि तदधो न

सौ.र.क.
प.

करदैः पद्मद्वयाभयवरधरां शुक्लांबरपरीधानां मुक्ताभरणैश्चतुर्भिर्गजैः करधृतकनककलशविनिर्गतामृतधाराभि
रभिषिच्यमानां सर्वाभरणभूषितां ध्यात्वा श्रीं श्रीं महालक्ष्मीश्वरी वेदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रि
पुरसुंदरी लक्ष्मीलक्ष्म्यंबा श्रीपा. पू. त. नमः॥ ईशाने ॐ ऐं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै
नमः॥ महालक्ष्मीश्वरी वेदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी महालक्ष्मीलक्ष्म्यंबा श्रीपादु
कां पू. त. नमः॥ ५ महालक्ष्मीं सिंदूरवर्णां त्रिनेत्रां वामाधःकराभिदक्षाधःकरांतेषु रत्नपात्रस्वर्णपद्मद्वयरत्नादर्शध
रां शुक्लवस्त्रानुलेपनां सर्वाभरणभूषितां ध्यात्वा॥ ततः आग्नेये त्रिशक्तिलक्ष्मीं नवहेमवर्णां वामोर्ध्वादितदधःकरादि
तदधःकरादिवामदक्षक्रमेण पद्मद्वयपाशांकुशधनुर्बाणधरां सर्वालंकारभूषितां ध्यात्वा॥ ५ श्रीं ह्रीं क्लीं महालक्ष्मीश्व
री वेदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी त्रिशक्तिलक्ष्म्यंबा श्रीपा. पू. त. नमः॥३॥ ततो नैर्ऋ
त्ये सर्वसाम्राज्यलक्ष्मीं नीलवर्णां त्रिनेत्रां चांशंखचक्रगदापद्मशार्ङ्गशरवराभययुताष्टभुजां सर्वालंकारभूषितां ध्या
त्वा ५ श्रीं सकलह्रीं श्रीं श्रीं महालक्ष्मीश्वरी वेदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी साम्राज्यलक्ष्म्यं
बा श्रीपादुकां पूजयामि तर्पयामि नमः॥ ५ इति संपूज्य एतच्चतुष्टयं श्रीपात्रामृतेन तर्पयेत्॥ ततः पुनर्मध्ये ५ मूलं पंचद

शाक्षरीमुच्चार्य महाकोशेश्वरी वेदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी श्रीविद्यांकोशांबा श्रीपा. पू.
त. नमः॥ इति देवीं ध्यात्वा संप्रत्यविशेषार्घ्यबिंदुभिः संतर्प्य पुनः वायव्यकोणे परंज्योतिं परक्तवर्णां मोर्ध्वादितदधोन्तैः करैः
पाशांकुशवराभीतिधरां त्रिनेत्रां रक्तपुष्पांबरानुलेपाभरणां ध्यात्वा॥ ५ ॐ ह्रीं हंसः सोहं स्वाहा महाकोशेश्वरी वेदमंडितास
नसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी परंज्योतिःकोशांबा श्रीपा. पू. त. नमः॥ ततः ईशाने परनिष्कलदेव
तां शुक्लांबरानुलेपाभरणां वामजानुन्यस्तवामकरां दक्षिणे ज्ञानमुद्रां दधतीं ध्यात्वा॥ ५ ॐ महाकोशेश्वरी वेदमंडितासन
संस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी परनिष्कलकोशांबा श्रीपा. पू. त. नमः॥ ततः आग्नेये अजपाकोशेश्व
रीं रक्तपीतवामदक्षिणांगद्वयां वामोर्ध्वादिदक्षोर्ध्वांतकरैः पाशाभयवरपरशुधरां अर्द्धनारीश्वररूपिणीं त्रिनेत्रां चंद्र
चूडां सर्वाभरणभूषितां ध्यात्वा॥ ५ हंसः महाकोशेश्वरी वेदमंडितासनेत्यादि अजपाकोशांबा श्रीपा. पू. त. नमः॥ ततो
नैर्ऋत्ये मातृकोशं रूपां शुभ्रमाल्यकासरस्वतीं ध्यात्वा ५ अ आ इत्यादि २५ महाक कोशेश्वरी वेदमंडितासनेत्यादि मातृ
काकोशांबा श्रीपा. पू. त. नमः॥ इत्येतच्चतुष्टयं श्रीपात्रामृतेन तर्पयेत्॥ अथ पंचकल्पलता॥ तत्र मध्ये मूलदेवीं ध्या
त्वा मूलं पंचदशाक्षरीमुच्चार्य महाकल्पलतेश्वरी वेदमंडितेत्यादि श्रीविद्याकल्पलतांबा श्रीपा. पू. त. नमः॥ ततो वायव्ये पं

सौ·र·क·
प·

चक्रेश्वरीं रक्तां वरालेपमाल्याभरणां वामाद्यूर्ध्वयोस्तदाद्यधःस्थयोश्च करयोः पाशांकुशधनुर्बाणपुस्तकाक्षमा
लावराभयधरां ध्यात्वा। ४ ह्रीं क्लीं ऐं ब्लूं स्त्रीं महाकल्पलतेश्वरीवृंदमंडितासनसंस्थिते स्वादि पंचकोशेश्वरीकल्पलताख्या
श्रीपा·पू·त·र्प·नमः॥ अत्र पंचकोशेश्वरीस्थाने चरितानि सांतत्रे त्रोकरूपां ध्यात्वा कल्पलतात्वेन पूजयेदिति के
चित्। तत्र स्वगुरुमतमादरणीयं। ततऐशान्ये पारिजातेश्वरीं शुभ्रां शुभ्रां वरालेपाभरणां चंद्रचूडां वामाधःकरादि
दक्षाधःकरांतेषु पुस्तकवीणासुधाकुंभाक्षमालाधरां सर्वाभरणभूषितां ध्यात्वा। ४ ॐ ह्रीं ह्स्रैं ह्रीं ॐ सरस्वत्यै नमः॥
महाकल्पलतेश्वरीवृंदमंडिते स्वादि पारिजातेश्वरीकल्पलताख्या श्रीपा·पू·त·नमः ततः आग्नेये कुमारीं उद्यत्सूर्य
समप्रभां वामाद्यूर्ध्वयोस्तदाद्यधःस्थयोः इक्षुधनुःपुष्पबाणपुस्तकाक्षमालाधरां रक्तमाल्यांबरालेपरत्नमुकुटा
दिनानाभरणां ध्यात्वा। ४ क्लीं ऐं सौः महाकल्पलतेश्वरीवृंदमंडिते स्वादि कुमारीकल्पलताख्या श्रीपा·पू·त·नमः। अत्र त्रि
पुरीकल्पलतेति केचित्। तदाद्यगुरुशक्तिमेव त्रिपुरां ध्यात्वा तन्निर्विद्यामेवोच्चार्य तां कल्पलतात्वेन पूजयेत्। अत्रा
पि स्वगुरुमतं प्रमाणं। ततः नैर्ऋत्ये पंचबाणेश्वरीं बालार्कमंडलारुणां नानालंकारशोभितां रक्तमाल्यांबरालेपां
वामादिस्तुकोदंडपुष्पबाणांकितकरद्वयां ध्यात्वा। ४ द्रां द्रीं क्लीं ब्लूं सः महाकल्पलतेश्वरीवृंदे स्वादि पंचबाणेश्व

रीकल्पलताख्या श्रीपा·पू·त·नमः॥ इति संपूज्य श्रीपात्रामृतबिंदुभिस्तर्पयेत्॥ अथ पंचकामदुघाः तत्र मध्ये मूल
देवीं ध्यात्वा मूलपंचदशीमुच्चार्य महाकामदुघेश्वरीवृंदमंडिते स्वादि॥ श्रीविद्याकामदुघाख्या श्रीपा·पू·त·नमः
॥ ततो वायव्ये अमृतपीठेश्वरीं कर्पूराभां मुक्तामयाभरणां दक्षवामकरयोर्ज्ञानमुद्राक्षमालाधरां ध्यात्वा ४ ॐ ह्रीं हंसः सं
जीवनि जूं जीवं प्राणग्रंथिस्थं कुरु कुरु सः स्वाहा॥ महाकामदुघेश्वरीवृंदमंडितासनसंस्थिते सर्वसौभाग्यजन
नी श्रीमहात्रिपुरसुंदरि अमृतपीठेश्वरीकामदुघाख्या श्रीपा·पू·त·नमः॥ ततऐशान्ये सुधासूः कामदुघां शुक्लां वरालेप
स्रग्विभूषणां पुस्तकाक्षमालान्वितवामदक्षकरद्वयां कुमारिकां ध्यात्वा ४ वद वद वाग्वादिनि ह्स्रैं क्लिन्ने क्लेदिनि म
हाक्षोभं कुरु कुरु ह्सौं ॐ मोक्षं कुरु कुरु ह्सौः महाकामदुघेश्वरीवृंदमंडितासनसंस्थिते सर्वसौभाग्यजननी श्री
महात्रिपुरसुंदरि सुधासूः कामदुघाख्या श्रीपा·पू·त·नमः॥ आग्नेये अमृतेश्वरीं सुधासूरिव ध्यात्वा ऐं ब्लूं स्त्रौं
जं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा॥ महाकामदुघेश्वरीवृंदमंडितासन
संस्थिते सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरि अमृतेश्वरीकामदुघाख्या श्रीपा·पू·त·नमः नैर्ऋत्ये अन्नपूर्णेश्व
रीं रक्तवर्णां विचित्रवसनाभरणां स्वर्णदर्वीदुग्धान्नपूर्णरत्नपात्रे दक्षवामकरद्वयां ध्यात्वा॥ ॐ ह्रीं श्रीं क्लीं नमो भ

सौ·र·क· गवति माहेश्वरि अन्नपूर्णे स्वाहा॥ महाकामदुघेश्वरी वंदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी
प· अन्नपूर्णाकामदुघाम्बाश्री पा·पू·त·नमः इति संपूज्य श्रीपात्रामृतबिंदुभिस्तर्पयेत्॥ अथ पंचरत्नपूजा· तत्र मध्ये म
जदेवीं ध्यात्वा पंचदशीमुच्चार्य महारत्नेश्वरी वंदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी श्री-
विद्यारत्नांबाश्री पा·पू·त·नमः॥ वायव्ये सिद्धलक्ष्मीं सुवर्णवर्णां मुक्तामालिक्यभूषितां मातुलुंगवराभीतदसवा
मकरद्वयां ध्यात्वा ४ जश्रीं महाचंडतेजः संकर्षिणि कालि मंथाने हः महारत्नेश्वरी वंदमंडितासनसंस्थिता॥ सर्व-
सौभाग्यजननी श्रीमहात्रिपुरसुंदरी सिद्धलक्ष्मीरत्नांबाश्री पा·पू·त·नमः॥ ऐशान्ये मातंगेश्वरीं हिंगुलाभां वीणा
वादनतत्परां कदंबपुष्पालंकृतवेणीबंधां शंखकुंडलधरां शुकश्यामलां रक्तांशुकां ध्यात्वा॥ ४ ह्रीं क्लीं सौः ऐं
क्लीं ह्रीं श्रीं ॐ नमो भगवति श्रीमातंगेश्वरि सर्वजनमनोहरि सर्वमुखरंजिनी क्लीं ह्रीं श्रीं सर्वराजवशंकरि सर्वस्त्रीपुरुषवशं
करि सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि सर्वलोकवशंकरि अमुकं मे वशमानय स्वाहा ४ श्रीं ह्रीं ऐं सौः क्लीं ऐं महार
त्नेश्वरी वंदमंडितासनसंस्थिता सर्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी श्रीमातंगेश्वरीरत्नांबाश्री पा·पू·त·न-
मः॥ आग्नेये भुवनेश्वरीं उद्यत्सूर्यसहस्राभां त्रिनेत्रां रक्तांबरानुलेपनमाल्याभरणां वामोर्ध्वादि वामाधःकरेषु

पाशांकुशवराभयकरां ध्यात्वा ४ ह्रीं महारत्नेश्वरी वंदेमादि भुवनेश्वरीरत्नांबाश्री पा·पू·त·नमः॥ नैर्ऋत्ये वाराहीं नील
वर्णां दंष्ट्रोर्ध्वादितदधो न करेषु हलकपालमुशलवरधरां त्रिनेत्रां मुंडमालादि नानाभूषणां चंद्रशेखरां दंष्ट्राकराल
कोलवदनां ध्यात्वा ४ ऐं नमो भगवति वार्ताली वाराहि वाराहि वाराहि वाराहि वाराहमुखि वाराहमुखि अंधे अं-
धिन्यै नमः॥ रुंधे रुंधिन्यै नमः॥ जंभे जंभिन्यै नमः॥ मोहे मोहिन्यै नमः॥ स्तंभे स्तंभिन्यै नमः॥ अमुकं स्तंभय सर्वदुष्टप्रदुष्टानां
सर्वेषां सर्वजिह्वा स्तंभं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ठठ हुं फट् स्वाहा॥ महारत्नेश्वरी वंदमंडितासनसंस्थिता स-
र्वसौभाग्यजननी श्रीमहात्रिपुरसुंदरी वाराहीरत्नांबाश्री पा·पू·त·नमः इति संपूज्य श्रीपात्रामृतबिंदुभिस्तर्पयेत्
इति पंचपंचिकान्तर्गत पंचसिंहासनपूजा॥ अथ चतुःसमयपूजा॥ तत्र बिंदुचक्रे एव मूले देव्यग्रे ४ ऐं क्लीं सौः ॐ नमः का-
मेश्वरि इच्छाकामफलप्रदे सर्वसत्ववशंकरि सर्वजगत्क्षोभणकरि हुं हुं द्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं कामेश्वरी समयदेवताश्री
पा·पू·त·नमः॥ देव्या वामे ४ ऐं ह्रीं सर्वकामार्थसाधिनि वज्रेश्वरि वज्रप्रदे वज्रपंजरमध्यगते ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे
ह्रीं वज्रनित्यायै नमः॥ वज्रेश्वरी समयदेवताश्री पा·पू·त·नमः॥ दक्षिणे ४ पूर्वोक्त भगमालिनी विद्यामुच्चार्य भगमालि-
नी समयदेवताश्री पा·पू·त·नमः॥ इति एवं त्रयं समष्ट्या सक्के वज्रपुष्पैः पूजयित्वा श्रीपात्रबिंदुभिस्तर्पयित्वा मध्ये म

सौ॰र॰क॰
प॰

नदेव्यामेव ४ क्लीं भगवति क्लिन्ने नित्ये कामेश्वरि ह्रीं सर्वसत्त्ववशंकरि सः त्रिपुरभैरवी ऐं ॥ बविच्चे क्लीं महात्रिपुरसुंदर्यै नमः ॥ श्री
महात्रिपुरसुंदरि समयदेवता श्रीपा॰ पू॰ त॰ नमः ॥ इति सप्तवारं केवलपुष्पैः संपूज्य विशेषार्घ्यबिंदुभिः संतर्प्य क्लीं सिति
शस्तुत्या पनमुद्रां बध्वा मूलविद्यया प्रदर्श्य हं इति मुंचेत् ॥ इति चतुःसमयपूजा ॥ अथ बिंदुचक्र एव समयपूजा स्था
ना हृदि पश्चि तः षल्लोले विभाव्य तत्कोणेषु डाकिन्याद्याः षड्योगिनीः पूजयेत् ॥ तत्र नैर्ऋत्यकोणे ४ अं आं रं डां डीं डूं डैं
डौं डः डमलवरयूं डाकिनी श्रीपा॰ । तां परितः ४ अं अमृता श्री॰ आं आकर्षिणी श्री॰ एवं पूर्वषोडशमासोक्ताः षोडशश
क्तीः पूजयेत् तर्पयेत् ततो वायव्यकोणे ४ कं १२ रां रीं रूं रैं रौं रः रमरवरयूं राकिनी श्रीपा॰ । तां परितः कं कोलरात्री श्री
पा॰ । इत्यादिषोडशमासोक्ता द्वादशशक्तीः पूजयेत् । ततः पूर्वकोणे ४ लां लीं लूं लैं लौं लः । लमलमवरयूं लाकिनी श्री
पा॰ । तां परितः । डं डामरी श्रीपा॰ । इत्यादि षड् दशशक्तीः पूजयेत् ॥ ततः आग्नेये ४ कं कां कीं कूं कैं कौं कः कमलवरयूं
काकिनी श्रीपा॰ । तां परितः बं बंधिनी श्रीपा॰ । इत्यादि षट् शक्तीः पूजयेत् । ईशान्ये ४ वं ४ सां सीं सूं सैं सौं सः समर
वरयूं साकिनी श्रीपा॰ । तां परितः वं वरदा श्रीपा॰ । इत्यादि चतस्रः पूजयेत् पश्चिमे ४ हं सं हां हीं हूं हैं हौं हः हमल
वरयूं हाकिनी श्रीपा॰ इति संपूज्य तन्मार्गयोर्हंसवतीं समावर्तिनीं संपूज्य श्रीपात्रबिंदुभिः संतर्पयेत् । एता मामाव

रणपूजा शक्तौ नाग एव केवलं तत्तत्कोणेषु पूजयेत् । एताः षोडशमासोक्ता वद्धेयाः ॥ इति षड्योगिनी पूजा ॥ अथ योगिन्याद्याः
श्रीचक्रस्य द्वारदेवताः पूजयेत् ॥ तत्र पश्चिमद्वारे ४ ऐं ह्रीं श्रीं सर्वयोगिनीभ्यः सर्वभूतगणेभ्यः सर्वभूताधिपतिडा
किनीभ्यः शाकिनीभ्यः इमां पूजां बलिं गृह्ण गृह्ण स्वाहा सर्वयोगिनी श्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति ना
नावर्णां सुधाकारवाहनां भरणाः स्त्रियः इति ध्यात्वा पूजयेत् । ततः पूर्वद्वारे ४ क्षौं क्षेत्रपालाय नमः । क्षेत्रपाल श्री
पा॰ । इति रक्तोग्रत्रिनेत्रं दिगंबरोर्ध्वकेशं नीलवर्णं गदी कपालधरं दिगंबरं सर्वनरपालमुग्रदंष्ट्रं ध्यात्वा पूजयेत् । दक्षि
णद्वारे महागणपतिं पंचयागमासोक्तरूपं ध्यात्वा ४ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वा
हा महागणपति श्रीपादुकां पूजयामि । ततः उत्तरद्वारे वटुकभैरवं बालं स्फटिकनिभं दिव्यालंकारभूषितं त्रिनेत्रं दंडखट्वा
ङ्गकरयोः फलदं डौं दधानं ध्यात्वा ४ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं वटुकभैरव श्रीपा॰ । इति संपूज्य
श्रीपात्रबिंदुभिः संतर्पयेदिति योगिन्यादि पूजा ॥ अथाम्नाय पूजा ॥ तत्र त्रैलोक्यसंमोहन सर्वाशापरिपूरक सर्व
संक्षोभणकारक सृष्टिचक्रे पूर्वाम्नायदेवतानुक्रामनपत्रछायायामुपविष्टां पद्मरागारुणांगीं रक्ताभरणवस्त्रमाल्या
नुलेपनां पाशांकुशवराभयधरां रत्नमुकुटार्पितचंद्ररेखां ध्यात्वा ४ ह्स्त्रीं स्फ्रीं श्रीं ह्स्क्लीं पूर्वाम्नायादेवतायै उन्मनी दे

सौ.र.क.
५.

वीश्रीपा.पू.त.नमः॥ततः चतुर्दशारदिदशारात्मके स्थितिचक्रे दक्षिणाम्नायदेवता उद्यत्सूर्यसहस्राभा नानालंकारभूषि
तारक्तवस्त्रानुलेपनी वामाद्यूर्ध्वयोस्तदाधस्थयोः करयोः पाशांकुशपुस्तकाक्षमालाधरां ध्यात्वा ४ ऐं क्लीं चें ह्रीं
मदद्रवे कुलेश्वरि सौः दक्षिणाम्नायाधिदेवता भोगिनी देवी श्रीपा.पू.त.नमः॥अथ नवयोनिचक्रे संहाररूपे पश्चिमा
म्नायदेवतां पंचमुंडासनां बालार्कसहस्रकांतिं मुंडमालां रक्तवस्त्राभरणानुलेपनां वामाद्यूर्ध्वतदाधः पाशांकु
शाभयवरहस्तां त्रिनेत्रां ध्यात्वा ४ ऐं ह्रीं श्रीं क्लैं सौः नमो भगवति क्लैं कुब्जिकायै स्रां ह्रीं ह्रूं अघोरे घोरे अघोरमुखि छिं छि
किणि किणि विच्चे सौः क्लैं श्रीं ह्रीं ऐं पश्चिमाम्नायाधिदेवता कुब्जिका श्रीपा.पू.त.नमः ततः समष्टिश्रीचक्रे उत्तराम्ना
यदेवतां कालीं पंचमुंडासनां बंधूककुसुमारुणदेहवस्त्राभरणानुलेपनां चंडचंडां मुंडमालाधरां त्रिनेत्रां वामो
र्ध्वादितदधोन्तपुस्तकाक्षमालावराभयकरां ध्यात्वा ४ हसखफ्रें महाचंडयोगेश्वरि उत्तराम्नायाधिदेवता काली देवी
श्रीपा.पू.त.नमः॥इति चतुराम्नायपूजा॥ततो मूलदेवीमेव प्रथमं मूलविद्यया संपूज्य संतर्प्य ततो रक्तवर्णां सुव
र्णदेवीं कुंभाभरितस्वर्णपात्रं च दधानां त्रिनेत्रां चंडचंडां विचित्रवस्त्राभरणां अन्नेश्वरीं रक्तरूपं ध्यात्वा ४ ह्रीं सौः
श्रीं क्लीं ॐ नमो भगवत्यन्नपूर्णे ममाभिलषितं अन्नं मे देहि स्वाहा अन्नपूर्णसुंदरी श्रीपा.पू.त.नमः॥इति त्रिः सं

५८

पूज्य विशेषार्घामृतबिंदुभिः संतर्प्य पुनः मूलेन मूलदेवीं संपूज्य संतर्प्य मूलदेवीमेवानुत्तराम्नायदेवतारूपां मकुटक
शशांककोटिप्रभोज्ज्वलां मुद्रापुस्तककरां त्रिनेत्रां चंडचंडां अंशुकावराभरणमाल्यानुलेपनां ध्यात्वा ४ सौः अनुत्तरा
म्नायदेवता परांबा श्रीपा.पू.त.नमः इति सप्तविंशतिवारं संपूज्य विशेषार्घबिंदुभिः संतर्प्य पुनर्देवीं परारू
पां ध्यात्वा मूलेन संपूज्य तर्पयेत्॥इत्यनुत्तराम्नायपूजा॥अथ विद्यात्रररूपां श्रीकामकलां पूजयेत्। तत्र प्रथमं बिंदुच
क्रमध्ये प्रणवादिनमोन्तया मूलविद्यया मूलदेवीं षोडशवारं संपूज्य तामेव पंचदशाक्षरीरूपेण परिणतां ध्यात्वा पु
नस्तां पंचदशाक्षरीमेकैकाक्षरलयेनातिमतुरीयस्वरावशेषेण तद्रूपां कामकलां प्रकाशशक्त्यात्मकपरमशिवो
नर्गतविश्वरूपां प्रकाशविमर्शात्मकत्वेन बहिःप्रकाशमानां सिंदूरवर्णां त्रिनेत्रां पीनोन्नतघनस्तनीं रक्तवस्त्राभर
णां गराणां अतिकोमलांगीं वराभयांकितकरद्वयां ध्यात्वा ४ ऐं परमसंवित्कलां श्रीमहात्रिपुरसुंदरी श्रीपा.पू.त.न
मः॥इति त्रिः संपूज्य विशेषार्घबिंदुभिस्त्रिः संतर्प्य पुनस्तामेव मेलदेवीरूपां ध्यात्वा मूलेन षोडशवारं संपूज्य सं
तर्प्य बिंदुचक्रे वायव्यादक्षिणमध्येषु ४ ईं मूलविद्याप्रथमकूटं हंसः श्रीं काशचरण श्रीपा.पू.त.नमः॥४
ईं द्वितीयकूटं सोहं विमर्शचरण श्रीपा.पू.त.नमः॥४ ईं तृतीयकूटं हंसः सोहं प्रकाशविमर्शचरण श्रीपा.पू.

प्र

त. नमः॥ ५ ई तुरीयविद्यामुद्राचार्यहंसः शिवः सौः सोहं निर्वाणचरणश्रीपा. पू. त. नमः। इति चरणचतुष्टयं संपूज्य
विशेषार्घबिंदुभिः संतर्प्य श्रीगुरुगुरुपंक्तिपूजनस्थाने प्रथमरेखायां उत्तराग्रे ५ मकुलानंदनाथश्रीपादुकां पू. त. न
मः॥ द्वितीयरेखायामुत्तराग्रे ५ निष्कलानंदनाथश्रीपा. त. नमः॥ तृतीयरेखायां उत्तराग्रे ५ नवात्मानंदनाथश्रीपा. पू. त.
नमः। अक्रूरानंदनाथश्रीपा. पू. त. नमः॥ इमेन गुरुचतुष्टयं दिव्यौघसिद्धौघमानवौघत्वेन पूजयेत्॥ इति गुरुपंक्तिं
संपूज्य श्रीपात्रबिंदुभिः संतर्प्य पुनर्बिंदुमध्ये मूलदेवीं श्रीगुरुकामकलां ध्यात्वा ५ ई सच्चिदानंदनाथपरमसंवि
दंबाश्रीपा. पू. त. नमः। इति त्रिः संपूज्य विशेषार्घेण संतर्प्य ५ ई परमसंवित्कलामहात्रिपुरसुंदरीश्रीपा. पू. त. नमः
इति च त्रिः संपूज्य संतर्प्य तस्यामेव ५ ई सपराईकुलानंदनाथोर्ध्वबिंदुवक्त्रश्रीपा. पू. त. नमः। ५ ई सपराईकुलानंदना
थाधोबिंदुयुगस्तनद्वयश्रीपा. पू. त. नमः। ५ ई सपराईकुलानंदनाथव्यंजितरेखायोनिश्रीपा. पू. त. नमः। इत्य
नेन चतुष्टयमवयवत्वेन संपूज्य विशेषार्घबिंदुभिः संतर्प्य पुनः पूर्वोक्तप्रकारेण कामकलासुंदरीं सिंदू
रवर्णां त्रिनेत्रां इत्यादि ध्यात्वा ५ ई परमसंवित्कलाश्रीमहात्रिपुरसुंदरीश्रीपा.। इति संपूज्य विशेषार्घबिंदुभिः सं
तर्प्य श्रीगुरुस्वगुरुपूजास्थाने गुरुपादुकाविद्यया श्रीगत्वा गुरुं संपूज्य श्रीपात्रबिंदुभिः संतर्पयेत्। इतिका

५९

मकलापारंपर्यपूजा॥ अथोर्ध्वाम्नायदीक्षितो बिंदुचक्रे मूलेन मूलदेवीं त्रिः संपूज्य संतर्प्य पुनस्तामेवोर्ध्वाम्नायदेवता
रूपिणीं महापोडावसानशिखिनध्यानोक्ताईनारीश्वररूपां वक्ष्यमाणषट्सरोरुहमध्यगतत्रिकोणमध्यस्थसिंहास
नोपविष्टां ध्यात्वा ५ सौः स्हौः तुरीयविद्यामुद्राचार्यश्रीमहात्रिपुरसुंदरीपरांबाश्रीपा. पू. त. नमः। इति त्रिः संपूज्य विशेषा
र्घबिंदुभिः संतर्प्य पुनः ५ सौः श्रीप्रासादपरांबाश्रीपादुकां पू. त. नमः। ५ स्हौः श्रीपराप्रासादपरांबाश्रीपा. पू. त. नमः। इति
च संपूज्य विशेषार्घबिंदुभिः संतर्प्य बिंदुचक्र एव प्रथममष्टदलकमलं तद्बहिः षट्त्रिंशतिदलं तद्बहिः षोडशदलं तद्ब
हिरष्टत्रिंशद्दलं तद्बहिश्चतुर्दशदलं तद्बहिरेकपंचाशद्दलमिति षट्सरोरुहात्मकं मंडलं चक्रे ध्यात्वा सर्वदलप्र
गतैकपंचाशद्दलकमलेण एकपंचाशद्दलपद्मायनम इति पुष्पांजलिं दद्यात्॥ एवमग्रेऽपि तत्तत्स्थानं पूजयित्वा सर्वत्र
तत्तदावरणं पूजयेदिति॥ ततो देवाग्रदलमारभ्य ५ ऐं ह्रीं श्रीं सौः स्हौः अं प्रपंचरूपश्रीश्रीपा. पू. त. नमः। ओ ही पद्म
पद्मांबाश्रीपा.। एवं प्रपंचरूपात्मकैकपंचाशद्देवतावामावर्तेन संपूज्य श्रीपात्रबिंदुभिः संतर्प्य ५ ऐं ह्रीं श्रीं सौः
स्हौः अं आं इत्यादि सर्वांनि संतमुच्चार्य सकलप्रपंचाधिदेवतायै श्रीपरांबादेव्यै नमः॥ स्हौः स्हौः श्रीं ह्रीं ऐं ५ स
मस्तप्रपंचरूपिणीं श्रीपरांबादेवीश्रीपा. पू. त. नमः। इति मूलदेवीं संपूज्य विशेषबिंदुभिः संतर्प्य पुष्पांजलिं

मादायं ऐं ह्रीं श्रीं ह्स्रौं ः स्हौः अमित्र सिद्धि मित्रादि स्रोकं पठित्वा प्रथमावरणार्चनमिति पुष्पांजलिं दत्वा पंचदेव॥
तामष्टरेखायै श्रीपरांबादेव्यै नमः॥ इति योनिमुद्रया प्रणमेत्॥ इत्थं षट्स्वप्यावरणेषु तत्तदावरणप्रांते महायो॥
ग्याम्नेन तत्र मासासमानो रूपव्यापकमंत्रैणो कृत्वा मध्ये मूलदेवीं पुष्पांजलिना संपूज्य संतर्प्य त्रिरूपु तस्यैव तत्
तदावरणपूजां समर्प्य तथैव तत्रव्यरस्वरूपांश्रीपरदेवतां योनिमुद्रया प्रणमेदिति॥ तदंतश्चतुर्दशदलकमल
दलेषु देव्यग्रादिध अतललोकनिलये त्यादि देवता धारशास्वं बादेवी श्रीपा॰पू॰त॰नमः॥ इति भुवनव्यासो रूचतुर्दश
देवतावामावर्त्तेन संपूज्य तदंतरष्टत्रिंशद्दलकमलदलेषु देव्यग्रदलमारभ्य ॐ अंकेशवात्तराश्रीपा॰पू॰त॰नमः॥ ए
वमष्टत्रिंशद्देवतावामावर्त्तेन संपूज्य तदंतः षोडशदलकमलदलेषु ॐ अं आं इं एकजलकोटि निदेसादि एकशूले॥
श्वर्यवादेवी श्रीपा॰पू॰त॰नमः॥ एवं वामावर्त्तेन षोडशदेवताः संपूज्य तदंतः षड्विंशति दलकमलदलेषु देव्यग्रमारभ्य ॐ आं
सहस्रकोटि सादिनिवसंवादेवी श्रीपा॰पू॰त॰नमः इति षड्विंशति देवताः वामावर्त्तेन संपूज्य तदंतरष्टदलेषु देव्यग्रद
लमारभ्य ॐ अनंतकोटीसादि असितांगभैरवश्रीपा॰पू॰त॰नमः॥ एवं वामावर्त्तेन न्यासोक्ताष्टभैरवदेवताः संपूज्य
देवताग्रे ऊर्ध्वाम्नायगुरून् दिव्यसिद्धमानवौघक्रमैर्मेरणापञ्च संक्तित्रयेणाष्टदलयोरंतरालेपूजयेत् तद्यथा॥ प्र

थमरेखायां॥ ॐ आदिनाथपरशिवश्रीपा॰॥ ॐ आदिशक्तिपरशिवाश्रीपा॰॥ ॐ सदाशिवपरशिवश्रीपा॰॥ ॐ सदाशि
वाश्रीपा॰॥ ॐ ईश्वरपरशिवश्रीपा॰॥ ॐ ईश्वरीपरशिवाश्रीपा॰॥ ॐ रुद्रपरशिवश्रीपा॰॥ ॐ रुद्राणीपरशिवाश्रीपा॰
॥ ॐ विष्णुपरशिवश्रीपा॰॥ ॐ वैष्णवीपरशिवाश्रीपा॰॥ ॐ ब्रह्मपरशिवश्रीपा॰॥ ॐ ब्रह्माणीपरशिवाश्रीपा॰॥ ॐ इति दिव्यौघः
ततो द्वितीयरेखायां॥ ॐ सनत्कुमहाशिवश्रीपा॰॥ ॐ सनंदनमहाशिवश्रीपा॰॥ ॐ सनातनमहाशिवश्रीपा॰॥ ॐ सनत्कुमा
रमहाशिवश्रीपा॰॥ ॐ सनत्सुजातमहाश्रीपा॰॥ ॐ ऋभुमहाशिवश्रीपा॰॥ ॐ दत्तात्रेयमहाशिवश्रीपा॰॥ ॐ रैवतकम
हाशीवश्रीपा॰॥ ॐ वामदेवमहाशिवश्रीपा॰॥ ॐ व्यासमहाशिवश्रीपा॰॥ ॐ शुकमहाशिवश्रीपा॰॥ ॐ इति सिद्धौघः
ततः स्तृतीयरेखायां॥ ॐ नरसिंहसदाशिवश्रीपा॰॥ ॐ महेशसदाशिवश्रीपा॰॥ ॐ भास्करसदाशिवश्रीपा॰॥ ॐ
महेंद्रसदाशिवश्रीपा॰॥ ॐ माधवसदाशिवश्रीपा॰॥ ॐ विष्णुसदाशिवश्रीपा॰॥ इति मानवौघः॥ इत्थं गुरु
पंक्तित्रयं संपूज्य श्रीपात्रबिंदुभिः संतर्प्य पुनः पूर्वोक्तरूपां ऊर्ध्वाम्नायदेवतां ध्यात्वा पूर्ववत् ह्स्रौः स्हौः॥ तु
रियविद्याद्यसादि श्रीपाश्रादपरांबा इत्थं तं संपूज्य संतर्प्य चरणादि दीक्षापुरुषोत्तत्तच्चैवचरणादिष॥

सौ॰ र॰ प॰

आधारविद्यां तन्मासोक्तचक्रकारेण पूजयेत् तर्पयेत्। तत्र निष्कलमध्ययं मातृकामानमेयविवर्जितं शंभुचरणं
ध्यात्वा प्राग्गुरुचरणविद्यया त्रिः संपूज्य संतर्प्य चरणोत्तमाः पंचांबादिम्यासोक्तदेवताः संपूज्य विशेषार्घविंदु
भिः संतर्प्य पुनश्चरणविद्यया त्रिः संपूज्य संतर्प्य तामेव मूलदेवीं ध्यात्वा मूलेन संपूज्य संतर्प्य इत्यूर्ध्वाम्ना
यपूजा श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना कृते सौभाग्यरत्नाब्धौ रत्नं गोऽष्टदशोऽगमत्॥ ॥इति श्री
सच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरेऽष्टादशस्तरं
गः॥ ॥१८॥ ॥ ॥अथ षडन्वयशांभवाख्योर्ध्वाम्नायदीक्षायुक्तस्यैतत्तंत्रोक्तमानसादिक्रमपद्धं पूज
येत्। तद्यथा॥ तत्र विंदुचक्र एव नैर्ऋत्यवायव्यपूर्वाग्नेयपश्चिमेशानेषु षट्सु स्थानेषु षट्कोणषट्कं विभाव्य तेषु
षट्सु षट्कोणेषु मासोक्तपरेश्वरादिमिथुनषट्कं सरश्मिकं पूजयेत्॥ तत्र प्रथमं मूलदेवीं सकामेश्वरां ध्या
त्वा मूलेन त्रिः संपूज्य संतर्प्य पुनस्तामेव षडन्वयशांभवाधिदेवतां सुईनारीश्वररूपां ध्यात्वा प्राग्गुरुपंक्ति
क्रमिश्रचरणविद्याः स्त्रीं त्रिःस्त्रीः त्रिः संपूज्य प्रतिचरणं विशेषविंदुभिः संतर्प्य नैर्ऋत्यदिग्गतषट्कोणमध्ये

तामेव सकामेश्वरां परेश्वरपरेश्वरीरूपां ध्यात्वा ऐं ह्रीं श्रीं ह्स्क्लैं ह्सौः सहसौं ऐं क्लैं श्रीपरेश्वरानंदनाथपरेश्वरीपरांबा
ह्सौः ह्स्क्लैं श्रीं ह्रीं ऐं श्रीपादुकां पूजयामि तर्पयामि नमः॥ इति संपूज्य विशेषार्घविंदुभिः संतर्प्य षट्कोणेष्वीशानादिवा
यव्यांतेषु प्राग्गुरुमानसक्रमवद्विंशतिमिथुनं प्राक्प्रोक्तसंख्याविभागेन संपूज्य प्रागुक्तविंदुभिस्तर्पयेत्॥
ततः पश्चिमषट्कोणमध्ये मूलदेवीमेव नाम सकमाधिदेवत विच्चेश्वरविच्चेश्वरीरूपां तत्तंत्रोक्तध्यानरूपां ध्या
त्वा ऐं ह्रीं श्रीं ह्स्क्लैं ह्सौः ह्स्रैं ऐं क्लीं ब्लूं विच्चेश्वरानंदनाथविच्चेश्वरीपरांबा ह्सौः ह्स्क्लैं श्रीं ह्रीं ऐं श्रीपादुकां पूजया
मि तर्पयामि नमः॥ ततः पूर्वादीशानांतेषु कोणेषु मासोक्तक्रमेण षट्त्रिंशद्रश्मिमिथुनं संपूज्य प्राग्वद्विंदुभि
स्तर्पयेत्॥ ततो वायव्यषट्कोणे वायव्यक्रमाधिदेवतं हंसेश्वरहंसेश्वरीरूपां परदेवतां ध्यात्वा ऐं ह्रीं श्रीं ह्स्क्लैं
ह्सौः ह्स्रैं ऐं क्लीं ब्लूं कायै ह्स्क्लैं विच्चे हंसेश्वरानंदनाथहंसेश्वरीपरांबा ह्सौः ह्स्क्लैं श्रीं ह्रीं ऐं श्रीपादुकां पूजयामि
तर्पयामि नमः। ततः आग्नेयादिपूर्वांतेषु कोणेषु प्राग्गुरुसप्तविंशतिरश्मिमिथुनं प्राग्गुरुविभागेन पूजयेत्
ततईशानषट्कोणमध्ये तेजसक्रमदैवतं सर्वेश्वरसर्वेश्वरीरूपिणीं परदेवतां ध्यात्वा ऐं ह्रीं श्रीं ह्स्क्लैं ह्सौः
ह्रौं ह्रीं ह्रीं स्त्रां स्त्रीं स्त्रीं श्रीं ह्सौं स्त्रां स्त्रें स्त्रौं किलि किलि स्क्लां स्क्लैं स्क्लीं विच्चे ह्रौं हसहसक्लें हस सम जवयकूं ओं

सौ.र.क्र.
प.

हसक्षमलवयरां हसक्षमलवयरूं हसक्षमलवयरीं ऐं क्लीं स्त्रैं स्त्रौं ह्रीं हूं ह्रां ऐं निसि भगवति स्त्रैं कुब्जेश्वरी ह्रां ह्रूं
ह्रीं ज्रां ज्रीं हूं स्त्रैं ह्रौं ॐ अगनमेस्त्रौं स्त्रैं स्त्रौं स्त्रैः हैं श्री फट् स्त्रौं ॐ अघोरमुखि कुब्जिकायै ज्रां ज्रूं ज्रीं घोरे अघोरे
ऐं रं लं वं हं सं किलि किलि महा किलि विच्चे संवर्त्तेश्वरानंदनाथ संवर्त्तेश्वरी परांबा॥ स्त्रौं स्त्रैं श्री ह्रीं ऐं श्रीपादु
कां पूजयामि तर्पयामि नमः॥ इति संपूज्य विशेषबिंदुभिः संतर्प्य पश्चिमादि निर्ऋत्यंतेषु कोणेषु पर्वोक्तक्रमेण क
त्रिंशद्रश्मिमिथुनं संपूज्य श्रीपात्रबिंदुभिस्तर्पयेत्॥ ततः पूर्वषट्कोणमध्ये आप्यक्रमाधिदैवत दीपेश्वर दीपे
श्वरी रूपां परदेवतां ध्यात्वा ऐं ह्रीं श्रीं स्त्रैं स्त्रौं: स्त्रैं लें रिं गदिपिं गटिकंटपिविच्चे दीपेश्वरानंदनाथ दीपेश्वरी परां
बा॥ स्त्रौं: स्त्रैं श्री ह्रीं ऐं श्रीपादुकां पूजयामि तर्पयामि नमः॥ ततस्तस्य पश्चिमादि निर्ऋत्यंतेषु कोणेषु पूर्वो
२ क्तषड्विंशति रश्मिमिथुनं प्राग्वद्विभज्य संपूज्य श्रीपात्रबिंदुभिस्तर्पयेत्॥ ततः आग्नेयषट्कोणमध्ये पार्थिव
क्रमाधिदैवत नवात्मेश्वर नवात्मेश्वरी रूपां श्रीपरदेवतां प्राग्वद्ध्यात्वा ऐं ह्रीं श्रीं स्त्रैं स्त्रौं: हसक्षमलवरयूं नमो
भगवति स्त्रैं कुब्जिकायै ह्रां ह्रूं ॐ अगनमे अघोरमुखि छ्रां छ्रूं छ्रीं किलि किलि विण्णविच्चे नवात्मेश्वरानंदनाथ
नवात्मेश्वरि परांबा स्त्रौं: स्त्रैं श्री ह्रीं ऐं श्रीपादुकां पूजयामि तर्पयामि नमः॥ इति संपूज्य विशेषबिंदुभिः संत

१५६

र्प्य तस्य पश्चिमादि निर्ऋत्यंतेषु कोणेषु प्रागुक्तक्रमेण द्वाविंशति रश्मिमिथुनं संपूज्य श्रीपात्रबिंदुभिस्तर्पयेत्॥
ततः प्राग्वन्मध्येचरणत्रयेण त्रिः संपूज्य संतर्प्य पुनर्यथोक्तरूपां भगवतीं श्रीजिह्वितां ध्यात्वा मूलेन त्रिः संपूज्य विशे
षबिंदुभिस्तर्पयेत्॥ अत्र सावरणपूजाशक्तौ प्रोक्तक्रमेण मिथुनषट्कमेव पूजयेत्॥ तत्राप्यशक्तौ सकामेश्व
रीं भगवतीमेव परेश्वर परेश्वरी रूपेण ध्यात्वा तद्विद्यया पूजायेत्॥ इति शांभवाख्योर्ध्वाम्नायपूजा॥ इत्याम्ना
यपूजां विधाय षड्दर्शनानि पूजयेत्॥ तच्चैलोक्यमोहने चक्रे चतुरस्रत्रयात्मके बौद्धदर्शन समयदेवतां तारां
देवीं श्यामवर्णां द्विनेत्रां द्विभुजां दक्षवामकरयोः वरपंकजे दधानां नानाभरणभूषितां रत्नपादुकान्यस्तपादद्व
यां ध्यात्वा॥ ॐ तारे तुत्तारे स्वाहा॥ तारादेव्यधिष्ठित बौद्धदर्शन श्रीपा.पू.त.नमः॥ ततः षोडशदले वैदि
कदर्शनाधिदैवतं ब्रह्माणं चतुर्वक्त्रं प्रतिवक्त्रं त्रिलोचनं रक्तवर्णं रक्तवस्त्राद्यलंकृतं रक्तपद्मासनस्थं
दक्षाधः करादितदूर्ध्वैः करैः वराभयकमंडलुस्रक्समालाधरं ध्यात्वा ॐ ब्रह्मणे नमः॥ ब्रह्मदेवता
धिष्ठित वैदिकदर्शन श्रीपा.पू.त.नमः॥ ततोष्टदलचक्रे पाशुपतदर्शनाधिदैवतं रुद्रं रक्तवर्णं त्रिनेत्रं रक्तवर्णा
यादेव्यारक्तोत्संगयुक्तं वामकरेण या वक्षोरुहं परितस्तं वामाधोहस्तं तया दक्षभुजेनाश्लिष्टं वामोर्ध्वहस्ते

सौ.र.कृ.
प.

मगं दक्षिणोर्ध्वपरशुं दक्षिणाधोहस्ते वरं च दधानं चंद्रचूडं नानाभरणभूषितं ध्यात्वा ॥ ॐ हौं शिवाय हौं नमः
रुद्रदेवताधिष्ठितशैवदर्शनश्रीपा. पू. त. नमः ॥ ततश्चतुर्दशारे सौरदर्शनाधिदेवतं भास्करं रक्तवस्त्रं नानाभ
रणभूषितं वामोर्ध्वादितदधोंतेषु करेषु पाशांकुशवराभीतिधरं त्रिनेत्रं चंद्रचूडं मंगितुंगस्तनयुगेन जगन्मातु
:स्वरूपं ध्यात्वा ॥ ॐ ह्रीं हंसः सूर्यदेवताधिष्ठितसौरदर्शनश्रीपा. । ततो दशारद्वये वैष्णवदर्शनाधिदैवतं वि
ष्णुं बालार्ककोटिसमप्रभं वामोर्ध्वादिदक्षोर्ध्वांतकरेषु शंखगदापद्मचक्रधरं श्रीमहीभ्यां शोभितवामदक्षिणपार्श्व
द्वयं नानाभरणभूषितं कौस्तुभश्रीवत्सशोभितवक्षसं पीतदुकूलपरिधानं ध्यात्वा ॥ ॐ नमो नारायणाय वि
ष्णुदेवताधिष्ठितवैष्णवदर्शनश्रीपा. पू. त. नमः ॥ ततो नवयोनिचक्रे शाक्तदर्शनाधिदेवतां श्रीभुवनेश्वरीं बा
लार्ककोटिकांतिं दक्षाद्यधस्तदारभ्य तदूर्ध्वांतं वराभयपाशांकुशान् दधतं चतुर्भुजां चंद्रोत्तंसितरत्नमुकु
टां पीनोन्नतघनस्तनीं रक्तांबरमाल्यानुलेपनाभरणां त्रिनेत्रां सुस्मितमुखीं ध्यात्वा ॥ ह्रीं भुवनेश्वरीदेवता
धिष्ठितशाक्तदर्शनश्रीपा. पू. त. नमः । इत्थं दर्शनानि संपूज्य श्रीपात्रबिंदुभिस्तर्पयेत् । इति षड्दर्शनपूजा । ततः ॥ मू
लविद्यां ने समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यपरापरातिरहस्ययो-

गिनीवृंदसहितश्रीचक्रगतसमस्तदेवताश्रीपा. पू. त. नमः ॥ इति पुष्पांजलिं निक्षिप्य पुनः ॥ मू. समस्तप्रकटे
त्यादि समस्तदेवताः सर्वोपचारैः संपूजितास्तर्पितास्तुष्टाः संतु नम इति पुष्पांजलिं निक्षिप्य श्रीचक्राद्बहिरिंद्राद
यो वनितारूपाः पूज्याः ॥ यथा ॥ लं इंद्रशक्तिश्रीपा. ॥ रं अग्निशक्तिश्रीपा. ॥ टं यमशक्तिश्रीपा. ॥ क्षं निर्ऋतिशक्ति
श्रीपा. ॥ वं वरुणशक्तिश्रीपा. ॥ यं वायुशक्तिश्रीपा. ॥ सं सोमशक्तिश्रीपा. ॥ हं ईशानशक्तिश्रीपा. ॥ ईशान
योर्मध्ये ॐ ब्रह्मशक्तिश्रीपा. निर्ऋतिवरुणयोर्मध्ये ह्रीं अनंतशक्तिश्रीपा. । इति सर्वादिदशदिक्षु संपूज्य तद्बहि
रिंद्रादीनां समीपे ॥ वज्रशक्तिश्रीपा. ॥ दंडशक्तिश्रीपा. ॥ खड्गशक्तिश्रीपा. ॥ पाशशक्तिश्रीपा. ॥ अंकुशश
क्तिश्रीपा. ॥ गदाशक्तिश्रीपा. ॥ त्रिशूलशक्तिश्रीपा. ॥ पद्मशक्तिश्रीपा. ॥ चक्रशक्तिश्रीपा. ॥ इति संपू
ज्य श्रीपात्रबिंदुभिस्तर्पयेत् ॥ पुनर्मूलेन मूलदेवीं संपूज्य संतर्प्य पुनर्गंधादिदीपांतैरुपचारैरुपचर्य पा
यसनैवेद्यं वक्ष्यमाणप्रकारेण कामकलारूपमात्मानं ध्यात्वा मूलविद्यां दशधा जपित्वा समर्प्य योनिमुद्रया देवीं
प्रणम्याग्निसहोमं कुर्यात् ॥ तत्र पूजामंडपस्यैशानभागे गोमयोपलिप्तायां भूमौ मूलेन लक्षणं कुं कुंडं अग्रोष्णपूर्वोच्चे
वांगुलमात्रोच्चं चतुरंगुलोच्चं वा वालुकाभिर्गोरमृत्तिकाभिर्वा लिंगतंडुलचूर्णान्मितमनिर्मितं स्थंडिलं हस्तमात्रं

सौ॰र॰कृ॰ प॰

यामविस्तारं वा यथेष्टप्रमाणां वेदिकां वा चक्रघटितमृण्मयीं जोडमध्ये नेत्तमांशकटिं वा चतुरस्त्रीं वा यथाशक्ति होम
स्थानं विधाय तत्र प्राङ्मुखः स्वासने समुपविश्य स्तुलस्तुवा मस्याजी मन्त्रपायसहोमपक्षे चरुस्थाली प्रणी
ताप्रोक्षणपात्रे च स्ववामभागे कुंडादेरुत्तरे कुशास्तरे ऽधोमुखानि संस्थाप्य अर्घपात्रं संमनं कुशान्पवित्रत्रयं
स्रुक्स्रुवौ इध्मं धनं धूपदीपादिकमाज्यादिकं च यथोचितं यस्तद्व्यं कुशाछादितमुदकभांडं च स्ववामे यथायथं
कुंडादिसविधे स्थापयेत्। ततो गुर्वादिवंदनपूर्वकं मूलेन प्राणायामत्रयं कृत्वा मूलविद्यया त्र्यक्षरादिकरषडं
गन्यासपूर्वकं करशुद्धि चतुरासनषडंगयुवती वाग्देवतान्यासान्विधाय देवीं ध्यात्वा मानसं संपूज्य ध्यात्वा
मूलविद्यया कुशोदकेन कुशास्तरे ऽधोमुखानि पात्राण्युत्थाप्य स्ववामभागे साधारं सजलं पात्रं निधा
य मूलेनाभिमंत्र्य धेनुमुद्रयामृतीकृत्य तज्जलं प्रोक्षणीपात्रे निक्षिप्य तेन जलेन कुशैः कुंडादिकं प्रोक्ष्य
कुंडादौ मूलविद्यादिनित्याविद्यां चोच्चार्य प्रागग्रा उदगग्राश्च तिस्रस्तिस्रो रेखाः कुशमूलेन विलिख्य पुनस्ता ये
व प्रोक्ष्य कांस्यादिपात्रे वह्निमानीय ऐं ह्रीं श्रीं क्रव्यादेभ्यो हुं फट् इति मंत्रेण क्रव्यादांशमेकमंगारं नैर्ऋत्यां प
रित्यज्य। वह्निं दृष्टं देवांशं मूलेनाभिमंत्र्य धेनुमुद्रयाऽमृतीकृत्य योनिमुद्रां भांमावनीतगतस्तमात्रं कराभ्यामादाय कुंडा

देरुपरि प्रदक्षिणं त्रिःपरिभ्राम्य तन्मध्यकोष्ठे तं वह्निं निक्षिपेत्। ततस्तदुपरि कुशान्शुष्ककाष्ठानि च क्षिप्य मूलवि
द्यादिनित्याविद्ये चोच्चरन्मुखेन फूत्कृत्यैव वह्निः प्रज्वालयेत्॥ ततो व्यजनादिना तमनलं प्रदक्षमलं ह्रीं श्रीं॥ अग्निं
प्रज्वलितं वंदे जातवेदं हुताशनं। सुवर्णवर्णमनलं समिद्धं सर्वतोमुखं इत्यनेन प्रणमेत्॥ ततः सप्तजिह्वामुद्रां
बध्वा ऐं ह्रीं श्रीं सकलजगत्कारण वह्नेर्गर्भाधानादिकाः क्रियाः संपद्यंतामिति सप्तजिह्वामुद्रां दर्शयेत्। ततः
पात्राण्युत्तानीकृत्य प्रोक्षणीपात्रं प्रक्षाल्य शुभोदकेनापूर्य तत्रासनात् पवित्रमेकं च निक्षिप्य उत्तानहस्त
द्वयानामिकांगुष्ठाभ्यां तत्पवित्राग्रमूले विधृत्य सौः अस्त्राय फडित्यस्त्रमंत्रेण पवित्रमध्येरत्नतुल्य बिंदुत्रयमग्
नौ निक्षिपेत्॥ ततस्तत्र घृतबिंदुं निक्षिप्य स्वभवामाग्रे कुंडसमीपे कुशेषु स्थापयेदिति प्रणीतापात्रप्रणयनं
। ततः प्रोक्षणीपात्रं प्रक्षाल्योदकेनापूर्य तत्र किंचित्प्रणीतातोयं निक्षिप्य तेनोदकेन सर्वाण्युपकरणानि प्रो
क्षयेत्॥ ततस्तत्पात्रं त्रिभागजलापूर्णं प्रणीतापूर्वे कुंडादिसमीपे संपातामधारणार्थं कुशेषु स्थापयेत्॥ त
तो मूलविद्यादिनित्याविद्यां च वह्निं त्रिःपरिषिच्य उदगग्रैः प्रागग्रैश्च दर्भैरीशानादीशानपर्यंतं परिस्तीर्य
स्वदक्षिणे ब्रह्मासनमास्तीर्य अमुककहोमकर्मणि कृताकृतावेक्षकत्वेन त्वं ब्रह्मा भवेति ब्रह्माणमुपवेशयन् दर्भा

सौ॰र॰क॰
प॰

वेकुशबटुं वा पूजयेत्॥ ततो वह्निं हेमवर्णां दक्षायूर्ध्वयोरूर्ध्वाधःकरयोः स्रुक्शक्तिस्वस्तिकवराभयान्वितां हेमभूषि
तां मूलदेवीरूपां वा ध्यात्वा अग्ने त्वमिहागच्छागच्छेति तावाहनादिपरमीकरणांते कृत्वा ॐ ऐं ह्रीं श्रीं अग्निश्रीपादु
कां पूजयामि इति पुष्पांजलिनाविःसंपूज्य एवं अग्नये आसनं कल्पयामि नमः इति पुष्पादिकमासनं दत्वा अर्घ्यं
कल्पयामि स्वाहा पाद्यं कल्पयामि नमः॥ आचमनीयं कल्पयामि स्वधा॥ मधुपर्कं कल्पयामि स्वधाः पुनराचम
नीयं। ततो गंधादिनैवेद्यांतानुपचारान्नमोंतानेव कल्पयेत्॥ ततः पूर्वादिस्वस्तकोणेषु मध्ये दक्षिणेन वह्नेः स
प्तजिह्वाः पूजयेत्। तद्यथा॥ ऐं ह्रीं श्रीं हिरण्याप्यादुकां पूजयामि एवं कनका रक्ताकृष्णा सुप्रभा अतिरक्ता बहु
रूपा चेति जिह्वाः संपूज्य पुनरग्निं संपूज्य स्रुवं सालितायामाज्यस्थाल्यां पवित्रमेकमाज्यं चक्षिप्य मूलेन चिरमभिमंत्र्य
धेनुमुद्रयामृतीकृत्य दक्षिणकरे पवित्रं वामे कुशमुष्टिं च धृत्वा दक्षिणेन स्रुवमादाय जुहुयात्॥ तद्यथा॥ ॐ ऐं ह्रीं
श्रीं अग्नये स्वाहा अग्नये इदं न मम। सोमाय स्वाहा सोमाय इदं न मम। अग्नीषोमाभ्यां स्वाहा अग्नीषोमाभ्यां इदं
न मम। अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृते इदं न मम। इति वह्नेर्दक्षनेत्रे वामनेत्रे ललाटनेत्रे च मुखे चैकैका
माज्याहुतिं कृत्वा॥ स्रुवसंलग्नं हविःशेषं संपातान्यधारणपात्रे निक्षिपेत्॥ ततः ॐ भूः स्वाहा अग्नये इदं न मम।

१५४

ॐ भुवः स्वाहा वायवे इदं न मम। ॐ स्वः स्वाहा सूर्याय इदं न मम। ॐ भूर्भुवः स्वः स्वाहा प्रजापतये इदं न मम। इत्येकैका
माज्याहुतिं कृत्वा यथाक्रमं सप्तजिह्वासु जुहुयात्॥ तद्यथा॥ ॐ ऐं ह्रीं श्रीं हिरण्यायै स्वाहा एवं पूर्वोक्तनामान्ते प्र
त्येकमेकैकामाहुतिं जुहुयात्॥ ततस्तत्र श्रीचक्रं विभाव्य तत्र पीठपूजापुरःसरं देवीमावाह्य प्राग्वदासनादि
सर्वोपचारैः संपूज्यावरणदेवताश्च प्राग्वदभ्यर्च्य वह्निदेवतयोरैक्यं विभाव्य यन्त्रचक्रैकीकरणार्थं पंच
विंशत्याज्याहुतीर्नाडीसंधानार्थमेकादशाहुतीश्च मूलविद्यया कृत्वा ततः स्रुचमादाय स्रुवेण तत्र चतुर्वी
रमाज्यं निक्षिप्य पुष्पं दत्वाऽधोमुखस्रुवेण तन्मुखं पिधायतिष्ठन् ॐ ऐं ह्रीं श्रीं मूलमुच्चार्य वौषट् इत्येकामा
हुतिं दद्यात्॥ इति संक्षेपतोऽग्निमुखं। इत्थं संस्कृतेऽग्नौ नित्यहोमं कुर्यात्॥ तत्र नित्यहोमद्रव्याणि। घृतान्नपायस
७६ मतिलतंडुलमधुरक्तपुष्पसुगंधपुष्पाणि चेति नित्यहोमद्रव्याणि। तत्र प्रथमं पंचायतनी चेत् गणेशसू
र्यविष्णुशिवेभ्यः तत्तन्मंत्रेण प्रत्येकमाहुतित्रयं कृत्वा घृतादिना मूलेन मूलदेव्यै षोडशाहुतीः कृत्वा पूजाक्रमे
णांगदेवताः षोडशनित्या गुरुपंक्तित्रय षडंगयुवतीः नवावरणशक्तीनामन्यासामपि देवतानां चतुर्थ्यन्तम
न्त्रान्स्वाहांते मेकैकामाहुतिं कृत्वा मन्त्रातिरिक्तप्रायश्चित्तार्थं महाव्याहृति होमं कुर्यात्॥ तद्यथा॥ ॐ भूः स्वा

सौ·र·क·
प·

येच पृथिव्यै च महते च स्वाहा। अग्नय इदं न मम। ॐ भुवो वायवे चांतरिक्षाय च महते च स्वाहा। वायव इदं न मम। ॐ सु
रादित्याय च दिवे च महते च स्वाहा। सूर्यायेदं न मम। ॐ भूर्भुवः सुवश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा। प्र
जापतये इदं न मम। इति महाव्याहृतिहोमः। ततः ऐं ह्रीं श्रीं इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यव
स्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणमस्तु स्वा-
हा। इत्याहुतीरष्टौ एकां वा जुहुयात्। ततः पूर्णाहुतिं दद्यात्। तत्र ॐ ऐं ह्रीं श्रीं मूलविद्यांते अग्नये नमः इति अ-
ग्निं संपूज्य ॐ ऐं ह्रीं श्रीं। न्यूनातिरिक्तमसिद्धपूर्णं ददामि स्वयं ततेति ॐ ह्रैं सांगं कुरु कुरु स्वाहा। इत्याज्यमिश्रितं तिलै- गर्ङ
रेकामाज्याहुतिं जुहुयात्। ततः सहस्रार्चिर्महातेजा नमस्ते वज्ररूपधृक्। सर्वाशिने सर्वग तपावकाय नमो-
स्तु ते। त्वं रौद्रघोरकर्मा च घोरहा त्वं नमामि ते। विस्मृतं त्वं लोकरूपा लोके शांतिमत्र प्रयच्छ मे। इत्यग्निं प्रार्थ्य एते-
न स्रुचमाप्रयं तदुपरि पुष्पं दत्वा अधोमुखं स्रुवं निधाय शंखवत्संपुटीभ्यां स्रुक्स्रुवौ कराभ्यां गृहीत्वोत्थाय नयो-
र्मलेन नासौ निधाय प्रणवादि वौषडंतया मूलविद्यया आहुतिं च यजुर्जुहुयादिति पूर्णाहुतिः। ततो देवीं संपूज्य
स्तुत्वा प्रणम्य वह्निशक्तिकाशादिं दुर्चके विसृज्याग्निं संपूज्य। भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मांतरेपि सं-

१५६

प्र

प्राप्ते सन्निधिं कुरु सादरं। इति वह्निं प्रार्थ्य संहारमुद्रया स्वास्थ्यानु हासयेत्। ततो विभूतिधारणं कृत्वा प्रणीतापात्र-
स्य जलैर्मार्जनं विधाय ब्राह्मणमुद्दास्य तस्याने दत्वा यज्ञ ब्राह्मणाय यथाशक्ति दक्षिणां दत्वा प्रणम्य पूजास्था-
नं गत्वा स्वासने समुपविश्य बलिदानं कुर्यात्। एतावत्कर्तुमशक्तश्चेत्। अग्न्याधानादिकं कर्म नित्यहोमे न
विद्यते। इति वसिष्ठसंहितावचनात् लौकिकाग्नौ मूलविद्यादिनित्याविधानमनुस्मृत्य भिन्नं देवीरूपं
ध्यात्वा परिषिच्य वह्निदेवतयोरैक्यं विभाव्य प्रणवचितारमूलविद्यामुच्चार्य श्रीमहात्रिपुरसुंदर्यग्नये नम इ-
ति संपूज्य ज्यादिकमानीय वह्निं तिधेनुमुद्रया मृतीकृत्य मूलविद्ययाचिरमि मंत्रितेन हविषा मूलविद्यया स्वाहां-
तया षोडशाहुतीर्हुत्वा समस्तप्रकटेत्यादि समष्टिमंत्रेण स्वाहांतेनैकाहुतिं जुहुयात्। ततस्तिथिनित्याषोडश
नित्यागुरुपंक्तित्रयषडंगयुवतीनवावरणशक्तिभ्यस्तत्तन्मंत्रेण एकैकामाहुतीं हुत्वा पुनः समस्तप्रकटेति
समष्टिमंत्रेणाहुतिं च यजुर्जुहुयात्। अत्राप्यशक्तौ षडंगयुवतीहोमानंतरं समस्तप्रकटेत्यादि समष्टिमंत्रेणाहु-
तित्रयं दत्वा प्रागवत्समापयेत्। इति होमविधिः। अथ देव्याः पार्षदेभ्यः कुरुकुल्लादिभ्यो बलिं दद्यात्। तत्रादौ
कुरुकुल्लाबलिः। तत्र देव्यग्रे किंचिद्वामे भूमौ चंदनादिना सिंदूरेण वा नवयोन्याद्यं कर्णिकमष्टदलकम

सौ॰र॰कु॰
प॰

ॐ कृत्वा तद्बहिः प्राक्पश्चिमद्वारयुक्तं चतुरस्रद्वयमिति वलिमंडलं निर्माय ततः कुरुकुल्लाविद्यामन्त्रये कृत्वा
अस्या विद्याया दक्षिणामूर्तिर्ऋषिः पंक्तिश्छंदः श्रीकुरुकुल्ला देवता वलिदाने विनियोग इति ऋष्यादिकं
न्यस्त्वा सर्वांदिक्षु विमस्त्रकालावीजत्रयेण मूलविद्यावत्करषडंगन्यासान् कृत्वा कुरुकुल्लाविद्याया आप
केशं त्वा । विकीर्णकुंतलानग्नौ रक्तमानंदविग्रहां । दधानां म्बिंत पेछाणं चापपाशसृणीन्करैः । नत्वमानायुधा ।
कारवेद्याद्वर्णदेवस्त्रवाद्यमाः । रुतुस्त्वानास्कुरघोमः सदानंदारुणेक्षणः । दष्ट्राधरूरमारस्मरस्तोर्ध्वकरयर्यंत ।
मायुधध्यानं । इति स्वैक्येन ध्यात्वा मानसं पूजयित्वा श्रीसरणीपात्रजलेनसुरस्यम्भुरूजलेनार्घ्यसाधारं निधा
यतत्र विशेषार्घ्यविंदून्निदत्वा षडंगेन संपूज्य कुरुकुल्लाविद्यया ऽष्टवारमभिमंत्र्य तेनोदकेन मंडलमभ्युक्ष्य त
त्रमंडलादिष्वर्घ्यमंत्रं श्रीचक्रपीठपूजावदभ्यर्च्य तत्रैव पश्चिमादि विलोमेन इक्षुरायतन्दुग्धाब्धीन्संपूज्य
इक्षुसागरतीरे द्वीपस्य नैर्ऋतिकोणे । ॐ ऐं ह्रीं श्रीं वाराही विद्यासुधार्यश्रीवाराहीदेवीश्रीपादुकां पूजयामी
ति मत्त्वदेव्या निसुरवोपविष्टां वाराहीं संपूज्य ततो वाराह्युक्तमार्या ॐ ऐं ह्रीं श्रीं ह्रीं रत्नपोताय नमः इति र
त्नपोतं संपूज्य तदुपरि रत्नसिंहासनादिमनोन्मनीशक्तिं तेष्वा चक्रपीठपूजाक्रमेण संपूज्य ततस्तन्मध्ये

१२१

णवत्रितारान्ते ह्रीः वलिचक्रायनमः इति वलिचक्रं संपूज्य तन्मध्ये । संविदासनाय नमः । इति देव्यासनं न्यस्तं पुरुषं
संपूज्य तत्र पंचविंशासनीं कुरुकुल्लाविद्यया चिरवं डामुद्रया चंतीसमावाह्य ह्रीः इति स्थापनादि परमीक
रणे तामुद्राः प्रदर्श्य तस्याः प्राणप्रतिष्ठां विधाय पाशादि चतुर्मुद्राः प्रदर्श्य आसनादि पुष्पांतै रुपचारैः सं
पूज्य श्रीकुरुकुल्लेपरिवारपूजार्थं मनुं सोऽदेहीति प्रार्थ्य तदनुज्ञया साधकः स्वयं रत्नपोतमारुह्य रत्नपोतस्य
पूर्वपश्चिमकोणयोः ह्रीः वामनीश्रीपा॰पू॰ । ह्रीः डाकिनीश्रीपा॰पू॰ इति संपूज्य पश्चिमद्वारस्य दक्षिणशाखायामार
भ्य नवशक्तीः प्रादक्षिण्येन पूजयेत् । तद्यथा । पश्चिमद्वारदक्षिणशाखायां ह्रीः सूर्यरूपिणी शक्तिश्रीपा॰पू॰ ।
वायव्यकोणे ह्रीः सोमरूपिणी शक्तिश्रीपा॰पू॰ उत्तरे ह्रीः निधिरूपिणी शक्तिश्रीपा॰पू॰ ईशाने ह्रीः वार
रूपिणी शक्तिश्रीपा॰पू॰ । पूर्वद्वारस्योत्तरशाखायां ह्रीः योगरूपिणी शक्तिश्रीपा॰पू॰ । दक्षशाखायां ह्रीः
करणरूपिणी शक्तिश्रीपा॰ । आग्नेये ह्रीः करणरूपिणी शक्तिश्रीपा॰ । दक्षिणे ह्रीः यक्षिणीरूपिणीश्रीपा॰ । ह्रीः
नैर्ऋते ह्रीः तारारूपिणी शक्तिश्रीपा॰पू॰ । ततो ष्टदलेषु देव्याद्यादि प्रादक्षिण्येन ह्रीः व्योमरूपिणी शब्दशक्ति
श्रीपा॰ । ह्रीः वायुरूपिणी स्पर्शशक्तिश्री॰ । ह्रीः अग्निरूपिणी रूपशक्तिश्रीपा॰पू॰ ह्रीः तोयरूपिणी रसश॰

सौ.र.कु.
प.

क्लिन्नीपा० । ध ह्रीः स्मररूपिणी गंधशक्तिश्रीपा० । ह्रीः ज्ञानरूपिणी शक्तिश्रीपा० । ध ह्रीः बुद्धिरूपिणी शक्तिश्रीपा० । ध
ह्रीः शक्तिरूपिणी शक्तिश्रीपा० । इति संपूज्यांतरष्टयोनिषु देव्यग्रादि प्रादक्षिण्येन प्रागुक्तवशिन्यादि वाग्देवता
ष्टकं संपूज्य तदंतर्योनेर्बहिर्देव्या दक्षिणभुजाग्रमारभ्य वामावर्तेन दक्षिणोर्ध्वभुजाग्रपर्यंतेषु चतुःस्थाने
षु ध ह्रीः बाणरूपिणी शक्तिश्रीपा० । ध ह्रीः चापरूपिणी शक्तिश्रीपा० । ध ह्रीः पाशरूपिणी शक्तिश्रीपा० । ध ह्रीः अं
कुशरूपिणी शक्तिश्रीपा० । ततो मध्ययोनौ देव्यग्रादि प्रादक्षिण्येन ध ह्रीः इच्छारूपिणी शक्तिश्रीपा० पू० । ध ह्रीः ज्ञान
रूपिणी शक्तिश्रीपा० । ध ह्रीः क्रियारूपिणी शक्तिश्रीपा० । ध ततो मध्ये प्राग्वत्संविदासनं संपूज्य तस्मिन्नु कुरुकु
ल्लां प्रागुक्तरूपां पंचविंशार्णमन्त्रविद्यया गंधादिभिः पुनः संपूज्य धूपदीपौ निवेद्य तदग्रे पात्रत्रयं साधारं सा
न्तर्यजनजलपूर्णं सुगंधपुष्पं चतुरस्रवृत्तत्रिकोणमंडले संस्थाप्य तत्र विशेषार्घविंदुं दत्त्वा ध श्रीकुरुकुल्ला
देव्या वतिइद्याय नम इति संपूज्य वामादिक्रमेण । ध ॐ कुरुकुल्ले स्वाहा श्रीकुरुकुल्लेगणपते बलिर्नमः ॥ इति
विशेषार्घोद्धृत जलधारां वामकरांगुलिभिः प्रथमपात्रे दद्यात् । ध कुरुकुल्लायाः ॐ कुरुकुल्ले ह्रीः स्वाहा । इ
ति द्वितीयपात्रे तथैव विशेषार्घजलधारां दद्यात् ॥ इत्थं बलिदानं कृत्वा नाराचमुद्रया बलिं प्रदर्शयित्वा पंचवि

शार्णमन्त्रविद्यया पुष्पांजलिं दत्त्वा प्रणमेत् ॥ अत्र सावर्णप्रजाशक्तौ प्रागुक्तमंडले देवीमेव पंचविंशार्णमन्त्र
विद्यया गंधादिदीपांतैरुपचारैर्गंधपुष्पाद्यैर्वा प्रजयित्वोक्तविधिना बलित्रयं दद्यात् ॥ इति कुरुकुल्ला
बलिः ॥ अत्र देवांगत्वेन बलिदाने प्रजायां देवी संमुखत्वेन पूर्वाभिमुखमुपविष्टा या अपि कुरुकुल्लायाः
पश्चिमाभिमुखत्वे तदग्रस्यैव पश्चिमत्वं वोढव्यं स्वतंत्रप्रजायां तु कुरुकुल्लायाः पश्चिमाभिमुखत्वे तदग्र
स्यैव पश्चिमत्वेति । अथ वाराहीबलिः ॥ तत्र देव्यग्रे किंचिन्निर्ऋतिकोणे त्रिकोणवृत्तषट्कोणवृत्तद्वयच
तुरस्रात्मके मंडले निर्माय ध वाराहीबलिमंडलाय नमः इति संपूज्य ग्लैं ग्लौं ठं वाराहीयोगपीठाय नमः । इति
योगपीठं मंडले आधारशक्त्यादि ज्ञानात्मांतं संपूज्य तत्र वाराहीं तद्विद्यया समावाह्य आवाहनादि परमी
करणांतैस्तन्मुद्रया विधाय तस्याः प्राणप्रतिष्ठां विधाय वाराहीमुद्रां योनिमुद्रां च प्रदर्श्य वाराहीविद्यया आ
सनादिपुष्पांतैरुपचारैर्गन्धादिपुष्पांतैर्वा संपूज्यावरणानि पूजयेत् ॥ तद्यथा ॥ त्रिकोणस्य वामकोणे ॐ
क्रोधिन्यै नमः । दक्षे ॐ स्तंभिन्यै नमः । अग्रे ॐ चंडोच्चंडायै नमः । ततः षट्कोणकोणेषु देव्यग्रादि प्रादक्षिण्येन
ॐ आं ब्राह्म्यै नमः । ॐ ईं माहेन्द्र्यै नमः । ॐ ऊं कौमार्यै नमः । ॐ ऋं वैष्णव्यै नमः । ॐ लृं इंद्राण्यै नमः । ॐ औं चामुं

सौ.र.क.
प.

ह्रायै नमः॥ ॐ भूः महालक्ष्म्यै नमः॥ इति देव्यग्रे पूजयेत्॥ ततश्चतुरस्रे इं हारीं लहृदिवर्ज्यां दीक्ष्व संपूज्य पु
नर्मध्ये वाराहीं तद्दिग्यासं पूज्य तदग्रे प्राग्वद्बलिपात्रं निधाय ॐ वाराही विद्यामुच्चार्य श्रीवाराहिण्यै व
लिर्नमः॥ इति प्राग्वत् बलिमुत्सृज्य पुनस्तद्दिग्यातां संपूज्य नाराचमुद्रया बलिं ग्राहयित्वा योनिमुद्र
या प्रणमेत्॥ इति वाराहीबलिः॥ ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ
तरंगोऽस्त्वनविंशतिः॥ ॥श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाब्धौ एकोनविंशतितरंगः॥ ॥
अथ बटुकादिबलिः॥ तत्र शुद्धोदकेन चंदनादियुक्तेन वहत्करोर्ध्वपुरहस्ताभ्यां श्रीचक्रस्य ईशानाग्निनै
र्ऋत्यवायव्यकोणेषु श्रीचक्रस्योत्तरभागे च त्रितारवृत्तचतुरस्रवृत्तत्रिकोणात्मकं मंडलपंचकं
निर्माय ॐ ऐं ह्रीं व्यापकमंडलाय नमः॥ इति प्रतिमंडलं संपूज्य ॐ वां बटुकभैरवाय नमः इति मंत्रेण ईशानदि
ग्गतमंडले बटुकभैरवमावाह्य वां वीं मित्यादि षड्दीर्घषडंगन्यासेन सकलीकृत्य कपालयोनिमुद्रे प्रदर्श्य प्रो
क्तमंत्रेण गंधादिभिः संपूज्य तदग्रे प्राग्वत् बलिपात्रं निधाय ॐ बटुकभैरवबलिद्रव्याय नमः इति बलिद्र
व्यं संपूज्य ॐ एह्येहि देवीपुत्र बटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय

नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा इति मंत्रमुच्चरन् बाणमुद्रारूपं बटुकं ध्यायन् वामांगुष्ठानामिका
भ्यां अर्घोदकधारया बलिमुत्सृज्य पुष्पांजलिमादाय ॐ बलिदानेन संतुष्टो बटुकः सर्वसिद्धिदः॥ शांतिक
रोतु मे नित्यं भूतवेतालसेवितः॥ इति पुष्पांजलिं दत्वा प्रणमेत्॥ इति बटुकबलिः॥ ततो द्वितीयमंडले ॐ यां
योगिनीभ्यो नमः सर्वयोगिन्य इहागच्छतागच्छतेति योगिनीरावाह्य प्राग्वत् ध्यात्वा॥ यां यीं मित्यादिना ष
डंगमंत्रेण सकलीकृत्य योनिमुद्रां प्रदर्श्य ॐ यां योगिनीभ्यो नमः॥ सर्वयोगिनीश्रीपादुकाः पूजयामीति गंधा
दिदीपांतैरुपचारैः संपूज्य प्राग्वत् बलिपात्रं निधाय ॐ ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाता
ले वा नले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः
सदा नः शुभबलिविधिना पांतु वीरेंद्रवंद्याः॥ ॐ यां योगिनीभ्यः सर्ववर्णयोगिनीभ्यो हुं फट् स्वाहा इति वामक
रस्यांगुष्ठमध्यमानामिकाभिर्योनिमाकारेण योजिताभिर्जलधारादानेन बलिमुत्सृज्य पुष्पांजलिमादाय ॐ
सौ
या काचिद्योगिनी रौद्रा सौम्या घोरतरा परा॥ खेचरी भूचरी व्योमचरी प्रीतास्तु मे सदा॥ इत्यनेन पुष्पांजलिं
दत्वा योनिमुद्रया प्रणमेत्॥ इति योगिनीबलिः॥ अथ क्षेत्रपालबलिः॥ तत्र नैर्ऋतिमंडले ॐ क्षां क्षेत्रपाला

सौ.र.क.
प.

यनमः क्षेत्रपाल इहागच्छागच्छेति समावाह्य क्षां क्षीमित्यादि षडंगमंत्रेण सकलीकृत्य क्षां क्षेत्रपालाय नमः
इति गंधादीपान्तैरुपचारैः संपूज्य तत्र प्राग्वत् बलिपात्रं निधाय क्षेत्रपालबलिं ध्यायन् नम इति बलिं संप्र
ज्य प्रागुक्तरूपं क्षेत्रपालं ध्यायन् क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थान क्षेत्रपाल धूपदीपादिसहितं बलिं गृह्ण गृह्ण स्वा
हा॥ इति वामकरांगुष्ठतर्जनीभ्यामर्घोदकधारादानेन बलिमुत्सृज्य पुष्पांजलिमादाय ॐ योस्मिन् क्षेत्रे
निवासी च क्षेत्रपालः सकिंकरः। प्रीतोयं बलिदानेन सर्वरक्षां करोतु मे॥ इति पुष्पांजलिं क्षिप्त्वा योनि
मुद्रया प्रणमेत्॥ इति क्षेत्रपालबलिः॥ अथ गणपतिबलिः॥ तत्र वायव्यमंडले गां गणपतये नमः॥ गण
पते इहागच्छागच्छेति समावाह्य गां गीमित्यादिना षडंगमंत्रेण सकलीकृत्य गां गणपतये नम इति मंत्रेण गं
धादिदीपान्तैरुपचारैः संपूज्य तत्र प्राग्वत् बलिपात्रं निधाय श्रीगणपतिबलिं ध्यायन् नम इति बलिं संपूज्य
ॐ गां गीं गूं गणपते वरवरद सर्वजनं मे वशमानय बलिं गृह्ण गृह्ण स्वाहा इति मंत्रेण वामकरमध्यमांगुष्ठा
भ्यामर्घोदकदानेन प्रागुक्तरूपाय गणपतये बलिमुत्सृज्य ॐ सर्वदा सर्वकार्येषु निर्विघ्नं साधयन्मम।
शांतिं करोतु सततं विघ्नराजः सशक्तिकः॥ इति पुष्पांजलिं क्षिप्त्वा योनिमुद्रया प्रणमेत्॥ इति गणपतिबलिः॥

१६०

अथोत्तरमंडले ॐ सर्वभूतेभ्यो नमः॥ सुरासुरनराद्याः सर्वभूतगणा इहागच्छतागच्छतेत्यावाह्य नानारूपधरान् ध्या
यन् क्रां क्रीमित्यादि षडंगमंत्रेण सकलीकृत्य मूलमंत्रेण गंधदीपान्तैरुपचारैः संपूज्य तत्र प्राग्वत् बलिपात्रं निधाय
सर्वभूतबलिं ध्यायन् नम इति बलिं संपूज्य ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा सर्वभूतेभ्य एष बलि
र्नमः॥ इति वामकरस्य सर्वांगुलीभिरर्घोदकधारादानेन बलिमुत्सृज्य पुष्पांजलिमादाय ॐ भूता ये विविधाका
रा दिव्यान्तरिक्षगाः॥ पातालतलसंस्थाश्च शिवयोगेन भाविताः॥ क्रूराद्याः शतसंख्याकाः पाषंडाद्या
व्यवस्थिताः॥ ध्रुवाद्याः सप्त संध्याश्च पीठजा द्वारपाद्या व्यवस्थिताः॥ तृप्यंतु प्रीतमनसो भूता गृह्णंतु मे बलिं॥
॥ इति पुष्पांजलिं क्षिप्त्वा योनिमुद्रया प्रणमेत्॥ इति सर्वभूतबलिः॥ अत्र प्रकारेण कालेन सर्वभूतबलेरंते ना
दचनावश्यकमिति सांप्रदायिकाः॥ अघोर्ध्वाम्नायी चेद्राजराजबलिं दद्यात् तत्र सर्वभूतबलिमंडलादुत्तरतः
प्राग्वन्मंडलं विधाय तत्रैव संपूज्य तत्र वक्ष्यमाणराजराजमंत्रेण समावाह्य सां सीमित्यादि षडंगैः सकली
कृत्य क्षेत्रपालवत् ध्यात्वा गंधादिभिः संपूज्य तत्र प्राग्वत् बलिपात्रं निधाय राजराजेश्वरबलिं ध्यायन् नम इति
संपूज्य ॐ अमुकस्थान क्षेत्रपाल राजराजेश्वर इमं सोपकरं बलिं

सौ॰र॰क॰
प॰

रह्लृं रह्लृं स्वाहा॥ इति वामकरमध्यमांगुष्ठाभ्यामर्घामृतधारादानेन बलिमुत्सृज्य पुष्पांजलिमादाय ॥ अनेन ब
लिदानेन बटुवर्गसमन्वितः॥ राजराजेश्वरो देवः सर्वदा मे प्रसीदतु॥ इति त्र्यार्घ्यपुष्पांजलिमुत्सृज्य योनिमुद्रया
प्रणमेत्॥ इति राजराजेश्वरबलिः॥ एवं बलिदेवताभ्यो विशेषार्घोदकधारादानेन बलिमुत्सृजेत्॥ अशक्तौ कु
रुकुल्लावाराहीबलिदानानंतरं श्रीचक्रस्योत्तरभागे मंडलद्वयं कृत्वा तत्रैकस्मिन्नीशानादिमध्यांतं प्राग्वत्पात्र
पंचकं निधाय बटुकादिसर्वभूतांतं बलिपंचकं दत्वा ऊर्ध्वा[illegible]न्यायी चेत्॥ द्वितीयमंडले राजराजेश्वरीबलिं
दद्यात्॥ अत्राप्यशक्तावेकस्मिन्नेव मंडले क्रमेण पात्राणि निधाय तस्मिन्नीशानादिकोणचतुष्टये बलिचतुष्टयं म
ध्ये द्वयमिति षण्णां बलीनां दद्यादिति। अयमिति संक्षेपस्त्वापत्कल्पः॥ इत्थं बलिदानं विधाय ॥ सर्वाभ्यो बलिदेवता
भ्यो नम इति पुष्पांजलिनाभ्यस्त देवताः संपूज्य तालत्रयं दत्वा नाराचमुद्रां प्रदर्श्य ॥ बलिदानेन संतुष्टास्स महेब
लिदेवता॥ यथासुखं विहारं तु यथेष्टासु दिशासु च॥ बटुकाद्याः सुराः सर्वे सर्वसिद्धिविधायिनः॥ मे शांतिं पुष्टिं तु
ष्टिं च संतु तत्त्वप्रसादतः॥ इत्युच्चार्य तान् विसृज्य प्रसन्नात्मा चिन्तारमुच्चरन् शुद्धोदकेनाभ्यानं प्रोक्षयेत्॥
इति बलिदानविधिः॥ अथ राजाद्योस्मिन्नेवावसरे छागादिबलिं दद्युः॥ तद्यथा॥ सर्वलक्षणसंपन्नं पशु

१६१

मूलमंत्रेणास्नाप्य गंधस्रगादिभिरलंकृत्य देव्यग्रे स्थापयित्वा मूलमंत्रेण प्रोक्षणीजलेन प्रोक्ष्यास्त्रमंत्रेण संरक्ष्य कव
चेनावगुंठ्य मुद्रयावगुंठ्यमिति धेनुमुद्रयामृतीकृत्य सर्वदेवतारूपाय बलिरूपायामुकपशवे नम इति गंधा
दिभिस्त्रिः संपूज्य तस्य दक्षिणकर्णे ॐ पशुपाशाय विद्महे विश्वकर्मणे धीमहि तन्नो जीवः प्रचोदयात्॥ इति पशुगाय
त्रीं त्रिः पठित्वा पुरतः खड्गं निधाय ॐ ह्रीं कालि कालि वज्रेश्वरि लोहदंडायै नमः॥ इति मंत्रेण गंधादिभिस्त्रिरभ्यर्च्य
तस्य मुष्टिदेशे ॥ वागीश्वरब्रह्मभ्यां नमः॥ मध्ये ॥ लक्ष्मीनारायणाभ्यां नमः॥ अग्रे ॥ उमामहेश्वराभ्यां नमः॥ इति संप्र
पूज्य ध्यात्वाऽभिमंत्रयेत्॥ ॐ खड्गाय सुरनाथाय देवकार्यार्थतत्पर॥ पशुच्छेदस्त्वया शीघ्रं खड्गनाथ नमोस्तु ते॥
इति मंत्रेण खड्गमभिमंत्र्य गंधाक्षतजलादिकमादाय मूलविद्यामुच्चार्य अद्येत्यादि तिथ्युल्लेखनांते अमुकगोत्रो
ऽमुकशर्माऽमुकवर्मेत्यादि दीर्घायुष्ट्वदुर्भिक्षदुःखनिवृत्तिपरमानंददशाश्वमेधसमफलध्वजमालाकुलवि
मानवरारोहणपूर्वकं देवीलोकगमनोत्तरशाश्वतसमावधिचिन्मयाखंडविजयकामः श्रीमन्महात्रिपुरसुंद
रि इमं पशुं तुभ्यमहं संप्रददे इत्युक्त्वा पुष्पाक्षतजलादिकं पशोः शिरसि निक्षिपेत्॥ ततः पशोः शिरो धृत्वा ॐ य
ज्ञार्थे पशवः सृष्टाः यज्ञार्थे पशुघातने। अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः॥ शिवायच मिदं विंदं उ

सौ·र·क·
प·

मनस्त्वं शिवतां गतः ॥ उद्बुध्यस्व पशो त्वं हि नाशिवस्त्वं शिवो ह्यसि ॥ इति बोधयित्वा खड्गमादाय सौः अस्त्राय फट् छिं
धि छिंधि स्वाहा ॥ इति मंत्रेण खड्गेन तस्य स्कंधे योजयेत् ॥ ततः स्वयं देवीरूपो भूत्वा निर्विकल्पमनेकेन प्रहारेण छिं
द्यात् ॥ सविकल्पः साधकस्तु परहस्तेन छेदयेत् ॥ छागस्यातिरिक्तैः स्वगात्रशोणितदानरूपोपि बलिर्देयः ॥ इ
ति छागादिबलिदानविधिः ॥ इत्थं बलिदानं विधाय मूलेन देवीं संपूज्य स्वर्णादिपात्रस्थं जलं धेनुमुद्रयामृतीकृत्य
मूलविद्यां त्रिरभिमंत्र्य मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकायै जलं समर्पयामीति समुत्सृज्य स जिजेपा
वनं देवेशि शीतलं सुमनोहरं । मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥ इत्यनेन देव्या वामभागे निवेदयेत् ॥ ततो मूलां
ते श्रीमहात्रिपुरसुंदरि तृप्तासीति विज्ञाप्य स्वर्णादिपात्रस्थं जलं धेनुमुद्रयामृतीकृत्य मूलेनाभिमंत्र्य अथ अमृतापि
धानमसि स्वाहेति देव्या दक्षिणहस्ते किंचिज्जलं दत्त्वा तया प्राशितं विभाव्य गतसारं नैवेद्यमुद्धृत्य नैरृत्यां दिशि
शेष्यायास्तु मंत्रेण गोमयोदकेन तत्स्थानं शोधयित्वा हस्तप्रक्षालनजलं दत्त्वा तैलापानोदनार्थं सुगंधचूर्णा
नि दत्त्वा पुनर्हस्तप्रक्षालनार्थं जलं दत्त्वा कर्पूरादिसुवासितजलैर्गंडूषानि कारयित्वा कर्पूरशलाकया दंतशोधनं का
रयित्वा पुनर्गंडूषानि कारयित्वा चरणौ प्रक्षाल्याचमनीयं निवेद्य शुद्धवस्त्रेण करचरणयोर्जलापनयनं
कृत्वा सुगंधद्रव्यैः करौ सुरभीकृत्य सुगंधानुलेपनमाल्यानि समर्प्य ताम्बूलमानीय प्राग्वदुत्सृज्य मूलमुच्चा
र्य श्रीमहात्रिपुरसुंदरि नूमालदलकर्पूरपूगभागतरंगितं । शंशोधितं सुगंधं च ताम्बूलं मम गृह्यतां ॥ इति ताम्बूलं
निवेद्य छत्रचामरादिराजोपचारान्निवेद्य प्रसन्नपूजां कुर्यात् ॥ तत्र मूलविद्यामुच्चार्य सुप्रसन्नायै महात्रिपुरसुं
दरि श्रीपादुकां पूजयामीति पुष्पांजलित्रितयं संपूज्य पुनर्मूलमुच्चार्य सुप्रसन्नायै श्रीमहात्रिपुरसुंदरि श्री
पादुकायै अर्घं कल्पयामि स्वाहेति पूर्ववदर्घं दत्त्वा गंधपुष्पधूपदीपांश्च प्राग्वन्निवेदयेदिति प्रसन्नपूजां वि
धाय आरात्रिकं कुर्यात् ॥ तद्यथा । स्वर्णादिपात्रे सिंदूरचंदनादिना हृदलकमलं निर्माय तत्र मध्ये दलाग्रे केच यव
गोधूमपिष्टादिरचितानि नव दीपपात्राणि संस्थाप्य घृतेनापूर्य कर्पूरादिगर्भिणीर्वर्तीर्निक्षिप्य भुवनेश्वर्या
प्रज्वाल्य श्रीं ह्रीं ह्सें ह्स्क्लें ह्रैं ह्सें ह्स्क्लें ह्सौः श्रीं इति नवरत्नेश्वरीविद्यां त्रिरभिमंत्र्य चक्रमुद्रां प्रदर्श्य रत्नेश्वरीवि
द्यां पुनरुच्चार्य रत्नेश्वरीश्रीपादुकां पूजयामीति संपूज्य मूलेन मूलदेवीमारात्रिकेः संपूज्य तत्पात्रमामस्तकमुद्धृ
त्योत्थाप्य घंटादिवादनपूर्वकं देव्यामस्तकादिपादांतं मूलांते समस्तचक्रचक्रेशीयुते देवि नवात्मिके ॥ आ
रात्रिकमिदं देवि गृहाण मम सिद्धये । इति पठन् देव्या मस्तकोपरि त्रिवारं भ्रामणपूर्वकं नवकृत्वो नीराजयेत्

॥ इति सामान्यारार्त्रिकविधिः॥ अथ विशेषारार्त्रिकं॥ तत्र लोहवर्जं स्वर्णादिपात्रे कुंकुमादिना नवयोनिचक्रं वि
लिख्य ततः कुत्रचित्पात्रे सुपक्वमतिशुभ्रौदनं नवधा विभज्य तेन नव गोलकान् कृत्वा तान् गोलकान् सप्त सप्त दीपाधा
रयोग्यानि वस्त्राकाराणि नव भाजनानि कृत्वा क्वचित्संस्थाप्य ततः शर्करायवगोधूमचूर्णानि पिंडपुष्पयु
ग्मेन परस्परपार्श्वसंलग्न सप्त सप्तकान् नवघटकागोलान् कृत्वा तस्मिन् नवयोनिचक्रे मध्यादिनवयोनिषु स्था
पयित्वा पूर्वरचितानि नवभाजनानि सप्त सप्तैकैकक्रमेण तेषामुपरि स्थापयित्वा तेषु घृतपाचिताश्चा
णकादीपादिसुद्राविकीर्य तत्र शर्करामिश्रितानि यवगोधूमदुग्धादिरचितानि मुष्टिप्रमितयष्टिकानि चतुरं
गुलोन्नतिगुतानि स्वाभिमतमानानि वाचिको णकारमुखानि उमवर्णाकाराणि बाष्पतपाचितानि दीपपात्रा
णि कृत्वा तेषां नवभाजनानां सुपरि एकैकस्मिन् सप्तसप्त स्थापयेत्॥ ततस्तानि सुगंधिगोघृतपूर्णानि
कृत्वा तत्र प्राग्वद्वर्तीर्निक्षिप्य मातृदेव्याः पुरतो दक्षिणे वा चतुरस्रमंडले स्थापयित्वा तत्र गोमेदसुवर्णम
रकतपद्मरागनीलानि इति गगनादीनां पंचरत्नानि निक्षिप्य भावयित्वा वाग्भवविद्यया चतुर्भुवनेश्वर्या
वा दीपान्प्रज्वाल्य चक्रमुद्रां प्रदर्श्य ॐ ऐं ह्रीं श्रीं ह्रं गगनलोक गोमेदरत्नाय ह्रं नमः॥४ ह्रं स्वर्गलोक

सुवर्णरत्नाय ह्रं नमः॥४ ह्रं मर्त्यलोक मरकतरत्नाय ह्रं नमः॥ इति स्वाद्याद्यभिमंत्र्य तं प्रादक्षिण्येन संपूज्य प्राग्व
द्भुवनेश्वरीविद्ययाऽभिमंत्र्य संपूज्य पंचोपचारैः पंचसिंहासनमंत्रैः स्तुत्यैव संपूज्य समुत्थाय घंटावादनपूर्वकं
प्राग्वन्नीराजनं कुर्यात्॥ ततस्तत्पात्रं चतुरस्रमंडले निधाय दीपमालामयं महः पश्यन् वह्निस्तेजस्विन्ते त्वा
रां ततः संविद्रूपेणास्थितः मितिध्यायेत्॥ इति विशेषारार्त्रिकं शक्तौ प्रत्यहं कुर्यान्नो चेत्पर्वदिवसेषु कुर्यात्॥ ततः आ
रार्त्रिकसमयस्थं दीपं मूलेन नमस्येदिति दक्षिणामूर्तिसंहितावचनात्॥ स्वगुरूपदिष्टविधिना रार्त्रिकमध्यस्थ
दीपं मूलविद्यया नमस्येत्॥ इति नीराजनविधिः॥ अथ कुमारीसुवासिनीर्वा स्वेष्टदेवताबुद्ध्या देवीप्रीत
ये पूजयेत्॥ तद्यथा॥ सर्वलक्षणसंपन्नां सुरूपां सपरिष्कृतां॥ कन्यां सुवासिनीं वा समानीय तस्याः पादौ प्रक्षा
ल्य सुस्नानवस्त्रेण मार्जयित्वा पादपीठोपरि निधाय सपादपीठे स्थिरासने संस्थाप्य ततो योगपीठपूजां विधाय तत्र
स्वशक्तिकासनोपविश्याथ तस्यां॥ ॐ मंत्राक्षरमयीं लक्ष्मीं मातृकारूपधारिणीं॥ नवदुर्गात्मिकां साक्षात्क
न्यामावाहयाम्यहं॥ इत्यावाह्य बालाविद्यामुच्चार्य कुमारी श्रीपादुकां पूजयामीति तस्याः पादौ द्भिः संपूज्य
बालायै वं गंधादिदीपांतैरुपचारैः संपूज्य सुवासिनीपक्षे तु सुवासिनी श्रीपा॰पू॰। आषोडशाद्वं कुमारीतत

सौ० र० क०
प०

ऊर्ध्वं सुवासिनीति तांत्रिकसंप्रदायः॥ तत्राप्यविवाहितासु फलाधिक्यमिति। ततः प्राग्वत् त्रिखंडामुद्रया आ-
वाहनीविद्यया चतस्रो मूलदेवीमावाह्य आवाहनादिपरमीकरणांतं प्राग्वत्कृत्वा मूलदेवीरूपं तां ध्याय-
न्संस्तोभनादिपाशादिमुद्राश्च प्रदर्श्य मूलेन पुष्पांजलिभिः प्राग्वदासनादि भोजनांतानुपचारानुपचर्या-
चमनं च दत्वा तांबूलं समर्प्य वस्त्रादक्षिणादिकं यथाशक्तिं दत्वा प्रणम्य विसर्जेत्॥ इति कुमारीपूजा॥ ततो देवी-
पुत्रबुध्या ॐ ह्रीं ऐं कुमाराय नमः इति मंत्रेण यथाशक्त्युपचारैर्देवीध्यानये कुमारमपि पूजयेत्॥ इति कुमारपू-
जा। तत्र भोगपात्रनिवेदनपक्षे पूर्वोक्तरीत्या पूजितायै कुमारिकायै सुवासिन्यै शक्तिपात्रं निवेद्य भोजनादिकं
दत्वा विसर्जेदिति॥ ततो वर्तमाने गुरुं श्रीपादुकाविद्यया समभ्यर्च्य नदीयेत तस्मै निवेदयेत्॥ तदभावे तत्पुत्रा-
य निवेदयेत्॥ तस्याप्यभावे शिरःपद्मस्थाय गुरवे निवेद्य तर्पणविधिना त्रिः संतर्प्य तत्प्रसादं स्वात्मनि यो-
जयेत्॥ ततो बटुकभैरवमंत्रेण कुमारं संपूज्य पूर्वस्थापितबटुक[illegible]पात्रं तस्मै निवेदयेत्। ततः पूर्वस्था-
पितं स्वपात्रमादाय प्रासादमंत्रेण स्वात्मनि योजयेत्। इति भोगपात्रसमर्पणविधिः॥ भोगपात्राभावपक्षे कुमारी-
बटुकयोरेव पूजनं॥ तत्रापि कुमार्या एवावश्यकमिति। ततो मूलेन मूलदेव्यै पुष्पांजलिं विधाय मूलेन प्राणाया-

५५

मत्रयेत्। कृत्वा मूलविद्यया ऋष्यादिकरषडंगन्यासान्विधाय कामकलारूपमात्मानं ध्यायेत्॥ तत्र शक्त्युत्थापनमुद्रां ब-
ध्वा निजदेहं स्वस्त्याकारं विभाव्य बिंदुत्रयहार्द्धकलात्मकं तुर्यस्वरं ध्यात्वा तस्योर्ध्वबिंदुं केशकर्णद्वयवत्समेन
माननेमध्यबिंदुं हृदयेवा कुचचतुष्टये समेतं स्तनमंडलेन तदधोमात्रां पादद्वयसमेतां योनिं विभाव्य आत्मानमपि तद्रूपं ध्या-
त्वा मूलविद्यां दशधा जपित्वा मूलदेवीरूपमात्मानं ध्यायन् स्वशिरसि कामेश्वर्यादि चित्रांताः पंचदश नित्यास्तत्र-
हृद्यासं पूज्य अं आं ऐं कचटतपयशहाणं शक्तिश्रीपा० पू०। इई ऐं खछठथफरक्ष भां भिश्रीपादुकां पूजयामि। उ-
ऊं ओं गजडदवलऊं लं इच्छाशक्तिश्रीपादुकां पू०। ऋॠ ओं घझढधमवस अं बुशक्तिश्रीपा० पू०। ऌॡ अं ङञ-
णनमशहक्षशक्तिश्रीपा० पू०। इति शिरस्येव संपूज्य। ॐ ह्रीं हंसः सोहं स्वाहा आत्मने नमः। इति स्वात्मानं शिर-
३ सि पुष्पांजलिना पूजयेत्॥ अथ पंचमन्त्रमंत्राणामादौ त्रितारयोजनाभावात्प्रासादपरमंत्रांते समासैरीयोज-
नाचनास्तीति रहस्योयं संप्रदायः। इत्यमात्मानं संपूज्य जपमालामानीय हृच्चिमात्रे वामपाणौ वा निधाय मू-
विद्यया मामा स्वार्घोदकेनाभ्युक्ष्य। ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मा-
न्मे सिद्धिदा भव॥ ह्रीं सिद्ध्यै नमः। इति गंधादिभिः संपूज्य गंभविघ्नं कुरु माले त्वं इत्यनेन दक्षिणहस्ते माला जो

सौ·र·क गृह्णीयात्स्वशिरसि स्वगुरुकेऽवेपीतवर्णां विद्यां हृदये श्रीपरदेवतां श्रीगुरुचरणयोरात्मानं च ध्यात्वान्त्रमध्य-
९· स्थानीचक्रे रुमंत्रदेवतात्मनामैक्यं विभाव्य कंठस्थविशुद्धिचक्रेन च तुष्टयमेकीभूतमानीय श्रीपरदेवतारूपं
स्मरणं ध्यात्वा मूलविद्यया हृदयकमलमानीय तत्र श्रीपरदेवतां ध्यायन् मंत्रार्थंकृतचित्तो हृदयसमीपे मालामा-
नीय दक्षिणहस्तस्य मध्यमांगुलिमध्यपर्वणि संस्थाप्यैकचित्तोऽनुग्रथीबोऽनुकायः स्वयमुन्नतः कंडुम्मील-
नरहितः स्वरस्वरादिशुद्धमकुर्वन्नंगुष्ठाग्रेण चालयन् तर्जन्या मालामस्पृशन् प्रतिबीजं मंत्रमुच्चरन् पर्वबीज-
जपसमये परबीजमंगुष्ठेनास्पृशन् वामहस्तेन मालामस्पृशन् स्थापितस्थानात्स्थानांतरमप्रापयन् भ्रां-
दोलयन् मेरुमलंघयन् परिवर्तनकाले संघट्टमकारयन् अंगुष्ठाग्रेण मध्यमामध्यपर्वस्थं बीजे परिवर्तयन्
प्रणवोच्चारयन् णपूर्वकमारभ्याभिमतसंख्यं जपं समाप्य पुनः प्रणवमुच्चार्य। ॐ त्वमाले सर्वदेवानां प्रीतिदा
शुभदा मम॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा॥ इतिमंत्रेण मालां स्वशिरसि संस्थाप्य पुनः प्राणायामत्र-
यं कृत्वा ऋष्यादिकरषडंगन्यासांश्च कृत्वा गमे चौर्ध्वदशांशं जपित्वा पुनः प्राणायामादिपूर्वकं। ॐ गुह्यातिगु-
ह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि स्थिता॥ इतिमंत्रेण सामान्यार्घोदकेन १५५

देव्या वामहस्ते जपं समर्प्य मालां श्रीगुरुमंत्रेण संपूज्य तेनैव रहः स्थापयेत्॥ मालाभावे करमालायैव जपं कुर्या-
त्॥ सा त्वनामिकामध्यपर्वादितर्जनीमूलपर्वपर्यंतदशपर्वरूपा॥ अनामामूलपर्वादि मध्यमामूलपर्वांता वा
मातृकामालया तु सर्वोत्कृष्टजपः॥ सा त्वनुलोमविलोमस्था अकारादिलकारांत सबिंदुकैर्वर्णात्मिका॥ अवर्गा-
द्यष्टवर्गयोगेनाष्टोत्तरशतास्वरूपा समेरुका मूलादिब्रह्मरंध्रांतं सुषुम्नांतःकुंडलिनीसूत्रेण ग्रथितानि जगुरू-
पदिष्टविधिना जपकाले भावनीया॥ वर्णात्मकजपस्तु दिक्सहस्रादिसंख्यावसाने कार्यः न तु प्रत्यावृत्तिरिति॥ अ-
स्या विद्याया नित्यजपस्तु सहस्रं तदर्द्धं त्रिशतमष्टोत्तरशतं वा तद्दिनं वा तद्दिनजपमिति नाथनत्वनित्याप्रति-
काश्रयमिति के विंशत्युत्तरशतसंख्याको जपः कार्य इत्यर्थः अयं जपः॥ सिद्धविषयः॥ अंगमंत्रास्तु षट्चक्रेश्वरी-
मंत्रास्तु दिनं नित्याविद्या तिथिनित्या चेति दशविद्या आवश्यकाः॥ शाक्तौ तु पंचदशनित्याविद्या। पंचसिंहासनग-
ताविंशतिविद्याः पूर्वाद्याम्नायानां। चतस्रो विद्याश्चतुःसमयविद्याः पजोऽभगमालिनीमेनरेणलिस्वः पूर्ण-
विद्याः कामकलाविद्या तुरीयविद्यानुत्तरपराकुरुकुल्लाविद्या चेति सप्तचत्वारिंशत्संख्याकाः विद्या जाप्याः
।ऊर्ध्वाम्नायी चेदेकसंख्युचरणषोडशाविद्याबडाधारविद्याश्चेति त्रयोविंशति विद्या जपेत्॥ अत्राप्यशक्तौ चर

सौ·र·क· ला विद्या मूलविद्या चेति। केवलञ्चासां दपरापराशासां द्वीस्तिस्रश्चेतयोरेकतमं तद्द्वयं वा जपेत्। षडन्वयशांभव
प· दीक्षितस्त्वेवं देवीनां द्वादशविद्याः पृथग्जपेत्। ततस्तिरस्करिणीविद्यां भुवनेशीरहितां न्दर्शनमंत्रान्पंच
जपेत्। तेन श्रीवीद्यागमस्तारचतुरायतनसमेता त्रयस्त्रिंशत संख्याका भवेतिन्तत्र यथाशक्ति जपेत्। श्रीविद्यानंदना
थेनेति॥ श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे विंशतिमस्तरंगः॥ ॥ ॥ततो मूलविद्यया देव्यै पु
ष्पांजलिं दत्वा घंटादिवाद्यपूर्वकं देवीस्तोत्रं पठेत्। तद्यथा॥ श्रीमच्छ्रीकोशहृदयं पंचसिंहासनात्मकं। फलेकल्प
लतानां वचोरूरलंकुरुकले॥१॥ चतुरायतनानंदि चतुरन्वयकोशगं॥ निस्मानंदि परं ब्रह्मधाम नौमि सुधामयं॥२॥
गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं॥ देवीमंत्रमयीं नौमि मातृकां पीठरूपिणीं॥३॥ प्रणमामि महादेवीं मातृकां
परमेश्वरीं॥ कालहृल्लोहल्लोल कलनाशनकारिणीं॥४॥ यदक्षरैकमात्रेपि संसिद्धे स्पर्द्धते नरः॥ रवितार्क्ष्ये
न्दुकंदर्पशंकरानलविष्णुभिः॥ यदक्षरशशिज्योत्स्नामंडितं भुवनत्रयं॥ वंदे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकां श्री
॥यदक्षरमहासूत्रे प्रोतमेतज्जगत्त्रयं॥ ब्रह्मांडादिकटाहांतं तां वंदे सिद्धमातृकां॥६॥ यदेकादशमाधारं बी
जं कोणत्रयोद्भवं। ब्रह्मांडादिकटाहांतं जगदद्यापि दृश्यते। अकचादिटतोन्नद्धपयशाक्षरवर्गिणीं। ज्येष्ठांगबा

१६६

रुहस्तपदकटिपादनिवासिनीं॥१०॥ नाभीकारास्तरोद्धारांस्त्रारात्सारतरां परां॥ प्रणमामि महादेवीं परमानंदरूपिणीं
॥११॥ अद्यापि यस्या जानंति न मनागपि देवताः॥ केयं कस्मात्क केनेति सरूपारूपभावनां॥१२॥ वंदे तामहमक्षय्यक्षका
रास्तररूपिणीं॥ वंदे कुलकलोल्लोलप्रोल्लसंतीं परां शिवां॥१३॥ वर्गानुक्रमयोगेन यस्या मात्र्यष्टकं स्थितं॥ वंदे ताम
ष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीं॥१४॥ कामपूर्णजकाराख्यश्रीपीठांतर्निवासिनीं॥ चतुराज्ञाकोशभूतां नौमि श्रीत्रि
पुरामहं॥१५॥ इति द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिकृत्॥ देव्यास्त्वखंडरूपायाः स्तवनं तव तद्यतः॥१६॥ इ
ति स्तुत्वा पुष्पांजलिमादाय मूलमंत्रेणैव वेदिकैः पौराणिकैस्तवैः स्तुत्वा तं देव्याश्चरणयोः क्षिपेत्॥ ततः प्रार्थनास्तु ज्ञो
व भ्यां प्रार्थनस्तवं पठेत्॥ किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायां का का कीर्त्तिः कुलकमलिनि ख्याप्यते न
स्तुतायां॥ का का सिद्धिः सुरवरनुते प्राप्यते नार्चितायां कं कं योगं त्वयि न चिनुते चित्तमालंबितायां॥१॥ सर्गसंस
र्गसंरंभस्फारितौघविभ्रमे॥ मिश्रं स्वं इमं उज्जान्तस्ये नमस्ते हरवल्लभे॥२॥ जगदाह्लादनोद्योतायोगभोगवियो
गिनि॥ स्थितिभावस्थिते गौरि नमस्या... प्रियें बिके॥३॥ भावाभावप्रपञ्चावस्वभावो भयधर्मिणि॥ चैतन्य
पंचके देवि नमस्तु संहरांगने॥४॥ स्पष्टिस्थितिसुपसंहारप्रपंचकूचित्तपदोदये॥ चिद्दिश्यांतमहाक्षसत्तामात्रैमा

सौ.र.क.
प.

त्रैनमोस्तुते॥५॥ वन्ध्यार्कशीतकिरणब्रह्मचक्रांतरोदिते॥ चतुःपीठेश्वरि शीवे नमस्त्रिपुरसुंदरि॥६॥ चराचर
मिदं विश्वं प्रकाशयसि यास्वथ॥ मातृकारूपमास्थाय तस्यै मातर्नमोस्तुते॥७॥ स्मरतामभयं हंसि पदं जितासि-
मुखंकरी॥ स्तुता त्वं वांछितं वस्तु ददासि करुणाकरे॥८॥ अक्रमामेनि त्यरूता युक्तस्य परमेश्वरि॥ वाग्भवादि मह
सिद्धिं देहि त्रिपुरसुंदरि॥९॥ परमानंदसंदोहप्रमोदभरनिर्भरे॥ दुःखत्रयपरिम्लानवदनं पाहि मां शिवे॥१०
॥ दहन्नसमये स्वच्छे देवि त्रिपुरसुंदरि॥ यथाशक्ति जपं पूजां गृहाण मदनुग्रहात्॥११॥ इदं पाठादिनं क्रियादिनं मे
त्रहीनं च यद्भवेत्॥ तत्सर्वं कृपया देवि क्षमस्व परमेश्वरि॥१२॥ यन्मया क्रियते कर्म जाग्रत्स्वप्नसुषुप्तिषु॥ तत्सर्वं ता
वकी पूजा भूयाद्भूत्यै नमः शिवे॥१३॥ यन्मया यो क्रमितानात्मन्यत्वस्त्रमेव वा॥ हंतसर्वं जगद्धात्रि सं तव्यमयमं
जलिः॥१४॥ हैतां हैतमहामोहशार्वरी क्षपणक्षमः॥ भास्वानिव जयत्येको गणेशः शक्तिसंयुतः॥१५॥ प्रतिभा
सागरोल्लासो निशाकर इवापरः॥ मन्त्रियुक्तः स जयति बटुकस्तोऽवान्वितः॥१६॥ षट्त्रिंशत्तत्त्वभरितं से
वेयः पालयस त्वं॥ सेवे हैंशं तमहं नौमि वारणास्यं महाबलं॥१७॥ चतुःपीठनिवासिभ्यो योगेभ्यो महाबलाः॥ च
तुःषष्टिप्रकारास्तानि संवंदे कुलागताः॥१८॥ भेदाभेद महामोहविवर्त परिमंडितां॥ आप्रयंतीं समयां हाद

१९१

श्रांतीं नमाम्यहं॥१९॥ इति स्तुत्वा पुष्पांजलिं दत्वा श्रीगुरुक्रमगुरुस्तोत्रेणापि स्तुत्वा प्रणम्य॥ ॐ सर्वशक्तिक्रमोद्भूतिप्रभ
न्मोहमिहात्मिका॥ देवस्य देवतां कांचित्त्वां विन्नु खमयीं श्रये॥ इत्युच्चरन्नमस्कारमुद्रां प्रदर्शयेत्॥ ततः प्रदक्षिण
निकृत्वा॥ ॐ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते॥ इति श्लोकं सत
धा पठित्वा गुरूपदेशविधिना साष्टांगं पंचांगं प्रणम्य श्रीमौस्त्वलितपादानां नूमिरेवावलंबनं॥ त्वयि जातापरा
धानां त्वमेव शरणं शिवे॥ अपराधो भवत्येव सेवकस्य पदे पदे॥ कोपरः सहतां लोके केवलं स्वामिनीं विना॥ अ
पराधसहस्राणि क्रियंते हर्न्निशं मया॥ दासोहमिति मां मत्वा क्षमस्व परमेश्वरि॥ ज्ञानतोज्ञानतो वापि यन्मया
क्रियते शिवे॥ मम कृत्यमिदं सर्वमिति मातः क्षमस्व मे॥ इति विकृधा प्रणति पूर्वकं समाप्य अर्घोदकं चुलुकेन पात्रां
तरेण वा आदाय ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तिअवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां
पद्भ्यामुदरेण शिश्नाय यत्कृतं यत्स्मृतं यदुक्तं तत्सर्वं श्रीगुरुदेव शामर्पितमस्तु स्वाहा॥ मां मदीयं च सकलं श्रीमहा
त्रिपुरसुंदर्यै समर्पयामि ॐ तत्सत्॥ इत्यनेन देव्याश्चरणारविंदयोर्गृहीतोदकदानेनात्मानमर्पयेत्॥ ततऊर्ध्वा
म्नायीचेत् ॐ महत्तुरीयातीताहं सर्वतत्त्वसमुद्भूतमात्मानं नेऽनुत्तरनत्वं यथा भवति तथा भगवत्यै समर्पयामि स्वा

तेन निष्कलत्मात्मानमर्पयेत्। ततः पूर्वोक्तमूलसमयविद्यया केवलपुष्पैर्मूलदेवीं सप्तवारमभ्यर्च्य कृतांजलिः। ॐ य
द्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलं। निवेदितं च नैवेद्यं तद्गृहाणानुकंपया॥ आवाहनं न जानामि न जानामि विस
र्जनं। पूजां चैव न जानामि त्वं गतिः परमेश्वरि॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम॥ अंतश्चारेण भूतानां द्र
ष्टी त्वं परमेश्वरि॥ मातर्योनिसहस्रेषु येषु येषु व्रजाम्यहं। तेषु तेष्वच्युता भक्तिरच्युतेस्तु सदा त्वयि॥ देवी दात्री
च भोक्त्री च देवि सर्वमिदं जगत्॥ देवी जयति सर्वत्र या देवी साहमेव हि॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्
॥ क्षंतुमर्हसि देवेशि कृपया न स्खलितं मनः॥ क्षमस्व देवदेवेशि त्रिपुरे परमेश्वरि॥ तव पादांबुजे नित्यं निश्चला
भक्तिरस्तु मे॥ इति सर्वसमापयोनीमुद्रया प्रणमेत्॥ ततः शंखमुद्धृत्य देव्युपरि भ्रामयित्वा। साधु वासाधु वा
कर्म यद्यदाचरितं मया॥ तत्सर्वं कृपया देवि गृहाणाराधनं मम॥ इति मंत्रमुच्चार्य देव्या हस्ते शंखजलं किं
चिद्दत्वा पुनः प्राग्वदर्घं देव्याः शिरसि दत्वा शंखं यथास्थाने निवेश्य जलं किंचिद्वामहस्ते निधाय तस्मिन्नाद्यशि
ष्टं किंचिद्दधमाजोप्य मूलेन सप्तवारमभिमंत्र्य तेन जलेनात्मानमभ्युक्ष्य स्वामपि समयिकानप्यशंखजलेन प्रो
क्षयेत्। ततः पुष्पांजलिमादाय। ॐ रश्मिरूपा महादेव्या अत्र पूजितदेवताः॥ श्रीसुंदर्यंगलीनास्ताः सं

तु सर्वशुभावहाः॥ इति पुष्पांजलिं क्षिप्त्वा परिवारगणान् गणेशाद्यानर्घ्यदेवताद्वारदेवतासहितान् मूलदेव्या
देहे विलीनानिति विभाव्य पर्ववत्कामकलारूपमात्मानं ध्यात्वा देव्या यद्दूषणं रूपमापूर्णं च तत्सर्वं निजदेहे वि
चिंत्य देवीरूपमात्मानं ध्यायन् खेचरीमुद्रां बध्वा तद्बीजेन देवीं श्र मूलविद्यां तेन भगवति श्रीमहात्रिपु
रसुंदरि त्वं क्षमस्वेति नाराचयेण देवीं प्रबोधयेत्॥ तेजोमयीं विचिंत्य। ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि॥
यत्र ब्रह्मादयो देवा न विदुः परमं पदं॥ इत्युच्चार्य तेजोरूपां तां संहारमुद्रया निर्माल्यपुष्पेण तत्तेजः समुद्धृत्य प्राण
पूरकयोगेन शिरस्थसहस्रदलकमलं प्राप्य तत्र क्षणं तेजोरूपं ध्यात्वा सुषुम्नावर्त्मना हृदयानमश्रति हृदयक
मलमानीय तत्र यथोक्तरूपां ध्यायन्। ॐ तिष्ठति परे स्थाने स्वस्थाने परमेश्वरि॥ यत्र ब्रह्मादयः सर्वे सुरास्ति
ष्ठंति मे हृदि॥ इति हृदयकमलमध्ये स्थापयित्वा॥ तत्र यथोक्तसिंहासनमध्यगतस्त्रीचक्रगतां सपरिवारां
परदेवतां मानसैरुपचारैः संपूज्य पुनस्तेजोरूपां तां कुंडलिनीरूपेण मूलादिब्रह्मरंध्रांतं ध्यात्वा मूलाधारे
स्थापयेत्॥ ततः ऐशान्यां दिशि जलेन त्रिकोणवृत्तचतुरस्रं मंडलं निर्माय तन्मध्ये शेषविकारयां निर्माल्यवा
सिनीं तन्मंत्रेण बाह्यषडंगन्यासेन सकलीकृत्य तत्र तां ध्यायेत्॥ तद्यथा॥ मातंगीनवयावकार्द्रचरणां

सौ.र.क.
प.

श्रीखासिवृक्षलांगुकां वीणोद्भासिसिकरां समुन्नतकुचां मुक्ताप्रवालावलीं ॥ हृद्यांगीमितशंखकुंडलधरां विद्या
धरां सुस्मितामाकीर्णालकवेणिमद्भुतनयनां ध्याये च्युकस्मामलां ॥ १ ॥ इति जगन्मोहिनीं निर्माल्यवासिनीं ध्या
त्वा तस्याः पौरुषरूपं लंबोदरादीन्मूलदेवीविभूतिः पौरुषरूपगणेशादीनामुच्छिष्टभोजिन्यः कोणेषु ई
शानादिषु तत्र निर्माल्येन पूजयित्वा मध्ये मूलदेवीं निर्माल्येन तदुच्छिष्टभोजिनीं तां पूजयेत् ॥ तत्र तस्य मंड
लस्यैशानकोणे गणेशं निर्माल्येन ॐ लंबोदराय नमः इति लं॥ बोदरं पूजयेत् ॥ तत आग्नेये सूर्यं निर्माल्ये
न ॥ ॐ तेजश्चंडाय नमः ॥ नैरृते विष्णुं निर्माल्येन ॥ ॐ विष्वक्सेनाय नमः । वायव्ये शिवं निर्माल्येन ॐ चंडेश्वरा
य नमः ॥ इति तन्निर्माल्येन गंधादिभिः पंचोपचारैः संपूज्य त्रिकोणमध्ये पद्मलतरूपभुवनेश्वर्यादिशक्तिपाशान
पस्ते तन्निर्माल्येन ॥ ४ ॐ चंडेश्वर्यै नमः इति निर्माल्यवासिनीं संपूज्य तत्त्रिकोणमध्ये देवीं निर्माल्येन ४ ऐं नमः
उच्छिष्टचांडालि मातंगि सर्ववशंकरि स्वाहा शेषिका श्रीपादुकां पूजयामि इति निर्माल्यपुष्पैः त्रिः संपूज्य त
न्निर्माल्योदकादिभिः पाद्यादिदीपांतानुपचारानुपचर्य नैवेद्यस्थाने शंखशंसहस्रां शंवानच्चरणोदकेनैव स
मर्पयेत् ॥ ततो निर्माल्यपुष्पांजलिमादाय ॐ लेपचोष्याद्यपानादितांबूलं स्रग्विलेपनं । निर्माल्यभोजनं ।

१५८

तुभ्यं ददामि श्रीशिवाज्ञया ॥ १ ॥ इममनेन पुष्पांजलिं दत्त्वा कृपिपल्लमस्वेति विसर्जयेत् ॥ इति निर्माल्यवासिनीं
पूजयित्वा ततस्तालत्रयपूर्वकं । ॐ देवनाथ गुरो स्वामिन् देशिकस्वात्मनायक ॥ त्राहि त्राहि कृपासिंधो पूजां
पूर्णतरां कुरु ॥ १ ॥ इति श्रीगुरुं प्रार्थ्य करांभ्यां श्रीपात्रमामस्तकमुद्धृत्य शिरसि स्थिताय श्रीगुरवे समर्प्य
तस्यावं दक्षिणकरे निधाय ४ श्रीगुरुपादुकां विद्यांते श्रीअमुकानंदनाथश्रीपादुकां तर्पयामि नमः इति त्रिः सं
तर्प्य तन्मात्रं यथास्थाने निवेश्य तत्रत्यं बिंदुमात्रं तरे निधाय ४ ऐं प्रथमकूटं आत्मतत्त्वाय नमः । ४ क्लीं द्विती
यकूटं विद्यातत्त्वाय नमः । ४ सौः तृतीयकूटं शिवतत्त्वाय नमः । ४ ऐं क्लीं सौः समस्तविद्यामुच्चार्य सर्वतत्त्वायन
मः ॥ इति तस्मिन् जलेन तत्चतुष्टयं विमृश्य स्पतज्जलं पुनः पात्रांतरेणोद्धृत्य चुलुकेनादाय तन्त्रोपात्मेशंषि
सिष्य ॥ अभ्यहमहंकारबुद्धिमनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगं
धाकाशवाय्वग्निसलिलपृथिव्यात्मकोऽमुद्धचतुर्विंशतितत्त्वसहितं स्थूलदेहं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं
एं ऐं ओं औं अं अः ऐं आत्मतत्त्वं शोधयामि स्वाहा । मयाकृतानि विद्यारागकालनियतिपुरुषात्मकसूक्ष्म
देहमत्तत्त्वसहितं सूक्ष्मदेहं कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं क्लीं विद्यातत्त्वं शोध

पृ

४५

सौ॰र॰कृ॰
५॰

यामि स्वाहा॥ शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाविद्याकलारागात्मकं पंचतत्वसहितं कारणदेहं यं रं लं वं
शं षं सं हं ळं क्षं सौः शिवतत्वं शोधयामि स्वाहा॥ शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाविद्याकलारागका
लनियतिपुरुषप्रकृत्यहंकारबुद्धिमनश्श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगं
धाकाशवाय्वग्निसलिलपृथिव्यात्मकशुद्धमिश्राशुद्धषट्त्रिंशत्तत्वसहितं स्थूलसूक्ष्मपराख्यदेहत्रयाभिमानि
नं जीवात्मानं अं आं प वा जानुच्चार्य सर्वतत्वं शोधयामि स्वाहा॥ इति चुलुकचतुष्टयं स्वीकृत्य तन्मात्रं कराभ्यामा
दाय मूलविद्यां गुरुपादुकाविद्यां चोच्चार्य प्रकाशामर्शहस्ताभ्यामवलंब्योन्मनीस्रुचं॥ धर्माधर्मकलास्नेहपूर्ण
वह्नौ जुहोम्यहं॥ इत्युच्चार्य तज्जलं प्राश्नीयात्॥ ततः कराभ्यां हृदिपादांतं पूर्वोक्तषट्त्रिंशत्तत्वात्मकतां भावय
न्स्वदेहं स्पृशेत्॥ अथैतावत्कर्तुमशक्तौ संध्याप्रकरणोक्ताचमनविधिना तत्वचतुष्टयं शोधयेत्॥ ततः स्वसाम
यिकान्यथाशास्त्रं यथागुरूपदेशं संभाव्य तेषु परितुष्टेषु बलिविसर्जनं कुर्यात्॥ तत्र पूर्वस्थापितबलिपात्र
स्थमन्नादिकमेकस्मिन्पात्रे कृत्वा तद्गृहीत्वा सोदकपात्रहस्तः पूजागृहाद्बहिर्गत्वा जलेन शुचौ देशे चतुर
स्रवृत्तत्रिकोणात्मकं मंडलं कृत्वा तत्र गदात्रिशूलं डमरुपात्रहस्तं त्रिलोचनं कृष्णाभं भैरवं देवं सर्वविघ्नवि

७॰

नाशनं॥१॥ वामाधःकरमारभ्य वामोर्ध्वकरपर्यन्तमायुधध्यानं इत्युच्छिष्टभैरवं ध्यात्वा गंधादिभिः संपूज्य ऐं ह्रीं
श्रीं उच्छिष्टभैरव एह्येहि बलिं गृह्ण गृह्ण हुं फट् स्वाहा॥ इति मंत्रेण तस्मिन्मंडले पात्रस्थं बलिं दत्वा विसृज्य तत्पात्रं
हस्तौ पादौ च प्रक्षाल्याचम्य तत्पात्रं जलेनापूर्य पूजागृहद्वारं गत्वा उद्द्योतस्त्विति त्रिभुवन् अंतः प्रविश्य स्वास
ने समुपविश्य तत्पात्रजले विशेषार्घजलबिंदुं दत्वा तेन जलेन सामयिकान्सिंचन् शांतिस्तोत्रं पठेत्॥
तत्र श्रीवामकेश्वरतंत्रे॥ ॐ नश्यंतु प्रेतकूष्मांडा नश्यंतु दूषका नराः॥ साधकानां शिवाः संतु आम्नायपरिपा
लिनः॥१॥ जयंतु मातरः सर्वा जयंतु योगिनीगणाः॥ जयंतु सिद्धडाकिन्यो जयंतु गुरुपंक्तयः॥२॥ नंदंतु अणि
मासिद्धा नंदंतु भैरवादयः॥ नंदंतु देवताः सर्वाः सिद्धविद्याधरादयः॥३॥ ये आम्नायविशुद्धाश्च मंत्रिणः शु
द्धबुद्धयः सर्वदा नंदहृदया नंदंतु कुलपालकाः॥४॥ इंद्राद्यास्तर्पिताः संतु तृप्यंतु वास्तुदेवताः॥ चंद्रसू
र्यादयो देवास्तृप्यंतु मम भक्तितः॥ नक्षत्राणि ग्रहा योगाः करणा राशयश्च ये॥ सर्वे ते सुखिनो यांतु मासा
स्तिथयस्तथा॥ तृप्यंतु पितरः सर्वे ऋचवो वस्वादयः॥ खेचरा भूचराश्चैव तृप्यंतु मम भक्तितः॥७॥ अं
तरिक्षचरा ये च ये चान्ये देवयोनयः॥ सर्वे ते सुखिनो यांतु सर्वानुग्रहपक्षिणः॥८॥ पशवस्सरवश्चैव पर्व

सौ॰र॰क॰
५

नाः कंदरागुहाः॥ ऋषयो ब्राह्मणाः सर्वे शांतिं कुर्वंतु मे सदा॥१०॥ तीर्थानि पशवो गावो ये चान्ये पुण्यजन्मयः॥ वराः प
तिव्रता नार्यः शिवं कुर्वंतु मे सदा॥११॥ शिवं सर्वत्र मे चास्तु पुत्रदारधनादिषु॥ राजानः सुखिनः संतु स्तेमं मार्गं तु
मे सदा॥१२॥ शुभा मे दिवसा यांतु मित्राणि सहतु मे शिवाः॥ साधका जयिनः संतु शिवं तिष्ठंतु पूजकाः॥१२॥ ये ये
पापधियः स्वच्छ्रमणाः तामन्निंदकाः॥ पूजने देवाचारविरुद्धनष्टहृदया दुष्टाश्च ये बाधकाः॥ दृष्टा चक्रमपूर्व
मंधहृदया ये कौलिकद्वेषकास्ते तेषां तु विनाशमेत्र समये श्रीभैरव स्याज्ञया॥१३॥ द्वेष्टारः साधकानां च सदैवा
म्नायदूषकाः॥ डाकिनीनां मुखे यांतु तृप्तास्तत्पिशितैस्तु ताः॥१४॥ शत्रवो नाशमायांतु मम निंदाकराश्च ये
॥ द्वेष्टारः साधकानां च विनश्यंतु शिवाज्ञया॥१५॥ ये निंदकास्ते विजयं प्रयांतु ये साधकास्ते प्रभवंतु सिद्धाः॥
सर्वत्र देवी करुणार्णवा नो कापुरः परेशी मम संनिधत्तां॥१६॥ इति पठित्वा सर्वाण्सामयिकानभिवन्द्य विशे
षार्घपात्रमुद्धृत्य श्रीगुरवे शिरःस्थिताय गुरवे समर्प्य तथैव तन्मातृकोक्तिः संतर्प्य मूलविद्या गुरुपादुका
विद्यां तेन च स्वादेति स्वमूलाधारस्थकुंडलिन्यात्मकपरदेवतामुखे हवनं बुद्ध्यातज्जलपात्रान्तरे हुत्वा प्राश्नी
यात्॥ शेषं प्रियशिष्याय प्रसादबुद्ध्या किंचिद्दद्यात्॥ सोपि स्वपात्रे कृत्वा तज्जलं प्राश्नीयादित्यर्घ्यप्रतिपत्तिः

ततः स्वगुरूपदिष्टविधिना शेषकृत्यं निर्वर्त्य समापयेत्॥ ततस्ताम्रादिपात्रे गंधपुष्पाक्षतान्वितं जलमापूर्य ॐ न
मो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे॥ नमः सवित्रे शुचये सवित्रे कर्मदायिने॥ ह्रां ह्रीं सः श्रीसूर्याय नमः अर्घ्यः स्वा
हा॥ इति सूर्यार्घ्यं दत्वा कृतांजलिः यच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम॥ सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसाद
तः॥ इत्यच्छिद्रमवधारयेत्॥ ततो मूलविद्यया प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासान्विधाय षडासनवा
ग्देवतादिकन्यासान्विधाय श्रीगुरुं गुरुस्तोत्रं पठित्वा श्रीगुरुं प्रणम्य मूलविद्यां द्वितीयकूटेन निर्मास्यं शिरसि
धृत्वा मूलविद्ययैव चरणोदकं स्वीकृत्य श्रीपरदेवताभक्तेभ्यो नैवेद्यादिकं विभज्य दत्वा स्वयमपि सुहृद्बांधवज
नैः सार्धं भुक्त्वा आत्मानं कामकलारूपं भावयन् सुखं विहरेत्॥ ॥इति श्रीपरदेवताया नित्यपूजाविधिः॥ एवं
बिंदुचक्रमारभ्य चतुरस्रांतं वा पूजयेत्॥ शाक्तौ तु स्त्राद्बिंदुचक्रान्तं पूजयित्वा पुनर्बिंदुचक्राच्चतुरस्रांतं
पूजयेत्॥ इति विस्तारानि विस्ताराभ्यां षट्त्रयं। एवं नित्यक्रमेण पूजयित्वा॥ सर्वसिद्धिर्भवेत्॥ अमंगल
मपि मंगलं स्यात्॥ विस्ताराशक्तौ संक्षेपतो विनित्यपूजां कुर्यात्॥ तत्र शुचिर्भूत्वा सुखासने उपविश्य गुर्वादिवंदनपू
र्वकं भूतशुद्धिं शुद्धमातृकान्यासं च कृत्वा योगपीठन्यासपूर्वकं प्राणायामत्रयं कृत्वा मूलविद्यया ऋष्यादिकर॰

षडंगन्यासान्विधाय करशुद्धि षडासन षडंगयुवती वाग्देवताष्टक चतुःपीठ चतुस्तत्त्वात्मक न्यासपंचकं कृत्वा भूता
पशक्तौ प्राणायामत्रयं कृत्वा दिकरषडंगन्यास चतुरासनाष्ट वाग्देवतात्मकन्यासत्रयं वा कृत्वा मुद्राप्रदर्श
नं ते यथाशक्ति मानसपूजां विधाय संक्षेपतः सामान्यार्घ्यं श्रीपात्रं च स्थापयित्वा आत्मपूजां प्रधाय पीठपू
जां कृत्वा पंचायतनी चेत्तत्पंचोपचारैः पंचायतनदेवताः संपूज्य श्रीचक्रे पूर्ववन्मूलदेवीमावाह्य षोडशभि
र्दशभिर्वा उपचारैर्यथाशक्ति संपूज्य शाखान्निसामंडलादि षडंगयुवत्यंतं पूजयित्वा नवावरणदेवताः पूजये
त्॥ अशक्तौ चतुर्दशारमारभ्य बिंदुचक्रांतमावरणत्रयं पूजयित्वा शेषं शमापयेदिति मापकल्पः॥ तत्राप्यश
क्तौ षडंगयुवतिपूजांते सायुधं त्रिकोणं बिंदुचक्रं यथाविधि पूजयेदिति परमापत्कल्पः॥ प्रवासे परिस्थितुर्गि
मस्थाने परचक्रागमे सिंहव्याघ्रचोराद्युपद्रवभये काराग्रहप्रवेशनादिसंभवे मनोभये जाते स्थानपूजा
तैः स्थाने साधनाघजाते स्थानसंध्यादिकं यथाशक्ति निर्वर्त्य न्यासादिकमपि यथाशक्ति विधाय यथाविधि
ध्यात्वा बाह्यपूजाविधिनैवार्घ्यसाधनपीठपूजां पंचायतनपूजां पुरःसरं मानसीमेव श्रीचक्रपूजां यथा
विधि विधाय होमजपादिकमपि यथाविधि यथाशक्ति कृत्वा समापयेत् इति मानसपूजासमयस्य विधि

स्या इति संक्षेपपूजाविधिः॥ एवमपि यो न करोति सोऽधो यातीति शिवस्मासनं इयं संक्षेपतः पूजाविस्तारतः
कर्तुं सामर्थ्ये देशकालादिके च [illegible]पि आलस्यादिना चेत् क्रियते न तदेयमनर्थकारिणी भवंति तस्मादायत्त
मयएवेयं पूजेति संक्षेपः॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाढ्यौ तरंगो
कविंशतिः॥ ॥इति श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वान्तेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्य
रत्नाकरे एकविंशतितमस्तरंगः॥२१॥ ॥शुभमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः दोषाः प्रयांतु शां
तिं सर्वत्र जनः सुखी भवतु॥ अथ नैमित्तिकपूजा॥ तत्र दीक्षितः प्रामपूर्णाभिषेकः कृतपुरश्चरणो नित्यार्चनानिर
तो नैमित्तिकार्चनं कुर्यात्॥ तत्र विशेषदिवसे पुष्कि मो येण महापूजा नैमित्तिकपूजेत्युच्यते॥ विशेषदिवसास्तु
तत्र पुष्पवर्त्त्वे नोक्तानि दिनानि॥ तानि तु गुरुपरमेष्ठिगुरूणां जन्मवारतिथिनक्षत्राणि स्वजन्मतिथिवार
नक्षत्राणि विद्याप्राप्तिदिनं गुरोः क्षयदिनं अष्टमी चतुर्दशी पूर्णिमाऽमावास्या रविसंक्रांति युगादि दिना
नि पुष्यनक्षत्र रविवासर पीठोपपीठगमन देशिकागमन वीरमहायोगिदर्शन तीर्थगमन व्रतदीक्षाद्युत्सव
दिनानि विशेषक्षेत्रगमन देवतादर्शनाक्षरत्रयसंपात दिनानि च अक्षरत्रयसंपातदिनमिति एकस्याक्षर

सौ॰ र॰ कृ॰ स्वदिनास्तत्वेन तु दयास्तत्वेन च दर्शनं यस्मिन्दिने तद्दिनं विशेषपर्व एतेषु दिनेषु जिनपूजां नैरंतर्येण यथाबलं यथा
प॰ गुरुं यथाकालं यथादेशं यथाविभवविस्तरं वित्तशाठ्यरहितो यथोक्तद्रव्यैः यथागुरूपदेशशक्तिसामयिकैः सा
र्द्धं विशेषपूजां कृत्वा यथाशास्त्रं गुरून् सामयिकांश्च परितोषयेत्॥ अत्र गुरुपर्वसु गुरुपंक्तिपूजोक्तमानवोघ गुरुसं
ख्याकान् साधकान् तत्त्वाचारान् सर्वोपचारैः समभ्यर्च्य यथाशक्ति दक्षिणादानादिभिः परितोषयेत्॥ चैत्रादिफाल्गु
णांतेषु पूर्णपर्वसु विशेषपूजां कुर्यात्॥ तद्यथा॥ तत्रादौ चैत्रमासि पूर्णिमायां दमनैः पूजयेत्॥ तत्र चैत्रशुक्ल
त्रयोदश्यां साधकः कृतनित्यकृत्यः साधकैः सार्द्धं दमनसमीपं गत्वा पूर्वोक्तचतुःकल्पलताविद्याभिर्दमनमभि
मंत्र्य॥ ॐ शिवप्रसादसंभूत नभ च सन्निहितो भव। शिवकार्यं समुद्दिश्य नेतव्योसि शिवाज्ञया॥ इति दमनमामं
त्र्य अनंतं च कामदेवं रतिं च तत्रत्यं मंत्रेण वक्ष्यमाणप्रकारेण दमनमभ्यर्च्य ध्यात्वा संपूज्य गृहमागच्छेत्॥ ततश्चतुर्दश्यां कृ
तनित्यकृत्यः साधकः साधकैः सार्द्धं पुनर्दमनसमीपं गत्वा मंत्रेण दमनं समूलमुत्पाद्य शस्त्रेण वा गुच्छं छि
त्वा गृहमानीय अघोरेभ्यो घोरे हूं घोरतरे स्त्रीं सर्वतः सर्वसर्वेभ्यो नमस्तेस्तु रुद्ररूपेभ्यः क्ष्रीं श्रीं इति मंत्रेण दमन
मभ्युक्ष्य पूजास्थाने क्वचिन्मात्रे दमनं नवधा विभज्य मध्ये दिक्षु च संस्थाप्य तन्मंत्रेण चंदनागुरुकुंकुमादि

पंकैः संलिप्य हं नमः॥ सं नमः सं नमः मं नमः लं नमः वं नमः रं नमः यं नमः ॐ नमः इति नवधा विभ
क्तं दमनं मध्यादिप्रादक्षिण्येन संपूज्यास्त्रेण संरक्ष्य करद्वयेन त्रिशूलमुद्रां बध्वा कवचमंत्रेण
दमनोपरि भ्रामयेत्॥ ततो रक्तनववस्त्रेणाच्छाद्य रहसि दमनं स्थापयेदित्यधिवासनं चतुर्दश्यां
रात्रौ कुर्यात्। ततः पौर्णमास्यां प्रातः स्नात्वा नित्यपूजां निर्वर्त्य सामयिकैः सार्द्धं स्वस्तिवाचनपुरःसरं दमनं
रत्नोस्थानमानीय पर्वेषु रधिवासनाकरणे चतुर्दश्यां सायंतने प्रोक्तविधिना दमनमामंत्र्य पूर्णिमायां
दमनमानीय। यद्वा पूर्णिमायामेव दमनमामंत्र्यानीयोक्तविधिना सद्योधिवासनं वा विधाय पुरतः सिं
दूरेण चतुरस्रं वृत्तद्वयवेष्टितं नवयोनिचक्रं विधाय तस्य नवसु योनिषु स्वर्णादिरचितान्नवकलशान्यव
पूजोपरिदीक्षाप्रकरणे वक्ष्यमाणविधिना मध्ययोनावेकं वा कुंभं संस्थाप्य तस्या स[illegible] नपरे जादिपाठेप
णांतं प्राग्वद्विस्तरतः॥ संक्षेपतो वा कृत्वा पंचायतनकमीचेत्॥ गणेशादीन् दमनैः संपूज्य स्वदक्षिण
भागे सर्वतोभद्रमंडलं वक्ष्यमाणं कृत्वा तदशक्तावष्टदलकमलं वा सिंदूरादिना कृत्वा तन्मध्ये अशोक
तरुं पंचवर्णरजोभिराचम्य तस्याधश्चित्रकोणमंडले कामदेवं तरुणमरुणवर्णं

सौ० ६ मन्त्र प

रक्तवस्त्राभरणमाल्यानुलेपनं वामदक्षिणयो रतिप्रीतिभ्यां शोभितं पु
ष्पबाणेक्षुधनुर्द्धरं वसंतनमस्कृतं ध्यात्वा ॐ ऐं ह्रीं श्रीं क्लीं कामाय नमः ॥ इति मंत्रेण गंधादिपंचोपचारैः काम
देवं संपूज्य तद्वामभागे रतिं गौरवर्णां सर्वालंकारभूषितां रक्तवस्त्रपरीधानां पद्महस्तकरां ध्यात्वा ॥ श्रीं
श्रीं श्रीं क्लीं रत्यै नमः इति मंत्रेण रतिं पंचोपचारैः संपूज्य कामस्य दक्षिणभागे प्रीतिं श्यामवर्णां सर्वाभर
णभूषितां रक्तवस्त्रपरिधानां नीलोत्पलकरां ध्यात्वा ॥ श्रीं श्रीं क्लीं प्रीत्यै नमः इति प्रीतिं पंचोपचारैः संपूज्य त
तः कामदेवस्याग्रे एकदेववनमध्ये वसंतं गौरवर्णं वामहस्तेन सुधाकुंभं दक्षिणहस्तेन नानापुष्पसमुच्चयं दधानं
रक्तवस्त्राभरणभूषितं रक्तमाल्यानुलेपनं ध्यात्वा वं वसंताय नमः इति मंत्रेण पंचोपचारैः वसंतं संपूज्य पुनर्म
ध्ये कामदेवं पुष्पांजलिना संपूज्याष्टदलकेसरेषु अग्नीशासुरवायव्यमध्ये चतुर्दिक्षु च ॥ क्लां हृदयाय नमः ।
नमः क्लीं शिरसे स्वाहा ॥ क्लूं शिखायै नमः ॥ क्लैं कवचाय नमः ॥ क्लौं नेत्राय नमः ॥ क्लः अस्त्राय नमः ॥ इति षडंगा
नि संपूज्याष्टदलेषु प्रागादि प्रादक्षिण्येन कामाय नमः ॥ भस्मशरीराय नमः ॥ अनंगाय नमः ॥ मन्मथाय नमः ॥ व
संतसखाय नमः ॥ स्मराय नमः ॥ इक्षुधनुर्द्धराय नमः ॥ पुष्पबाणाय नमः ॥ इत्यष्टौ कामान्संपूज्य । बहिश्चतुर

स्रे लोकपालांस्तैस्तदस्त्राणि च पूजयेत् ॥ ततः पुनः कामदेवं मंत्रेण संपूज्य धूपदीपादिकं दत्वा प्रणम्य काम
देवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनंगः प्रचोदयात् ॥ कामगायत्रीं यथाशक्ति जपित्वा समर्प्य । नमोस्तु पु
ष्पबाणाय जगदानंदकारिणे ॥ मन्मथाय जगन्नेत्रे इति प्रीतिप्रियाय च ॥ इति कामदेवं प्रणम्य स्वविद्याया
ऋष्यादिकरषडंगन्यासान्कृत्वा मध्यकुंभे प्राग्वद्देवीमावाह्य षोडशोपचारैः संपूज्य प्राग्वत्तिथिनित्यादिलो
कपालांतानुक्रमेण दमनैः संपूज्य आवाहितासि देवेशि सद्यःकाले मया शिवे ॥ कर्तव्यं तु यथालाभं पूर्णं
स्प पर्वं त्वदाज्ञया ॥ इति विज्ञाप्य देवीं गंधपुष्पादिभिः पुनः संपूज्य प्राग्वत् धूपदीपनैवेद्यानि निवेद्य नैमित्तिक
होमं नित्यहोमोक्तविधिना संस्कृतेऽग्नौ नित्यहोमद्रव्यैः केवलदमनेन वा नित्यहोमसंख्यात्रिगुणं कृत्वा प्राग्वज्जोप
चारमहाराज्ञिककुमारीसुवासिनीवटुकादिपूजां विधाय सर्वान् भोजयेन्नवस्त्रालंकारदक्षिणातांबूलादि
भिः परितोष्य स्वगुरुं गोभूहिरण्यवस्त्रालंकरणपूजाप्रणतिभिः परितोष्य तदभावे तत्सुतं तत्पत्नीं कनिष्ठं
च अनंतं वा म[illegible]गिनं संपूज्य दक्षिणादानादिभिः परितोष्य स्वविद्यां नित्यजपात्त्रिगुणसंख्यं जपित्वा अं
गविद्याश्च पठित्वा जपित्वा देव्यै जपं समर्प्य स्तुत्वा पुनः पुनः प्रणम्य षोडशार्णो जगन्मातर्वांछितार्थफलप्रदे ।

सौ.र.क. प. ऊ

कामान् पूरय मे देवि कामं कामेश्वरेश्वरि ॥ इति देवीं प्रार्थ्य पुनः कामदेवं तन्मंत्रेण दमनैः संपूज्य रतिप्रीतिवसंत-
स्वदमनैः संपूज्य धूपदीपनैवेद्यतांबूलानि निवेद्य प्राग्वत्स्तुत्वा प्रणम्य कामदेवं सवसंतं विसृज्य पुष्पांजलि-
मादाय समस्तचक्रेशि सर्वविद्याशरीरिणि । वेदमातर्ममैतत्तु भवत्विष्टेन दास्यया ॥ इति देवीं प्रार्थ्य पुष्पांजलिं
दत्वा प्राग्वत् देवीं विसृज्य श्रीपात्रोद्वासनादि प्राग्वत् यथागुरूपदेशं विधाय शक्तिसामायिकान्परितोष्य ब्रा-
ह्मणान् भूरिदक्षिणाभोजनादिभिः परितोषयेदिति दमनपूजाविधिः ॥ इयं दमनपूजा यदि चैत्रपूर्णिमायां न
संपद्यते तदा पक्षद्वयस्याष्टमी नवमी चतुर्दश्यान्यतमतिथौ कार्या चैत्रे मासि चेत् ॥ न भवेत् तदा वैशाखे ज्ये-
ष्ठे वा मासि प्रोक्ततिथिष्वन्यतमतिथौ कुर्यात् । अथ चैत्रे मासि पूर्णायामेव तत्कालसंभवे पुष्पैश्चंदनकर्पूर
कुंकुमकस्तूरैर्वसंतोत्सवपूजां कुर्यात् ॥ अत्रापि नैमित्तिकपूजायां सर्वं च पूजाद्यापि पूर्वेद्युर्निशि पवि-
त्रस्थाने कुचितात्रे निधाय मूलविद्यया मुख्यमूलविद्यया न हि नित्याविद्यया च गंधपुष्पधूपदीपन-
मस्कारार्चैः पंचोपचारैरभ्यर्च्याधिवासनं विधाय परेद्युः स्वनित्यं च मार्चनांते तैः सविशेषं पूजनं कृत्वा स-
गुरुपूजनं च कुर्यादित्यधिवासनं पूजनं च सर्वत्र ज्ञेयं ॥ अथ वैशाखे मासि पूर्णिमायां विशेषपूजां विधाय

कदलीपनसांकफलैर्मद्यान्नैवेद्यैर्देवीं परितोष्य गुर्वादिपूजनं च कुर्यात् ॥ अथाषाढमासि पूर्णिमायोगे लोककोलम-
नीकजकुंकुमान्वितैश्चंदनैः पूजयेत् ॥ अथ श्रावणे मासि पूर्णिमायां पवित्रारोपणं कुर्यात् ॥ अत्र श्रावणे मासीसु-
पलक्षणं मिथुनसंक्रमणमारभ्य तुलासंक्रांतिपर्यंतं च पवित्रोत्सवस्य कालः ॥ तिथयस्तु पक्षद्वयेपि चतुर्थ्यष्ट-
मी नवमी चतुर्दशी पूर्णिमा चेति । अत्र उत्तरोत्तरं गौणः कालः पवित्राणि तु सुवर्णरूप्यताम्रपट्टसूत्रत्रसरी-
पद्मसूत्रदर्भमुंजाशणसूत्रवल्कलकार्पासस्त्रैष्वन्यतमेन सूत्रेण कुर्यात् ॥ कार्पाससूत्रं चेत् सुवासिनीभिः
कृतं त्रिगुणं त्रिगुणीकृत्य तत्वसूत्रस्यैकरसत्वेन कल्पितैस्तैः संख्यैः सूत्रैः पवित्राणि कुर्यात् ॥ तत्राष्टोत्तरशत-
सूत्रैः स्त्रुद्दैर्घ्यमादर्धैर्वोत्तममध्यमकनिष्ठानि पवित्राणि तत्तत्सूत्रसंख्यसमसंख्यांगुलदैर्घ्याणि दशग्रंथि-
युक्तानि कुर्यात् ॥ अथवा षोडशांगुलदैर्घ्याणि निषोडशसूत्रैः षोडशशतग्रंथीयुक्तानि नवांगुलदैर्घ्याणि न-
वसूत्रनवग्रंथियुक्तानि वा यथाशक्ति त्रावरणे या वत्सः शक्तयस्तत्संख्यांगुलसरग्रंथियुक्तानि वा पवित्राणि
कुर्यात् ॥ तत्रावरणशक्तिसंख्यांगुलादि पक्षे मूलदेव्याः षोडशांगुलाया मादिकं पंचदशनित्यानां पंचदशां-
गुलादिकं वाराह्यादि कुरुकुल्लयोभ्यमूलदेव्या इव पवित्राणि कुर्यात् ॥ आयुधानामष्टांगुलदैर्घ्यसरग्रंथि-

पवित्रा

मो० र० क० प०

युक्तानि गुरुपंक्तित्रयस्य तत्तद्दोषोक्तगुरुसंख्यो गुल्फादिकं नवां गुल्फादिकं वा पवित्राणि कुर्यात्॥ इत्थं श्रीचक्रेष्ट
स्पदेवतावृंदसमसंख्याकानि पवित्राणि उक्तपक्षे स्वेकपक्षानुसारीणि कृत्वा होत्तरशतसरग्रंथियुक्तमेकं
वितानास्तृताविष्टरमानदैर्घ्यं वहनमवित्रं आत्मनः क्रमागमसूशिष्याणां च स्कंधादिनाभिपर्यंतदैर्घ्यमंगी
कृतपक्षानुसारि सरग्रंथिकमन्येषां सामान्ययोगशक्तीनां एकग्रंथि नवसरयुक्तानि मंडपस्थेकसूत्रेणावेष्ट
नप्रमाणं ग्रंथिरहितं पवित्रं कुर्यात्॥ अत्र भावरणशक्तिसमसंख्या गुल्फादि पक्षे आत्मनः क्रमागमसूशि
ष्याणां च मूलदेवी वस्त्रवित्रे षु ग्रंथयो वा जामंत्रेण कवचमंत्रेण वा कार्या ग्रंथिषु सूत्रवेष्टनसंख्या त्वादौ पक्ष
त्रये षड्विंशति चतुर्विंशति द्वादश इत्युक्तमध्ये कनिष्ठेषु पवित्रेषु अन्यपक्षेषु यथेष्टमेवेति। इत्थं पवित्राणि
विधाय पवित्रारोपणादिनात्पूर्वदिने साधकः॥ कृतनित्यकृत्यो रात्रौ सामयिकैः सार्द्धं पवित्राणि पूजास्थानमा
नीय पवित्रस्थाने सिंदूरादिना चतुरस्रवृत्तवेष्टितं नवयोनिचक्रं कृत्वा कृचिमाचे तस्मिन्यंत्रे पवित्राणि गो
रोचनाकुंकुमरक्तचंदनकस्तूरीकर्पूरपंकैर्जित्वाति लाक्षागैरिकाद्यैर्ग्रंथिस्थाने षु विचित्रितानि संस्थाप्य का
र्पाससूत्ररचितपवित्राणि चैतेषां नवसु सूत्रेषु ॐकाराय नमः। चंद्रमसे नमः। वह्नये नमः। ब्रह्मणे नमः। ना

रोपणं

१२५

गाय नमः। गुरवे नमः। रवये नमः। सदाशिवाय नमः। सर्वदेवेभ्यो नमः। इति प्रति सूत्रमेकैकां देवतां संपूज्य शि
रोमंत्रेणाभिमंत्र्य हृन्मंत्रेणाभ्युक्ष्यास्त्रमंत्रेणावरुध्य पर्वोक्तदशग्रंथिपक्षेन स्यदशसु ग्रंथिषु ॐ क्रिया
यै नमः। ॐ पौरुष्यै नमः। ॐ वीरायै नमः। ॐ गायत्र्यै नमः। ॐ अपराजितायै नमः। ॐ विजयायै नमः। ॐ
मुक्तिदायै नमः। ॐ सदाशिवायै नमः। ॐ मनोन्मन्यै नमः। ॐ सर्वतोमुख्यै नमः। इति दशशक्तीः संपूज्य पवित्रेषु म
ज्ञविद्ययाष्टांगैस्त्वसंपूज्य षोडशनित्यास्व पूजयित्वा तेषु सुगंधकुसुमानि निक्षिप्य पंचरत्नानि सर्वौषधीः
श्च निक्षिपेत् पंचरत्नानि तु हीरकमुक्ताफलनीलपद्मरागमरकताख्यानि। सर्षपकुष्ठहरिद्रादारुहरिद्रा जो
ध्रमुस्ता शीरप्रियंगुमुरजटामांसीशिलारसाख्या सर्वौषधयः ततो नववस्त्रयुगेनाच्छादयेदिमाधिवासनं वि
धाय परेद्युः साधकः कृतनित्यकृत्यः सामयिकैः सार्द्धं पूजास्थानं प्रविश्य पूजामंडपं वितानादिभिरलंकृत्य पू
जाविष्टरादूर्ध्वं वितानात्पर्यंतं शक्त्यवतारस्थं महापवित्रमालंबयित्वा आसनपूजांतं विधाय प्राग्वत् कुंभ
स्थापनं कृत्वा अर्घस्थापनाद्यात्मपूजांते पीठपूजां विधाय पंचायतनदेवताः संपूज्य पवित्रैः संभाव्य तस्मिन् कुं
भे देवीमावाह्य सर्वोपचारैरभ्यर्च्य नित्यपूजाक्रमेणावरणशक्तीरिदं पवित्रैः संभाव्य तस्मिन्कुंभे देवीमावाह्य नं

गन्धवर्ज्जं नैमित्तिकवत् कृत्वा गुरुं संतोष्य तस्मै पवित्रं समर्प्य पूर्णाहुतिं कृत्वा अग्नये पवित्रार्पणं विधाय गुर्वनुज्ञ-
या स्वयमपि पवित्रधारणं कृत्वा दमनपूजावत् शक्तिसामयिकान् पवित्रदानादिभिर्भोजनतांबूलदक्षिणादि-
भिश्च परितोष्य जपं नैमित्तिकत्वेन विधाय तज्जपं देव्यै समर्प्य देवीं प्रार्थ्य स्तुत्वा प्रणम्य विसृज्य ब्राह्मणादीन् भो-
जयित्वा वस्त्रदक्षिणादिभिश्च तोषयेत्॥ एतावत्कर्तुमशक्तश्चेत्त्वेवं संगुलायामसरग्रंथियुक्तानि पवित्राणि
त्रीणि कृत्वा प्राग्वदधिवासपूर्वकं कुंभस्थापनादिपूजापूर्वकं तानि देव्यैः समर्प्य शेषं समापयेत्॥ इति पवि-
त्रारोपणविधिः॥ अथ भाद्रपदमासि पूर्णिमायां केतकपुष्पैः साधिवासं विशेषपूजां कुर्यात्॥ अथाश्वयुजे
मासि शुक्लपक्षप्रतिपत्तिथिमारभ्य पूर्णिमापर्यंतं पंचदशसु तिथिषु प्रत्यहं नित्यपूजानंतरं नैमित्तिकत्वेन च
क्रमेण संपूज्य प्रतिपत्तिथिमारभ्यैकादिवृद्ध्या प्रतिपदि शतं द्वितीयायां द्विशतं तृतीयायां त्रिशतमित्यादि जप
होमौ विधाय पूर्णिमायां तद्दिने पंचदशशतजपानंतरं शतसंख्यमधिकं जपित्वा होमांते शतसंख्यहोमं च कुर्यात्
॥ प्रतिपदादितिथिषु एकादिवृद्ध्या पूर्णिमायां षोडशकन्या यथा भवंति तथा कन्यापूजनं च कुर्यात्॥ तत्र प्रत्यहं प्रातः
कन्यायाः निमंत्रणं कृत्वा पूजाजपहोमांते तां सुस्नातां समलंकृतां पूजास्थाने समुपवेश्य तस्यां प्राग्युक्तविधिना

देवीमावाह्य संपूज्य वस्त्रालंकरणभोजनतांबूलदक्षिणादानादिभिः परितोष्य प्रणम्य विसृजेत्॥ एवं बहु-
कन्यापूजनेपि प्रत्येकं प्रत्येकं पूजनं कुर्यात्॥ अस्मिन्नेव मासि प्रतिपत्तिथिमारभ्य नवम्यंतरसु नवरात्रतिथिषु
कुमारीपूजने विशेषः॥ प्रतिपदि एकवर्षा द्वितीयायां द्विवर्षा एवं नवम्यां नववर्षा कन्या पूज्या॥ तत्रापि तिथिकुमारी
पूर्वदिनपूजितास्वेव नवम्यामेकवर्षादिनवर्षांता नव कुमार्यो यथा भवंति तथा पूजयेत्॥ तासां नामानि तु प्र-
तिपदि शुद्धा द्वितीयायां बाला तृतीया जजिता चतुर्थ्यां मालिनी पंचम्यां वसुंधरा षष्ठ्यां सरस्वती सप्तम्यां रमा अ-
ष्टम्यां गौरी नवम्यां दुर्गा मंत्रास्तु ऐं ह्रीं श्रीं शुद्धायै नमः। ऐं ह्रीं श्रीं जजितायै नमः। इत्यादिनाममंत्रैः पूजयेत्॥ अ-
थवा नवयौवनसंपन्ना यथोक्तलक्षणाः सुवासिनीर्वा नवरात्रिषु पूजयेत्॥ तासां नामानि तु हृल्लेखा गग-
ना रक्ता महोच्छुष्मा करालिका। इच्छा ज्ञाना क्रिया दुर्गा चेति॥ अत्रापि मंत्रास्तु ऐं ह्रीं श्रीं हृल्लेखायै नमः इत्यादयः
॥ अथ पूज्यापूज्यकुमारीणां लक्षणानि॥ तत्र प्रथमं पूज्यालक्षणानि॥ तत्र श्रीकुलार्णवे॥ अरोगिणीं सुपुष्टांगीं
सुरूपां व्रणवर्जितां॥ एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूजयेत्॥ अथापूज्यकुमारिकालक्षणानि तत्रैवा॥ ही-
नाधिकांगीं कुष्ठीं च विशीलकुलसंभवां॥ ग्रंथिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां॥ जातांधां केकरां

सो॰र॰क॰
प॰

काणां कुरूपां तनुलोमशां॥ संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां॥ अथ फलविशेषे कुमारी
पूजाविशेषः॥ तत्र स्कांदे॥ ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां॥ लाभार्थे वैश्यवंशोत्थां
सुतार्थे शूद्रवंशजां॥ दारुणे चांत्यजातीनां पूजयेद्विधिना नरः॥ अत्र नैमित्तिकपूजांगकु
मारीपूजा स्वपितृकुलजा तिथिपूर्वस्त्रीजा भेत्तु रोत्तराप्रत्येति॥ अथ रत्नसुवासिनी लक्षणा
नि॥ ॥+॥ काणां कुरूपां तनुलोमशां॥ संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां॥ अथ फलविशे
षे कुमारीपूजाविशेषः॥ तत्र स्कांदे। ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां॥ लाभार्थे वैश्यवंशोत्थां सु
तार्थे शूद्रवंशजां॥ दारुणे चांत्यजातीनां पूजयेद्विधिना नरः॥ अत्र नैमित्तिकपूजांगकुमारीपूजा
स्वपितृकुलजा तिथिपूर्वस्त्रीजा भेत्तु रोत्तराप्रत्येति॥ अथ रत्नसुवासिनी लक्षणानि॥ स्त्री कुमार्यावत्सु
रूपा तरुणी शीलाढ्या तुष्टा मुदिता शुचिः॥ शोकादीनाभक्तियुक्ता गृहशास्त्रोपयोगिनी॥ अलोलुपा
सुशीला च स्मिता स्यात्प्रियवादिनी॥ गुरुदैवतसंपन्ना सुचित्ता कौलिकप्रिया॥ विमत्सरा विशेषज्ञा देवताराध
नोत्सुका॥ मंत्रतंत्रसमायुक्ता समयाचारपालिका॥ मनोहरा सदाचारा शक्तिरेखा सुलक्षणा॥ अथापत्नसुवा

सिनी लक्षणानि॥ तत्रैव॥ दुष्टोग्रा कर्कशा स्तब्धा कुत्सिता कुलदूषिका। दुराचारा पराधीना भावहीना तु राजसा॥ नि
द्राशक्ता निर्मेधा हीनांगी व्याधिपीडिता॥ दुर्गन्धा दुःखिता मूर्खा वद्धोन्मत्ता रहस्यभित्॥ कुतर्का कुत्सिता
लापा निर्लज्जा कलहप्रिया। विरूपोन्मार्गगा क्रुद्धा पंगुर्बंधा विह्वलानना॥ ईदृशी मंत्रयुक्तापि वा शक्तियोगे विवर्जी
येत्॥ इयं नवरात्रपूजा चैत्रादिफाल्गुनांतेषु द्वादशमासेषु चैत्राषाढाश्विनपुष्याख्यमासचतुष्टये चैत्राश्वि
नमासयोर्वा आश्विने वा शुक्लपक्षेषु यथाविभवविस्तरं कार्या॥ नचापि नवरात्रकरणाशक्तौ तृतीयादि
नवम्यंतं सप्तरात्रं पंचम्यादि पंचरात्रं सप्तम्यादि त्रिरात्रं वा तत्तत्तिथिकुमारीपूजनादिभिर्नवरात्रोत्सवं कु
र्यात्॥ एवमन्येपि नैमित्तिकपूजाविशेषा बहवः संति। ते तच्च ग्रंथगौरवभयान्न लिखिताः॥ ते तु साधकैर्गुरुतः
शास्त्रतश्च ज्ञातव्याः॥ अथ कार्त्तिके मासि पूर्णिमायां कुंकुमेन देवीं समभ्यर्च्य रात्रौ कुंडस्थंडिलादावग्निस्थापनं कृत्वा
विष्णवे घृतपरिप्लुतैः कर्पूरवर्त्तिदीपैः प्रदीपैर्नियतहोमक्रमेणैव कृत्वा सौभाग्यसावरणायै देव्यै दीपदानं च कु
र्यात्। तत्र तु समेनेतले सिंदूरादिना विपुलं श्रीचक्रं विरच्य तत्र देवीमावाह्य संपूज्य मध्ये बिंदुचक्रे षोडश
दीपान् शर्करादुग्धमिश्रयवगोधूमादिपिष्टरचितान् कर्पूरगर्भवर्त्तिकान् घृतपूरितान् प्रज्वालितान् सम

सौ॰र॰क॰
प॰

विद्यामन्त्रदेव्यग्रे स्थापयित्वोत्सृजेत्॥ एतावत्करणाशक्तौ एकस्मिन्स्वर्णादिभाजने नवयोनिचक्रं अष्टद
लकमलं वा कुंकुमादिना निर्माय तस्मिन्यथोक्तरूपान् नवदीपान् मध्ये स्वयोनिषु दलेषु वा संस्थाप्य देवीम
भ्यर्च्योत्सृज्य समर्पयेत्॥ अथ मार्गशीर्षमासि पूर्णिमायां कर्पूरयुक्तनारिकेलजलैरर्घस्थापनं विधाय सु
गंधपुष्पादिभिः संपूज्य माषपिष्टनिर्मितापूपैर्नैवेद्यं च कुर्यात्॥ अथ पुष्यमासि पूर्णिमायां देवीं संपूज्य
शर्करायुक्तं गुडयुक्तं वा गव्यं दुग्धं नैवेद्यं दद्यात्॥ अथ माघमासि पूर्णिमायां शुक्लैः कुसुमैर्नीतिलैर्देवीं
शर्करायुक्तं गुडयुक्तं वा गव्यं दुग्धं नैवेद्यं दद्यात्॥ अथ माघे मासि पूर्णिमायां शुक्लैः कुसुमैर्वा तिलैर्देवी॰
सावरणां संपूज्य शर्करादुग्धापूपादिनैवेद्यं च निवेदयेत्॥ अथ फाल्गुने मासि पूर्णिमायां पंकजैः सुव
र्णरजतपुष्पैराम्रपुष्पैः कल्हारैर्मधुकपुष्पैश्च देवीं संपूजयेत्॥ इति नैमित्तिकपूजा॥ श्रीविद्यानंदनाथेन॰
शिवयोः प्रियसूनुना॥ इते द्वाविंशतिः प्रागात्तरंगो रत्नवारिधौ॥ ॥इति श्रीसच्चिदानंदनाथचरण
रविंदद्वंद्वान्तेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे द्वाविंशतिस्तरंगः॥ ॥२२॥ ॥
अथ नित्यनैमित्तिकार्चासु निरतानां सिद्धविद्यानां विवेकिनां साधकानां काम्यपूजाविधिर्लिख्यते॥ तत्र का
म्यानि षट्कर्माणि तानि तु रक्षा शांति जय जपनिग्रह निधनाख्यानि॥ तत्र रक्षा नाम राज्यादीनां परचक्रो

च्चाटनबालादिनयेभ्यः परिपालनं। रक्षाशब्देन स्तंभनमप्युच्यते। रक्षा याराज्यादीनां क्रोधोद्योगगतिनिरोधरूप
त्वात्। शांतिस्तु जनानां भूतप्रेतपिशाचग्रहमायुपद्रवनिवृत्तिः। संग्रामद्वंद्वयुद्धवादद्यूतादिषु विजयो जयः। अ
त्र राज्ञामापद्धनिकवनितादयः प्रोक्तकर्मकराभूत्वा स्वाभीष्टमपि वस्तु निवित्तप्राणैः सहप्रयच्छंतीति
वश्याकर्षणयोरपि जयांतर्वर्तित्वं। तयोः सर्वजनचित्तजननैयरूपत्वात्। वाणिज्यराजसेवादिभिरभीष्टव
स्तुप्राप्तिर्लाभः॥ विद्वेषणोच्चाटनव्याधिकरणादयो निग्रहः। निधनं मारणं कर्म इति षट्कर्माणि तत्र साधको
रात्रिशेषे स्नानः कृतनित्यकृत्यः प्रातः पंचघटिकात्मके दिनस्य प्रथमभागे वसंतत्तौ गोमयोपलिप्ते शुभे समे
भूतले हरिद्रारजसा त्रिरेखात्मकोपेतं विपुलं चतुरस्रं भूमिमंडलं विरच्य ॐ ऐं ह्रीं श्रीं ग्लौं गं जं डं दं वं लं जं भू
रायनमः। इति भूमिमंडलं पूजयित्वा पुनरुक्तमंत्रमुच्चार्य इच्छाशक्तिश्रीपादुकां पूजयामि तिभ्रपुराधिदेवतां मंड
लमध्ये भूमिं च पीतपुष्पाक्षतादिभिः संपूज्य तन्मध्ये स्वासनमास्तीर्य प्रागुक्तविधिना संपूज्योपविश्य स्वपुर
तो गोरोचनादिपीतद्रव्येण श्रीचक्रमुद्धृत्य समस्तप्रकटेत्यादि समष्टिमंत्रेण पुष्पांजलिं निक्षिप्य श्रीचक्रस्य समी
पे कृचिमीढांतरेण प्रयोगादिवसस्य वारे शुद्धयतिथीशनक्षत्रेशदिननित्यातिथिनित्याषड्धातुदेवतापंचा

शान्तिपुनर्देवताश्च पृथक्पृथक् पूजयेत्॥ नक्षत्रवारेशास्तु रविवारस्य सूर्यशिवौ। चंद्रवारस्य सोमांबिके। मंगल
वारस्य भौमकुमारौ॥ सौम्यवारस्य ब्रह्मबुधौ। गुरुवारस्य बृहस्पतिविष्णू। भृगुवारस्य शुक्रमे। शनिवारस्य
कुबेरसौरी॥ इति नक्षत्रवारेशौ पृथक्पृथक्पूजयित्वा तिथिशपूजनं कुर्यात्॥ तिथीशास्तु प्रतिपद्यग्निः। द्वि
तीयायामश्विनौ। तृतीयायामुमा। चतुर्थ्यां विघ्नराजः। पंचम्यां सर्पः। षष्ठ्यां षण्मुखः। सप्तम्यां रविः। अष्टम्यां
मातरः। नवम्यां दुर्गा॥ दशम्यां दिशः। एकादश्यां धनदः। द्वादश्यां केशवः। त्रयोदश्यां यमः। चतुर्दश्यां हरः। पं
चदश्यां चंद्रः। नक्षत्रदेवतास्तु अश्विन्यामश्विनौ। भरण्यां यमः। कृत्तिकायामग्निः। रोहिण्यां धाता। मृगशिरसि चंद्रः।
आर्द्रायां शिवः। पुनर्वसु अदितिः। पुष्ये गुरुः। अश्लेषायां सर्पः। मघायां पितरः। पूर्वायामर्यमा॥ उत्तरायां भगः। ह
स्ते सूर्यः। चित्रायां त्वष्टा। स्वात्यां मारुतः। विशाखायामिंद्राग्नी। अनुराधायां मित्रः। ज्येष्ठायामिंद्रः। मूले निर्ऋ
तिः। पूर्वाषाढायां तोयं। उत्तराषाढायां विश्वेदेवाः। श्रवणे हरिः। धनिष्ठायां वसवः। शतभिषायां वरुणः। पू
र्वाभद्रपदायां अजएकपात्। उत्तराभद्रपदायां अहिर्बुध्न्यः। रेवत्यां पूषा। अथैतेषां पूजामंत्राः। प्रणवत्रिता
रतद्दिननिमाविद्यान्तन्नामश्रीमत्पादुरीरति मंत्रेण औंकारं शादि सर्वदेवताः पूजयेत्॥ ततस्तद्दिननिमोनक्षि

थिनिसांधातुदेवतामिथुनदेवताश्च वसमाणविधिनासंपूज्य ततः करस्थ्यादिना सजातं शाम्यद्विधाय
ध्यानादियोपीठार्चनं चतुरायतनदेवताः संपूज्य। ॐ अद्येत्यादि तिथ्युल्लेखनांते अमुकस्य इष्टार्थश्रीपर
देवतायाः सांगावरणपूजामहं करिष्य इति संकल्प्य विधाय निसपूजोक्तविधिना तत्रश्रीचक्रे देवीमावा-
ह्य सर्वोपचारैराराध्य तथैव क्रमार्चनं विधाय विशेषनैवेद्यमहदारात्रिकादिभिः समस्तराजोपचारैः देवी-
परितोष्य यथापादि पूजाशेषं शाम्यत्समापयेत्॥ एवं शांतिकर्मणि दिनस्य द्वितीये खंडे श्रीपूर्णो कर्परजसा
शालितंडुलचूर्णैर्वा विपुलमर्द्धचंद्राकारं जलमंडलं श्वेतकृष्णपद्माञ्जांछितं कृत्वा प्रणवत्रितारकूर्चं औं प
ऋद्धमवसमं कुमंडलायनमः। इति तन्मंडले श्वेतगंधादिभिः संपूज्य पुनस्तथैव वोच्चार्य अंबुशक्तिश्रीपा
दुकां पूजयामीति तन्मंडलाधिदेवतां मंडलमध्ये संपूज्य तन्मध्ये शाम्यत्श्वेतगंधादिभिः श्रीचक्रमुद्रया प्रा-
ग्वद्वारेशादिपूजा पुरःसरं देवीमावाह्य श्वेतचंदनपुष्पाक्षतादिभिस्तथैव समर्चयेत्। एवं जयायवश्यादि
सिद्धये वा दिनस्य तृतीये खंडे वर्षं त्रैसिंदूरकुंकुमादिना वह्निमंडलं कोणत्रयेपि स्वस्तिकलांछितं कृत्वा इई
ले खछठयफरस्त वह्निमंडलायनमः। इति मंडले संपूज्य पुनस्तथैव वोच्चार्य अग्निशक्तिश्रीपादुकां पूजयामी

सौ.र.क.
प.

तिरक्तचंदनपुष्पादिभिस्तन्मंडलाधिदेवतां संपूज्य तन्मध्ये प्राग्वत् श्रीचक्रमुद्धृत्य तत्र संपूज्य ततो वारेशादिपू
जापुरःसरं संकल्पपूर्वकं देवीमावाह्य रक्तगंधाद्युपचारैः सर्वैश्चक्रक्रमान्संपूज्य प्राग्वत्सर्वजाशेषं समाप
येत्। ततो जाग्रायदिनस्य चतुर्थभागे शरदृतौ कर्तव्ये: कोकिलाचूर्णैर्वा एकोनत्रितमेन वर्तुलं द्विर्विरचितं न
बिंदुषट्कयुक्तं रक्तात्मकं वायुमंडलं विरच्य प्रणवत्रितारो ते भ आ ए क च ट त प य ष वायुमंडलायनमः इति
तन्मंडले संपूज्य पुनरुद्धार्य प्राणशक्तिश्रीपादुकां पूजयामीति वायुमंडलाधिदेवतां संपूज्य तन्मध्ये प्रा
ग्वत् श्रीचक्रमुद्धृत्य वारेशादिपूजापुरःसरं प्रोक्तविधिना देवीमावाह्य गंधादिभिः सर्वोपचारैः संपूज्य क्रमार्चनं
विधाय प्राग्वत्सर्वजाशेषं समापयेत्। ततो निग्रहनिधिनयोर्दिनस्य पंचमषष्ठभागयोर्हेमंतशिशिरर्त्वोर्वृत्ता
कारं व्योममंडलं प्रोक्तकृष्णवर्णद्रव्यैर्विधाय ॐ ऐं ह्रीं श्रीं ऊं ॠं ॡं अं डं अं णं नमः सह व्योममंडलायनमः इति व्योमम
मंडलं कृष्णपुष्पाद्यैः संपूज्य पुनरुद्धार्य स्वशक्तिश्रीपा.पू. इति व्योममंडलाधिदेवतां संपूज्य तन्मध्ये श्रीचक्रं
कृष्णवर्णद्रव्यैः समुद्धृत्य प्राग्वत्तत्समीपे वारेशादिपूजनं विधाय संकल्पपूर्वकं तत्र देवीमावाह्य प्राग्वत्कृष्ण
पुष्पादिभिः सचक्रक्रममभ्यर्च्य प्राग्वत्सर्वजाशेषं समापयेदिति। एवं रात्रिंवा पंचपंचघटिकाभिः षोढा विभ

ज्य वसंतादिषट्कतुष्वेतेषु तेषु खंडेषु प्रोक्तविधिना प्रोक्तषट्कर्मसिद्धये प्रोक्तक्रमेण देवीं पूजयेत्। इति
तंत्रराजमतं। तंत्रांतरे तु षट्कर्माणि शांतिवश्यस्तंभनविद्वेषोच्चाटनमारणानि। तत्र शांतिर्नाम प्राणि
नो रोगकृत्याग्रहाद्युपद्रवनिवृत्तिः वश्यं नाम राजामात्यवनितादीनां स्वापत्तीकरणं। स्तंभनं तु सर्वेषां प्रा
णिनां प्रवृत्तिनिरोधः॥ विद्वेषणं तु स्निग्धयोरन्योन्यं द्वेषजननं उच्चाटनं तु द्विषतां देशादिभ्यः प्रवासनं। मारणं
तु शत्रूणां प्राणहरणं। अत्र मारणे कर्मणि ब्राह्मणधर्मैकजनधर्मिष्ठराजास्त्रीजनव्यतिरिक्ता दुष्टा उच्चाटयो
विषयाः। तत्रापि स्वरोषतो लोकानुग्रहाय वा मारणे कर्म कुर्यात्। न तु द्रव्यादिलोभेन। अथैषां शांत्यादिषट्
कर्मणां काले पूजनीयाः तत्कर्माधिदेवताः। तत्र शांतिकर्मणि रतिं पूजयेत्। तस्या मंत्रध्यानादिकं नैमित्ति
कपूजायां दमनारोपणप्रकरणे वागेव प्रोक्तं॥ तत्र पद्मासनपद्ममुद्रामुद्रितकरा रतिं ध्यात्वा भावाद्य पद्म
मुद्रां प्रदर्श्य तन्मंत्रेण षोडशोपचारैः पंचोपचारैर्वा तां तथैव ध्यात्वा पूजयेत्। वश्यकर्मणि स्वस्तिकासनः
पाशमुद्रामुद्रितकरः पारिजातसरस्वतीपंचकल्पलताप्रजापदकरणोक्तरूपां ध्यात्वा तोक्तमंत्रेण
पूजयेत्। स्तंभनकर्मणि विकटासनो गदामुद्रामुद्रितकरो रमां प्राक्पंचलक्ष्मीपूजाप्रकरणोक्तका।

सौ·र·कृ·
प·

रमंत्रेण तत्रोक्तरूपां तां ध्यात्वा पूजयेत्॥ विद्वेषणे तु कुक्कुटासनस्थो मुसलमुद्रामुद्रितकरो ज्येष्ठादेवीं धूमा
वतीं तत्कल्पोक्तरूपां ध्यात्वा तन्मंत्रेण पूजयेत्। धूमावतीमन्त्रः तत्कल्पस्थास्मच्छिवार्चनचंद्रिकायां द्रष्टव्यः
। उच्चाटने वज्रासनस्थो शनिमुद्रामुद्रितकरो दुर्गां शाकम्भरीं चक्रधारप्रजावकरोक्तरूपां ध्यात्वा तन्मंत्रेण तां पू
जयेत्। मारणे भद्रासनस्थः खड्गमुद्रामुद्रितकरो भद्रकालीं तत्कल्पोक्तरूपां ध्यात्वा तन्मंत्रेण तां पूजयेत्। मंत्र
णे भद्रासनस्थत्वस्तु। ह्रीं कालि महाकालि किलि किलि फट् स्वाहा इति विशेषः प्राग्वच्चंद्रिकायां द्रष्टव्यः॥ अत्र शां
तिकर्मणि साधकः श्वेतवसनमाल्यानुलेपन ईशानकोणाभिमुखः स्वाभिमुखं प्रोक्तरूपं श्रीचक्रमुक्तप्रोक्तवि
धिना पूजयेत्॥ वश्यकर्मण्युत्तराभिमुखो रक्तवस्त्रादिभूषितः पूजयेत्॥ स्तंभने पूर्वाभिमुखः पीतवस्त्रादिकः
पीतद्रव्यैः पूजयेत्॥ विद्वेषणे निर्ऋतिदिङ्मुखो धूम्रवस्त्रादिको धूम्रवर्णद्रव्यैः पूजयेत्॥ उच्चाटने वायव्याभिमुखः
कृष्णवस्त्रादिकः कृष्णद्रव्यैः पूजयेत्॥ मारणे पिङ्गलवर्णो रेवाग्नेयकोणाभिमुखः पूजयेत्॥ अत्र कालस्तु द
शदशघटिकाभिरहोरात्रं षोढा विभज्य तेषु वसंतादिषड्ऋतुभक्तेषु खंडेषु हेमंताख्ये पंचमखंडे शांतिं कुर्या
त्॥ वसंताख्यो प्रथमखंडे वश्यकर्म कुर्यात्॥ षष्ठखंडे शिशिराख्ये स्तंभनं कुर्यादिति षट्कर्मसु कालविशे

१८२

त्॥ ग्रीष्माख्ये द्वितीयखंडे द्वेषणं कुर्यात्॥ वर्षाख्ये तृतीयखंडे उच्चाटनं कुर्यात्॥ शरदाख्ये चतुर्थे खंडे मा
रणं कर्म कुर्यादिति षट्कर्मसु कालविशेषः॥ अत्र मंडलानि वारिवह्निधराव्योमवाय्वाख्यानि शांतिकादिषु ज्ञे
यानि॥ तानि तु पूर्वोक्तरूपाण्येव। अत्र मारणे वह्निमंडलं उच्चाटने वायुमंडलं इति पूर्वतो विशेषः। यस्मिन्कर्मणि
यन्मंडलं तदुक्तोदयेन मंत्रोच्चारादिकं कार्यं तत्परिज्ञानप्रकारस्तु नासारंध्रेण निर्गच्छन्वायुर्यदा ति
र्यक्चलति तदा वायुमंडलोदयकालः॥ यदोर्ध्वं चलति तदाग्नेरुदयः। यदा दंडवत्स्तदाधरोदयः॥ यदा
त्वधश्चलति तदा जलोदयः॥ यदा मध्यं गतस्तदाकाशमंडलोदयकाल इति ज्ञेयं तत्सर्वं गुरुमुखाज्ज्ञात्वा
कर्म कुर्वीत तदा वश्यं तत्फलसिद्धिर्भवतीति षट्कर्मपूजाविधिः॥ अथ चैत्रादिमासेषु पूजाविशेषः। तत्र चै
त्रमासि स्निग्धमातकच्छलेण विपुले चतुरस्रपीठे निर्माय तस्मिंश्चित्स्यपूजां ने प्रतिदिनं कुंकुमादिना श्रीचक्र
मुद्धृत्य तत्र देवीमावाह्य त्रिपुरानाम्नीं तन्माससंभवैः पुष्पैः संपूज्य जपहोमादिकं विधाय विप्राविदेशान्स्वणाय
यथाशक्ति व्रीहिदानं विधाय यथाशक्ति दक्षिणां दत्वा प्रणम्य देवीं स्तुतिप्रदक्षिणानमस्कारैः परितोष्य प्रणम्य
विसर्जयेत्। अत्र पूजायां त्रिपुराकृपिली श्रीमहात्रिपुरसुंदरी श्रीपादुकायै आसनं कल्पयामि नमः स्वाहेति यो

सौ॰ र॰ क॰
प॰

गवाक्यं कार्यं ॥ अग्रे त्रिपुरेशणादावप्येवं प्रयोगवाक्यमूहनीयं ॥ एवं वैशाखेमासि करेणपीठे प्राग्वत् श्रीचक्रमु-
द्धृत्य तत्र त्रिपुरेशीनाम्ना देवीमावाह्य तत्कालसंभवैः पुष्पैः प्रतिदिनं संपूज्य जपहोमादिकं विधाय विद्यावि-
देमावदानेन यथाशक्ति दक्षिणां च दत्वा प्रणम्य देवीं च प्राग्वद्विसर्जयेत् ॥ एवं ज्येष्ठेमासि विभीतकपीठे प्राग्वत् श्रीच-
क्रमुद्धृत्य तत्र देवीमावाह्य त्रिपुरसुंदरीतिनाम्ना तत्कालसंभवैः पुष्पैः संपूज्य प्राग्वद् घृतदानं विधाय शेषं समा-
पयेत् ॥ आषाढेमासि निंबपीठे श्रीचक्रमुद्धृत्य तत्र देवीमावाह्य त्रिपुरवासिनीनाम्ना सर्वोपचारैः संपूज्य
मधुदानं विधाय प्राग्वत् शेषं समापयेत् ॥ श्रावणेमासि अश्वत्थपीठे श्रीचक्रमुद्धृत्य तत्र देविमावाह्य त्रि-
पुराश्रीरितिनाम्ना सर्वोपचारैः संपूज्य प्राग्वत् घृतदानं विधाय शेषं समापयेत् । भाद्रपदेमासि कदंबपीठे श्रीचक्रमुद्धृ-
त्य तत्र देवीमावाह्य त्रिपुरमालिनीनाम्ना सर्वोपचारैः संपूज्य दुग्धदानं विधाय शेषं समापयेत् । अश्विमासि वि-
ल्ववृक्षपीठे श्रीचक्रमुद्धृत्य तत्र देवीमावाह्य त्रिपुरासिद्धेतिनाम्ना सर्वोपचारैः संपूज्य दधिदानं विधाय शेषं स-
मापयेत् । कार्त्तिकेमासि वटवृक्षपीठे श्रीचक्रमुद्धृत्य तत्र देवीमावाह्य त्रिपुरांबिकानाम्ना सर्वोपचारैः समभ्य-
र्च्य वस्त्रदानं विधाय शेषं समापयेत् ॥ मार्गशीर्षेमासि सहकारपीठे श्रीचक्रमुद्धृत्य तत्र देवीमावाह्य त्रि-

पुरसुंदरीतिनाम्ना सर्वोपचारैराराध्य हेमदानं विधाय शेषं समापयेत् । पुष्येमासि कर्पूरैलपीठं निष्पाद्य तत्र श्री-
श्रीचक्रमुद्धृत्य तत्र देवीमावाह्य ललितेतिनाम्ना सर्वोपचारैः समभ्यर्च्य रत्नदानं विधाय प्राग्वत् शेषं समाप-
येत् । माघेमासि रक्तचंदनपीठे श्रीचक्रमुद्धृत्य तत्र देवीमावाह्य कामदेतिनाम्ना सर्वोपचारैः समभ्यर्च्य तिलदा-
नं विधाय प्राग्वत् शेषं समापयेत् । फाल्गुनेमासि श्रीचक्रमुद्धृत्य तत्र देवीमावाह्य कामेश्वरीतिनाम्ना सर्वो-
पचारैः समभ्यर्च्य गुडदानं कृत्वा प्राग्वत् शेषं समापयेत् । एवं वत्सरमात्रमविच्छिन्नं पूजयन्नायुःकीर्त्तिश्रि-
यं भूमिं विजयं बलारोग्यादियद्यदभीष्टं तत्सर्वं प्राप्नुयात् ॥ आत्मसिद्धिं च लभेत् ॥ अथ चैत्रादिद्वादशमा-
सेषु प्रतिमासं रविवारेषु नित्यपूजांते रक्तकमलैः प्रतिरविवासरं पूजयेत् । सोमवारेषु कुमुदकुसुमैः पूज-
येत् । भौमवारेषु रक्तोत्पलैः पूजयेत् । बुधवारेषु नंद्यावर्त्तैः । गुरुवारेषु कल्हारैः । भृगुवारेषु श्वेतकमलैः । शनि-
वारेषु रक्तोत्पलैः पूजयेत् । अत्र रविवारादिषु नैवेद्यविशेषः । तत्र रविवारेषु पायसं ॥ सोमवारेषु दुग्धं । भौमवा-
रेषु कदलीफलं । बुधवारेषु नवनीतं । गुरुवारेषु पिंडशर्करा । शुक्रवारेषु सितकृतामिताशर्करा ॥ शनिवारेषु घृ-
तमिति । एवं वत्सरमात्रमविच्छिन्नं कुर्वन्नयं ग्रहपीडादिनानादुरितानि विनिर्जित्य नानाविधानि सुखानि प्रा-

सौ·र·कृ·
प·

प्नुयात्॥ अथ सिद्धिविशेषेषु काम्यपूजाविशेषः॥ नवम्यां रोमे जनार्थे पर्वताग्रे रात्रौ पालाशपुष्पैः। सिद्ध्यैश्च
श्रीचक्रे सपरिवारां देवीं पूजयेत्॥ एवं सप्तरात्रे कृते सप्तरोमे जनं भवेत्॥ अथ महारण्ये वसन्ते पर्वतकंदरे वा कृ
देवजातिपुष्पाभ्यां सिद्ध्यैश्च श्रीचक्रे सपरिवारां देवीं मासमात्रं पूजयितुः वट्त्रिंशद्यक्षिण्यः प्रसन्ना भू
त्वा वांछितमखिलं प्रयच्छंति॥ समुद्रतीरे केतकीकुसुमैः सिद्ध्यैश्च श्रीचक्रे सपरिवारां देवीं मासमात्रं
रात्रौ पूजयितुः चतुःषष्टिभेदाश्चेटकाः प्रसन्ना भूत्वा मालाभरणादि नानावस्तुनि भूमी होवनितां भूस्मा
नि नानाविधानि वस्तूनि साधकवांछितानि प्रयच्छंति पुष्टे च महाद्भुतां मायां कुर्वंतः॥ शत्रूणां कदने च कुर्वंति
। स्वनक्षत्रवृक्षेण पीठं कृत्वा तत्र श्रीचक्रं सुरूपं श्मशानदेशे मासमात्रं रात्रौ शाल्मलीपुष्पैः सिद्ध्यैश्च नि
र्भयस्य देवीं पूजयितुः पिशाचाः प्रसन्ना भूत्वा तस्मा अयापाषाणपानादि नानाविधप्रहारैरस्य शत्रून्संहरं
ति। नक्षत्रवृक्षास्तु। कारस्करस्त्वामलकोदुंबरो जंबुकस्तथा॥ खदिरः कृष्णवंशौ च पिप्पलो नागरोहिणौ। प
लाशः प्लक्षकांवष्ठौ बिल्वार्जुनविकंकताः॥ बकुलः सरलः सर्जो वंजुलः पनसस्तथा॥ अर्कः शमी कदंबश्च
चूतो निंबस्तथैव च॥ मधूकश्चेति संप्रोक्ता वृक्षा भानां क्रमादमी इति तंत्रराजोक्ताः॥ निर्जने रण्ये मासमात्रं

श्रीचक्रे देवीं सपरिवारां मालतीजातिपुन्नागकेतकीपुष्पैर्मधुमिश्रैः सिद्ध्यैश्च संप्रसवेतालसिद्धिं प्राप्नुयात्॥
नानारूपधरं यथेष्टं लोकत्रयेपि निर्भयश्चरेत्॥ श्मशाने चंडिकायतने निर्जने विपिने वा कृष्णवस्त्रादिभूषितः
कज्जलादिकृतसद्वेषेण श्रीचक्रं सुकृत्य तत्र देवीमावाह्य कृष्णवर्णां यतिकुवा ध्यायन् स्वयमप्यतिकुशाशयो ई
रात्रे साधनं तत्र योनिं छित्त्वा रुधिरं देव्यै च बलिं निवेद्य तत्प्राणं लोचनानि। स्तनौ भोति भीषणाभयः कृसामः स्व
शत्रून्निवेदयेत्। तास्तान्संहृत्य साधकेन प्रार्थिताः पुनरेव देव्यालंकारे नेत्रे तिरोहिता भवंति। साधनं तत्रये
नयस्तु। अश्विन्यां मेषः भरण्यां गजः॥ कृत्तिकायां भजः॥ रोहिण्यां सर्पः॥ मृगशिरः सर्पिणी। आर्द्रायां पुनर्व
सौ विडालिका। पुष्ये भजा। आश्लेषायां मार्जारः॥ मघायां मूषकः॥ पूर्वायां मूषिका। उत्तरायां वृषः॥ हस्ते महि
षी। चित्रायां व्याघ्रः॥ स्वात्यां महिषः॥ विशाखायां व्याघ्री॥ अनुराधायां मृगी। ज्येष्ठायां मृगः॥ मूले श्वा शुनी। पूर्वाषा
ढायां कपिः॥ उत्तराषाढायां गोपंढः॥ श्रवणे वानरी॥ धनिष्ठायां नारी॥ शतभिषायां तुरगी। पूर्वाभाद्रपदा
यां नरः। उत्तराभाद्रपदायां गौः॥ रेवत्यां करेणुः इति॥ पुष्पोद्याने निर्जने रक्तवस्त्रमाल्यानुलेपभूषणभूषितो वि
गद्रः श्रीचक्रे यथोक्तरूपां देवीं ध्यात्वा कल्हारचंपकाशोकपाटलाशतपत्रपुष्पैः सिद्ध्यैश्च मासमात्रं प्र

सौ॰ र॰ कृ॰ प॰

जयित्वा मायासिद्धिं प्राप्य कामरूपो भूत्वा इंद्रजालादिदर्शनेन विश्वचारी नानाविनोदवान् भवेत्॥ किंशुकपु-
ष्पैः सिद्धद्रव्यैश्च मासमात्रं श्रीचक्रे देवीं संपूज्य नानाविधानि भूषणादीनि प्राप्नुयात्॥ तथैव गजप्राप्त्यै पा-
टलपुष्पैर्मासमात्रं पूजयेत्॥ तथैवाश्वप्राप्त्यै रक्तोत्पलैः॥ नृपप्राप्त्यै नीलोत्पलैर्मासमात्रं पूजयेत्। गोप्राप्त्यै
नंद्यावर्त्तैः रूप्यैर्वा तथैव मासमात्रं पूजयेत्॥ तथैव जंबीरैर्महिषीप्राप्त्यै मासमात्रं पूजयेत्॥ तथैवाजप्रा-
प्त्यै जंकुचैर्मासमात्रं पूजयेत्॥ तथैव निधिप्राप्त्यै दाडिमैर्मासमात्रं पूजयेत्॥ ग्रामसिद्ध्यै मंथकपुष्पैर्मासमा-
त्रं पूजयेत्। स्त्रीप्राप्त्यै बकुलपुष्पैर्मासमात्रं पूजयेत्॥ तथैव कल्हारैः पुत्रप्राप्त्यै मासमात्रं पूजयेत्॥ तथैव वा-
जयावाप्त्यै शतपत्रैर्बकुलपुष्पैर्मासमात्रं पूजयेत्॥ स्यंदनांदोलिकादिवाहनप्राप्त्यै मासमात्रं केतकैः पू-
जयेत्॥ नानासुगंधपुष्पैः सौभाग्यसिद्ध्यै मासमात्रं श्रीचक्रे देवीं सपरिवारां पूजयेत्॥ अर्द्धमासमात्रमित्यु-
पलक्षणं मासद्वयं मासत्रयं यावल्लक्षणावाप्तिर्वा पूजयेदिति॥ कंचुकोद्याने कंचुकपुष्पैः सिद्धद्रव्यैश्च दिवा-
निशि देवीं पूजयन् स्त्रीजनेषु स्त्रीजनेषु सा साक्षान्मन्मथो भवेत्॥ सिद्धद्रव्याणि गुरुमुखाद्वगंतव्यानि पूर्णा-
सु कुमारिकायां देवीमावाह्य समर्चनात् स्मरेरितां स्मृत्वा मंत्राम्नायप्रेरकीं नेवपरावरस्य यस्मात् पूजकं बाधितुं

१६५
१६४

न शक्नुवंति। सुगंधकुसुमैः श्रीचक्रे देवीं संकल्पपूर्वकं संपूज्य महापातकैर्मुक्तो भवति॥ तथा शमीपत्रैर्दूर्वां-
कुरैरश्वत्थपल्लवैरर्कपुष्पैर्वा देवीं सपरिवारां श्रीचक्रे संपूज्य सप्तजन्मार्जितैः पापैर्मुक्तो भवति। पीतवर्णस्य
लेपीतवितानादिशोभिते प्राङ्मुखः पीतद्रव्यैश्चक्रराजमुद्दिश्य रक्तवस्त्राद्यलंकृतः स्वस्मिन् रक्तोपचारैर्देवीं सं-
पूज्य सर्वलोके वशीनयेत्। पश्चिमाभिमुखश्चंदनेन चक्रराजमुद्दिश्य तत्र विधिवदेव्यर्चनात् सर्वयोषिद्वश्यो
भवति। तास्तस्य दासीवद्वशा भवंति। दक्षिणाभिमुखः कृष्णद्रव्यैश्चक्रराजमुद्दिश्य तन्मध्ये अमुकस्य मंत्रं रा
दानिं कुरु कुर्विति साध्यनामसमालिख्य तत्र देवीमावाह्य कृष्णवस्त्राद्यलंकृतः कृष्णद्रव्यैः समभ्यर्च्य द्विषतां मं-
त्रहानिं कुर्यात्॥ एवमाग्नेयाभिमुखश्चक्रं संपूज्य समस्तं स्तंभयेत्॥ विद्वेषणाय नैर्ऋतिकोणाभिमुखः
चक्रराजं पूजयेत्॥ शत्रूणां व्याधिकरणाय वायव्यकोणाभिमुखश्चक्रराजं पूजयेत्। शत्रूच्चाटनाय शंभुको-
णाभिमुखः पूजयेत्। महाष्टमीचतुर्दश्योः रात्रौ सिद्धद्रव्यैः श्मशाने देवीं सचक्रक्रमां स्थिरचित्तः समभ्यर्च्य ख-
ड्गसिद्धिं वेतालसिद्धिं घुटिकासिद्धिं पादुकासिद्धिमंजनसिद्धिं मनःसिद्धिं धातुसिद्धिं महाबिलसिद्धिं यक्षि-
णीसिद्धिं वा यथोद्दिष्टां लभेत्॥ महाष्टमीचतुर्दशी तु दीपावल्याश्चतुर्दशी रक्तपद्मैः कर्पूरसोदमिश्रैर्मा

सौ॰र॰त॰
प॰

समाचंद्रयाचक्रे सिद्ध्यैस्त्र देवीं संपूज्य जन्मांतरकृतैर्ब्रह्महत्यादिमहापातकसमूहैर्मुक्तो भवति॥ मदंती-
सुस्थिरां श्रियं च प्राप्नोति॥ जपापुष्पैर्मासमात्रं तथैव संपूज्य जन्मांतरार्जितैर्महापातकैस्त्रमुक्तो धनवा-
न्भवेत्॥ केतकीपुष्पैर्मासमात्रं प्राग्वत्संपूज्योपपातकान्मुक्तो भवति। महासौभाग्यं च प्राप्नुयात्। शतप-
त्रैर्मासमात्रं पूजनात्सर्वपापक्षयो भवति। तथैव चंपकपुष्पैः संपूज्य शतजन्मार्जितपापसमूहान्मु-
क्तो भवति महासौभाग्यवांश्च भवेत्॥ तथा श्वेतपद्मैर्मासमात्रं देवीं संपूज्य त्रिशतजन्मकृतैः पापैर्विमु-
क्तो मोक्षभाग्भवेत्। बंधूककुसुमैर्देवीं मासमात्रं तथैव संपूज्य समस्तपापक्षयं त्रैलोक्यं वशमानयेत्।
बिल्वपत्रयुक्तैः पद्मैर्मासमात्रं संपूज्य सर्वपापविमुक्तः सर्वसमृद्धिमान्भवेत्॥ मल्लिकाजातीमालती-
कुंदशतपत्रश्वेतोत्पलैर्मिलितैः सिद्ध्यैस्त्रमासमात्रं संपूज्य शतजन्मार्जितब्रह्महत्यादिमहापातकसमू-
हान्मुक्तो भवति। वाचा बृहस्पतिसमो भक्त्या मुक्तिभाग्भवेत्। अगरुपबंधूकजपारक्तोत्पलैः पूर्ववन्मास-
मात्रं संपूज्य महापातकसमूहं नाशयित्वा कंदर्पसमो भवेत्॥ चंपकपाटलबिल्वदलनागकेसरकल्हार-
सिंधुवारपुष्पैर्मासमात्रं प्राग्वत्संपूज्य सहस्रजन्मार्जितानि महापातकानि नाशयित्वा महासौभाग्यं च प्रा- ८५

प्नुयात्॥ ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ त्रयोविंशस्तरंगकः॥ ॥इ-
ति श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे त्रयोविंशस्तरंगः॥ ॥२३॥ श्रीगुरवे नमः ॥अ-
थ दीक्षाविधिः॥ तत्रादौ तदंगभूतमंडपादिरचनार्थं भाव्यादिपरिज्ञानस्यावश्यकत्वात्॥ तत्परि-
ज्ञानप्रकारः प्रदर्श्यते। तत्र मेघाघनावृतसूर्ये निर्मलनभोमंडले दिवसे वस्त्रप्रसादाघनावृते भूप्रदेशे
नलयंत्रादिभिर्दर्पणोदरवत्सुसमीकृते भूतले क्वचिद्बिंदुं कृत्वा तद्वृत्तं भ्रमतः प्रतिदिशं द्वादशांगुलमाने
न वृत्तं निष्पाद्य तत्र षडंगुलमानपरिणाहमूलमुत्तरोत्तरपरिणाहापचयेन सूचीमात्रकृताग्रपरिणाहं
केन्वाकृतिं शंकुं द्वादशांगुलोच्छ्रायसहितं वृत्ताकारं शिल्पिवरेण निर्मितं वृत्तमध्यस्थबिंदुमध्ये यथा शंकु-
मूलपरिणाहमध्ये भवति तथा संस्थाप्य तच्छंकुच्छायाग्रस्पर्शांकितवृत्तरेखापश्चिमभागे यत्र संपातस्त-
त्र ततोः पराह्णे शंकुच्छायाग्रस्य तद्वृत्तरेखापूर्वभागे यत्र संपातस्तत्र च चिह्नं विधाय तच्चिह्नद्वयप्राप्तियत्ना
चेतन्तर्वापरं परिकल्प्य तच्चिह्नद्वयावष्टंभेन तच्चिह्नोनराजमानस्य चेद्धाधिके नाईमाने नाम्नो म संश्लिष्टं प-
र्वदारवत्तद्वयं विधाय तद्वृत्तरेखादक्षिणोत्तरमत्स्यद्वयसंपातात्तत्स्समारम्मानेनतुल्यरूपप

रिकल्पितस्तत्राग्नेस्तैस्तेषां मंडपकुंडादीनां शंकुभ्रमकृदक्षिणोत्तरात्मकेदिक्चतुष्टये कल्पयेदिति ॥ स्यैः प्राचीसा-
धनं विधाय वा कुमाराग्रमुदितद्युमानामधिकोत्तुं वैरवर्णित्वा तुरवक्षोगारास्थितोलोहादिकेनिरस्यन त्स्यानं शुद्धभू-
मिरापूर्य्यसमीकृतहस्तीकृतेनतत्र विंशतिहस्तैरष्टादशहस्तैः षोडशहस्तैर्वोत्तमं । चतुर्दशहस्तैर्द्वादशहस्तै-
र्वा मध्यमं । दशहस्तैन वहस्तैर्वा समायामविस्तरैः कनिष्ठं मंडपं कुर्यात् ॥ हस्तलक्षणं तु । महाकपिलपंच-
रात्रे । वातायनपथं प्राप्य सैयोऽनिरविरश्मयः ॥ तेषु त्रसरेणुवत्सु सरेणवः ॥ परमाणोर्णो रष्टगु-
णस्त्रसरेणुरुदाहृतः ॥ तैश्चैकेशाग्रमाख्यातं लिक्षा प्रोक्ता तदष्टकैः ॥ तदष्टकं यवस्तेषां चांगुलिः समुदाहृता
॥ सा तूत्तमांगुलिः सप्तयवा सैव तु मध्यमा ॥ षड्यवा साधमा प्रोक्ता मानांगुलमिति रितं ॥ वितस्तैस्त्रिर्यंगुलाभि-
र्यैर्वैर्मानोत्तरांगुलं ॥ शालिभिर्वा कृतं तुम्बैस्त्रिभिर्मानोत्तरं भवेत् ॥ आचार्यदक्षिणकरे मध्यमांगुलिमध्यमे-
॥ पर्वणोरंतरं दीर्घं मात्रांगुलमुदाहृतं ॥ विनांगुष्ठेन शेषाभिर्मुष्टिमंगुलिभिः कृतं ॥ चतुर्णां विनजे देको भा-
गो मुष्ट्यंगुलः स्मृतः ॥ येकं चिमो रुपाया मेविभज्य दशधा पुनः ॥ एकं द्वादशधा भागे कृत्वा तेषां क्रमेण तं ॥ दे-
हलब्धांगुलं नाम जानीयात्तत्त्वतस्तु नः ॥ एभिश्चतुर्विंशतिभिर्हस्तः स्यादंगुलैः क्रमात् ॥ उच्छ्रायः प्रतिमाया

स्यान्महामानांगुलाश्रयः ॥ महामानांगुलिरितिमात्रांगुलिरिहोच्यते ॥ प्रासादादीश्च तेनैव कुर्यान्मानोत्तरेण वै ॥ वे-
दिकापीठशिबिकारथादीनां विधिपूर्वनः ॥ मानांतरांगुलेनैव भवेत्वाम्येनकेनचित् ॥ यागोपकरणानां च कुर्या-
न्मानांगुलेन वै ॥ होमांगानि स्रुवादीनि कुंडं मुष्ट्यंगुलाश्रयं ॥ देहलब्धांगुलेनैव प्रतिमांगानि कल्पयेत् ॥ इ-
ति भवत्याचरंते आचारयंतीत्याचार्योयजमानः ॥ एतावदुक्तं यन्मानं यजमानस्य तद्भवेदिति सारसंग्रहवचनात्
। कर्तुर्दक्षिणहस्तस्येति शारदातिलकवचनाच्चेति ॥ अत्र कुंडेपुतेचांतरापेक्षया विशेषकथनार्थं तन्निर्माणे ह-
स्तस्तु तंत्रराजोक्तोग्रस्तनेयथा ॥ मध्यमांगुलिमध्यस्थपर्वणः परिणाहतः ॥ त्रीयांशो भवेद्वत्तं तेचेसर्वत्रचांगु-
लिः ॥ तैश्चतुर्भिर्भवेन्मुष्टिर्वितस्तिस्त्रिभिर्गुणैः ॥ अरत्निस्तत्द्वयेन स्याद्धस्तस्तद्वयतः शिवे ॥ तद्वयं तु भवेद्दो-
मंतन्मानस्याल्परोचनतिः ॥ षणवसंगुलासासाग्रन्यानेकुंडकल्पनमिति ॥ इत्येवमुक्तप्रकारयोमध्येकपिलपंच-
रात्रोक्तमात्रांगुलिभिर्हस्तेपरिकल्प्योक्तप्रकारेण शोधितेदृष्टीकृते शिलाभिः समीकृतेभूतलेयथोद्दिष्टमान-
हस्तायामविस्तारेपुरस्ताद्वक्ष्यमाणप्रकारेण कृतसमचतुरस्रकोणचतुष्कनिखातशंकुचतुष्टयजन्यसूत्र-
चतुष्टयकोष्ठकं विधायपूर्वापरायतं दक्षिणोत्तरायतं च मध्यसूत्रद्वयं दत्वा तत्र तु नः सूत्रैर्नवधाविभ-

सौ.र.क.
प.

ऽथवा प्रकोणचतुष्टये कैकं प्रतिदिशं स्त्राग्रान्‌ द्विविक्रमादिक्कचतुष्टये च स्तंभाष्टकं संन्यस्य द्वादशस्तंभान्त्र
तिस्थलं कुशानवकानप्रमाणेनैकजातीयान्सुवृत्तान्पंचहस्तसमुच्छ्रायान्खातप्रतिष्ठस्वस्वपंचमांशान्
प्रमाणबहिर्हस्तस्वस्थोच्छ्रतीयायां शस्थलविततस्तु त्रनशिखाग्रुक्तान्मध्यविभक्तेः कोणचतुष्टये स्तंभ
चतुष्टयं पूर्वस्तंभसजातीयं पूर्ववत्‌ः किंचित्स्थूलमुन्नमं मंडपे नदर्शोच्चमन्येषां हस्तसमुन्नतं पूर्ववत्स्वशिखं
पंचमांशेन प्रविष्टमन्तलमिति षोडश स्तंभान्निखायनेषामुपरि समंजातीयानिरून्नन्यप्रमाणानि शिखाप्रवेशयो
ग्यवेधयुक्तकोटिद्वयं वंतितिर्यक्काष्ठानि शिल्पिभिः परिकल्पितानि द्वादशस्तंभाग्रेषु मध्यस्तंभचतुष्टयाग्रेषु च चतुर
स्राकारेण समारोप्य मध्यस्तंभचतुष्टयोपरि शिखाग्रप्रविष्टमूलवेधयुक्तमेकैकं लताग्रचतुष्टयं शिल्पिवरनि
र्मितसजातीयकाष्ठकाष्ठशकमलाकृतिशोभितामथ दिग्विदिक्स्थद्वादशस्तंभशिखाग्रेऽधोनमूलमध्यस्तंभ
चतुष्टयाग्रास्थलाग्रकृतन्मध्यातिर्यक्काष्ठचतुष्टयमध्यगताग्रे कृत्वोर्ध्वं निधाय योग्यदीर्घस्थौल्यमुलप्रसा
रितद्वादशकाष्ठसंयुतमन्यैरपि काष्ठैर्यथायोग्यं दृढीकृतैर्नारिकेलदलैर्वंशकटैर्वा सम्यगाच्छादितैस्तैरेव निःशेष
विहितकोणचतुष्टयं च चतुर्दिक्षु त्तममध्यमकनिष्ठमंडपेषु सार्धांगुलहस्तद्वयसचतुरंगुलहस्तद्वयहस्तद्वय

रु

विस्तारयुतद्वारचतुष्टयोपेतं मंडपं विरच्य मंडपस्य पूर्वद्वारान्बहिर्हस्तमात्रे परित्यज्य अन्यत्र स्तरणोत्तममध्य
मकनिष्ठेषु सप्तषट्पंचहस्तोच्छ्रितं दशांगुलविस्तृतं पंचांगुलस्थूलं विषमचतुरस्रं प्रमाणातिरिक्तवितस्ति
त्रनशिखं द्वारस्योभयपार्श्वयोरुत्तममध्यमकनिष्ठमंडपेषु सार्धहस्तद्वयसपादहस्तद्वयहस्तद्वयांतरालं य
थापूर्वं पंचमांशेन प्रविष्टमतलं फलकद्वयं ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं ॥ होतारं रत्नधातमं इतिमं
त्रेण निखायतत्सजातीयकाष्ठेन समानविस्तारस्थूलं विषमचतुरस्रं कोटिद्वयेऽपि शिखाप्रवेशयोग्यवेध
युतं तिर्यक्फलकं समारोप्य दर्भमालां च बध्नीयात्‌ ॥ एवं दक्षिणद्वारे उदुंबरमयं तोरणं । इषे त्वोर्जे त्वा वाय
वस्थोपायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे इति मंत्रेण निखायततः पश्चिमद्वारेऽजलनरू
मयं तोरणं प्राग्वन्निर्मितं अग्न आयाहि वीतये गृणानो हव्यदातये ॥ निहोता सत्सि बर्हिषि ॥ इति मंत्रेण नि
खायोत्तरद्वारे वटवृक्षमयं तोरणं प्राग्वन्निर्मितं ॥ शन्नो देवीरभिष्टय आपो भवंतु पीतये ॥ शंयोरभिस्रवं
तु नः ॥ इति मंत्रेण निखायनतस्तेषामुपरि तनतिर्यक्फलकेषु मध्यतः सुषिरं विधाय तेषु तोरणसजाती
यकाष्ठेन निर्मितकृत्नुमध्यभागमीषद्वक्रपार्श्वभागद्वयं कनिष्ठेन वांगुलदीर्घं मध्यमे त्वेकादशांगुलदीर्घं

त्रयो

सो० ८० अर्द्धमेखलांगुलं॥ नेत्री दैर्घ्यं तत्र चतुर्थांशविस्तारयुतं कुर्यान्निष्कादिषु षडंगुलं। अंगुलचतुरंगुलमानेन
प० सुषिरं युत्तिष्ठेत्त्रिभिः शलाकारैः प्रतिलोमं भित्तिरणमेव॥ मेकं कीलमारोपयेत्। ततो मंडपाग्रे दशहस्तदैर्घ्य
वंशदंडाद्ध्वजं विनिर्माय हस्तमात्रविस्तृतं पंचहस्तदैर्घ्यं तत्र मंचदेवतवाहनमत्स्यांकितं वंशचामरभूषिता
ग्रं सुमुखे तन्तद्देवतवर्णानुरूपवर्णं वा ध्वजमारोप्य दश दिक्षु बाहुमात्रदीर्घा यथायोग्यमानदंडावलंबिता
: तत्र लोकपालवर्णानुरूपवर्णाः तत्र लोकपालवाहनमत्स्यांकिताः द्वादशांगुलविस्तारा लोकपालानां
वेदोक्तमंत्रेणावधाना कार्या। वध्वीयात्। तत्रेंद्रस्य पीतवर्णः। वह्नेः पिंगलवर्णः। यमस्य कृष्णवर्णः। निर्ऋ
तेः श्यामवर्णः। वरुणस्य श्वेतवर्णः। वायोर्धूम्रवर्णः। सोमस्यामलवर्णः। ईशानस्य सितवर्णः। अनंतस्य
श्वेतवर्णः। ब्रह्मणो रक्तवर्णः। इति लोकपालवर्णाः॥ लोकपालवाहनानि तु गजमेषमहिषप्रेतमकरमृग
नरवृषभहंसगरुडा यथाक्रमेणेंद्रादीनां ज्ञेयाः। एतेषां वर्णास्तु। श्वेतरक्तकृष्णधूम्ररश्वेतकृष्णगौरसि
तश्वेतरक्ता ज्ञेयाः॥ इत्थं पताकाभिरलंकृत्य मंडपांतरं वितानपुष्पमाल्यादिभिरलंकृत्य सांद्राश्वत्थ
दलग्रथितदर्भरज्जुरूपवंदनमालया मंडपमंतर्बहिश्च परिवेष्ट्य स्तंभान् दुकूलैः संवेष्ट्य तन्मध्यस्थं १८६

नचतुष्टयमध्यगते चतुरस्ररूपे मध्यखंडे उभयपक्षेष्टकाभिः स्निग्धमृद्भिर्वा चतुरस्रां दर्पणोदरनिभपार्श्वां
चतुष्टयमध्यप्रदेशां समंततो वेद्यायामस्यैकादशांशेन नवमांशेन सप्तमांशेन पंचमांशेन चतुर्थांशेन तृ
तीयांशेन वोच्छ्रायवतीं वेदीं विदध्यात्॥ इति मंडपनिर्माणविधिः॥ इत्थं मंडपं विधाय तस्य निर्ऋतिकोणे
हस्तमात्रविस्तारायामे वितस्तिमात्रोच्छ्रितां दर्पणोदरसंकाशां चतुरस्रां वेदिं कृत्वा तत्र वास्तुपूजां कुर्यात्
तत्र प्राक्प्रत्यक् दक्षिणोत्तरं दशदश सूत्रविन्यासेन एकाशीतिकोष्ठानि समांतरालानि निष्पाद्य तन्मध्ये कोष्ठ
नवकमेकीकृत्य तदनंतरवाह्यवीथ्यां परितः षोडशसंख्यकोष्ठानि तासां प्रतिदिशं त्रीणि कोष्ठान्येकीकृ
त्य तद्वीथ्यां प्रतिकोणमेकैकक्रमेण च सिंहकोष्ठचतुष्टयं तद्बाह्यवीथीगतचतुर्विंशतिकोष्ठेषु प्रतिको
णमेकैकक्रमेण कोष्ठचतुष्टयं चैवं क्रमात्स्थिति कोणे कोष्ठद्वयं कोष्ठद्वयमेककोणस्त्रेण द्विधा कृत्वा संभ
यकोणचतुष्टयस्यार्द्धकोष्ठद्वयात्मकमेकैकं क्रमात् षोडश देवतास्थाने परिकल्प्य पुनस्तद्वितीयवीथ्यां तत्तत्को
णनयपार्श्वयोः कोष्ठद्वयं कोष्ठद्वयमेकीकृत्य पुनस्तद्वीथ्यां प्रतिदिशं मध्ये मध्ये शिष्टमेकमेकं कोष्ठं वस्वमा
णक्रमाद्दृष्टरविन्यासार्थं परिकल्प्य पुनस्तद्बाह्यवीथ्यो द्वात्रिंशत्कोष्ठानि द्वात्रिंशद्देवतास्थानानीसेवसं

सौ०र०क०
प०
४

न्यासरविमासस्थानकोष्ठचतुष्टयवर्जितपंचाशद्देवतास्थानयुक्तं वास्तुप्रजाचक्रं निर्माय तस्य द्वितीय
वीथीमध्यगतकोष्ठचतुष्टयं प्रत्येकं कोणस्थानां चतुर्धा विभज्य पूर्वकोष्ठस्थखंडचतुष्टये ब्राह्मादिद्वादशि
लेपेन तत्कालीनयुगार्णपर्यायैर्मासरत्रयं च लिखेत् । ततो दक्षिणकोणस्थखंडचतुष्टये तद्दिनस्योदयार्ण
तद्दिननित्यार्णत्रयं च लिखेत् ततः पश्चिमकोष्ठब्राह्मादिद्वादशिलेपेन रमितो यंप्रजयामी निवर्णं चतुष्टयं च लि
खेत् ततउत्तरकोष्ठब्राह्मादिखंडचतुष्टये ब्राह्मादिलेपेन प्रजयामिति वर्णचतुष्टयं लिखेत् ॥ ततस्तन्मध्ये ॐ ब्रह्म
णे नमः । पूर्वादिचतुर्दिक्षु ॐ आर्याय नमः ॐ विवस्वते नमः ॐ मित्राय नमः ॐ महीधराय नमः । एवं तद्वि
दिक्कोणाष्टके आग्नेयादीशानांते । सावित्राय० सवित्रे० शक्राय० इंद्रजिते० रुद्राय० रुद्रजयाय० अप्य० आपवत्साय० ।
इत्यष्टौ देवताः संपूज्य तद्बहिः पार्श्वयोरेखीकृतकोष्ठद्वयात्मककोष्ठाष्टके ब्राह्मवदनादितः शर्वाय नमः ॥ गुहाय० अ
जे र्यम्णे० जृंभकाय० पिलिपिच्छिकाय० चरक्यै० विदार्यै० पूतनायै० । इत्यष्टौ देवताः संपूज्य तद्बहिः पूर्ववीथ्यामीशान
कोणस्थकोष्ठमारभ्याष्टसु कोष्ठेषु ईशानाय नमः ॥ पर्जन्याय० जयंताय० शक्राय० भास्कराय० सत्याय० वृषा
य० अंतरिक्षाय० इत्यष्टौ देवताः संपूज्य दक्षिणवीथ्यामाग्नेयाद्यष्टसु कोष्ठेषु । अग्नये नमः ॥ पूष्णे० वितथा०

२६०

य० यमाय० गृहक्षताय० गंधर्वाय० भृंगराजाय० मृगाय० । इत्यष्टौ देवताः संपूज्य पश्चिमवीथ्यां निर्ऋतिकोणमार
भ्याष्टसु कोष्ठेषु निर्ऋतये नमः ॥ दौवारिकाय० सुग्रीवाय० वरुणाय० पुष्पदंताय० असुराय० शेषाय० रोगा
य नमः ॥ इत्यष्टौ देवताः संपूज्योत्तरवीथ्यां वायुकोणकोष्ठमारभ्य । वायवे० नागाय० मुख्याय० सोमाय०
भल्लाटाय० अर्गलाय० दित्यै नमः अदित्यै नमः इत्यष्टौ देवताः संपूज्य प्राग्वत्सर्वत्र स्वस्वकुंडे स्थंडिले वा वास्त्व
नलमग्निस्थापनं कृत्वा ॐ ब्रह्मणे स्वाहा इत्यादिपूजितदेवतानाममंत्रैः स्वाहांतैः प्रत्येकं व्रीहिमुद्गय
वैर्घृतमधुदुग्धपरिप्लुतैः सघृतैः पायसैर्वा प्रत्येकमेकैकद्रव्येणाष्टोत्तरशतसंख्यमष्टाविंशतिसंख्यं
वा जुहुयात् ॥ ततो घृतशर्कराकदलीफलनानान्नजनयुतैः पायसैः ॐ ब्रह्मणे एष बलिर्नमः । इत्यादि
तत्तन्नाममंत्रैस्तेषां पदेषु बलिं दद्यात् । ततः श्रीपरदेवतामर्चित्वा नानाविधान्नपानैर्भक्ष्यभोज्यैश्च तोषयेत् ब्रा
ह्मणान्दक्षिणादिभिः परितोषयेत् । इति वास्तुप्रजाविधिः । इत्थं वास्तुप्रजां स्वगृहे सिंहगते भानौ प्रकुर्यां
प्रतिवत्सरे कुर्वतो न सर्वपीडा न चाकालमरणं नाप्यौत्पातिकं न ह्यप्यशुभानि भवंति पुत्रपौत्रधनारोग्यपशु
दासदासीसमृद्धिमान्नरोगी विजयी चिरस्थाततस्मिन्गृहे सुखं जीवति । राजवेश्मनि महिषीगृहे स

सौ.र.क. प.

त्रिवामास्मसेनानीभवनेषु मांत्रिकः कारयेत्॥ तेषामुक्तफलसिद्धिर्भवति। यदि न कुर्यात्तदा वैपरीत्यं भवति॥ इत्थं वा स्तम्भनो विधाय तस्मिन्मंडपे प्रागादिदिक्षु मेषादिद्वादशराशिस्थानेषु चतुरस्रादिकुंडानि यथाकामफलप्रदं कुर्यात् तत्रोक्ते मंडपे वान्यस्मिंश्चके प्रागादिचतुर्दिग्गतासु चतसृषु भक्तिषु एकस्यामेकस्यां दिशि राशिक्रमेण कोणदिग्गतासु भक्तिषु कैकक्रमेण च संभूय प्राग्भक्तिगतस्थानमारभ्य प्रादक्षिण्यक्रमेणैशानकोणभक्तिपर्यन्तं मेषादिद्वादशराशिस्थानानि परिकल्प्य तेषु स्थानेषु मंगलप्रयोगे मेषकर्कटतुलामकरराशिषु चतुरस्रकुंडानि चत्वारि वृषसिंहवृश्चिककुंभराशिषु चतुरस्रकुंडानि च चत्वारि मिथुनकन्याचापमीनराशिषु योन्याकाराणि चत्वारि कुंडानि च। पुनरमंगलप्रयोगे तन्मेषादिचरराशिचतुष्टये अर्धेन्दुचंद्राकारकुंडचतुष्टयं स्थिरराशिचतुष्टये त्रिकोणाकारकुंडचतुष्टयमुभयराशिचतुष्टये क्रमान्तं चास्त्रषडस्रसप्तास्राष्टास्रकानि केचिदिति कुंडानि कुर्यात्। तानि च चतुरस्रयोन्यर्धचंद्रत्रिकोणपंचास्रषडस्रसप्तास्राष्टास्राणि नव विधानि। अथैतेषां रचनाप्रकारः॥ तत्रवेद्याः पूर्वभागे यस्मात्प्राचीं भुवं परिसमाप्य प्राक्प्रस्थितं दिक्सूत्रं प्राक्प्रस्थगायतं सूत्रमास्फाल्य तन्मध्ये चिह्नं कृत्वा तच्चिह्नात्सर्वतः पश्चिमतश्च तं च राजोक्तांगुलैर्द्वादशांगुलमाने

न चिह्नं कृत्वा ततस्तदधिकांशं मार्जयित्वा तच्चिह्नद्वयावष्टंभेन तन्मत्स्याद्वा किंचिदधिकमात्रभ्रमेण पूर्वापरतः किंचिदमोघसंश्लिष्टं वृत्तद्वयं विधाय तयोर्दक्षिणोत्तरहंसपदप्राप्ति प्राक्प्रत्यक्सूत्रमध्यगतं हंसपदसंभेदाद्दक्षिणोत्तरं सूत्रमास्फाल्य तत्रापि मध्याच्चिह्नात् द्वादशांगुलमाने न चतुर्थकोणेष्वपि हंसपदचतुष्टयं विधाय तत्र दक्षिणोत्तरहंसपदप्राप्तिप्राक्प्रत्यक्सूत्रद्वयं दक्षिणोत्तरं सूत्रद्वयं च संभूय सूत्रचतुष्टयमास्फाल्य चतुरस्रं कुर्यात्॥ ततस्तत्र तस्य प्राक्प्रागायतब्रह्मसूत्रमाननिम्नं समचतुरस्रं खातं कृत्वा ततो बहिरेकांगुलमात्रं मेखलान्तःस्थितं द्वादशांगुलमानविस्तारां चतुरंगुलमानोत्सेधां मेखलां कृत्वा तदुपरि तस्या एव परितः चतुरंगुलमानं संत्यज्यान्तर्देशे विस्तारोत्सेधाभ्यां चतुरंगुलमानमितां मेखलां कुर्यात्॥ एवं कृते प्रथमा मेखला द्वादशांगुलोन्नता चतुरंगुलविस्तृता न भवतीति॥ अत्र केचित् प्रथमा मेखला चतुरंगुलविस्तृता नवांगुलोन्नता द्वितीया तु अंगुलविस्तृता पंचांगुलोन्नता तृतीया तु द्व्यंगुलविस्तारा द्व्यंगुलोन्नतेति मेखलामानमाहुः॥ एतन्मेखलायाः महद्धस्तमात्रखातपक्षे ज्ञेयं यस्मात्सूत्रवानः करः प्रोक्तो निष्कोणतिर्यंगुलेन वितितिविस्मकर्मा वचनात् न च नवांगुलस्यैवावरूपकत्वात् न च

तु सर्वेषां मेखलानां मानेन वितस्तिहस्तदण्डकैः विस्तारान्मेवौधयोः कुर्यादिति तंत्रराजवचनात्॥ सत्त्वपर्वक
गुणान्विताः क्रमाद्द्वादशाष्टचतुरंगुलोच्छ्रिताः सर्वतोंगुलचतुष्कविस्तृता मेखलाः सकलसिद्धिदाम
ता॥ इति पंचरात्रवचनाच्च पूर्वोक्त एव पक्षः समीचीन इति सिद्धांतः॥ ततः सर्वाबाह्यस्य मेखलोप
रि मध्ये द्व्यंगुलायामविस्तारेणैकांगुलोत्सेधं चतुरस्रं पीठं मृदा कृत्वा तदुपरि निहतनमल्लद्वादशांगुल
दीर्घे त्रिरोत्तरहीनपरिणाहमध्यमेखलासंलग्नमरंध्रनालयुतोष्ठे कुंभदयपुक्तां मध्ये सगर्त्तामुपरितनमे
खलोपरिगतामष्टांगुलमानविस्तारमूलां तत्त्वदेशादुभयपार्श्वतः क्रमेण संकुचितामेकांगुलविस्तारायां
द्वादशांगुलमानायाममेकांगुलोत्सेधां मेखलायुक्तामश्वत्थदलाकारां मूलां किंचिन्निम्नाग्रामीषत्कु
ण्ठविस्तारां योनिं कुर्यात्॥ अत्र वर्त्तयोनिर्नास्तीति तंत्रराजटीकाकारमतं योनिकुंडे योनिः पद्मकुंडे ना
भिश्च नास्तीत्याकूतं त्रिका॥ अथ नाभिः॥ तत्र कुंडमध्यस्थं हंसपदावलंबनेन त्रितिदिशं चतुरंगुलमा
नेन वृत्तं निष्पाद्य तद्बहिः षडंगुलमानेन च वृत्तं कृत्वा तदंतर्वृत्तं कर्णिकां परिकल्प्य तद्बहिःस्थद्व्यं
गुलमानवृत्तांतरालवीथ्यामष्टदलानि विधाय षडंगुलोच्चं नाभिपंकजं कुर्यात्॥ इति चतुरस्रकुंडनि

र्माणविधिः॥ अत्र तंत्रराजे कुंडानां यत्केनेनोक्तं तेषां पणवसंगुलात्मकत्वमंगाशंकायेति बोद्धव्यं॥ तर्हि केवाकर
णे विषमवाय्वयनामिति चेन्न संतन्स्यात्मने त्रेष्टकुंडे परत्वं कल्पनीयं॥ शिवसमत्वतेषेछत्वात्॥ कुंडेषु सम
दप्यत्राम्नं तेंचापेक्षयाविशेषबाकूल्पदर्शनादिति॥ अथ वृत्तकुंडरचनाप्रकारः॥ तत्र प्राग्वद्यूयो द्विष्ठराशिस्थ
स्थाने समचतुरस्रं क्षेत्रं साधयित्वा तन्मध्यविष्कंभमानमष्टादशधा विभज्य तेषामेकांशमानेन ततः प्राचीदिग्गत
दक्षिणोत्तरायतनत्रिर्यक्सूत्रद्वाद्बहिः प्राकूद्बसकूआयतनक्षेत्रसूत्रस्य प्रागग्रे विस्तार्य मध्यचिह्नमवलंब्यावि
स्तारितवस्तूसत्रायमानेन परितो भ्रमेण वृत्तं निष्पादयेत्॥ तदा वृत्तद्बहिःकोणचतुष्टये सक्रमेण मिमाने
दिक्चतुष्टये चतुरस्राद्बहिर्वृत्तांतरे लग्नेनैतेन सर्वाणि कुंडानि पणवसंगुलपरिणाहवंतचतुरस्र
कुंडक्षेत्रसमानानि भवंति॥ इत्थं वृत्तं निष्पाद्य तद्बहिः निष्पाद्य तद्बहिः पुनरेकांगुलेनैव द्वादशांगुलमा
नेन वृत्तं निष्पाद्य प्रथमकृतवृत्तमध्ये चतुरस्रस्य क्षेत्रस्य सूत्रमानेन निम्नं खातं कृत्वा बहिर्द्वादशांगुलांतरा
लवीथ्यां प्राग्वन्मेखलात्रयं कृत्वा प्राग्वदेव योन्यादिकं रचयेदिति॥ अथार्धचंद्राकारं कुंडरचनाप्रकारः॥ त
त्र प्राग्वत् चतुरस्रं निर्माय तद्विष्कंभमानं दशधा विभज्य तेष्वेकैकांशं तत्याक्पश्चिमयोः परित्यज्य चिह्नद्वयेन

सो॰र॰क॰
९॰

त्वा तत्पश्चिमचिह्नाद्दक्षिणोत्तरायततिर्यक्सूत्रसंधिमध्यावलंबनेन प्राक्प्रकल्पितचिह्नाद्द्वादशमानेन चन्द्रा-
मार्द्धचंद्राकारं कुंडं भवेदिति॥ इत्थमर्द्धचंद्राकारं मंडलं निष्पाद्य तद्बहिरष्टांगुलैकेनांशमानेन द्वादशां-
शमानेन चार्द्धचंद्र निर्मंमंडलद्वयं क्षेत्राग्रममलं तन्मंडलमध्ये चतुरस्रवृत्तसूत्रमानं निम्नखातं कृत्वा तद्बहि-
प्राग्वन्मेखलादिकं कुर्यात् इति। अथ त्रिकोणकुंडरचनाप्रकारः। तत्र प्राग्वच्चतुरस्रं कृत्वा तत्पूर्वसूत्रस्य पो-
गग्रे वहिर्गमाय प्रसार्य चतुरस्रविष्कंभमानं षोडशविभज्य तेष्वेकैकांशमानेन पश्चिमतिर्यक्सूत्राग्रद्वयं
पार्श्वयोर्बहिः प्रसार्य तदग्रद्वयात्तत्सूत्रमानोपेतसूत्रद्वयस्य प्रासारितपूर्वसूत्रस्य यत्र संपातस्तद
वध्यासत्तात्त्रिकोणकुंडं परिकल्प्य तद्बहिस्थैकांशमानेन द्वादशांगुलमानेनोक्तपुरस्तात्त्रिकोणं निष्पा-
द्य खातं कंठमेखलादि प्राग्वत्कल्पयेदिति। अथ योनिकुंडनिर्माणप्रकारः तत्र प्राग्वच्चतुरस्रं निर्मा-
य चतुष्कोष्ठपूर्वस्य तत्पूर्वसूत्रं तन्मानपंचमांशेन बहिर्विस्तार्य तत्कोष्ठचतुष्टयात्मकचतुरस्रप-
श्चिमभागस्य दक्षिणोत्तरकोष्ठयोर्द्वयोर्नैर्ऋत्यादीशानमाग्नेयादिवायव्यांतं च कोणसूत्रद्वयास्फाल-
नेन लक्षितं तत्सूत्रद्वयसंपातविदितमध्यदेशावलंबेन तत्कोणावधिमानेनोत्तरकोष्ठे प्राक्पश्चात्कु-

त्तसूत्रपश्चिमाग्रादिदक्षिणोत्तरमध्यतिर्यक्सूत्रोत्तराग्रावधितद्दक्षिणकोष्ठे तत्सूत्रपश्चिमाग्रादि-
तद्दक्षिणाग्रावधि चन्द्रमार्द्धचंद्रद्वयं निर्माय तन्मध्यतिर्यक्सूत्राग्रद्वयमारभ्य प्राक्प्रसारितसूत्र-
सूत्रावधिसूत्रद्वयास्फालनेन योन्याकारं क्षेत्रं परिकल्प्य तद्बहिश्च कंठमेखलार्थं पद्यो क्तमानेनोक्तपु-
नर्योनिमंडलद्वयं निष्पाद्य प्राग्वत्खातमेखलादि कल्पयेदिति। अथ पंचास्रकुंडनिर्माणविधिः। तत्रो-
प्राग्वच्चतुरस्रं कृत्वा तन्मध्यमानस्य सप्तमांशेन पूर्वसूत्रस्य प्रागग्रं बहिर्विकास्य तन्मानेन तच्चतुरस्र-
मध्यस्थहृत्पदावलंबनेन भ्रमाद्वृत्तं निष्पाद्य तच्चतुरस्रमध्यसूत्रं चतुर्गुणितं कृत्वा तेषु शत्रयेण शत्रयेण
तद्वृत्ते पूर्वसूत्रप्रागग्रादि परितः पंच चिह्नानि विधाय तत्र चिह्नाच्चिह्नांतर्ज्यारूपाणि पंचसूत्राणि आस्फा-
लयेत् तत्र यावद्रूप तत्र स्वेदमार्जनात् पंचास्रकुंडं भवति। इत्थं पंचास्रकुंडक्षेत्रं परिकल्प्य तद्बहिरपि प्रोक्तपुरस्तात् कंठमे-
खलार्थं पंचास्रद्वयं परिकल्प्य खातादिकं प्राग्वत्कल्पयेदिति। अथ षडस्रकुंडनिर्माणप्रकारः। तत्र प्राग्वच्चतु-
रस्रं विधाय तन्मध्यमानं षोडशधा विभज्य तेष्वेकांशेन पूर्वसूत्रस्य प्रागग्रं बहिर्विकास्य तन्मानेन चतुरस्र-
मध्यस्थहृत्पदमध्यावलंबनेन भ्रमाद्वृत्तं निष्पाद्य तन्मध्यविष्कंभमानार्द्धेन तन्मध्यतिर्यक्सूत्रदक्षिणा-

सौ.र.क.
प.

यारिपरि रन्ने चिन्हषट्कं विधाय तत्र च्छिन्नाच्छिन्नं स्याद्रूपं सत्तत्र षड्भास्फाल्यतत्रत्र चापरूपवत्सर्व्वमार्जनेन षट्‌कोणकुंडसेत्रं निष्पाद्य तद्बहिरेकांशतो द्वादशांशात्मको रुक्तमावत् कोणद्वयं निष्पाद्य खातादीनि प्राग्वत्कल्पयेदिति। अथ समास्त्र कुंडनिर्माण प्रकार ॥ तत्र प्राग्वत्समचतुरस्त्रं कृत्वा तन्मध्यमानं दशधा विभज्य तेष्वेकांशमानेन तत्पुरस्तात्सूत्रं बहिर्विकाश्य तन्मानेन तच्चतुरस्त्रमध्यस्य हंसपदमध्यमवत्स्थ्यत्र तत्र कृत्वा तच्चतुरस्त्रमध्यसूत्रमानं च तुः षष्टिभागेन भागीकृत्य तेषु त्रयस्त्रिंशदंशमानेन कृत्समसूत्रे प्राग्वदादाय तत्र सप्त चिह्नानि कृत्वा चिह्नाच्चिह्नं भ्रामयेत्समसप्तत्राण्यास्फाल्य तत्र चापरूपवत्सर्व्वमार्जनात्समास्त्र कुंडक्षेत्रं निर्माय तद्बहिरप्येकांशेन द्वादशांगुलमानेनोक्तयुक्त्या समस्त्रद्वयं कृत्वा खातादिकं कल्पयेदेतत्समास्त्रं वायुदिग्गतं चापराशिस्थानप्रोक्तवैरिनाशकरं कुंडं भवेदिति। अथाष्टास्त्र कुंडरचना प्रकार ॥ तत्र प्राग्वच्चतुरस्त्रं विधाय तन्मध्यसूत्रमानं चतुर्विंशतिधा विभज्य तेष्वेकैकांशमानेन बहिः प्रतिदिशं प्रसारितसूत्राग्रे पूर्ववच्चतुरस्त्रे प्रोक्तक्रमेण विधाय तत्पूर्व्वचतुरस्त्रस्य कोणसूत्रस्यार्द्धमानेन वाह्यचतुरस्त्रे कोणचतुष्टयप्यसामावष्टमाद्भ्रमयतः प्रतिरेखं चिह्नद्वयं द्वयक्रमात्स्यंभ्रयाष्टचिह्नानि कृत्वा तच्चिह्नाच्चिह्नं प्राग्वत्सूत्रे च चतुष्कमास्फाल्य तद्बहिर्गतकोण २६४

णमार्जनादष्टास्त्र कुंडं भवतीत्यष्टास्त्र कुंडक्षेत्रं कृत्वा तद्बहिरप्युक्तयुक्त्यैकांगुलमानेन द्वादशांगुलमानेन चाष्टास्त्रद्वयं कृत्वा खातादिकल्पयेदिति। नवकुंडरचना प्रकारः। अत्र दीक्षायां वृषादिस्थिरराशिस्थानचतुष्टये चत्वारि चतुरस्त्रकुंडान्येव कुर्यात् ॥ कर्क्किन्याकुंभेतु मिथुनकन्याचापमीनाख्योभयात्मकराशिस्थाने षाय्येयादिषु कोणेषु योनिकुंडानि चत्वारि कुर्यात्। इन्द्रेशानयोर्मध्येन वममाचार्यकुंडं चतुरस्त्रमेव कुर्यात्। अन्यानि तु स्तुभास्तुभात्मककाम्यप्रयोगेषु यथागुरूपदेशं विधेयानि एतत्सर्व्वसुत्र रत्र क्रूरहोमप्रकरणेषु विशेषेवक्ष्यमप्यत्र कुंडप्रसंगे किमप्युक्तं। अत्र बिंदुस्तादिकुंडरचना प्रकारो न लिखितः ग्रंथगौरवभयात् ॥ दीक्षायां प्रयोजनाभावाच्च ॥ ॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना ॥ कृते सौभाग्यरत्नाब्धौ चतुर्विंशस्तरंगकः ॥ ॥ ॥ इति श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे चतुर्विंशस्तरंगः ॥ ॥ अथ दीक्षा ॥ अथ नत्वशिष्याय दिव्यज्ञानं ददाति सर्व्वपापक्षयं च करोतीति दीक्षा शब्दनिरुक्तिः ॥ सा तु सप्तभेदा भवति। क्रियामयी ॥ वर्णमयी कलामयी ॥ स्पर्शमयी ॥ दृग्दीक्षा वाग्दीक्षा वेधदीक्षा चेति। तत्रादौ क्रियादीक्षाविधिर्विविच्यते ॥ तत्र शुभे मासि शुक्लपक्षे शुभतिथौ यथोक्तलक्षणयुक्तं गुरुं यथोक्तलक्षणयुक्तः शिष्यो यथावि

धिमेवाद्विजिः प्रसाद्य यथाविधि वरणं कृत्वा तत्सकाशाद्दीक्षां गृह्णीयात्॥ तत्र मासास्तु मंत्रयाने भैरवतंत्रे॥ चैत्रे
दुःखाय दीक्षा स्याद्वैशाखे सर्वसिद्धिदा॥ ज्येष्ठे मृत्युप्रदा मासा आषाढे बंधुनाशनी॥ श्रावणे वृद्धिदा नृणां नभस्ये दुःख-
दा मता॥ आश्विने सर्वसिद्धिः स्यात्कार्त्तिके ज्ञानवृद्धिदा॥ शुभदा मार्गशीर्षे च पौषे मेधाविनाशिनी॥ माघे सुवर्ण-
लाभः स्यात्फाल्गुने सर्वसिद्धिदा॥ सारसंग्रहे॥ मलमासं विवर्जयेदिति॥ अथ वासराणि तत्रैव॥ रविवारे भ-
वेद्वित्तं सोमे शान्तिर्भवेत्किल॥ आयुरंगारके हंति तत्र दीक्षां विवर्जयेत्॥ बुधे सौंदर्यमाप्नोति ज्ञानं स्यात्तु बृ-
हस्पतौ॥ शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे॥ इति वारफलानि॥ अथ तिथयस्तत्रैव॥ प्रतिपत्कृ-
ता दीक्षा ज्ञाननाशकरी मता॥ द्वितीयायां भवेज्ज्ञानं तृतीयायां भवेच्छुचिः॥ चतुर्थ्यां धननाशः स्यात्पंच-
म्यां बुद्धिवर्द्धनं॥ षष्ठ्यां ज्ञानक्षयः सौख्यं लभते सप्तमीदिने॥ अष्टम्यां ज्ञाननाशः स्यान्नवम्यां वपुषः क्षयः
॥ दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत्॥ द्वादश्यां सर्वसिद्धिः स्यात्त्रयोदश्यां दरिद्रता॥ तिर्यग्योनिश्च-
तुर्दश्यां मतिर्मासावसानके॥ पक्षांते सर्वसिद्धिः स्यात्स्वाध्यायं हि विवर्जयेत्॥ मासावसानकममावास्या
॥ पक्षांतः पौर्णमासी॥ संध्यागर्जितनिर्घोषभूकंपोल्कानिपातने॥ एतानन्यांश्च दिवसान्श्रुत्युक्तान्परिवर्जयेत्॥

६५

अथ नक्षत्राणि च तत्रैव॥ अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवं॥ कृत्तिकायां भवेद्दुःखं रोहिण्यां वाक्पतिर्भवे-
त्॥ मृगशीर्षे तु दुःखं स्यादार्द्रायां बंधुनाशनं॥ पुनर्वसौ धनाढ्यः स्यात्पुष्ये शत्रुविनाशनं॥ आश्लेषायां भवे-
न्मृत्युः मघायां दुःखमोचनं॥ सौंदर्यं पूर्वफाल्गुण्यां संप्राप्नोति न संशयः॥ ज्ञानं चोत्तरफाल्गुन्यां हस्तायां च
बली भवेत्॥ चित्रायां ज्ञानसिद्धिः स्यात्स्वातौ शत्रुविनाशनं॥ विशाखायां तु दुःखं स्यादनुराधा बुद्धिवर्द्धनी॥ ज्येष्ठा-
यामसुभावो वा मूले सर्वसमृद्धिकृत्॥ पूर्वाषाढोत्तराषाढे भवेतां कीर्त्तिदायके॥ श्रवणायां भवेद्दुःखं धनिष्ठा-
यां दरिद्रता॥ बुद्धिः शतभिषायां स्यात्पूर्वभाद्रे सुखी भवेत्॥ सौख्यं चोत्तरभद्रायां रेवत्यां कीर्त्तिवर्द्धनं॥ इति
नक्षत्रफलानि॥ योगाश्च तत्रैव॥ योगाः प्रीतिरायुष्मान्सौभाग्यः शोभनः शुभः॥ सुकर्मा च धृतिर्वृद्धिर्ध्रुवः
सिद्धिश्च हर्षणः॥ वरीयांश्च शिवः सिद्धो ब्रह्मा ऐन्द्रश्च षोडशेति॥ करणानि च तत्रैव॥ शुभानि करणान्याहु-
र्दीक्षायां वै च विशेषतः॥ शकुन्यादीनि विष्टिं च विशेषेणैव वर्जयेत्॥ अत्रादिपदेन किंस्तुघ्नचतुष्पदना-
गानां ग्रहणं॥ राशयस्तु वैशंपायनसंहितायां मेचाधारं मंत्रं मेषे धनधान्यप्रदं भवेत्॥ वृषे मरणमा-
प्नोति मिथुनेऽपत्यनाशनं॥ कर्कटे सर्वसिद्धिः स्यात्सिंहे मेधाविनाशकः॥ कन्या लक्ष्मीप्रदा नित्यं तुलायां सर्वसि-

सौ·र·रु· यः॥ वृश्चिके स्वर्णलाभः स्याद्धनुर्ज्ञानविनाशकं॥ मकरः पुत्रदः प्रोक्तः कुंभो धनसमृद्धिदः॥ मीनो दुःखप्रदो नित्य
प· मेवं राशिफलं भवेत्॥ निषिद्धदिनानि ज्योतिःशास्त्राद्विशेषतो ज्ञेयानि। तान्यत्र न लिखितानि ग्रंथगौरवभ
यात्॥ अथोक्तमासपक्षादिशोधनमंतरेण विमर्वेषां दीक्षायाः शुभकालविशेषः॥ विषुवेप्ययने ग्रहे संक्रां
त्यां दमनोत्सवे। दीक्षा कार्या त्वकालेपि पवित्रे गुरुपर्वणि॥ षष्ठिभाद्रपदे मासि शुक्ले सत्रयोदशी॥ कार्त्ति
केनवमी शुक्ला श्रावणे कृष्णपंचमी॥ एतानि देवपर्वाणि तीर्थकोटिफलानि वै॥ निंदिते पि मासे पि
दीक्षोक्ता ग्रहणे शुभा॥ सूर्यग्रहणकालेन समा नो नास्ति भूतले॥ अत्र यद्यत्कृतं कर्म अनंतफलदं भवेत्
॥ रविसंक्रमणे चैव नास्मात्श्रेयः परं भवेत्॥ नमासतिथिवारादिशोधनं सूर्यपर्वणि॥ तदभीष्टं च यत् क्रीया
दस्मिन्काले गुरोर्नरः॥ सिद्धिर्भवति मंत्रस्य विनायासेन वेगतः॥ रविसंक्रमणे चैव सूर्यस्य ग्रहणे त
था॥ तत्र लग्नादिकं किंचित्तु विचार्यं कथंचन॥ सत्तीर्थे र्कविधुग्रासे पुण्यारण्ये वने पुच॥ मंत्रदीक्षां प्र
कुर्वाणो मासर्क्षादीन्न शोधयेत्॥ अथवान्यप्रकारेण दीक्षाग्रहणमुत्तमं॥ प्रवक्ष्यामि समासेन सर्वतं
त्रेषु गोपितं॥ सर्वे वारा ग्रहाः सर्वे नक्षत्राणि च राशयः॥ यस्मिन्नहनि संतुष्टो गुरुः सर्वे शुभावहाः॥

१६६

संतुष्टे च गुरौ तस्य संतुष्टा सर्वदेवताः॥ गुरुं संतोषयेद्यस्मात्तदयमेव तथा भवेत्॥ इयं भुक्तिमुक्तिः॥ मुमुक्षूणां
सदाकालः स्त्रीणां कालस्तु सर्वदा॥ शुक्लपक्षे शुभा दीक्षा कृष्णेप्या पंचमी दिनात्॥ भूतिकामैः सिते पक्षे मु
क्तिकामैः सितेतरे॥ दीक्षायां त्वतिशेषः॥ तथा त्रिषडायगताः पापाः शुभाः केंद्रत्रिकोणगाः दीक्षायां तु शु
भाः सर्वे रंध्रस्थाः सर्वनाशकाः॥ आयः एकादशस्थानं पापाः राहुकेतुक्षीणचंद्रयमारविधरणिजविभाः पा
पयुक्तः सौम्यस्तु प्रथमचतुर्थसप्तमदशमस्थानानां केंद्रसंज्ञा॥ त्रिकोणं नवमस्थानं पंचस्थानं च॥ शुभाः अ
क्षीणचंद्रः पापरहितः सौम्यः गुरुर्भृगुः॥ रंध्रं अष्टमस्थानं॥ एवं विचार्य निर्दोषे दिवसे शुभलग्ने दीक्षां कु
र्यात्॥ इति दीक्षाकालः॥ अथ गुरुलक्षणानि। तंत्रकादिमते। सुंदरः सुमुखः स्वच्छः सुलभो बहुतंत्रवि
त्॥ असंशयः संशयच्छिन्निरपेक्षो गुरुर्मतः॥ सौंदर्यमनवद्यत्वं रूपेणैः सुमुखत्वात्पुनः॥ स्मेरपूर्वाभिभाषि
त्वं स्वच्छता भ्रांतिवर्जिता॥ सौलभ्यमप्यगर्वित्वं संतोषो बहुतंत्रता॥ असंशयस्तत्त्वबोधे तच्छित्तिः प्रतिपा छि
दनात्॥ नैरपेक्ष्यमविच्छेच्छा गुरुत्वं हितवेदिता॥ एवंविधो गुरुर्ज्ञेयः॥ स्त्वितरः शिष्यदुःखदः॥ तथा कुला
र्णवे॥ श्रीगुरुः परमेशानि शुद्धवेषो मनोहरः॥ सर्वलक्षणसंयुक्तः सर्वावयवशोभितः॥ सर्वागमार्थ

सौ॰ र॰ कु॰ न्नवत्तः सर्वमंत्रविधानवित् ॥ लोकसंमोहनाकारो देववत्प्रियदर्शनः ॥ सुमुखः सुलभः स्वच्छः श्रुतोतश्छिन्न
प॰ संशयः ॥ इंगिताकारचेष्टावित् ऊहनः कृतदुर्जनः ॥ अंतर्मुखो बहिर्दृष्टिः सर्वज्ञो देशकालवित् ॥ आज्ञासि
द्धिस्त्रिकालज्ञो निग्रहानुग्रहक्षमः ॥ वेदवेदांगविज्ञानतः सर्वजीवदयापरः ॥ स्वाधीनेंद्रियसंचारः षड्वर्ग
विजयक्षमः ॥ अग्रगण्यो तिगंभीरः पात्रापात्रविशेषवित् ॥ निर्ममो नित्यसंतुष्टो निर्द्वंद्वो नेतशक्तिमान् ॥ सद्
रूपवत्सवोधीरः कृपालुः स्मितपूर्ववाक् ॥ भक्तप्रियः सर्वसमो दयालुः शिष्यशासिता ॥ सेहनिस्तगुरुः आशी
वनिताप्रजनोत्सुकः ॥ नित्यनैमित्तिके काम्ये रतः कर्मण्यनिंदिते ॥ अलोलुपो हिंसकश्चपस्तपानी विचक्षणः ॥
वित्रविद्यादिभिः पूर्णो मंत्रयंत्रादितत्परः ॥ निःसंकल्पविकल्पश्च निर्णीतार्थाभिधायकः ॥ तुल्यनिंदास्तुतिर्मौनी निर
पेक्षो नियामकः ॥ इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये ॥ इति श्रीगुरुलक्षणानि ॥ सच्छिष्यैरेवंविधो गु गुरु॰
रुर्ग्राह्यः सेव्यश्च ॥ अथ सच्छिष्यलक्षणानि ॥ कादिमते चतुर्भिराद्यैः संमतः श्रद्धावान्सुस्थिराशयः ॥ अलुब्धः
स्थिरगात्रश्च प्रेक्षाकारी जितेंद्रियः ॥ अस्ति कोदृक्भक्तिश्च गुरौ मंत्रे सदैवते ॥ एवंविधो भवेच्छिष्यः इतरो दुः स्थि
खकृत् गुरोः ॥ तथा कुलार्णवे ॥ सच्छिष्यं तं कुलेशानि सर्वलक्षणसंयुतं ॥ शमादिसाधनोपेतं गुणशीलसमन्वि

१८७

तं ॥ गुरुदेहानुवर्तां मे धार्मिके शुद्धमानसं ॥ दृढव्रतं सदाचारं श्रद्धाभक्तिसमन्वितं ॥ लज्जं तं पापभीतं च ॥
साधुसज्जनसंमते ॥ आस्तिकं दानशीलं च सर्वभूतहितेरतं ॥ विश्वासविनयोपेतं वित्तशाठ्यविवर्जितं ॥
असाध्यसाधकं शूरं बहुलकीर्तिसमन्वितं ॥ अनुकूलक्रियायुक्तं मंत्रविचक्षणं ॥ हितसत्यमितस्निग्ध
भाषिणं मुक्तदूषणं ॥ सत्कुटुंबं सुरूपहीनार्थं चतुरं बुद्धिविस्तरं ॥ गरहतव्यासनोत्संगं निर्विकारमसेवकं
॥ विश्वरूपकारिणं वीरं मनोदारिद्र्यवर्जितं ॥ सर्वकार्यातिकुशलं धीरं सर्वोपकारकं ॥ स्वस्वार्थे परनिंदा
यां विमुखं सुमुखं प्रिये ॥ जितेंद्रियं सुसंतुष्टं धीमंतं ब्रह्मचारिणं ॥ मत्काधिव्याधिचापल्यं शंकातं
कवर्जितं ॥ गुरुध्यानस्तुतिकथासेवनाभजनोत्सुकं ॥ गुरुदैवतभक्तं च कामिनीपूजनोत्सुकं ॥ निसंगु
त्रु रुसमीपस्थं गुरुसंतोषकारिणं ॥ वाङ्मनःकर्मभिर्नित्यं नितप्रस्त ॥ संगुरुकार्यसमुत्सुकं ॥ गुर्वाज्ञापालकं दे
विगुरुकीर्तिप्रकाशकं ॥ गुरुवाक्यप्रमाणज्ञं गुरुशुश्रूषणे रतं ॥ चित्तानुवर्तिनं प्रेक्ष्यकारिणं कुलना
यिके ॥ जात्यभिमानगर्वादिवर्जितं गुरुसन्निधौ ॥ निरपेक्षं गुरुद्रव्ये तत्त्वकौ सादाभिकांक्षिणं ॥ कुलध
र्मकथायोगियोगिनीकौलिकप्रिये ॥ कुलार्चनादिनियतं मोक्षमार्गानुगामिनं ॥ इत्यादिलक्षणोपेतं गुरुः

वेशनवं

इ सो.र.क. प प. शिष्यंपरिगृह्णीत॥ इति सच्छिष्यलक्षणानि॥ अथासच्छिष्यलक्षणानि॥ कुलार्णवे॥ दुष्टान्वयायजं दुष्टं गुण
हीनं निरूपितं॥ परशिष्यं च पाषंडं धर्म्मपंडितमानिनं॥ हीनाधिकविकारांगं विकलावयवान्वितं॥ पंगुमं
धं च बधिरं मलिनं व्याधिपीडितं॥ उच्छिष्टं दुर्मुखं वापि सच्छास्त्रबेषधरं विटं॥ दुर्विदग्धं कुचेष्टं च कुलीलं भीम
र वीक्षणं॥ निर्लज्जस्मयुतं नेत्रं द्यूतादिव्यसनान्वितं॥ कपाटकुप्रसक्तं मायादौ तिरोहितं तनुं सदा अन्यस्य युक्ति
अलाक करं स्तुद्वेष्टं भक्तिविवर्जितं॥ किमेकवादिनं स्तब्धं प्रबकं चपलं शठं॥ धनस्त्रीस्तुहिरद्दितं निषेधवि
धिवर्जितं॥ रहस्यभेदकं चापि देवीकार्याविघातकं॥ मार्जारबकवृत्तिं च रंध्रान्वेषणतत्परं॥ मायान्वि
तं हतघ्नं च पछन्नीतरदायकं॥ विश्वासघातकं देवद्रोहिणं पापकारिणं॥ अविश्वासमविद्यां नामनर्थं मि
द्धिकांक्षिणं॥ आततायिनमारिदित्सुं क्लिष्टं क्रूरसाहसिकं॥ सर्वयाचकं देवि सर्वाकृष्णनिगामिनं
॥असत्यनिष्ठं चासक्तं ग्राम्यादि बहुभाषिणं॥ दुर्विचारकुतर्कादिकारकं कलहप्रियं॥ वेयाक्षेपकरं वा सुरतं
तं त्वामकं वाग्विडंबकं॥ परोक्षे दूषणकरं प्रत्यक्षे प्रियवादिनं॥ वाग्हस्तवादिनं विद्याचौरमात्मप्रशंसकं॥
गुणसहिष्णुं सद्गीतमार्जिक्रोधसमन्वितं॥ चार्वाकं दुर्जनसखं सर्वलोकविगर्हितं॥ पिशुनं परसंतापं सर्व

१२८

प्राणिभयंकरं॥ स्वक्लेशवादिनं मित्रद्रोहिणं भ्रातृवंचकं॥ जितकोपस्य परं देवि नस्करं पशुचेष्टितं॥ अकार
णद्वेषहासक्लेशक्रोधादिकारणं॥ अतिहास्य सकर्माणं मर्मान्तःपरिहासकं॥ कार्मुकं चातिनिर्लज्जं मिथ्यादु
हता ष्टेषु सत्त्वकं॥ असूयामदमात्सर्यदंभाहंकारसंयुतं॥ ईर्ष्याद्वेषमपारूष्यकार्पण्यं क्रोधमानिनं॥ अधीरं दुःशि
क्षं दुष्प्रमशक्तं भाववर्जितं॥ अप्रसन्नमतिर्मध्ये चिंताकुलितमानसं॥ रक्षाजीवनयुतं दीनमतुष्टं सर्वयाचकं॥
वक्रासिशिशिनं कपटिनं भ्रामकं कुटिलं प्रिये॥ भक्तिश्रद्धादयाशांतिधर्माचारविवर्जितं॥ मातापितृगुरुश्राद्ध
मद्दतो हास्यकारकं॥ कुलद्रव्यादिबीभत्सुं गुरुत्वेनाभिमानिनं॥ स्त्रीद्विष्टं संमयभ्रष्टं गुरुरुणं कुलेश्वरि॥ इ
त्यादिविगुणोपेतं गुरुः शिष्यं परित्यजेत्॥ स्नेहाद्वा लोभतो वापि यदि गृह्णाति दीक्षयेत्॥ तस्मिन् गुरौ सशिष्ये
प तु देवताशापमापतेत्॥ तस्मादेवंविधं शिष्यं न गृह्णीयात्कथंचन॥ यदि गृह्णाति मोहेन तस्य देव्याः पतेद्गुरुः॥
मंत्रिपापं चरा मानं पतिं जाया कृतं यथा॥ तथा शिष्यकृतं पापं प्रायो गुरुमपि स्पृशेत्॥ इति निंद्यशिष्यपरिग्र
हे दोषश्रवणाद्सच्छिष्यं न परिगृह्णीयात्॥ इति गुरुशिष्यलक्षणानि॥ अथ परीक्षा॥ तत्र यथोक्तलक्षणः
शिष्यो यथोक्तलक्षणं गुरुं पूर्वं चिरकालसेवितं शुश्रूषाविनयप्रदान विनयप्रणामाद्यैर्बहुपरितोषितं

सो.र.क. प.

सुस्नातं कृतनित्यक्रियं शिष्यं च स्नातः कृतनित्यक्रियः कृतसकलः समजं कृतः पंचगव्यपुरःसरं ब्राह्मणैः स्वस्ति वाच
यित्वा ॥ ॐ अद्य अमुके मासि अमुकराशिगते सवितरि अमुकपक्षे अमुकतिथौ भारतवर्षे खण्डे अमुकदेशे विदेशे वे
देशे अमुकक्षेत्रे अमुकगोत्रः अमुकवेदान्तर्गताऽमुकशाखाध्यायी अमुकशर्मा श्रीविद्याग्रहणं करिष्य इति कुशहस्तः
संकल्प्य कुरुष्वेति सदस्यैः कृतप्रतिवचनः शिष्यो गुरुचरणसामग्रीमादाय गुरोरभिमुखं स्थित्वा अद्य मासादि अमु
कशर्मा अहं अमुकगोत्रोऽमुकवेदान्तर्गताऽमुकशाखाध्यायिनं अमुकशर्माणं त्वां श्रीविद्याग्रहणार्थं गुरुत्वेन
वृणे इति कुंडलस्वर्णयज्ञोपवीतीनारिकेलवस्त्रयांगुलिमुद्रिकां च सनादि गुरुपादयोर्निक्षिप्य प्रणम्य वृणुयात्
॥ ततो वृतोस्मीति गुरुणा प्रतिवचने दत्ते शिष्यः कृताञ्जलिः यथाविहितं गुरुकर्म कुरुष्वेति प्रार्थयेत् ॥ ततो गुरुः
करवाणीति प्रतिश्रुत्य पंचवाद्यघोषपुरःसरं मोनीसमलंकृतो ब्राह्मणाशीर्भिरभिनंदितः सशिष्यैः सामग्रि
कैः सार्द्धं दीक्षामंडपस्य पश्चिमद्वारं गत्वा पादौ प्रक्षाल्याचम्य प्राङ्मुखः स्वासने समुपविश्य प्रागुक्तसामा
न्यार्घ्यं विधाय द्वारपूजां प्राग्वत् कृत्वा अन्तःसारणं विधाय वास्तुदेवमंडपं नः प्रविश्य वास्तोः शरीरपना
यादि पुष्पमर्दिमं वा तं संपूज्य पंचगव्याधिवासितां मंडपाभ्यंतरे प्रोक्षं मंडपोक्षणादि तुभिः संस्का

१५५

रैः संस्कृत्य दशांगागरुधूपैर्मंडपं धूपयित्वा लाजाचंदनसिद्धार्थभद्रदूर्वाकुशाक्षतान्नकावस्त्रमंत्रेणाभिमंत्रिता
न्विकिरान्मंडपाभ्यन्तरे विकीर्य अस्त्रमंत्रेण कुशमुष्टिना तान् विकिरान्संमार्ज्य कीलसेशानकोणे तत्संस्थाप्य वा
स्तोः पुण्याहं वाचयित्वा ब्राह्मणान् दक्षिणादिभिः परितोष्य वेद्यां श्रीचक्रमुद्धरेत् ॥ तत्र वेदिकायां गोमयो
पलिप्तायां पश्चिमतः स्वासनस्थानं परित्यज्य पूर्वभागे सुसमे भूतले हंसपदं विधाय तत्स्वदशस्थानमव
लम्ब्य प्रतिपार्श्वं षट्त्रिंशदंगुलमानं क्रमेण रचनं निधाय तत्र शंकुप्रसंगाय तं ब्रह्मसूत्रमास्फाल्य तन्दक्ष
चत्वारिंशद्देशे नवभि भेदय तत्पूर्वसूत्रं प्रागादि षट्षट्पंचाशन्माने तिर्यक्सूत्रत्रयं दत्वा पुनरपि पश्चिमादि
षट्षट्षडंशमाने तिर्यक्सूत्रत्रयं विधाय प्रागादितृतीयसूत्रस्य मध्यमसूत्रस्य च मध्ये स्वस्मात् मर्मा
नुगुलेन तिर्यक्सूत्रं चयस्थानेकर्त्तृयत्नया मनसा परिकल्पयेत् ॥ मध्यमवस्तुतिर्यक्सूत्रे पूर्वपश्चिमस्थं
सूत्रे प्रथमसूत्रे परिकल्प्यात्र कृमोनेपुत्तृतीयसमसूत्रे ह्यंयं तस्य कृत्वा ततस्तृतीयसूत्रस्य ह्यादि प्रा
ग्रसूत्रप्रागग्रं तत्र संपातो तेसूत्रं वयं तन्मसमसूत्राय ह्यादि ब्रह्मसूत्र पश्चिमाग्रं तत्र संपातो तेसू
त्रत्रयं च संभ्यसूत्र चतुष्टयमास्फाल्य षट्कोणं कृत्वा पुनस्तन्मध्यमरेखामध्यादि प्राङ्निर्मिते षट्को

ण प्राचीनमर्मानुगुणगतिवशेन यावदष्टमरेखाग्रद्वयांतं सूत्रद्वयं पुनर्नवमरेखामध्यादिपद्मकोणस्य पश्चि
मर्मानुगुणगतिवशेन यावद्द्वितीयरेखाग्रद्वयांतं सूत्रद्वयं संभूय सूत्रचतुष्टयं मर्मचतुष्टयानुगुणमास्फा
ल्य पुनर्नवमतिर्यक्सूत्रोभयपार्श्वांतमारभ्य सप्तमान्तसप्तमसूत्रोरुभयपार्श्वसंपातस्थानचतुष्टयं स्पृ
पमर्मचतुष्टयानुगुणं ब्रह्मसूत्रसमलाग्रकं सूत्रद्वयमास्फालयेत्॥ नवसूत्रद्वयस्य ब्रह्मसूत्रेण च सं
पातस्तम्भाग्रमादिचतुर्थतिर्यक्सूत्रस्य स्थानं भवति। पुनः सप्तमसूत्रमध्यादिपश्चिमतः उभयपार्श्व
स्थमर्मद्वयानुगुणेन यावत्प्रथमतिर्यक्सूत्रोभयपार्श्वांतं संभूय चतुर्मर्मानुगुणेन सूत्रद्वयमास्फा
ल्य पुनरष्टमतिर्यक्सूत्रमध्यमारभ्य प्रथमसूत्रमध्यात् प्रसारितसूत्रद्वयस्य तुर्यरेखामध्यादि
प्राक्प्रसृतसूत्रद्वयस्य च संपातद्वयानुगुणं नवमरेखामध्यात्पश्चिमतः प्रसृतोभयरेखावधि
त्रितयरेखां हत्वा तदग्रद्वयमारभ्य द्वितीयरेखामध्यावधि सूत्रद्वयमास्फाल्य पुनस्तुर्यरेखामध्यादिप्राक्
प्रसृतरेखाद्वयस्य सप्तमरेखामध्यादिपश्चिमतः प्रसृतरेखाद्वयस्य च संपातद्वयानुगुणं तुरीयरेखा
ग्रद्वयात् पूर्वतः प्रसृतरेखाद्वयस्य स्थलाग्रद्वयं तिर्यग्रेखां हत्वा तदग्रद्वयमारभ्य तृतीयतिर्यक्सूत्रम

ध्यावधि सूत्रद्वयमास्फाल्य ब्रह्मसूत्रं मार्जयित्वा वज्रस्य षट्कस्त्वेन दस्मरशास्त्रमष्टादशोपेतं चतुर्विंशतिसंधि
युतं श्रीचक्रं विंदादिचतुर्दशारांतं निष्पाद्य तद्बहिस्त्र्यंगुलमानेन वृत्तं कृत्वा तद्बहिरपि षडंगुलमानेन वृत्तं॥
तरं विरच्य तत्र्यंगुलवीथ्यां केसराणि षोडशरेखाभिः परिकल्प्य बहिः षडंगुलवीथ्यामष्टदिक्षु छदनानि प
रिकल्प्य तद्बहिस्त्र्यंगुलमानेन वृत्तमेकं तद्बहिः षडंगुलमानेन वृत्तमेकमिति वृत्तद्वयं निष्पाद्य त्र्यंगुलांतरा
लवीथ्यां समांतरालानि द्वात्रिंशद्रेखाभिः केसराणि परिकल्प्य तद्बहिः षडंगुलवीथ्यामष्टदिक्षु तदंतरा
लेषु च षोडशदलानि निर्माय तद्बहिरेकैकांगुलांतराले वृत्तद्वयं भ्रामयित्वा तद्बहिर्व्यंगुलमानं स्वैकैकै
कांगुलमानेन चतुरस्रत्रयं प्रागादिचतुर्दिक्षु प्रतिदिशं दशादशांगुलविस्तारोत्तिराजद्वारयुतं कुर्यादिति
चक्रराजं समुद्धृत्य तत्समीपे स्वासनस्थानं प्राग्वत्संशोध्य तत्र स्वासनमास्तीर्य प्राग्वदेव प्रसन्न च प्राङ्मु
खः पद्मासनेनोपविश्य मौनी विजितेन्द्रियः प्राग्वत्मूलाद्यावरणासाधनानि तथैव संस्थाप्य ततो गुर्वादि
वंदनांते प्राग्वत्समस्तप्रकरे स्वादि समष्टियोगिनीमूलविद्यया चक्रराजे त्रिः पुष्पांजलिं निक्षिप्य करसु
ध्यादिमानसपूजांतं प्राग्वद्विधाय मूलविद्यामष्टोत्तरशतं जपित्वा जपं देव्यै समर्प्य प्राग्वदर्घस्थापनाद्या

सौ.र.क.
व.

न्यासजातं विधाय पुनर्मूलविद्यां यथाशक्ति जपित्वा जपं समर्प्य पुनः पूर्ववत् श्रीचक्रे पुष्पांजलिं दत्वा मध्यत्रिकोणम
ध्ये शालिभिरावर्यं तदुपरि तंडुलान्निक्षिप्य तत्र दर्भानास्तीर्य साष्टान्नदीर्घास्त्रमष्टविंशतिरूर्मिकीलत्वा यपद्रे
णे बृहत्स्वग्रं थिविधाय कूर्चं हस्त्वा गंधास्तत दूर्वायुतेन कूर्चं शालिपुंजोपरि निधाय तत्र प्रागुक्तविधिना पीठपू
जां विधाय स्तुवर्णादिरचितं कुंभं मत्रलम्पतिशोभनालकृतिमस्त्रमंत्रेण क्षालितं चंदनागुरुकर्पूरधूपिताभ्यं
तरं त्रिगुणीकृतेन तंतुना वेष्टितं अच्छिद्रं गंधपुष्पादिभिः पूजितं कुंभं कुशास्तृतसमन्वितं पुष्पनीलवैडू
र्यविद्रुममौक्तिकमरकतवज्रगोमेदपद्मरागाख्यनवरत्नोदरं शालिपुंजोपरि प्रणवमुच्चरन्संस्थाप्य प्राग
चितयोगपीठस्य कुंभस्य चैतन्यं परिकल्प्यैकपंचाशद्वर्णौषधिका यतो यंगंधपुष्पकर्पूरवासितेन तीर्थजले
र्वास्त्रमंत्रेण वितस्तरं सबिंदुकं मातृकां प्रतिलोमेन पठन्मूलविद्यामपि तथा जपन् देवताधिया तं कुंभमा
पूर्य पुरतः प्रागुक्तसामान्यार्घविधिना शंखं संस्थाप्य तं शंखं कुंभमनोयसजातीयजलेनापूर्य तत्र चंदनागरु
कर्पूरगोरोचनाकाश्मीरचोरजटामांसीशिङ्गकारख्याष्टगंधपंकं निक्षिप्य तस्मिञ्छंखजले प्रागुक्तावह्ने
र्दशकलाः सूर्यस्य द्वादशकलाः सोमस्य षोडशकलाः सृष्ट्यादिपंचाशत्कलाभ्यावाह्य प्राग्वत्संपूज्य तां

२०१

सोष्टाणप्रतिलोमं विधाय प्रतिलोममूलविद्यां त्रिः सकृत्वा शंखं स्पृशन् जपित्वा हृदये देवीं ध्यात्वा तच्छंखस्थं जलं
कुंभजले निक्षिप्य अभ्यस्थापनसाधनपञ्चवानि शतकं तुलत्या समावध्य कल्पद्रुमधिया कुंभवक्त्रे निधाय तदु
परि कुंभसमजातीयं तंडुलपूर्णं नारिकेलफलान्वितं चषकं संस्थाप्य तत्फले कल्पवृक्षफलं ध्यायन्नारक्तप
ट्टवस्त्रयुगेन तं कुंभं संवेष्टयेदिति प्रधानकुंभं संस्थाप्य पूर्वादितोरणसमीपेषु शालिपुंजोपरि प्राग्व
त्कुंभानष्टौ संस्थाप्य पूर्वकुंभे धृतवंदक्षिणे धरो पश्चिमे वायसनिमुत्तरे विघ्नेशं च संपूज्य तदन्ते उपसः कोणे चतु
र्षये कुंभानष्टौ संस्थाप्याग्नेयकुंभेऽमृतं नैर्ऋते दुर्जयं वायव्ये सिद्धार्थं ईशाने मंगलं च संपूज्य पुनः पूर्वादि
कुंभेषु दिग्गजान्वैदिकमंत्रैः संपूज्य पूर्वाद्यष्टदिक्षु ऐरावतं पुंडरीकं वामनं कुमुदांजनौ पुष्पदंतं सार्व
भौमं सुप्रतीकं च पूजयेत्॥ इति दिग्गजान्संपूज्य प्रधानकुंभे प्राग्वन्मंत्रविद्यया श्रीपरदेवतामंत्रपी
ठिकल्पितसांश्रीपरदेवतामावाह्य सर्वोपचारैराराध्य प्राग्वत्तिथिनित्यादिश्रीचक्रगतसमस्तदेवतावृं
दं संपूज्य प्राग्वद्धूपदीपौ निवेद्य नैवेद्यं परिकल्प्य प्राग्वत्पूजान्ते देवीं ध्यात्वा स्वदक्षिणभागे गोमयोपलिप्त भूतले
हस्तमात्रविस्तारयाममंगुष्ठपर्वमात्रोच्चमंगुलमात्रोच्चं वा वालुकाभिः समचतुरस्रं स्थंडिलं कृत्वा तन्निसदो

सौ.र.क.
प.

मोक्तविधिना वह्निं संस्कृत्य तत्र देवीमावाह्य गंधादिभिः संपूज्य प्राग्वत्तारयाहुतित्रिशतमाज्येनार्हुत्वा सप्तदशेन
पायसेन महाविद्यया पंचविंशसाहुतीः षडंगेन षडाहुतीश्च हुत्वा पुनर्महाव्याहृतिहोमांते देवीं संपूज्य तां कुंभस
मन्त्रैर्विसृज्य वह्निं च प्राग्वत्तद्धाम प्राग्वद्बलिदानं विधाय योगिराशोधनादि राजोपचारांतं कृत्वा प्राग्वद्ब्राह्मणान्
विद्या रात्रिकं कुमारीः पूजनं च प्राग्वद्देवं विधाय प्राग्वन्मूलविद्यां महोत्तरसहस्रं जपित्वा देव्यै समर्प्य स्तुत्वा प्रण
म्य मंडपस्येशानकोणे पूर्वसंचितविकिरपुंजोपरि सोदकं हिरण्यगर्भं वस्त्रादिसंयुक्तं करकं निधाय तस्मिन्
सिंहारूढां खड्गखेटकधारिणीं घोररूपां पश्चिमाभिमुखीमस्त्रदेवतां ध्यात्वा निवेश्य गंधादिभिः संपूज्य तं क
रकमादाय श्रीपरदेवता त्वया स्मान् रक्ष रक्षेति लोकपालानां देव्याज्ञां श्रावयन्मंडपात् नीलशुक्लोदकधारया
परिषिंचन्प्रदक्षिणक्रमात्स्वयमनुचरन् यथास्थाने तं करकं निवेश्योपविश्य पुनः पूर्ववदस्त्रदेवतामभ्यर्च्येन्द्रे
शानयोर्मध्ये चतुरस्रकुंडे आचार्योऽग्निस्थापनं कुर्यात्॥ ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृ
ते सौभाग्यरत्नाकरे तरंगः पंचविंशकः॥ ॥ ॥इति श्रीसौभाग्यरत्नाकरे पंचविंशस्तरंगः॥ ॥
अथाग्निस्थापनं॥ तत्रादौ गुरुः स्वकुंडसमीपे स्वासनं प्राग्वत्संपूज्य तत्र प्राङ्मुख उपविश्य कुंडं गोमयेनोप

लिप्त अष्टादशभिः संस्कारैः संस्कुर्यात्॥ तत्र मूलमंत्रं स्मरन् दिव्यदृष्ट्या कुंडं निरीक्ष्यास्त्रमंत्रेण कुशमुष्टिनै
र्ऋत्यां हस्ताग्रेण प्रोक्ष्यास्त्रमंत्रेणैव कुशैस्त्रिः संताड्य कवचमंत्रेण विरलमुष्टिना जलैरभ्युक्ष्यास्त्रमंत्रेणै
व खनन्मुष्टिमृदः परित्यज्य हृन्मंत्रेणाग्नित्रिकोणतरेण तन्नवातमापूर्यास्त्रमंत्रेण तत्समीकृत्य कवचमंत्रे
ण जलैरासिच्यास्त्रमंत्रेण फलकादिना दृढीकृत्य कवचमंत्रेण कुशैः संमार्ज्य कवचेनैव गोमयाद्भिर्वि
लिप्य कवचेनैव सोमसूर्याग्निकलारूपं परिकल्प्य कवचेन सूत्रत्रयमेण मेखलात्रयं त्रिस्त्रिः संवेष्ट्याम
लविद्यामुच्चार्य अमुककुंडाय नमः इति कुंडं संपूज्य पुनः॥ ह्सौः वषट्कार्यमित्यनेन मनुना इति नाभिं कुंडमध्य
गतं मंत्रमृन्मंत्रेण मेखलाभ्यो नमः इति मेखलाश्च संपूज्यास्त्रमंत्रेण कुंडे वज्रवद्दृढतरं संचिंतयेत् हृन्मं
त्रेण कुंडस्य चतुर्दिक्षु वर्णकृज्जालविलासायमार्गं चतुष्टयं कुशैः परिकल्प्य तद्छिद्राय कुशैरस्त्राभिमंत्रितैः
कवचमंत्रेण कुंडं भित्तिगणं सर्वमाच्छादयेदित्यास्तरणं कुर्यात्॥ एवमष्टादशभिः संस्कारैः कुंडं संस्कृत्य अथ
वा प्रथमोक्तैरष्टभिर्विवीक्षणादिभिः संस्कृत्याग्निस्थापनं कुर्यात् स्थंडिलेऽप्येते संस्कारा एव कार्याः॥ अत्र
हृन्मंत्रकवचमंत्रास्त्रमंत्राः सौभाग्यरूपा ज्ञेयाः॥ तन्नमः पदं कुंडपद मात्रा॥ ततः कुंडमध्ये मौकुशमूलेन दक्षिण

सौ॰र॰क॰
प॰

मध्योन्तरेषुपश्चिमादिप्राग्ग्रान्तिस्त्रोरेखा हृदयमंत्रेणविलिख्यपुनःपश्चिममध्यपूर्वेषु दक्षिणादुत्तराग्रास्ति
स्रोरेखास्तथैवविलिख्यवालायावाग्रवबीजेनकुशसलिलैःप्रोक्ष्यप्रागग्ररेखासुदक्षिणरेखायां॥ॐवि
ष्णवेनमः॥मध्यरेखायां॥ॐईश्वरायनमः॥उत्तररेखायां॥ॐइंद्रायनमः॥उदगग्ररेखासुदक्षिणरेखायां॥ब्रह्म
णेनमः॥मध्यरेखायांयमायनमः॥पूर्वरेखायांसोमायनमइतिरेखाधिदेवताःसंपूज्यतत्रत्रिकोणगर्भच
तुर्द्वारयुक्तचतुरस्रद्वयवेष्टितमष्टदलकमलंकामेश्वरीपीठंविरच्यविभाव्यवातत्रॐमंडूकायनमः॥ॐ
कालाग्निरुद्रायनमः॥ॐमूलप्रकृत्यैनमः॥आधारशक्त्यैनमः॥कूर्माय॰॥अनंताय॰॥वराहाय॰॥पृथ्व्यै॰॥सु
धार्णवाय॰॥रत्नद्वीपाय॰॥महाकल्पकोद्यानाय॰॥स्वर्णप्राकाराय॰॥कदंबवनाय॥मणिमंडपाय॥कल्पवृक्षा
य॰॥स्वर्णवेदिकायै॰॥रत्नसिंहासनाय॰॥इतिसंपूज्यचतुरस्रसिंहासनस्त्वेनपरिकल्पितस्याग्न्येयादिको
णचतुष्टये॥धर्माय॰॥ज्ञानाय॰॥वैराग्याय॰॥ऐश्वर्यायनमः॥तस्यस्वाग्न्यादिदिक्षु॥अधर्माय॰॥अज्ञाना
य॰॥अवैराग्याय॰अनैश्वर्याय॰॥मध्येमायायै॰॥विद्यायै॰॥अनंताय॰॥पद्माय॰॥आनंदकंदाय॰॥संविन्ना
लाय॰॥प्रकृतिमयपत्रेभ्यो॰॥विकृतिमयकेसरेभ्योनमः॥पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै॰॥कर्णिका

यैनमः॥अंअर्कमंडलायनमः॥ॐसोममंडलायनमः॥मंवह्निमंडलायनमः॥संसत्वाय॰॥रंरजसे॰॥तंतमसे॰॥आं
आत्मने॰॥अंअंतरात्मने॰॥पंपरमात्मने॥ह्रींज्ञानात्मने॰॥स्वाग्न्यादिचतुर्दिक्षुमध्येच॥ॐज्ञानतत्वात्मनेनमः॥
मायातत्वात्मनेनमः॥कलातत्वात्मनेनमः॥विद्यातत्वात्मने॰॥परतत्वात्मने॰॥इतिसंपूज्याष्टदलकेसरेषुस्वाग्न्य
मारभ्य॰॥अंमोहन्यै॰॥क्षोभण्यै॰॥वशिन्यै॰॥स्तंभिन्यै॰॥आकर्षिण्यै॰॥द्राविण्यै॰॥आह्लादिन्यै॰॥क्लिन्नायै॰॥मध्येक्ले
दिन्यैनमः॥इतिपीठशक्तीःसंपूज्यह्रींसर्वशक्तिकमलासनायनमः॥इतिसमस्तंपीठंसंपूज्यपुनःकामबीजमु
च्चार्यकामेश्वरकामेश्वरीमूर्तिंपरिकल्पयामीतिमूर्तिंपरिकल्प्यपुनःकामबीजमुच्चार्यकामेश्वरकामे
श्वरीमूर्तिभ्यांनमइतिसंपूज्यकामबीजेनप्राणायामत्रयंकृत्वाशिरसिसंमोहनऋषयेनमः॥मुखेगायत्री
छंदसेनमः॥हृदयेश्रीकामेश्वरीदेवतायैनमः॥गुह्येक्लींबीजायनमः॥पादयोःईंशक्तयेनमः॥नाभौक्लींकी
लकायनमः॥इतिविन्यस्यममसर्वाभीष्टसिद्धयेविनियोगइतिकृतांजलिर्वदेत्॥ततःक्लांहृदयायनमः॥
क्लींशिरसेस्वाहा॥क्लूंशिखायैवषट्॥क्लैंकवचायहुं॥क्लौंनेत्रत्रयायवौषट्॥क्लःअस्त्रायफट्॥इतिषडंगमं
त्रानंगुष्ठादितलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिविन्यस्यजपाकुसुमसंकाशांधनुर्बाणधरांस्मरेत्

सौ॰ र॰ क॰
प॰

॥ नानालंकारसुभगां मोहयंतीं जगत्त्रयं। इति हृदये ध्यात्वा मानसं संपूजयित्वा कराभ्यां पुष्पांजलिमादाय हृदयकम
लात्तेजोरूपां भगवतीं करस्थपुष्पांजलौ सुषुम्नावर्त्मना वहन्नासापुटद्वारेण निःसार्य कुंडमध्यस्थयंत्रमध्ये क
ल्पितमूर्तौ प्राग्वदावाहनादिपरमीकरणांतं तत्तन्मुद्रया विधाय प्राणप्रतिष्ठां तेनुवाणयोनिमुद्राः प्र
दर्श्य प्रागुक्तरूपां स्वसमानवर्णायुधभूषणादियुतकामेश्वरयुतामृतुमतीं सकामां ध्यात्वा धर्माभिरतो ध्यात्वा
प्राग्वदासनादिपुष्पांतैरुपचारैर्देवदेवौ पृथक् पृथक् संपूज्याष्टदलकेसरेषु अग्नीशासुरवायव्यदेक्षु
स्वाग्रादिचतुर्दिक्षु च॥ क्रां हृदयाय नमः। क्रिं शिरसे स्वाहा। क्रूं शिखायै वषट्॥ क्रैं कवचाय हुं। क्रौं नेत्रत्रया
य वौषट्। क्रः अस्त्राय फट्। इति संपूज्य कर्णिकायां त्रिकोणांतः स्वाग्रादिचतुर्दिक्षु प्रादक्षिण्येन देव्यग्रे च द्रां द्रा
वण्यै नमः। ह्रीं क्षोभिण्यै नमः। क्लीं वशीकरिण्यै नमः। ब्लूं आकर्षिण्यै नमः। सः संमोहिन्यै नमः। इति संपूज्याष्टद
लेषु देव्यग्रादि। अनंगरूपिण्यै। अनंगमदनायै। अनंगकुसुमायै। अनंगमदनातुरायै। अनंगमन्मथायै॥
अनंगकुसुमायै। अनंगमदनातुरायै। अनंगशिशिरायै। अनंगमेखलायै। अनंगदीपिकायै नमः। इति प्राद
क्षिण्येन संपूज्य चतुरस्रे प्राग्वल्लोकपालान् तदस्त्राणि च संपूज्य धूपादिनैवेद्यांतानुपचारान् समर्प्य स्व।

२४

र्णरजतताम्रनूतनमन्यतमपात्रे अरणिमथं सूर्यकांतादिमणुद्भवं लोहपाषाणगुडं तैस्त्रिधा यदि नगरत्वा
दाग्नेर्वा स्वीयाग्निमादाय कवचमंत्रे वेक्षणसंज्ञानीयपात्रांतरेण पिधायाग्निमानीयास्त्रमंत्रेण तन्मध्यादेकमं
गारं नैर्ऋत्यकोणे क्रव्यादांशं परित्यज्य देवीं संस्मरन् स्वपात्रे मूलविद्यया संस्थाप्य मूलमंत्रेण वीक्षणास्त्र
मंत्रेण प्रोक्ष्य अस्त्रमंत्रेणावकुंठ्य त्रिः संताड्य कवचेनामृतस्रवणेनाभिमंत्र्य धेनुमुद्रयाऽमृतीकृत्य मा
स्त्रमंत्रेण रक्षां कवचेनावगुंठ्य जानुभ्यामवनीं गत्वा तस्मात्कराभ्यामादाय कुंडस्योपरि प्रदक्षिणं त्रिः
परिभ्राम्य भ्रामणवत्कुच्चरन् कामेश्वर्यां योनौ कामेश्वरस्य वीजमिति ध्यायन् स्वाभिमुखं कुंडमध्येऽग्निं
निक्षिप्य कामेश्वरीकामेश्वरयोराचमनं दत्वा स्वनाभिमंडलेन जठराग्निं संचिंत्य सुषुम्नावर्त्मना ब्रह्मरंध्रस्था
ग्नीषोमात्मकमहाबिंदुमध्यगतं वैश्वानरं वायौ तं जठराग्निं संयोज्य तौ पुनर्वहन्नासाध्वना निः॥ सार्य कुंडमध्यस्थपार्थि
वाग्नौ संयोज्य कामेश्वरीगर्भे वसुमालाध्यानोक्तरूपां वह्निमूर्तिं संचिंत्य मूलविद्यां तेजो सोहं वह्निचैतन्याय नमः
इति तस्यां मूर्तौ वह्निचैतन्यं संयोज्य क्लीं वह्निमूर्तये नमः इति वह्निमूर्तिं संपूज्य तदुपरि कुशान्स्रुक्का
ष्ठसकजानि च निक्षिप्य चित्पिंगल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा। इति मंत्रेण मुखरूपं

सौ सौ.र.क.
प प.

मातमग्निं प्रत्याज्यमग्निं प्रज्वलितं वंदे जातवेदं हुताशनं। सुवर्णवर्णममलं समिद्धं सर्वतोमुखं॥ इति ध्यात्वा जलेन
मग्निमुपतिष्ठेत्। ततो वक्ष्यमाणवह्निमंत्रेण प्राणायामत्रयं कृत्वा शिरसि भृगुऋषये नमः। मुखे गाय
त्रीछंदसे नमः। हृदये अग्नये देवतायै नमः। इति विन्यस्य लोमार्थे विनियोगः। इति कृतांजलिर्वदेत्। न
नः सहस्राचिर्हृदयाय नमः स्वस्तिपूर्णाय शिरसे स्वाहा॥ उत्तिष्ठपुरुषाय शिखायै वषट्॥ धूम
व्यापिने कवचाय हुं। सप्तजिह्वाय नेत्रत्रयाय वौषट्। धनुर्धराय अस्त्राय फट्॥ इति षडंगमंत्रान् गुरु
ष्ठादितलांतकरयोर्विन्यस्य हृदयादिषडंगेषु विन्यसेत्॥ ततो लिंगे ॐ हिरण्यायै नमः। पायौ ॐ कनकायै
नमः। शिरसि ॐ रक्तायै नमः। मुखे ॐ कृष्णायै नमः। नासिकायां ॐ सुप्रभायै नमः। नेत्रयोः ॐ अतिरक्तायै न
मः। सर्वांगे ॐ बहुरूपायै नमः। इति सप्तजिह्वा विन्यस्य मूर्ध्नि ॐ अग्नये जातवेदसे नमः। वामांसे ॐ अग्नये
ॐ सप्तजिह्वाय नमः। वामपार्श्वे ॐ अग्नये हव्यवाहनाय नमः। वामकट्यां ॐ अग्नये अश्वोदरजाय नमः।
लिंगे ॐ अग्नये वैश्वानराय नमः। दक्षिणकट्यां ॐ अग्नये कौमारतेजसे नमः। दक्षिणपार्श्वे ॐ अग्नये वि
श्वमुखाय नमः। दक्षिणांसे ॐ अग्नये देवमुखाय नमः। इति वह्नेरष्टमूर्तीर्विन्यस्य सप्तजिह्वामु

२०५

द्रां वध्यावक्ष्यमाणवह्निरूपं स्वात्मेदेन ध्यात्वा वह्निमंत्रेण प्राणुक्तसामान्यार्घविधिना अर्घपात्रं संस्थाप्य प्रागुक्त
विधिनैव पाद्याचमनीयमधुपर्कपुनराचमनीयप्रोक्षणीपात्राणि च संस्थाप्य स्रुक्स्रुवाज्यस्थालीचरुस्था
लीप्रणीताप्रोक्षणीपात्रे वा कुमात्र दीर्घमाप्रिक्षित्वा गव्यणमाई मंगुष्ठमात्रस्थूलं पलाशवैकंकत
काश्मर्यवैल्वाश्वत्थमं परिधित्रयं परिधिसज्ञातीयं प्रादेशमात्रं दैर्घ्यं कनिष्ठांगुलिमानस्थौल्यं
आर्द्रं समित्स्रवकं कुशान्पवित्रद्वयं घृतं पूजाद्रव्याणि दध्यक्षतादि बलिद्रव्याणि च यागोपकरणा
नि संपाद्य कुंडस्योत्तरभागे कुशास्तरे स्रुगादिषट्पात्राण्यधोमुखानि संस्थाप्यान्यानि द्रव्याणि च यथायथं निधाय प्रो
क्षणीपात्रं जलेन पात्राणि प्रोक्ष्य स्रुक्स्रुवादीनि पात्राण्युत्तानी कृत्य प्रणीतापात्रं पश्चात्स्वपुरतः कुशास्तरे नि
धाय शुद्धोदकेनापूर्य गंधाक्षतानि निक्षिप्य तत्र पवित्रं कुशाग्रं निधाय उत्तानहस्तद्वयांगुष्ठानामिकाभ्यां पवित्रा
ग्रमूले विधृत्याधोमुखोदस्तोकत्वा स्वमंत्रेण तज्जलबिंदु पवित्रमध्ये नममौ विनिक्षिप्य तत्र घृतबिंदुं दत्वा पा
णिभ्यामामस्तकमुद्धृत्य कुंडस्योत्तरे कुशास्तरे तत्पात्रं संस्थाप्य तदुपरि कुशान्निक्षिपेत्॥ इति प्रणीतापनं विधा
य प्रोक्षणीपात्रं पश्चात्स्वपुरतः कुशास्तरे निधाय तत् शुद्धोदकेनापूर्य तत्र प्रणीताजलं किंचिन्निक्षिप्य प्राग्व

सौ.र.क.
५.

त्पवित्रेणोत्सवनं कृत्वा तेनोदकेन होमोपकरणानि च प्रोक्ष्य तस्मात्त्रिभागजलं प्रणीतां कुंडस्योत्तरे प्रणीतापात्रस्य
पूर्वभागे कुशास्तरे संपाता स्मृधारणपस्थापयेत्॥ ततः प्राकुस्थापितप्रोक्षणीजलेन वह्निमेखलोपरि परि
षिच्य मध्यमेखलोपरि गर्भरहितैश्चतुर्भिश्चतुर्भिर्दर्भैः ईशानादीशानांतं प्रादक्षिण्येनाग्नेये दक्षिणपरिस्तर
णाग्रे पूर्वपरिस्तरणस्य मूलमाच्छादयन्नैर्ऋत्ये दक्षिणपरिस्तरणस्य मूलेन पश्चिमपरिस्तरणस्य मूलमा
च्छादयन्नुत्तरपरिस्तरणस्य मूलेन वायव्यस्य पश्चिमपरिस्तरणाग्रमाच्छादयन्नीशाने उत्तरपरिस्तरणाग्रेण पू
र्वपरिस्तरणाग्रमाच्छादयन्परिस्तीर्य पश्चिमदक्षिणोत्तरदिक्षु ज्येष्ठमध्यकनिष्ठक्रमेण पूर्वाग्रमुत्तराग्रं परि
धीन्निक्षिप्य तेषु पश्चिमपरिधौ ब्रह्मणे नमः। दक्षिणे विष्णवे नमः। उत्तरे रुद्राय नमः। इति संपूजयेत्। अत्र परि
स्तरणपरिधिप्रक्षेपौ पश्चिमरेखलायां योनिनीलोर्ध्वमेखलयोर्मध्ये कार्यौ नाभमेखलयोर्मध्ये परिधेः स्था
नस्य च रंध्रं कुर्यात्॥ तथाविध्यान्मध्यमामेखलोपरि इति सारसंग्रहवचनात्॥ न च रंध्रस्य विद्यमानत्वात्॥
ततः शिष्यो ब्रह्मविद्यादीक्षितं ब्राह्मणमाकृष्य कुंडस्य दक्षिणभागे कुशासने समुपवेश्य अमुकगोत्रः अमुक
शर्माहं अमुकगोत्रिणं अमुकवेदांतर्गताऽमुकशाखाध्यायिनं अमुकशर्माणं मम श्रीविद्यादीक्षांगमंतदो

२०६

मकर्मणि कृताकृतावेक्षणाय ब्रह्मत्वेन त्वां वृणे इति वस्त्रालंकारादिभिर्वरयेत्। ततस्तं गंधादिभिः संपूजयेत्
। ब्राह्मणं जानेकुशवटुं वा संपूज्य कुंडमध्ये कामेश्वरीगर्भस्थं वह्निं ध्यायेत्॥ तद्यथा॥ ततो वैश्वानरं गर्भे त्रिने
त्रमरुणप्रभं॥ मुक्तावरैरक्षरत्नभूषणं पद्मसंस्थितं॥ वरं शक्तिं स्वस्तिकं चाभीतिं हस्तैस्तु बिभ्रतं॥ अनेकहेममा
लाभिरंकितं संस्मरेत्प्रिये॥ इति त्रिकोणगर्भितषट्कोणकर्णिकचतुर्द्वारयुक्तचतुरस्रद्वयवेष्टिताष्टदलकम
लात्मकवह्निपीठमध्यस्थं ध्यात्वा आधारशक्त्यादि त्रोमात्मांतं प्राग्वद्योगपीठे संपूज्याष्टदलकेसरेषु मध्ये च स्वाहा
दिपत्रादक्षिण्येन। ॐ पीतायै नमः। ॐ श्वेतायै नमः। अरुणायै। कृष्णायै। धूम्रायै। तीव्रायै। विस्फुलिंगिन्यै। रु
चिरायै। ज्वालिन्यै। इति नवशक्तीः संपूज्य रं रमवशक्तिकमलासनाय नमः। इति समस्तं पीठं संपूज्य तन्मध्यस्थं
यथोक्तरूपं वह्निं ध्यायन् स्थापनादिपरमीकरणांतं तत्सन्मुद्रया विधाय सप्तजिह्वामुद्रां प्रदर्श्य वैश्वानर जातवे
द इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा॥ इति मंत्रेण गंधादिपुष्पांतैरुपचारैर्वह्निं पूजयेत्। अत्र वह्नि
पूजायां मरीचादिकं वह्नेस्तत्तदंगं बुध्या कुंडाद्बहिः प्राचीं तरे दद्यात्॥ चंदनादीनि वह्नावेव दद्यात्। ततो वह्नेर्मुख
षट्कोणं विभाव्य वह्निस्थ षट्कोणेष्वाईशानकोणे॥ ह्रां हिरण्यायै नमः। ह्रीं कनकायै। ह्रूं रक्तायै। ह्रैं कृष्णायै।

सौ॰र॰क॰
प॰

ॐ सुभगायै। ॐ भगातिरक्तायै नमः॥ मध्ये। ॐ बकुरूपायै नमः॥ इति त्रिकोणः संपूज्याष्टदलकेसरेषु आग्नेय्यां ॐ सहस्रार्चिषे
हृदयाय नमः॥ ईशाने ॐ स्वस्तिपूर्णाय शिरसे नमः॥ नैर्ऋत्ये ॐ उत्तिष्ठपुरुषाय शिखायै नमः॥ वायव्ये धूमव्यापिने
कवचाय नमः॥ अग्रे सप्तजिह्वाय नेत्राय नमः॥ स्वाग्न्यादि चतुर्दिक्षु धनुर्धराय अस्त्राय नमः॥ इति षडंगानि संपूज्याष्ट
दलेषु स्वाग्न्यादि प्रादक्षिण्येन॥ ॐ अग्नये जातवेदसे नमः॥ ॐ अग्नये सप्तजिह्वाय नमः॥ ॐ अग्नये हव्यवाहनाय न
मः॥ ॐ अग्नये अश्वोदरजाय नमः॥ ॐ अग्नये वैश्वानराय नमः॥ ॐ अग्नये कौमारतेजसे नमः॥ ॐ अग्नये विश्वमु
खाय नमः॥ ॐ अग्नये देवमुखाय नमः॥ इति मर्षिः संपूज्याष्टदलाग्रेषु॥ आं ब्राह्म्यै नमः॥ ईं माहेश्वर्यै नमः॥ ऊं कौ
मार्यै नमः॥ ॠं वैष्णव्यै नमः॥ ॡं वाराह्यै नमः॥ ऐं इंद्राण्यै नमः॥ औं चामुंडायै नमः॥ अः महालक्ष्म्यै नमः॥ इत्य
ग्न्यादि प्रादक्षिण्येन संपूज्य चतुरस्रे लोकपालांस्तदस्त्राणि च प्राग्वत्संपूज्य पुनरुक्तेन वह्निमंत्रेण वह्निं संपू
ज्य धूपाद्युपचारांस्तो बजोताम्परिकल्प्य वह्निघ्राणस्य स्रुक्स्रुवादिसंस्कारान्कुर्यात्॥ अत्र दीक्षादि सात्विक
होमेषु प्रोक्ताः सप्तजिह्वाः पूज्याः॥ वश्यादि राजकाम्यकर्मसु तु पद्मरागा सुवर्णा स्यात्तनीयाभ इलोहिता॥ लोहिता
नेतरं ध्येता धूमिनी चकराजिका॥ राजसोरसना वह्नेर्विहिताः काम्यकर्मसु॥ इति मारणादि क्रूरकर्मसु तु वि

श्वमूर्तिस्फुलिंगिनी धूम्रवर्णा मनोजवा॥ लोहिताम्या कराला राख्या काली नाम स्मई रिता इति। एतास्तत्तत्कर्मणि प्रा
गुक्ता वीजाद्या मासप्रजास्तु योज्याः॥ केचित्तु प्रागुक्त सात्विक सप्तजिह्वासु कर्मविशेषेषु तत्तत्कर्मसु॥ गुणो जिह्वा म
ध्ये मर्च्यं तस्यां होमः कार्य इत्याहुः॥ उक्तं च॥ कुंडस्य मध्ये त्वथ सा प्रशस्ता जिह्वा हिरण्या तु विकामर्णा दौ॥ सेनना रि
षु मन्नारवलु रक्तामारणे तिनिगादिता तु विलक्ष्मा॥ सुप्रभा तु धवरेरिह शांत्यां उच्चाटने तिरक्तां नरिति॥ अत्र याजिका
मध्येति हृति तद्ध्वंगामारभ्य शेषाः॥ संपूज्य पुनरादि जिह्वामारभ्य मध्यमस्थस्य जिह्वापर्यंतमीशानादिमध्यां
तं प्रादक्षिण्येन पूजयेदिति॥ ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ ष
ड्विंशोग्निरंगकः॥ ॥ ॥इति श्रीसौभाग्यरत्नाकरे षड्विंशस्तरंगः॥ ॥अथ कृते पुनर्वह्निमंत्रेण वह्निं
संपूज्यास्य स्थालीमस्त्रमंत्रेण प्रक्षाल्य स्वपुरतः कुशास्तरे निधाय तस्यामुत्तराग्रे पवित्रं निधाय वीक्षणादि च
तुर्भिः संस्कारैः संस्कृतेषु तंडुलेषु गोधिसु शोधितं गव्यं घृतमापूर्य मूलविद्यया त्रिरभिमंत्र्य तत्र स्वेष्टदेवतां सं
चिंत्य धेनुमुद्रां प्रदर्श्य कुंडाद्दक्षिणात् उत्तरकुंडस्य वायव्यकोणे कृचिस्ताने मौ चानिप्य तदुपरि हृन्मंत्रेण स्था
लीं निधाय दर्भयुगलमग्नौ संदीप्य दग्धाग्रमाज्ये दत्त्वा निक्षिप्य अवशिष्टमग्नौ प्रक्षिप्य पुनर्दर्भयुगलं संदी

सौ.र.क.
प.

ण्यकवचेनाभ्योपरिस्त्रिर्भ्रामयित्वाग्नौ दर्भशेषं विसृज्य पुनर्दर्भाग्रमाज्यस्थाल्यां मेदन्मंत्रेण प्रदर्श्य दर्भशेषानग्नौ प्र-
क्षिप्याज्यस्थालीमंगारेष्वुत्तरस्यामुत्तार्य अंगारानग्नौ निक्षिप्य पवित्रमस्पृश्य स्रुवं पुरतो दर्भेष्वाज्यस्थालीं निधाय
प्रागग्रदर्भं मंत्रेण पवित्रमध्येन पूतेति ऋतस्य वनं कृत्वा हृदयमंत्रेण स्वाभिमुखं पवित्रमध्येन त्रिः संप्लवनं कुर्यादि-
ति। तापनपवित्रीकरणाभिघोतनोत्पवनसंप्लवनाख्यषट्संस्कारान्कृत्वा कराभ्यां स्रुवं स्रुचं वा गृह्य ऊर्ध्वमुखौ गृही-
त्वा तावधोमुखौ प्रताप्य कुशमूलैस्तयोर्मूलं कुशमध्यैस्तयोर्मध्यं कुशाग्रैस्तयोरग्रं त्रिस्त्रिः परिमृज्य वामहस्ते
निधाय दक्षिणहस्तेन तौ स्रुवस्रुचौ पुनस्त्रिः प्रताप्य दर्भानद्भिः संस्पृश्याग्नौ प्रक्षिप्य तयोरधो वामकरं कृत्वा अधोमुखौ तौ
मूलाग्रं तेवालाविधयास्त्रिरभिमंत्र्य तयोर्मूले ऐं आत्मतत्त्वाय नमः॥ तयोर्मध्ये क्लीं विद्यातत्त्वाय नमः॥ तयोर-
ग्रे सौः शिवतत्त्वाय नमः॥ इति पृथक्पृथग्विन्यस्य पुनस्तयोर्मूले ह्रां इच्छाशक्त्यै नमः॥ तयोर्मध्ये ह्रीं ज्ञानश-
क्त्यै नमः॥ तयोरग्रे हूं क्रियाशक्त्यै नमः॥ इति शक्तित्रयं विन्यस्य [redacted] स्रुवे ह्रीं नमः। स्रुचे श्रौं नमः॥ इति
विन्यस्य हृन्मंत्रेण तयोः कंठदेशे त्रिवृतं तन्तुरूपेण पृथक्पृथक्त्रिः प्रदक्षिणं संवेष्ट्य गंधादिभिः संपूज्य स्वदक्षिण-
भागे कुशास्तरे तौ स्थापयित्वाज्यस्थाल्यां प्रागग्रं पवित्रं निक्षिप्य तद्भागौ कृत्वा दक्षिणभागं शुक्लपक्षं वामभागं कृ-

स्त्रेल२

२.८

ष्णपक्षं च संचिंत्य वामभागे इडां दक्षिणे पिंगलां मध्ये सुषुम्नां च विभाव्य हृन्मंत्रेण दक्षिणभागात्स्रुवेणाज्यमादा-
य अग्नये स्वाहा अग्नय इदं न मम इत्याग्नेये दक्षिणे नेत्रे हुत्वा पुनर्वामभागात्स्रुवेणाज्यमादाय सोमाय स्वाहेति वह्नेर्वा-
मलोचने हुत्वा सोमायेदं न ममेत्युद्देशत्यागं विधाय पुनर्मध्याद्धृताज्यमादायाग्नीषोमाभ्यां स्वाहेति वह्नेर्भाले-
नेत्रे हुत्वा पुनर्दक्षिणभागाद्धृताज्यमादाय अग्नये स्विष्टकृते स्वाहेति वह्नेर्मुखे हुतं कुर्यात्। अत्र सर्वत्र स्रुचल- पे
ग्नं कृतशेषं आज्यं संपातधारणाय शाकल्यपिठरपात्रे निक्षिपेत्॥ सर्वत्र प्रागुक्तयुक्तमन्त्रोद्देशत्यागं
कुर्यात्॥ इति वह्नेर्नेत्रवक्त्रोद्घाटनं विधाय। ॐ भूः स्वाहा अग्नय इदं न मम। ॐ भुवः स्वाहा वायव इदं न
मम। ॐ स्वः स्वाहा सूर्याय इदं न मम। ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम। इत्याहुतिचतुष्टयं कृत्वा
वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा। इत्यग्निमंत्रेणाहुतित्रयं कृत्वा ऐं अग्ने
गर्भाधानं संपादयामि स्वाहा। ऐं अग्नेः पुंसवनं संपादयामि स्वाहा। ऐं वह्नेः सीमंतोन्नयनं संपादयामि स्वाहा॥
इति प्रतिकर्माज्याहुतीर्हुत्वा कामेश्वरीगर्भाज्जातं प्रागुक्तरूपं वह्निं ध्यायन्। ऐं अग्नये जातकर्म संपादया-
मि स्वाहा। सह वाज्याहुतीर्हुत्वा वह्नेर्नालच्छेदं कृत्वा सूतकं संशोध्य ऐं वह्नेर्नामकरणं संपादयामि स्वाहा। स-

सौ.र.क.
प.

होवा म्याकृतीर्कृत्वा कामाग्निरितिनाम परिकल्प्य कामेश्वरी कामेश्वरौ संपूज्य विसर्ज्य ऐं वह्नेरुपनिष्क्रमणं संपादया
मि स्वाहा। ऐं अग्नेरन्नप्राशनं संपादयामि स्वाहा। ऐं अग्नेश्चौलं संपादयामि स्वाहा। ऐं अग्नेरुपनयनं संपादयामि
स्वाहा। ऐं अग्नेर्महानाम्न्यं संपादयामि स्वाहा। ऐं अग्नेर्महाव्रतं संपादयामि स्वाहा। ऐं अग्नेरुपनिषदं संपाद
यामि स्वाहा। ऐं अग्नेर्गोदानं संपादयामि स्वाहा। ऐं अग्नेः समावर्तनं संपादयामि स्वाहा। ऐं अग्नेर्विवाहं
संपादयामि स्वाहा। इति प्रतिकर्माहुतिं हुत्वा म्याकृतीकृत्वा गर्भाधानादि विवाहान्तान्पंचदशसंस्कारान्नस्नुनेक
मे सुकुर्यात्॥ अशुभकर्मस्तु अग्नेर्मृतिं संपादयामि स्वाहा। इति मरणान्तानाम्नोद्वैशसंस्कारान्कुर्यादिति नितो
मूलाग्रघृतप्लुतं समित्संचकं तत्स्त्रीवह्नौ निक्षिप्य स्रुं हिरण्यायै स्वाहा। क्ष्रूं कनकायै स्वाहा। ष्रूं रक्तायै स्वा
हा॥ फ्रूं कृष्णायै स्वाहा। ञ्रूं सुप्रभायै स्वाहा। न्त्रूं अतिरक्तायै स्वाहा। ध्रूं बहुरूपायै स्वाहा। ॐ सहस्रार्चि
षे हृदयाय स्वाहा॥ ॐ स्वस्तिपूर्णाय शिरसे स्वाहा। उत्तिष्ठपुरुषाय शिखायै स्वाहा। धूमव्यापिने कवचाय स्वा
हा। सप्तजिह्वाय नेत्राय स्वाहा। धनुर्धराय अस्त्राय स्वाहा॥ ॐ अग्नये जातवेदसे स्वाहा। ॐ अग्नये सप्तजिह्वा
य स्वाहा। ॐ अग्नये हव्यवाहनाय स्वाहा। ॐ अग्नये अश्वोदरजाय स्वाहा॥ ॐ अग्नये वैश्वानराय स्वाहा। ॐ अ

२०६

ग्नये कौमारतेजसे स्वाहा। ॐ अग्नये विश्वमुखाय स्वाहा। ॐ अग्नये देवमुखाय स्वाहा। ॐ आं ब्राह्म्यै स्वाहा। ईं माहेश्व
र्यै। ऊं कौमार्यै। ॠं वैष्णव्यै। ऌं वाराह्यै। ऐं इन्द्राण्यै। औं चामुंडायै। अः महालक्ष्म्यै स्वाहा। लं इंद्राय स्वाहा। रं अग्न
ये स्वाहा। टं यमाय स्वाहा। क्षं निर्ऋतये स्वाहा। वं वरुणाय स्वाहा। यं वायवे स्वाहा। सं सोमाय स्वाहा। हं ईशानाय
स्वाहा। आं ब्रह्मणे स्वाहा। ह्रीं अनन्ताय स्वाहा। ॐ वज्राय स्वाहा। ॐ शक्त्यै स्वाहा। ॐ दंडाय स्वाहा। ॐ खड्गाय स्वाहा
ॐ पाशाय स्वाहा। ॐ अंकुशाय स्वाहा। ॐ गदायै स्वाहा। ॐ त्रिशूलाय स्वाहा। ॐ पद्माय स्वाहा॥ ॐ चक्राय स्वा
हा। इति वह्निर्जिह्वांगावृत्तिदेवतानामैकैकामाज्याहुतिं कृत्वा स्रुवेण चतुर्वारं स्रुचि घृतमापूर्य अधोमुखं स्रुवं स्रुचि निधा
योत्थाय प्राङ्मुखः वह्निमेत्रीनेत्रो घटिति वह्नौ कृत्वोपविश्य पुनः स्रुवेण ॐ स्वाहा। ॐ श्रीं स्वाहा। ॐ श्रीं ह्रीं स्वाहा। ॐ
श्रीं ह्रीं क्लीं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा। ॐ श्रीं ह्रीं
क्लीं ग्लौं गं गणपतये वरवरद स्वाहा॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं ग
णपतये वरद सर्वजनं मे वशमानय स्वाहा। इति दशधा विभक्तेन महागणपतिमंत्रेण दशाज्याहुतीर्हुत्वा समस्ते
न महागणपतिमंत्रेणाज्याहुतिचतुष्टयं जुहुयात्॥ समस्तमहागणपतिमंत्रस्तु दशमाहुतिर्होमः। श्रीं क्लीं: ग्लौं

सौ.र.कृ.
प.

वादिस्वाहांतो ज्ञेयः ततस्ताम्रादिनिर्मितां चरुस्थालीं अस्त्रमंत्रेण प्रक्षाल्य तत्र सुशुद्धान् शालितंडुलान्॥ मूलविद्यया
ऽष्टधाभिमंत्रितान् पंचदशप्रसृतिमितान् अस्त्रमंत्रं जपन् निक्षिप्य तत्र यथामानं गोक्षीरं निक्षिप्य। कवचमंत्रेण
पात्रांतरेण तस्या मुखं पिधाय गुरुः प्राङ्मुखो मूलविद्यां जपन् इध्माज्वालनीयेनेध्मा ईमानेनावदानयोग्यस्थूला
ग्रेण वृत्ताकारघटितेन मेक्षणेन प्रादक्षिण्येनोर्ध्वमवघट्टयन् सुस्विन्नमदग्धं नातिकठिनं नातिशिथिलं च
रुं श्रपयित्वा स्रुवमाज्येनाभिपूर्य मूलविद्यया स्विन्ने तस्मिन् चरौ तत्राभिघारितं स्रुवस्थमाज्यं निक्षिप्य तत्पात्रं कव
चेनोत्तीर्य कुंडस्योत्तरभागे कुशास्तरे निधाय प्राग्वदासने संपूज्य तत्र प्राङ्मुख उपविश्य मूलविद्यया प्राणायाम
त्रयं मूलविद्यया ऋष्यादिकरषडंगन्यासांश्च विधाय करशुद्धिपद्मासनषडंगयुवतीवशिन्याद्यष्टकचतुः
पीठचतुस्तत्त्वात्मन्यासषट्कं विधाय ध्यानमानसपूजांते प्राग्वदर्घ्यादिपात्रस्थापनं कृत्वा आत्मपूजां विधाय व
ह्निमुखे श्रीचक्रं ध्यात्वा प्राग्वद्योगपीठं संपूज्य मूर्तिं कल्पयित्वा तत्र प्राग्वद्देवीमावाह्य सर्वोपचारैः संपूज्य मूर्तिं
कल्पयित्वा तत्र प्राग्वद्देवीमावाह्य सर्वोपचारैः संपूज्य प्राग्वत्तिथिनित्यादिसमस्तदेवतावृंदं संपूज्य संत
र्प्य वह्निरूपं भगवतीं ध्यायन् मूलविद्यया घृतैः पंचविंशत्याहुतीर्हुत्वा चरोश्चक्रीकरणे विधाय पुनर्वह्निदे
धा

२१०

वतायाः स्वात्मना सह ऐक्यं विभावयन् नाडीसंधानार्थमेकादशाहुतीर्मूलविद्यया हुत्वा अंगादिसमस्तावृत्तिदेवता
नां तत्तन्नाम्नो ते श्रीपादुकायै स्वाहेत्यादि तत्तन्नाममंत्रैः प्रत्येकमेकैकामाज्याहुतिं हुत्वा प्रागादिषु कुंडेषु ऋत्
विग्भिः प्रागुक्तविधिना संस्कृतेष्वाचार्यः स्वकुंडादग्निमुद्धृत्योद्धृत्य विहरेत्॥ ततो ऋत्विजः स्वे स्वे कुंडे वह्निं
पूज्या स्वस्वकुंडाग्रे स्वस्वासनानि प्रागुक्तविधिना संपूज्योपविश्य गुर्वादिवंदनपूर्वकं भूतशुद्ध्यादियथाश
क्तिन्यासजातं विधाय प्रोक्तविधिनार्घादिस्थापनपूर्वकं वह्निमुखे श्रीचक्रं ध्यात्वा पीठपूजापुरःसरं देवी
मावाह्य सांगावरणां सर्वोपचारैः संपूज्य संस्कृतघृतेन पंचविंशत्याहुतीर्मूलविद्यया स्वे स्वे कुंडे जुहुयुः
ततो गुरुर्विद्यामंडलं अस्त्राभिमंत्रिते कुशास्तरे चरुं त्रिधा विभज्यैकं भागं देव्यै निवेद्य प्राक्चक्रं परितः पूर्वमंकुरा
र्पणकर्मणि कृतांकुरभाजनानि निक्षिप्य घृतपूर्णादिक्षमयदीपांश्च विधाय द्वितीयं भागं विभज्य ऋत्विग्भिः सहसा
ज्येन तेन प्रतिकुंडं पंचविंशत्याहुतीर्हुत्वा श्रीचक्राद्बहिः प्रागुक्तमेषादिराशिस्थानेषु राश्यधिनाथेभ्यो नक्षत्रेभ्यः
करणेभ्यश्च कृतशेषेण पायसेन बलिं दद्यात्। यथा मेषवृश्चिकस्थानयोः क्रं ॐ मेषवृश्चिकराश्यधिपतये मंगलाय ए
ष गंधाक्षतयुक्तपायसबलिर्नमः। वं ॐ वृषतुलाराश्यधिपतये शुक्राय। दं ॐ मिथुनकन्याधिपतये बुधाय। यं ॐ

सो॰र॰क॰ प॰ कर्काधिपतये सोमाय॥ ॐ रं सिंहाधिपतये सूर्याय॥ नं ॐ धनुर्मीनाधिपतये गुरवे॥ यं ॐ मकरकुंभाधिपतये श
नैश्चराय॥ पुनः क्रमेण मेषादिस्थानेषु मेषराशेः पंशभूताश्विनीभरणीकृत्तिकापादनक्षत्रदेवताभ्यो दिवारेन
क्तंचरेभ्यः सर्वेभ्यो नमोऽतेभ्यो एष गंधेत्यादि प्राग्वत्॥ एवं वृषराशेः पंशभूत कृत्तिकापादत्रयरोहिणीमृगशिरार्द्ध
नक्षत्रेभ्य इत्यादि मिथुनराशेः पंशभूत मृगशिरोर्द्धआर्द्रापुनर्वसुपादत्रयनक्षत्रेभ्य इत्यादि॥ एवमग्रे विमेत्राः ऊह्याः॥
ततो मीनमेषयोरंतराले बवकरणाय एष इत्यादि॥ एवं वृषमिथुनयोरंतराले बालव॥ सिंहकन्ययोर्मध्ये तैति
लः॥ कन्यातुलयोर्मध्ये गरज॥ वृश्चिकधनुषोर्मध्ये वणिजे॥ धनुर्मकरयोर्मध्ये विष्टये॥ एवं गंधाक्षतपुष्पयुक्तं पा
यसबलिर्नमः॥ इति बलिं दद्यात्॥ अत्र राशिद्वयाधिपतीनां राशिद्वयस्थानेपि बलिर्देय इति संप्रदायः॥ ततो गु
रुः कुंभस्याग्रे देव्यै तत्र रापोशनादिना राजनं तं कृत्वा स्तुत्वा शरणं प्रपद्य क्षमापयेत्॥ ततो यंभागे शिष्येण
सद्गुरुः॥ स्वयं भुक्त्वा च समसमाचांतं शिष्यं षडंगन्यासं नेत्रसंकलीकृतं हृन्मंत्राभिमंत्रितेन क्षीरद्रुमादि
संभवे दंतकाष्ठं शिष्याय दद्यात्॥ ततः शिष्यः समाहितः सन् दंतान् विशोध्य दंतकाष्ठं प्रक्षाल्य
विसर्जयेत्॥ ततः समाचांतं शिष्यं मूलविद्यया बद्धशिखं मस्त्रमंत्राभिरक्षितं वेष्टनीयं गुरुः स

२११

शिष्यो रात्रिशेषे समुत्थाय स्नानादिनित्यकृत्यं निर्वर्त्य यागमंडपं गत्वा द्वारपूजादि नित्यक्रमोक्तविधिना कुंभस्यो
परदेवतां सांगां सावरणां संपूज्य मूलविद्यया षोडशधा तां कृत्वा॥ जपांते समाप्य कुंडसमीपं गत्वा स्वा
सनेषु समुपविश्य कृत्विजो गुरुश्च स्वस्वकुंडे परदेवतां यथाविधि संपूज्य मूलविद्यया षोडशधा तां कृत्वा
आवरणदेवतामेकैकामाहुतिं कृत्वा घृताहुतेस्तिलैस्तत्र कश्यो क्रमपुरश्चरणांगहोमे विहितद्रव्यैर्वा प्र
तिकुंडमष्टोत्तरसहस्रं जुहुयुः॥ अत्र पुरश्चरणांगहोमद्रव्यं तु पलाशपुष्पाणि कुसुंभकुसुमानि वा त्रिमधु
युक्तानि॥ त्रिमधूनि तु घृतक्षीरमधूनि घृतशर्करामधूनि वा॥ ततः स्नातं कृतनित्यकृत्यं शिष्यं पंचगव्यं पा
यित्वा कुंडसमीपं नीत्वा गुरुस्तं दिव्यदृष्ट्या विलोकयन् योगमार्गेण गुरुस्तदीयहृदये प्रविश्य तच्चैतन्यमाकृष्य
स्वात्मनि संयोज्य शिष्यमूर्ध्नि षडध्वरूपं श्रीचक्रे विभाव्य तस्य षडध्वशोधनं कुर्यात्॥ तत्र शिष्यस्य पादयोः प्रा
गुक्त निवृत्त्यादिपंचकलात्मकं कलाध्वानं संचिंत्य पुनस्तस्य लिंगदेशे आत्मतत्वविद्यातत्वशिवतत्वशिवतत्व
विद्यातत्वआत्मतत्वआत्मतत्वविद्यातत्वशिवतत्वसर्वतत्वात्मकतत्वमये तत्वदशकं विभाव्य पुनस्तस्य नाभिदेशे
प्रागुक्तचतुर्दशभुवनात्मकं भुवनाध्वानं परिकल्प्य पुनस्तस्य हृदये अकारादिक्षकारांतमातृकावर्णमयं वर्णाध्वा

नेमं चिंतयेत्पुनस्तस्य ललाटे वर्णात्मकमहमयं पादाध्वानं विभाव्य पुनस्तस्य शिरसि पदसमूहरूपमस्तमेव राशिमयं
मंत्राध्वानं विभावयेदिति षडध्वानं शिष्यदेहे स्मरन् गुरुः कुर्वन् शिष्यं स्पृशन् । ॐ अमुकस्य कलाध्वानं शोधया
मि स्वाहा । इति तिलैरष्टधा कृत्वा कलाध्वानं तत्त्वाध्वनि विलीनं विभाव्य पुनः ॐ अमुकस्य तत्त्वाध्वानं शोधया
मि स्वाहा इत्यष्टधा कृती कृत्वा तं भुवनाध्वनि विलीनं विभाव्य पुनः ॐ अमुकस्य भुवनाध्वानं शोधयामि स्वाहा इत्य
ष्टधा कृती कृत्वा तं वर्णाध्वनि विलीनं विभाव्य पुनः । ॐ अमुकस्य वर्णाध्वानं शोधयामि स्वाहा इत्यष्टधा कृती कृत्वा
तं पदाध्वनि लयं नीत्वा पुनः ॐ अमुकस्य पदाध्वानं शोधयामि स्वाहा इत्यष्टधा कृती कृत्वा तं मंत्राध्वनि विलीनं
विभाव्य ॐ अमुकस्य मंत्राध्वानं शोधयामि स्वाहा इत्यष्टधा कृती कृत्वा तं परमात्मनि विलीनं विभावयेदित्यध्वशोध
नं विधाय पुनः सृष्टिक्रमात्परमात्मनि लीनं मंत्राध्वानं ततः तस्मात्पदाध्वानं ततो वर्णाध्वानं ततो भुवनाध्वानं त
तस्तत्त्वाध्वानं ततः कलाध्वानं च तत्तत्स्थाने संयोज्य स्वात्मस्थितं शिष्यचैतन्यं तत्कुमारं प्रेरणप्रवेश्य सुषुम्नावर्त्मना
शिष्यस्य हृदये तं दिव्यदृष्ट्यावलोकयन् स्थापयेत् । ततो गुरुः स्वकुंडे ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा । अग्न
य इदं न मम । ॐ भुवो वायवे चांतरिक्षाय महते च स्वाहा वायव इदं न मम । ॐ सुवरादित्याय दिवे च महते च स्वा ।

२९६

हा । आदित्यायेदं न मम । ॐ भूर्भुवः सुवश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा । प्रजापतय इदं न मम इत्याहुत्ये
वाहुतिचतुष्टयं न्यूनातिरिक्तप्रायश्चित्तार्थं कृत्वा इतः पूर्वं प्राणबुद्धिदेहकर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यव
स्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्नाय यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ।
इति ब्रह्मार्पणमंत्रेण कर्मबंधविमुक्त्यर्थमाज्येनाहुतिं कृत्वा वह्निमंत्रेण पुनः प्राग्वदग्निं संपूज्य सहस्रार्चि
र्महातेजो नमस्तेव कुरूपघ्नकृ । सर्वाग्निने सर्वगत पावकाय नमोस्तु ते । त्वं रौद्र घोर कर्मा घोर हात्वेन माभिते । वि
सुस्त्वं जो कपालो ज्ञि शांतिमंत्रप्रयच्छ मे । इत्यग्निं प्रार्थ्य न्यूनातिरिक्तपूर्णार्थं ददामि सघृतं तिलं । ॐ हूं सांगं कुरु
कुरु स्वाहा इति तिलैरेकामाहुतिं कृत्वा स्रुवेणाज्यं चिघृतमापूर्य नदग्रे कुशपुष्पपूगीफलादिकं च निक्षिप्य तदूर्ध्वे अधो
मुखे स्रुवं निधाय शंखवत्संपुटाभ्यां कराभ्यां स्रुक्स्रुवौ गृहीत्वोत्थाय कन्नुकायस्तयोर्मूलं स्वनाभौ निधाय वामप
पादमग्रे कृत्वा कृतविप्रा सुमुद्राचार्य नमः । इति देव्या सुखकमले परमामृतबुध्या जुहुयात् । एवं पूर्णाहुतित्रयं कृत्वोपविश्य
देवीं संपूज्य देवीसकाशात् सांगां सावरणां कुंभे विसर्जयेत् । एवमग्नि जोपि स्वकुंडे महाव्याहृत्यादिहोमपूर्वकं पू
र्णाहुतिं कृत्वा देवीसंपूज्य विसर्जयेत् । ततो गुरुः प्राग्युक्तविधिना सांगां सावरणां वह्निं संपूज्य प्राग्वद्या हतिभि

ग्निं क्षां कादीनां मंत्रैस्स्वहस्तैः कृत्वा वह्निं परिषिच्य ॐ नमो नमो वा। होर्मं हाशाके सर्वकर्मप्रसाधका कर्मांतरेपि संज्ञाने संनिधिं कु
रुसादरं॥ इति वह्निं संप्रार्थ्य प्रणम्य तं स्वात्मनि संयोज्य परिस्तरणपरिधीनग्नौ प्रक्षिप्य विसृज्य निवेदनं कृत्वा नेत्रमंत्रेण
शिष्यनेत्रे नवपट्टवस्त्रेण बध्वा तं करे गृहीत्वा कुंडसकाशान्मंडलं नीत्वा तस्यांजलिं पुष्पैरापूर्य स्वयं मूलविद्यामुच्चार्य
कुंभस्थदेवतायै पुष्पांजलिं दापयित्वा नेत्रवेधं विसृज्य दर्भास्तरे तं समुपवेश्य भूतशुद्धिविधिना शिष्यदेहे संहृत्यो
त्पाद्य तद्देहे गुरुः षोढाद्यखिलन्यासजातं विन्यस्य पंचोपचारैः कुंभस्थां देवतां संपूज्य षडंगन्यासयोगेन गुरुः
प्राग्वद्दीक्षाकलशवेद्या उत्तरे भागे उत्तरयोरंतराले कनिष्ठमंडपे चेन्मंडपाद्बहिरुत्तरस्यां दिशि कृत्वा तस्मिन्मे
न्नतले सुसमे वक्ष्यमाणसर्वतोभद्रमंडले स्वजं कृतं शिष्यं प्राङ्मुखं भद्रासने समुपवेश्य पंचवाद्यघोषपुः
रःसरं ब्राह्मणाशीर्भिः सह गुरुः कुंभमुत्थाप्य तन्मुखस्थान्सुरद्रुमान्छिष्यमूर्ध्नि निधाय विलोममातृकामूलवि
द्यां च जपन् तदमृतरसैः शिष्यमभिषिच्य पूर्वं स्थापितवर्धनीतोयेन रक्षार्थं शिष्यमभिषिच्य तदवशिष्टजलेनाचां
तं षडंगन्यासयोगेन षडंगमंत्रैः सकलीकुर्यात्॥ ततः शिष्यस्तूत्थाय शुद्धौतेस्सुश्वेते वाससी परिधायाचम्य
मौनी कृतांजलिर्गुरुसंनिधौ तिष्ठेत्। ततो गुरुस्तं स्वीयचक्रे वा गुरुहस्ते समुपवेश्य तस्मिन्संक्रांतां स्वेष्टदेवतां।

गंधादिभिः पंचोपचारैः संपूज्य शिष्यदेवतयोरैक्यं संचिंतयन् स्वीयपाशामृतेन गुरुक्रमविधिना गुरुः शिष्यस्य तत्त्वशोधनं
कारयित्वा तस्य पाशच्छेदं विदध्यात्। तत्र प्रथमं शिष्यदेहे गुरुक्रमदशबोधन्यासान्तर्गतमंत्रन्यासोक्तमूलाधारादिषो
डशसु स्थानेषु षोडशार्णोपदेशेन तस्याः षोडश विज्ञानि संचिंत्य पंचदशाक्षर्युपदेशेन तस्याः पंचदशाक्षराणि मूला
धारादिपंचदशस्थानेषु संचिंत्य तदूर्ध्वं समस्तविद्यामयीं सविंदुचतुर्थस्वरात्मिकां महाकामकलां संचिंत्य सवि
द्याक्षरषोडशकलाः संलीनाः सत्वादिगुणत्रयगुणातीतजाग्रत्स्वप्नसुषुप्तितुर्याख्यावस्थाचतुष्टयजनिताः षोड
शकलाः। तत्र निजागरबोधमनोव्याहृतिरभिलाषभ्रमचिंतास्मृतिर्मरणविस्मृतिमूर्छानिद्रावैराग्यमुमुक्षास
माधिविवेकाख्याः संचिंत्य तदिच्छाद्यवलोकयन् धनपुत्रादिमूलेन नानापानक्रमयपत्रयुते अभिलाषप्रसक्तं भ
रिते पुण्यपापफलान्विते। संसारवृक्षे पुनरक्षरवास्यस्थलशाखाद्ये निपतन्मोहमत्सरकामक्रोधाहंकारमदम
यपिच्छवकुलामांसे कल्पविकल्परूपपक्षाभ्यामतिचंचले तस्माच्चंचुपुटे कृत्वा कृत्वा पदद्वयं शिष्यस्य मनः पक्षिणं
ज्ञानोपदेशलक्षणपाशेन बध्वा स्वीयगुरुकराकाररूपशस्त्रच्छिन्नपक्षद्वयं तयाभिस्वलीभूतमनः पक्षिणः प्राणो
न्मनीभावस्य निःशेषत्रुटितभवपाशस्य शिष्यस्य ब्रह्मरंध्रे गुरुः सपुष्पफलेन स्वदक्षिणकरेण स्पृशन् वाच्य

सौ॰र॰क॰
प॰

रूपंयद्वस्तुतच्छिष्येसंयोज्यब्रह्मैवाहमितिभावयन्तत्रस्थसहस्रदलसरसीरुहोदरमध्यगतंगुरुरूपंशाक्तःस्मरणोक्त
रूपंबोधयित्वातत्रैवाजपासंकल्प्यप्रकरणोक्तप्रकारेणषट्चक्रस्वरूपादिकंचोपदिश्यपादुकाविधिनाश्रीपात्र
स्थेनेनतत्त्वशोधनंकारयित्वान्तेनवस्त्रेणशिष्यस्यमस्तकमाच्छाद्यतस्यदक्षिणकर्णेप्रथमतोगुरुपादुकाविद्यां
स्वपादुकांचानुपदिश्यतदनुगणेशसूर्यविष्णुशिवशक्त्यात्मकपंचायतनमंत्रान्ततोबालांतदनुपंचपंचिका
विद्यास्ततोमन्त्रविद्यांतदनुनवचक्रेश्वरीविद्याःषोडशार्णोपदेशपक्षेतदंतर्गतांस्त्रिकूटांतदनुपंचदशनित्या
विद्यास्ततश्चतुराम्नायविद्यास्ततश्चरणादूर्ध्वाम्नायविद्याःअन्याश्चक्रमप्रजोपयोगिन्योपियायाविद्यास्ताःसर्वाःय
थाक्रमंयथासंप्रदायंयथाधिकारंसम्यगुपदिश्यतस्यनामाद्यक्षरादिवर्णमानंदनाथशब्दांतेसुंदरंशिष्यस्यनाम
कुर्यात्।नामकृत्वातदनंतरंगतकलियुगदिनादिदीक्षादिनावसानानिगणयित्वानवभिर्हृतेयावंतिनदिनान्य
वशिष्टानिभवंतितानिपरिज्ञायशाक्तःप्रातःसंध्याप्रकरणोक्तेषुनवनाथेषुदीक्षादिनस्यपर्यायोनाथोभवतितस्य
नाम्नैवस्वशिष्यस्यापिनामकुर्यात्।ततःशिष्योब्राह्मणश्चायमषडंगन्यासपूर्वकंगुरूपदिष्टांमूलविद्यांमहोत्तरशतमष्टाविंशति
वारमष्टधावाजपित्वाजपंसमर्प्यगुरुमंत्रदेवतानामैक्यंविभावयन्देवतात्मकंश्रीगुरुंध्यायन्दंडवत्प्रणम्यतस्यपा

ततो

दद्वयंकृतार्थोस्मीतिवदन्स्वशिरसिनिधायप्रणमेत्।।ततोगुरुःकृतार्थोसीतिवदन्शिष्यमुत्थाप्यपरिरभ्यमूर्ध्न्याघ्रायक
जनित्वोदयाक्षरादिपारंपर्यक्रममुपदिश्यसमयाचारादिकंयथाधिकारंबोधयेत्।।ततःशिष्यःप्रहृष्टमनाःस्वात्मनि
वेदनंकृत्वागुरवेसर्वस्वंतदर्धंवास्ववित्तदशमांशंवावित्तशाठ्यरहितोगोभूहिरण्याभरणगजाश्वदासदासीगृहा
रामादिपुत्तांदक्षिणांदत्वाऋत्विग्भ्यश्चसमग्रांदक्षिणांदत्वाब्राह्मणान्परितोष्यकुमारिकाःसुवासिनीःसामयिका
श्चभक्त्याभोज्यवस्त्रालंकारभूरिदक्षिणाद्यैस्तोषयेदितिक्रियामयीदीक्षा।। ।।श्रीविद्यानंदनाथेनशिवयोः
प्रियसूनुना।।कृतेसौभाग्यरत्नाख्योतरंगःसप्तविंशकः।। ।।इतिश्रीसौभाग्यरत्नाकरेसप्तविंशस्तरंगः।। ॥
अथसर्वतोभद्रमंडलरचनाप्रकारः।।तत्रशाक्तःप्रत्यगायतादक्षिणोत्तरायताःसप्तदशरेखाःकृत्वाषट्
पंचाशदुत्तरशतद्वयकोष्ठेषुचतुरस्रमंडलंकृत्वातन्मध्यगतषट्त्रिंशत्कोष्ठानेकीकृत्यतद्बहिश्चतुर्दिक्षुएकपंक्ति
परितःसंस्थाप्यैकीकृत्यपीठंपरिकल्प्यतद्बहिरपिचतुर्दिग्गतपंक्तिद्वयमेकीकृत्यसंमार्ज्यवीथींपरिकल्प्यसर्वम
ध्यगतसरोजस्यानेवहिःपरितोद्वादशसंभागंपरित्यज्यसर्वगमध्यावलंबनेनसमांतरालंवृत्तत्रयंसंपाद्यतत्रसर्वम
ध्यवृत्तमध्यंकर्णिकांपरिकल्प्यतद्बहिर्गतवृत्तवीथीकेसरार्थंपरिकल्प्यकेसरस्थानेषोडशधाविभज्यतच्छिद्रकाव

सो.र.क.
प.

लंबनेन द्वितीयतृतीयवृत्तयोरंतरालमानसूत्रमानेन गुरुरूपयुक्त्या षोडशार्द्धचंद्रान्परिकल्प्य तेनाष्टदलानि कृत्वा
तृतीयवृत्ताद्बहिस्तस्यैकैकांशतो मध्यचिह्नावलंबेन वृत्तांतरं विधाय गुरुरूपयुक्त्या पत्राग्राणि विधायैकैकदलं
मूले केसरद्वयं यथा स्यात्तथा विरच्य पद्मं कृत्वा पद्माद्बहिर्गतैकपंक्तिरूपचतुरस्रपीठस्य कोणचतुष्टये
पि कोणत्रयेण पीठपादान्परिकल्प्यावशिष्टकोष्ठैरेकीकृतैः पीठगात्राणि विधाय तद्बहिर्गतपंक्तिद्वयको
णानि सम्यक्प्रमार्ज्य तद्बहिर्गतपंक्तेश्चतुर्दिक्षु मध्ये कोष्ठद्वयकोष्ठद्वयमेकीकृत्य सर्वबाह्यगतपंक्तेरपि च
तुर्दिक्षु प्रतिदिशं कोष्ठचतुष्टयमार्जनेन द्वारचतुष्टयं परिकल्प्य तत्पार्श्वयोः पंक्तिद्वयगतकोष्ठेष्वंतःपंक्तेः
कोष्ठत्रये बहिःपंक्तेः कोष्ठमेकमिति कोष्ठचतुष्टयमेकीकृत्य शोभाः परिकल्प्यावशिष्टैः षड्भिः षड्भिः कोष्ठैस्त्वपि
कोणानि परिकल्पयेदिति। सर्वतोभद्रमंडलं निर्माय सरोजकर्णिकाकेसरदलदलाग्रपीठवीथीद्वारशोभोपशो
शोभाकोणस्थानानि पंचवर्णरजोभिर्भूषयेत्॥ पंचवर्णरजांसि तु हरिद्राचूर्णं पीतं रजः तंडुलचूर्णं शुक्लं कु
सुंभकुसुमचूर्णं रक्तं दग्धतंडुलचूर्णं कृष्णवर्णं बिल्वपत्रचूर्णं श्याममिति। रजोविन्यासप्रकारस्तु सामागताः
सर्वरेखाः शुक्लरजसा एकांगुलोन्नधविस्तारयुताः कार्याः पीतरजसा कमलकर्णिकां केसराणि च समापूर्य

शुक्लरजसा दलानि च संपूर्य श्यामरजसा दलसंधीनापूरयेत्॥ अथवा कर्णिकां पीतेन केसरान्पीतरक्ताभ्यां दलानि
रक्तेन दलसंधीन्कृष्णेन रजसा संपूर्य पीतेन कृष्णेन वा पीठगर्भं नापूर्य पीठपादानि रक्तेनापूर्य पीठगात्राणि शुभ्र
रजसापूर्य वीथीचतुष्टये कल्पवल्लीः कोरकपुष्पपत्रफलमंडिता नानावर्णरजोभिरारच्य शुभ्रेण रजसा
द्वारचतुष्कमापूर्य रक्तवर्णेन द्वारशोभाः पीतेनोपशोभाः कृष्णेन कोणानि चापूर्य तद्बहीरेखात्रयमेकैकां
गुलीनरालं शुक्लरक्तरजोभिः कुर्यादिति सर्वतोभद्रमंडलरचनाप्रकारः॥ अथैतावत्कर्तुमशक्तानामाचा
र्यः प्रागुक्ते मंडपे मंडपकरणाशक्तौ प्रशस्ते क्वचिद्देवासु समे वा भूतले मंडपे चेद्वेद्यां प्राक्प्रत्यक्त्वाल
सूत्रमास्फाल्य पंचमतो गुरुः स्वासनस्थानं परित्यज्य पूर्वतो हस्तद्वयमात्रे ब्रह्मसूत्रे मध्ये चिह्नं विधाय
तच्चिह्नावलंबनेन हस्तमात्रपरिभ्रांत्या वृत्तं निष्पाद्य तन्मध्यब्रह्मसूत्रं षोडशधा विभज्य प्राग्यादि पंचद
शचिह्नानि कृत्वा समोत्तरालेषु तु चतुर्थसप्तमद्वादशमेषु चिह्नेषु तिर्यक्सूत्रत्रयं दक्षिणोत्तरवृत्त
रेखावधि कृत्वा तेषु मध्यसूत्रस्य दक्षिणोत्तरवृत्तसंधिद्वयमारभ्य ब्रह्मसूत्रस्य पश्चिमवृत्तसंध्यवधि
सूत्रद्वयमास्फाल्य ततः प्राक्सूत्रस्य दक्षिणोत्तरवृत्तसंधिद्वयमारभ्य पश्चिमसूत्रमध्ये ब्रह्मसूत्रप

सौ.र.क.
प.

क्षिमसूत्रयोर्यत्रसंपातस्तदवधिसूत्रद्वयमास्फाल्य ततः पश्चिमसूत्रस्यैव तिर्यक्छेदद्क्षिणोत्तरवत्संधिद्वयमारभ्य सूत्र
सूत्रस्पर्शवत्संध्यवधिसूत्रद्वयमास्फाल्य सूत्रसमत्वं मार्जयित्वा सुसमं नवयोनिचक्रं निष्पाद्य तत्र प्राग्वत्कुंभस्थापनादि
कं विधाय वैश्वदेवांते गुरुर्दिङ्ईशानयोर्मध्ये चतुरस्रमाचार्यकुंडं यथाविधि संस्कृत्याग्निस्थापनादिकं कृत्वाभिषि
च्य प्रागुक्तविधिना दीक्षां दद्यात् मंडपाभावे गृह एव कुंडकरणाशक्तौ प्रागुक्तस्थंडिले वा कृत्वा अग्निस्थापनादिदी
क्षांतं सकलं कर्म कुर्यात्॥ अग्निस्थापनेऽपि विस्ताराशक्तौ प्रागुक्तनित्यहोमविधिनाप्यग्निस्थापनं कुर्यात्॥ एवं दिनाधिवास
नाशक्तौ तस्मिन्नेव दिने सद्योऽधिवासनं कृत्वा दिनद्वयकृत्यमेकस्मिन्नेव दिने समापयेदिति। संक्षेपतः क्रियादीक्षा स
द्योऽधिवासनपक्षे गुरुशिष्ययोः कृतशेषचरुप्राशनं न स्यात् किंतु प्राशनस्यावश्यकत्वादाघ्राणं कार्यमिति शिष्टाचारः॥
अत्र होमकाले वह्नेर्जिह्वाशिरःकर्णादिकं ज्ञात्वानुकुर्यात्॥ तत्र जिह्वायामेव होमः श्रेयः॥ अन्येष्वंगेषु दोषावहः॥ त
थाचोक्तं गुरुकल्पे सर्वकार्यप्रसिद्ध्यर्थं जिह्वायां तत्र होमयेत्॥ चक्षुःकर्णादिकं ज्ञात्वा होमयेद्देशिकोत्तमः॥ अपि
कर्णे कृते यस्तु कुर्याद्व्याधितो भयं॥ नासिकायां महद्दुःखं चक्षुषोर्नाशनं भवेत्॥ केशे दारिद्र्यदं प्रोक्तं तस्माज्जिह्वासु
होमयेत्॥ यत्र काष्ठं तत्र कर्णौ यत्र धूमस्तु नासिके॥ यत्राल्पज्वलनं नेत्रं यत्र भस्म तु तच्छिरः॥ यत्रैव ज्वलितो वह्निस्तत्र

२१६

जिह्वा प्रकीर्तिता इति॥ तथा शारदातिलके॥ अप्रसन्ने तु कुर्याच्चेद्वह्नौ विप्रश्चित्सर्वकर्मसु॥ कर्णहोमे भवेद्व्याधिं नेत्रे त्वंधत्वमी
रितं॥ नासिकायां मनःपीडा मस्तके धनसंक्षयः॥ सधूमोऽग्निः शिरः प्रोक्तो निर्धूमश्चक्षुरेव च॥ ज्वलन्कृशो भवेत्कर्णः काष्ठ
युग्मश्च नासिका॥ अग्निर्जिह्वा यत्र शुद्धस्फटिकसन्निभः॥ तन्मुखं तत्र विज्ञेयं चतुरंगुलमानतः॥ इति॥ यथा अग्नेर्व
र्णाद्या॥ तत्र नारदपंचरात्रे॥ अग्नेर्भासश्च गंधाश्च शब्दाश्चाकृतयस्तथा॥ विकाराश्च शिखाश्चैव संवेद्याः कर्मसिद्धये॥
पद्मरागद्युतिः स्निग्धो ज्वालासारसमप्रभः॥ ज्वालार्कवर्णः कुलिशकुंजयार्थं सस्यते बुधैः॥ इंद्रगोपकसंकाशः शोणिता
भोऽथ पावकः॥ बंधुजीवनिभः श्रेष्ठः कुसुंभाभस्तथैव च॥ रक्तानां पुष्पजातीनां वर्णेनाग्निरिहोच्यते॥ अथ गंधः॥ सुगंध
द्रव्यगंधो निर्धूमगंधः सुशोभनः॥ आपूर्वः पद्मगंधः स्याद्दिव्यगंधश्च सुव्रता॥ अथ शब्दः॥ जीमूतवल्लकीशंखवद्दं
गध्वनितुल्यकः॥ हाहाहेति सिद्धये होतुरतोऽन्यः स्यादसिद्धिदः॥ तथा शारदातिलके॥ भेरीवारिदहस्तींद्रध्वनिर्वह्नेः शुभा
वहः॥ अथाकृतिः नारदपंचरात्रे॥ छत्राकारोऽथ हंसानां मयूराणां च सिद्धिदः॥ तथाकृतिः सदा वह्निः सद्यः सिद्धिकरः स्मृ
तः॥ शेषाणां दक्षिणां रूपं न शस्तं होमकर्मणि॥ यद्रूपं कथितं चैतद्दिनस्य प्रतिलक्षणं॥ अन्योन्यलंपपद्देन तदासि
द्धिकरो नलः॥ अथ शिखास्तत्रैव॥ विषमाश्च शिखा वह्नेस्त्वादयश्च शुभावहाः॥ ह्रस्वा ह्रस्वोन्नतादीर्घाग्निज्वालाः

सौ॰ रु॰ कु॰
पृ॰

सिद्धिदाः स्मृताः॥ तथा सारदातिलके। प्रदक्षिणस्य कर्कं पाठो ज्वाला शिखिनः शिखा। शुभदा यजमानस्य राज्यस्यापि वि-
शेषतः॥ तथा नारदपंचरात्रे। प्रदीप्ते जिह्वाने ग्नौ निर्धूमे सगुणे तथा। हूयेत्तु क्षिप्रदे चैव होतव्यं सिद्धिमिच्छता॥ अथ
निषिद्धः॥ नारदपंचरात्रे। अल्पतेजा स्वल्पधूमस्वविस्फुलिंगसमन्वितः। धूमावली दग्धजन्य कृशानुर्नैव सिद्धिदः॥
दुर्गंधश्चावली ढस्त्र सितकृष्णश्च यो भवेत्॥ भूमिं च विलिखेद्यस्तु सोपि दद्यात्सराभवं॥ तथा शारदातिलके॥ कृ-
ष्णः कृष्णगतेर्वर्णो यजमानं विनाशयेत्॥ प्रतिगंधो कृतभुजो होतुर्दुःखप्रदो भवेत्॥ छिन्नार्चच्छिन्नशिखा कुर्यात्स्मरत्तुं
धनपरिक्षयं॥ शुकपक्षनिभो धूमः पारावतसमप्रभः। हानिं तुरगजातीनां गवां च कुरुते चिरात्॥ तथा नारदपंच-
रात्रे॥ स्वरो ह्युम दिग्वादीनां हतमत्र न सिद्धये॥ कृष्णश्चटचटाशब्दः स्त्रपसव्यगतिः सदा॥ उद्गिरेद्वसुधां यश्च यश्चा-
धःशिखएव च॥ नेष्यते सो मुनिश्रेष्ठ शास्त्रे स्मिन्मारमेश्वरे॥ इति अत्रैवंविधेषु दोषेषु प्रायश्चित्तमुक्तं शारदातिल-
के। एवंविधेषु दोषेषु प्रायश्चित्ताय देशिकः। मूलेनाज्येन जुहुयान्मंत्रं च विंशतिमाहुतीरिति पंचविंशतिरेकैकस्मिन्दो-
षे इति शेषं॥ अथ स्रुक्स्रुवौ तत्र श्रीपर्णी शिंशपा चंदन रक्तचंदनबिल्वाम्रपनसचंपकपुन्नागखदिरवैकंकतप-
लाशवटपिप्पलप्लक्षोदुंबराणि वृक्षाणामन्यतमस्य शुक्लमव्रणमशीर्णं शुष्कं दिमिरजुष्टं उद्दिष्टमानादधिकदीर्घ-

स्थूलयुतं समचतुरस्रं काष्ठं गृहीत्वा तत्र षट्त्रिंशदंगुलेन चतुर्विंशत्यंगुलमानं षट्त्रिंशदंशेन विभज्य तेषु विंशत्यंशेन दंडार्थं वि-
भज्यावशिष्टषोडशभागेष्वग्रदेशे भागाष्टकं मुखार्थं परिकल्प्यावशिष्टभागाष्टकेन समचतुरस्रां वेदिं कृत्वा तन्मध्ये
बिंदुं कृत्वा तच्चिह्नमवलंब्यार्धांशमानेनाभितो वृत्तं निष्पाद्य तद्बहिरष्टकोंशमानेन वृत्तं निष्पाद्य वृत्तयोरंतराले भा-
गत्रयनिम्नं मध्ये वृत्ताकारां कर्णिकां स्थापयन् गर्तं कृत्वा तद्बहिर्द्व्यंशमानेन वृत्तं निष्पाद्य तद्बहिरष्टकोंशमानेन
वृत्तांतरं कृत्वा वृत्तद्वयांतराले ष्टदलानि परिकल्प्य तद्बहिर्द्व्यंशमानेन परितश्चतुरस्राकारां मेखलां विधाय तन्म-
ध्ये अर्द्धांशमानेन सुसमाकारां विचित्रां वा शोभां विदध्यात्॥ ततोग्रे वशिष्टत्र्यंशेष्टकोंशेन वेद्यास्तत्तीयांशे
न पार्श्वद्वयखंडेन मध्ये कंठं विधाय कंठतः किंचिदुन्नतमवशिष्टैः सप्तभिरंशैरग्रे कंठसमानविस्तारं समतलमध-
स्तादधोधः क्षीयमाणविस्तारं मुखं कृत्वा मुखेपि वेदीवन्मेखलां परिकल्प्य कंठादधो मुखस्य मेखलामभिंदन्त्र-
णाकाराग्रे कोंशमानं निम्नं कनिष्ठाप्रवेशयोग्यं खातं कृत्वा कर्णिकामध्यस्थखातमध्यात्मुखमध्यस्य प्र-
णाकारखातमध्ये यथाघृतं निस्सरति तथा जोदृशांशाकार्याकंठवेदीपरिधिं भेदिनं सुषिरं विधाय तथैवाग्रेपि
मुखपरिधिभेदिनं घृतनिर्गमनाय कनिष्ठाप्रवेशयोग्यं रंध्रं कुर्यात्॥ ततो वेद्याः पश्चाद्भागे कूर्माकारं मध्ये किंचिन्निम्नमत्रं मो

सौ.र.क.
प.

यथा निम्नत्वं तिष्ठति तथा कृत्वा मुखस्य पृष्ठभागे मध्ये किंचिन्निम्नं कृत्वा मुखरंध्राधस्तात्पृष्ठभागे हंसमुखाकारं गजमु
खाकारं वराहमुखाकारं वा मुखरंध्रं कारयित्वा स्रुवं यंत्रमारोप्य नद्दं उद्घृष्यमाना किंचिदधिकस्थूलं सुवर्तुलं ग्रीवास्थि
वरेण कारयित्वा दंडस्य मूले एकांशेन कंकणाकारं त्रयं चतुष्टयं वा कृत्वा तदग्रांशत्रयोग्रमुखकंठमध्यमजादि
तुशोभितमूर्ध्वमुखं कुंभं निर्माय तदधः पुनरेकांशेन कंकणानि कृत्वा तदधो नवांशमानेन सुवर्तुलं षडंशमानदैर्घ्यस
हितं वेष्टनयोग्यस्थूलं दंडमध्यं कृत्वा तदधः पुनरेकांशेन कंकणानि तदूर्ध्वचतुष्टयेन प्रागवदूर्ध्वमुखं कुंभं तदधः पुनरेकां
शेन कंकणानि च कुर्यादिति स्रुवं निर्माय स्रुचमपि चतुर्विंशतिभागदैर्घ्यस्थूलमग्रदेशे शरद्वयमानेन वर्तुलाकारस्थूलशि
रोभागयुतं सुवर्तुलं स्रुवं निर्माय तस्य मुखप्रदेशे पंकमध्यगतेस्तपोतपद्माकारे कर्षमात्रघृतग्राहि खातं कृत्वा तदधो
दंडमूले एकांशमानेन प्रागवत्कंकणानि तदधो मात्रयेण कुंभं ततएकांशेन पुनः कंकणानि ततएकादशांशमात्रं च
तुरंशमानदैर्घ्यं तत्र वेष्टनयोग्यस्थूलदंडमध्यं कृत्वा ततएकांशेन कंकणानि ततोंशचतुष्टयेन कुंभं पुनरेकां ७
शेन कंकणानि च कुर्यादिति। स्रुक्स्रुवनिर्माणप्रकारः। एवं स्वर्णरौप्यताम्रमयौ वा स्रुक्स्रुवौ कार्यौ स्रुक्स्रुवाभावे प
लाशस्य मध्यपत्रद्वयं पिप्पलदलद्वयं वा होमे ग्राह्यं संस्कारेपि स्रुक्स्रुवयोरिव तस्मिन्समये पर्णयोरपि कार्य इति। अथ

प्रकृते क्रियादीक्षाशक्त्यानां वर्णदीक्षाविधिर्लिख्यते। तत्र पुंप्रकृत्यात्मकान् ककारादिक्षकारांतान् मातृकावर्णान् प्रकृ
त्यात्मके शिष्यदेहे प्रागुक्तविधिना विन्यस्य पुनः संहारक्रमेण मूर्द्धादिहृदयांतस्थं क्षकारं हृदयादिनाभ्यंतस्थे ळ
कारे संहरामि हृदयादिनाभिपर्यंतस्थं ळकारं हृदयादिवामपादाग्रपर्यंतस्थे हकारे संहरामि हृदयादिवामपादा
ग्रपर्यंतस्थं हकारं हृदयादिदक्षिणपादाग्रपर्यंतस्थे सकारे संहरामि हृदयादिदक्षपादाग्रावधिस्थं सकारं हृदयादिवा
मपाणप्राग्रावधिस्थे षकारे संहरामि हृदयादिवामपाण्यग्रावधिस्थं षकारं हृदयादिदक्षिणपाण्यग्रावधिस्थे शका
रे संहरामि। एवं पुनः शकारं वकारे संहरामीत्यादिमुखवृत्तस्य माकारं शिरस्थे अकारे संहरामीत्यंतमुक्त्वा पुनः वर्णान्संहृ
त्य तत्स्वैतन्यं सकलतत्त्वग्रामसमेतं परमात्मनि संयोज्य विलीनसकलतत्त्वसमूहं विगतनिखिलकंचुकं दिव्यत
नुं शिष्यं संचिंत्य पुनः परमात्मनः सकाशात् क्षकारादिककारांतान् वर्णान् सृष्ट्या प्रागुक्तसृष्टिन्यासक्रमेण शि
ष्यदेहे मातृकावर्णान्विन्यस्य पुनस्तच्चैतन्यं तत्त्वग्रामसमेतं तस्मिन्संयोज्योक्तविधिनोपदेशं कुर्यात्॥ इति वर्णदी
क्षा॥ अथ कलादीक्षा॥ तत्र पादतो जानुपर्यंतं निवृत्तिकला। जानुतो नाभिपर्यंतं प्रतिष्ठाकला। नाभितः कंठपर्यंतं विद्या
कला। कंठाल्ललाटपर्यंतं शांतिकला। ललाटाद्ब्रह्मरंध्रांतं शांत्यतीतकला शिष्यदेहे च संचिंत्य निवृत्तिकलां प्रतिष्ठाकलायां

सौ॰र॰कृ॰
प॰

संहरामि प्रतिष्ठाकलां विद्याकलायां संहरामि। विद्याकलां शान्तिकलायां संहरामि। शान्तिकलां शान्त्यतीतकलायां संहरामि
। शान्त्यतीतकलां परमात्मनि संहरामि इति क्रमात्संहृत्य वेधयित्वा पुनः परमात्मनः शकाशात् शान्त्यतीतकलां ततः शां
तिं ततो विद्यां ततः प्रतिष्ठां ततो निवृत्तिं च सृष्टिक्रमेण शिष्यदेहे तत्तत्स्थाने संयोज्योपदेशं कुर्यात्॥ एवमष्टत्रिंशत्क
लाभिर्वा एकपञ्चाशत्कलाभिर्वा प्रागुक्ताभिरुक्तयुक्त्या संहारसृष्टिन्यासक्रमेण शिष्यं संस्कृत्य दीक्षां दद्यात्॥ इतिक
लादीक्षा॥ अथ स्पर्शदीक्षा॥ तत्र गुरुः स्वहस्तदले शिवरूपं स्वगुरुं ध्यायन् मूलविद्यां षडंगमंत्रान्न्यात्वा को च ज
पन् शिष्यस्य शिरसि दक्षिणकरं निधायोपदिशेत्॥ इति स्पर्शदीक्षा॥ अथ वाग्दीक्षा। तत्र गुरुः परचिद्रूपे शिवे
चित्तं निधाय तद्दृक्तान्समस्तमंत्रान् ध्यायन् तन्मयः स्वयं शिष्याय मंत्रानुपदीशेत्। इति वाग्दीक्षा॥ अथ दृग्दीक्षा
तत्र गुरुः स्वनेत्रे निमील्य परमात्मस्वरूपिणीं मंत्रदेवतां ध्यात्वा प्रसन्नचित्तो दिव्यचक्षुषा शिष्यं निरीक्ष्य मंत्रोपदेशं कु
र्यात्॥ इति दृग्दीक्षा॥ पश्चादुक्तमेतद्दीक्षात्रयं विरक्तानामशक्तानां शिष्याणां तत्त्वविदा गुरुणा कार्यमिति। स्त्रीणां
तु वाग्दीक्षैव विहिता नान्या॥ अथ वेधदीक्षा॥ तत्र गुरुः शिष्यस्य मूलाधारे चतुर्दलपंकजमध्यगतत्रिकोणमध्ये प्रसु
प्तरूपां कुंडलिनीं ध्यात्वा तया तत्रस्थचतुष्टयमध्यस्थ वादिसान्ताक्षरचतुष्टयं तन्मध्यस्थिते कमलासने संहृत्य तत्र

२१८

क्षाणां तदूर्ध्वगतस्वाधिष्ठानाख्यषट्पत्रकमलमध्यस्थिते विष्णौ संयोज्य वेधयित्वा तत्पत्रषट्कमध्यस्थ वादिलान्तव
र्णषट्कं च विष्णौ संयोज्य तदूर्ध्वे नाभिमंडले दशदलकमलात्मके मणिपूरकचक्रे विष्णुं संयोज्य तत्पत्रदशकमध्य
स्थडादिफान्तवर्णदशकसहितं विष्णुं तत्पंकजमध्यस्थे रुद्रे संयोज्य वेधयित्वा तं रुद्रमनाहताख्ये हृत्स्थे कादिठा
न्तद्वादशवर्णद्वादशदलयुक्ते संयोज्य तैरक्षरैः सार्धं तं रुद्रं तन्मध्यस्थिते ईश्वरे संयोज्य वेधयित्वा कंठदेशे
षोडशस्वराख्यषोडशदलकमले विशुद्धिचक्रे तमीश्वरं संयोज्य तैः स्वरैः सार्धमीश्वरं तन्मध्यस्थे सदाशिवे
संयोज्य वेधयित्वा तं सदाशिवं भ्रूमध्यस्थद्विदलकमलपंकजमाज्ञाचक्रं नीत्वा तत्पत्रद्वयस्थहक्षवर्णद्वय
सहितं सदाशिवं च तन्मध्यवर्तिनि बिंदौ संयोज्य वेधयित्वा तं बिंदुं तदूर्ध्वस्थितायां कलायां संयोज्य तां पुनर्नादे ना
दं नादान्ते नादान्तमुन्मन्यां। तां विषुवत्के विषुवर्के विषुवत्के चेत्युत्तरोत्तरं संयोज्य वेधयित्वा जीवात्मना सह तां कुंडलिनीं
परशिवे संयोज्य वेधयेत्। एवं कृते शिष्यो गुर्वाज्ञया छिन्नसंसारपाशः परशिवो भवेत्॥ ततो गुरुः संहृतविपरीतक्र
क्रमेण परशिवात्कुंडलिनीमुत्थाप्य तया संहृतमखिलं सृष्टिक्रमेण शिष्यदेहे तत्तच्चक्रे तां तां देवतां संयोज्य हृदये
जीवं मूलाधारे कुंडलिनीं च संयोज्योपदेशादिकं कुर्यात्॥ ततः शिष्यः सञ्जातदिव्यबोधो भूत्वा भविष्यवर्त्मा

ततः सदाशिवो भवति॥ इति वेधदीक्षा॥ अयः कलौ वेधदीक्षाकरो गुरुः तयोग्यः शिष्यश्च दुर्लभस्तस्मात् कुलाचार्याः प्र
संगाद्यापि लिखिते यन्त्रिशिवं। अथै वंदीक्षितानां सद्भक्तियुक्तानां कृतपुरश्चरणक्रियाणां नित्यनैमित्तिकरता-
नां विदितविविधविद्यारहस्यानां शिष्याणां गुरुः पूर्णाभिषेकाख्यं द्वितीयमभिषेकं कुर्यात्॥ तच्च प्रागुक्ते सुरम्ये मंड-
पे वेदिकारहिते प्रागुक्तलक्षणं वक्ष्यमाणषट्। त्रिंशदधिकसार्धसहस्रं कलशस्थापनयोग्यं विपुलतरं श्रीचक्रं
विरच्य तच्चतुरस्ररेखात्रयान्तरालगतवीथीद्वये षिढिदशकस्थानेषु अष्टाष्टकस्थानेषु षोडशदलेषु अ-
ष्टदले चाष्टधाष्टकपूजास्थानेषु च त्रिकोणानि कृत्वा मध्यस्थत्रिकोणस्य कोणत्रये प्रतिकोणमेकैकां तिर्यग्रेखां
कृत्वा त्रिकोणत्रयं निष्पाद्य तेषु चतुर्दशारद्वयारां तत्र चक्रचतुष्टयगतद्विचत्वारिंशत्त्रिकोणेषु च संभूय पंचनव-
तिसंख्येषु श्रीचक्रगतावरणदेवतापूजास्थानत्रिकोणेषु प्राक्त्रिकोणं रेखात्रयेपि प्रतिरेखं समान्तरालानि त्री-
णि त्रीणि चिह्नानि कृत्वा तेषु चिह्नाद्विक्रमितिक्रमेण गुरूक्तेषु स्थानेषु नवनव तिर्यग्रेखाभिः षोडशत्रिकोणानि कृत्वा
मध्यगतत्रिकोणस्यान्तराले दलं कृत्वा तन्मध्ये स्वाभिमुखाग्रत्रिकोणं कृत्वा तत्रापि प्रागुक्तयुक्त्या षोडशत्रिकोण-
नि कृत्वा तेषु सर्वमध्यत्रिकोणमध्ये दीक्षाप्रकरणोक्तविधिना वक्ष्यमाणरत्नादिप्रमाणजलपूर्णकुंभं संस्था-

प्यान्येषु षष्ट्यवन्ति त्रिकोणगर्भितेषु पंचत्रिंशदधिकसार्धसहस्रसंख्याकेषु त्रिकोणेषु तावत्संख्याकान् कलशान् जल-
जलपूर्णान् वस्त्रयुग्मवेष्टितान् नवरत्नादियुतान् स्थापयित्वा सर्वमध्यस्थकुंभे देवीमावाह्य प्राग्वत्सर्वोपचारैः सांगां
सावरणां प्रोक्तक्रमेण संपूज्य कुंभेस्वशान् षट्त्रिंशदुत्तरसप्तशताधिकविंशतिसहस्रसंख्याकाः कालनित्या-
विद्याः प्रजपेत्। तास्तु प्रागेव पारायणप्रकरणे प्रदर्शिताः। गुरुमुखादवगंतव्याः॥ एवं शिष्यस्य जन्मनक्षत्रदिना-
त्पूर्वदिने जन्मनक्षत्रदिने वा पूर्वमधिवासनं कृत्वा पूर्वदिनाधिवासनपक्षे पूर्वेद्युरुक्तविधिनाधिवासनं विधाय शिष्यस्य
जन्मनक्षत्रे गुरुः प्रातः स्नात्वा नित्यक्रियां निर्वर्त्य मध्यस्थकुंभे देवीं सांगां सावरणां संपूज्य मूलविद्यां महोत्तरसहस्रं
जपित्वा नित्यहोमप्रोक्तविधिना स्थंडिलादौ वह्निं संस्थाप्य नित्यहोमोक्तद्रव्यैर्यथाशक्तिं कृत्वा पूजाशेषं समाप्य शृंग-
काहलादिनानावादित्रघोषपुरःसरं ब्राह्मणाशीर्वादैः सह गुरुः प्राकृतिमंत्रितैर्देवतात्मभिः पूजितैः शक्तिसाधकैः
सार्धं स्वयं प्रधानकुंभे समुत्थाप्य प्रागुक्तविधिनाऽभिषिंचेत्॥ ततः शक्तयः सामयिकाश्च कलशानुत्थाप्योत्थाप्याभि-
षेकं कुर्युः॥ ततः शिष्याय दिननित्यापर्यायनित्योदयास्तरादिकं स्वक्रमं सर्वं कथयेत्॥ शिष्योपि तदारभ्याविच्छिन्नपर्यायं
यथा भवति तथा गुरूक्तक्रमेण भजनं कुर्यात्॥ पर्याये गुर्वाज्ञामन्ते विच्छिन्ने शिष्यः साभिषेकं मूलविद्यां महोत्तरसहस्रं

सौ·र·क·
प·

भवेत्॥ प्रायश्चित्तार्थमिति विच्छिन्नदिनानां च मेकैकसंध्यात्रयसहितजपं शतावृत्तिजपं च प्रायश्चित्तं कृत्वा तद्दिना
निक्रमं जपं कुर्यादिति॥ अथ पूर्णाभिषेके प्रागुक्तषोडशत्रिकोणकरणादिविस्ताराशक्तौ विपुलश्रीचक्रमु
द्धृत्य तत्र प्रागुक्तषण्णवतित्रिकोणेषु मध्यत्रिकोणे वह्निकुंभमध्ये पुक्त जशान्ध्याग्वत्सं स्थाप्य संपूज्याभिषिंचेत्॥
अत्र षण्णवतिकलशस्थापनपक्षे त्वावरणशक्तीनां प्रतिकलशमेकैकदेवतापूजनं मध्यकुंभे मूलदेव्याः पूजनमिति
॥ अत्रोत्तरः पक्षस्त्वशक्तविषयः॥ इति पूर्णाभिषेकविधिः॥ खारिजलक्षणं तु मत्स्यविष्णुपुराणे। पलद्वयं तु प्रसृतं द्विगु
णं कुडवं मतं। चतुर्भिः कुडवैः प्रस्थः प्रस्थश्चत्वार आढकः॥ आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः। कुंभो
द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडशेति खारीलक्षणं॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्य
रत्नाब्धौ वह्निविंशस्तरंगकः॥ ॥ इति श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे त्र्याविंशस्तरंगः॥ ॥
श्रीगुरवे नमः॥ अथैवं प्राप्तसिद्धविद्याभिषेकाणां साधकानां श्रीगुरुपादुकाभक्तिलक्षणं तत्पादुकामाहात्म्यं तद्भज
नेन प्राप्यं फलं तदभक्तानां प्रत्यवायं तद्भक्तैः कर्तव्याचारादिकं च लिख्यते। तत्र श्रीकुलार्णवे। वागुरामूलबल
येसृत्राप्याः कवलीकृताः॥ एवं कुलागमे ज्ञानं पादुकायां प्रतिष्ठितं॥ कोटिकोटिमहादानात्कोटिकोटिमहाव्र

तात्॥ कोटिकोटिमहायज्ञात्परा श्रीपादुकास्मृतिः॥२॥ कोटिमंत्रजपात्कोटितीर्थावगाहनात्॥ कोटिदेवार्च
नाद्देवि परा श्रीपादुकास्मृतिः॥३॥ महारोगे महोत्पाते महादुःखे महाभये॥ महापदि महापापे स्मृता रक्षति पादु
का॥४॥ तेनाधीतं श्रुतं ज्ञातं दत्तमिष्टं च पूजितं॥ जिह्वाग्रे वर्तते यस्य सदा श्रीपादुका प्रिये॥५॥ सकृच्छ्रीपादुकां दे
२ वि यो वा जपति भक्तितः॥ स सर्वपापरहितः प्राप्नोति परमां गतिं॥६॥ शुचिर्वाप्यशुचिर्वापि यो भक्त्या स्मरति पादुकां॥
अनायासेन धर्मार्थकाममोक्षान्लभेत सः॥७॥ श्रीनाथचरणांभोजं यस्यां दिशि विराजते॥ तस्यां दिशि नमस्कुर्या
द्भक्त्या प्रतिदिनं प्रिये॥८॥ न पादुकापरो मंत्रो न देवः श्रीगुरोः परः॥ न हि शक्त्याः परो मार्गो न परं कुलपूजना
त्॥९॥ ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदे॥ मंत्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा॥१०॥ गुरुमूलाः क्रियाः मंत्र
सर्वाः लोकेस्मिन्सुखदायिके॥ तस्मात्सेव्यो गुरुर्नित्यं सिद्ध्यर्थं भक्तिसंयुतैः॥११॥ तावदार्तिर्भयं दुःखं मोहशो
कभ्रमादयः॥ यावन्न याति शरणं श्रीगुरुं भक्तिवत्सलं॥१२॥ तावद्भ्रमति संसारे सर्वदुःखमलीमसः॥ यावन्न
भोजते भक्त्या श्रीगुरुं शिवरूपिणं॥१३॥ सर्वसिद्धिफलोपेतो मंत्रस्कंधोतिशोभनः॥ गुरुप्रसादमूलोयं परत
त्वमहाद्रुमः॥१४॥ यथा ददाति संतुष्टः प्रसन्नो वरदो मनुः॥ तथा भक्त्या धनैः प्राणैर्गुरुं यत्नेन तोषयेत्॥१५॥

गुर्वर्थं धारयेत्प्राणान्गुर्वर्थं चार्थमर्पयेत्॥अपि प्राणान्परित्यज्य गुरुवाक्यं न लोपयेत्॥१८॥

सौ.र.क.
प.

यदाददाच्छिवायत्वं संज्ञात्मानं देशिकोत्तमः॥तदा मुक्तो भवेच्छिष्यो न ततोस्ति पुनर्भवः॥१६॥तावदाराधयेच्छिष्यः
सुप्रसन्नो यथा भवेत्॥गुरौ प्रसन्ने शिष्यस्य सद्यः पाशक्षयो भवेत्॥१७॥भवसाधिनिकांक्षे न भक्तो मानानुजीविका
संपादयंति तत्सर्वे स्वामिनो भक्तवत्सलाः॥ब्रह्मा विष्णु महेशान देवता मुनि योगिनः॥कुर्वंत्यनुग्रहं तुष्टा गुरौ तुष्टे न
संशयः॥१९॥भक्त्या संतुष्टगुरुणा यो पदिष्टः कृपालुना॥कर्मयुक्तो भवेच्छिष्यो मुक्तियुक्तो सभाजनं॥२०॥शि
ष्येणापि तदा ग्राह्यं यदा संतोषितो गुरुः॥तस्माद्गुरोः प्रियं कुर्यात् मनोवाक्कायकर्मभिः॥२१॥यदि वा परितु
ष्टेन गुरुणा यत्र कुत्रचित्॥मुक्तोसीति समादिष्टः सोपि मुक्तो भवेत्प्रिये॥२२॥अयवाचिः प्रपंचेन धाम्ना केन
चिदीश्वरि॥करोमि गुरुरूपेण पशुपाशविमोचनं॥२३॥न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः॥त
स्मै देयं ततो ग्राह्यं संपूज्योत्यहं यथा॥२४॥विप्रोपि गुणयुक्तो वाप्यभक्तो न प्रशस्यते॥म्लेच्छोपि गुणहीनो वा भक्ति
मान्स विशिष्यते॥२५॥गुरुभक्तिविहीनस्य तपो विद्या व्रतं कुलं॥निःफलं हि कुलेशानि केवलं लोकरंजनं॥२६॥
गुरुभक्त्याख्यदहनदग्धं दुर्जातिकल्मषं॥श्वपचोपि परैः पूज्यो न विद्वानपि नास्तिकः॥धर्मार्थकामैः किं तस्य मो
क्षस्तस्य करे स्थितः॥सर्वार्थे श्रीगुरौ देवि यस्य भक्तिः स्थिरा सदा॥स शिवो गुरुरूपेण भुक्तिमुक्तिप्रदो मम॥इति

२२२

धर्मा

भक्त्याऽस्मरेद्यस्तु तस्य भक्तिरहरन्॥२९॥यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥तस्यैते कथिता ह्यर्थाः प्रकाशं
ते कुलेश्वरि॥३०॥नारायणे महादेवे मातापित्रोश्च राजनि॥यथा भक्तिर्भवेद्देवि तथा कार्या निजे गुरौ॥ल
क्ष्मीनारायणौ वाणीधातारौ गिरिजाशिवौ॥श्रीगुरुं गुरुपत्नीं च पितरौ प्रविचिंतयेत्॥३२॥गुरुभ
क्त्या यथा देवि प्राप्यंते सर्वसिद्धयः॥यज्ञदानतपस्तीर्थव्रताद्यैर्न तथा प्रिये॥३३॥श्रीगुरौ निश्चला भक्तिर्व
र्द्धते हि यथा यथा॥तथा तथास्य विज्ञानं वर्द्धते कुलनायिके॥३४॥किं तीर्थैर्य महायासैः किं व्रतैः कायशोषणैः॥निर्वा
णसेवा देवेशि भक्तिर्येषां हि सद्गुरौ॥३५॥कायक्लेशेन महता तपसा वापि यत्फलं॥तत्फलं लभते देवि सुखेन गुरुसेव

विश्वी
या॥३६॥भोगमोक्षार्थिनां ब्रह्मविष्णुशिवपदकांक्षिणां॥भक्तिरेव गुरौ देवि नान्यः पंथाः श्रुतिः॥३७॥अशुभानि च सं
मा
चितानि महापातककानि च॥भक्तिज्ञानेन दहति तूलराशिमिवानलः॥३८॥विघ्नापायनमस्तस्मै सर्वसिद्धिप्रदायिने॥
येन मद्रूपरूपदः फलं मविकल्पं फलं॥३९॥न योगो न तपो नाचकिमः कोपि निगद्यते॥भ्रमाये कुलमार्गेस्मिन् भक्तिरे
व विशिष्यते॥४०॥मास्ताद्गुरुमये देवि सर्वस्मिन्भुवनांतरे॥किं न भक्तिमतां सिद्धं मंत्रः केषां न सिध्यति॥४१॥गुरौ म
नुष्यबुद्धिं च मंत्रे चाक्षरबुद्धिकां॥प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत्॥४२॥गुरुं न मर्त्यं बुध्येत यदि बुध्ये

सौ.र.क.
प.

तनस्तु॥ कदापि न भवेत्सिद्धिर्मंत्रैर्वा देवतार्चनैः॥४३॥ श्रीगुरुंपादुकैः सार्द्धं ये स्मरंति वदंति वा॥ तेषां चैव सुकृतं सर्वं रि
पातकं न भवति प्रिये॥४४॥ जन्महेतू हि पितरौ पूजनीयौ प्रयत्नतः॥ गुरुर्विशेषतः पूज्यो धर्माधर्मप्रदर्शकः॥ गु
रुः पिता गुरुर्माता गुरुर्देवं गुरुर्गतिः॥ शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥ गुरोर्हितं हि कर्तव्यं वाङ्मनःका शिवो नदि
यकर्मभिः॥ अहिताचरणाद्देवि विष्ठायां जायते कृमिः॥४७॥ शरीरं वित्तं प्राणांश्च श्रीगुरुं वंचयंति ये॥ कृमिकीट
पतंगत्वं प्राप्नुवंति नराधमाः॥४८॥ गुरुत्यागाद्भवेन्मृत्युर्मंत्रत्यागाद्दरिद्रता॥ गुरुमंत्रपरित्यागाद्रौरवं नरकं व्रजे
त्॥४९॥ गुर्वर्थं धारयेद्देहं तदर्थं धनमर्जयेत्॥ निजप्राणान्परित्यज्य गुरुकार्यं समाचरेत्॥५०॥ गुरूक्तं पौरुषं वा यदु
कोमलाशिषं चिंतयेत्प्रिये॥ तेन संताडिते वापि प्रसादमिति संस्मरेत्॥५१॥ भोगयोग्यानि वस्तूनि गुरवे सर्वमर्पयेत्
स्व ॥ तच्छेषमिति संचिंत्य सेवातुमया कुलेश्वरि॥५२॥ गुर्वर्थेन तपः कुर्यान्नोपवासव्रतादिकं॥ तीर्थयात्रां च नो कुर्या
आज्ञा न्स्नायादात्मशुद्धये॥५३॥ न नियोगं गुरोर्देवि शुश्रूषकमिति भावयेत्॥ ऋणदानं तथा दानं वस्तूनां क्रयविक्र
यं॥५४॥ न कुर्याद्गुरुभिः सार्द्धं शिष्यो भूत्वा कदाचन॥ न कुर्यान्नास्तिकैर्वादं संभाषणमपीश्वरि॥ विलोक्य लोके:
दूरतो गच्छेन्नासीत सह तैः क्वचित्॥५५॥ गुरौ संनिहिते यस्तु पूजयेदन्यमंबिके॥ स याति नरकं घोरं सा पूजा नि:

फलं भवेत्॥ शिरसा न वहेन्नारं गुरुपादाब्जधारिणं॥ तदाज्ञया न कर्तव्यमाज्ञारूपो गुरुः स्मृतः॥ मंत्रागमाद्यमन्नं च वस्तु तत्त
स्मै निवेदयेत्॥ गुर्वाज्ञया न गृह्णीयान्नेदं निषिद्धं विवर्जयेत्॥ स्वशास्त्रोक्तं रहस्यार्थं न वदेद्यस्य कस्यचित्॥ यदि ब्रूयात्स स
मयात्स्युत एव न संशयः॥ अद्वैतं भावयेन्नित्यं नाद्वैतं गुरुणा सह॥ आत्मवत्सर्वभूतेषु हितं कुर्यात्कुलेश्वरि॥ आत्मस्था
नो गसंज्ञा वैः शुश्रूषा सा चतुर्विधा॥ शुश्रूषया तया देवि शिष्यः संतोषयेद्गुरुं॥ पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयं॥
शुश्रूषणपरो यस्तु गुरुदेवमहात्मनो॥ केवलं गुरुशुश्रूषा तत्कृपाकारिणी प्रिये॥ सद्भक्तिसहिता सा चेत्सर्वकामफलप्रदा॥
स्तीर्यते सर्वपापानि वर्द्धते पुण्यराशयः॥ सिद्ध्यंति सर्वकार्याणि गुरुशुश्रूषया प्रिये॥ यद्यदात्महितं वस्तु तत्तद्धितं निवे
येत्॥ गुरुदेवार्चकोऽपि स्तुतस्य पुण्यं न गण्यते॥ भक्त्या वित्तानुसारेण गुरुतुष्टिं प्रयत्नतः॥ स्वल्पं वा बहु वा पुण्यं तुल्य
माढ्यदरिद्रयोः॥६६॥ सर्वस्वमपि यो दद्याद्गुरवे भक्तिवर्जितः॥ शिष्यो न फलमाप्नोति भक्तिरेव हि कारणं॥ यस्मिन्देवे
गुरोरस्ति स्पृहा नातु भवेच्चेतनं॥ अवश्यं यदि वांछा स्याद्दत्तं स्यात्तदाज्ञया॥ यत्तिलार्द्धं तदर्द्धं वा गुरुस्वमुपजीवति॥
प्रलोभान्मोहात्स पच्यते नरके चिरं समं के॥ अन्यादस्वं गुरुद्रव्यं मर्दंतं स्वीकरोति यः॥ तिर्यग्योनिमापन्नः कृम्या मतं
दैर्भक्ष्यते प्रिये॥ गुरुद्रव्याभिलाषी च गुरुस्त्रीगमनोत्सुकः॥ पतितस्य सुहृत्कस्य प्रायश्चित्तं न विद्यते॥ आज्ञाभंगो गुर्व्व

कौ.र.क.
प.

दूषणं गुरोरप्रियवर्त्तनं॥ गुरुद्रोहमिदं प्राहुः यः करोति स पातकी॥ स्वद्रव्यविनियोगं च नानिवेद्य गुरोश्चरेत्॥ अनिवेद्य तु यः
कुर्यात्स भवेद्ब्रह्मघातकः॥ गुरुस्थानं संप्रदायं तद्धर्मं यो विनाशयेत्॥ गुरुभिः स बहिः कार्यो दंड्यो वध्यश्च पातकी॥ गु
रुकोपान्न नाशोऽस्ति गुरुद्रोहान्न पातकं॥ न स्मृतिं गुरुनिंदायां गुर्वनिष्टान्न चापदः॥ अग्नी वेदग्निप्रविष्टो वा नरः पीतवि
षोऽपि वा॥ स्तु हस्तगतो वापि नापराधकरो गुरोः॥७६॥ यत्र श्रीगुरुनिंदा स्यात्तिष्ठायश्च बलेसवके॥ सद्यस्तस्मादपक्रा
मेद्दूरं नस्मरेत्पायथा॥ गुरोर्नमिजवेतस्वाप्य बलेसाद्यति क्रिया॥ गुरुमित्रसुहृद्दासीदासाद्यान्नापमानयेत्॥
घे न निंदेदस्य समयान् वेदशास्त्रागमादिकान्॥ श्रीगुरोः पादुकामन्त्रगुरुनामस्तुतिर्जपः॥ गुर्वाज्ञाकरणं हृत्संस्मु
स्मृताभजनं गुरोः॥ विविस्तु दैशिका वासंशांत चिन्तोति भक्तिमान्॥ यत्र ने पादुकोछत्रं चामरं वाहनादिकं॥ तां ब
जनत्वरणं वेषमुद्रन्यव विशेषकं ते॥ वाहनं पादुकोछत्रं मासनं वसनादिकं॥ दृष्ट्वा गुरोर्नमस्कुर्यात्तान्यभोगाय
कारयेत्॥ पादप्रक्षालनं स्नानमभ्यंगं दंतधावनं॥ मत्रं निष्ठीवनं क्षौरं शयनं स्त्रीनिषेवणं॥ वीरासनं च दुर्वाक्यमा
सनं हास्य रोदनं॥ केशमोचनमुष्णीषं कंचुकं वस्त्रं तोतथा॥ पादप्रसारणं वादं कलहं दूषणं प्रिये॥ अंगभंगो गवाद्यादि
करास्फालनधूननं॥ एतत्कुक्कुटमद्याद्विपुद्दमिरसादिचं विके॥ गुरुयोगिमहासिद्धपीठक्षेत्राश्रमेषु च॥८६॥ नाचरे

सतांजलिपुटे न्यस्त्वा शनैर्गुर्वंघ्रिपाविशेत्

दाचरेन्मोहाद्देवताशापमाप्नुयात्॥ उपचारं विना तिष्ठेद्गुर्वग्रे नेच्छया विशेत्॥ मुखवाकजोकी सेवेत न कुर्याच्च समाचरेत्
॥ गुरुत्वमानुकं कार्येषु नोपेक्षां कारयेत्प्रिये॥ सदसद्यद्गुरुर्ब्रूयात्तत्कार्यमविशंकया॥ निग्रहानुग्रहे वापि गुरुः सर्वस्य
कारणं॥ निर्गतं यद्गुरोर्वक्त्रात्सर्वं शास्त्रं तदुच्यते॥ गुरुकार्ये स्वयं शक्तो नापरं प्रेषयेत्प्रिये॥ बहुत्वेन स्मरेन्मंत्रैः स
हितो प्यति भक्तिमान्॥ गच्छन्तिष्ठन्स्वपन्जाग्रत्जपन्जुह्वन्प्रपूजयन्॥ गुर्वाज्ञामेव कुर्वीत तत्कृतेनो नरा स्म
नो॥ अभिमानो न कर्त्तव्यो जातिविद्याधनादिभिः॥ सर्वदा सेवयेन्नित्यं शिष्यः श्रीगुरुसन्निधौ॥ छायाभूमिपरित्या
गी विनीतस्त्वति भक्तिमान्॥ देवि गुर्वग्रतस्तिष्ठेद्गुरुकार्यसमुत्सुकः॥ स्वकार्यमन्यकार्यं वा शिष्यः श्रीगुरुचि
ग्रवित्॥ गुरुपार्श्वगतो नम्रः अच्छन्नास्यो मितं वदेत्॥ सामान्यतो निषेवेच्चेत् गुरोर्यदि सन्निधौ॥९६॥ आच
रेदिमनलान्तदोषः कोटिगुणो भवेत्॥ अनादरं गुरोर्वाक्यं शृणुयाद्यः पराङ्मुखः॥ अहितं वा हितं वापि रौरवं न र
केव्रजेत्॥ गोब्राह्मणवधं कृत्वा यत्पापं समवाप्नुयात्॥ तत्पापं समवाप्नोति गुर्वग्रेन्तभाषणात्॥ स्था
नं तरगतं वापि व्यसने विषमे स्थितं॥ श्रीगुरुं न त्यजेत्क्वापि तदादिष्टो व्रजेत्प्रिये॥ अधःस्थिते गुरावूर्ध्वेन
तिष्ठेत कदाचन॥ न गच्छेदग्रतस्तस्य न विशेदुत्थिते गुरौ॥ शक्तिछायां गुरुछायां देवछायां न जंघये

सौ.र.क.
७.

त्॥ स्वच्छायां नैव गुरोः कुर्यान्न स्वपेद्गुरुसंनिधौ॥ भाषणं परिधानं गानं भोजनं शयनादिकं॥ अनादिष्टो न कुर्वीत नत्वा वंदनपूर्व
कं॥ बद्धहस्ताग्रतः कुर्याद्गुर्वाज्ञां परिपालयेत्॥ विना गुर्वाज्ञया शिष्यो निःश्वसेन्नापि शासनात्॥ सर्वं गुर्वाज्ञया कुर्यान्ना
लिंगेत स्त्रियं प्रिये॥ भक्त्या प्रणम्य चोत्तिष्ठेद्बद्धांजलिपुटः प्रिये॥ पश्चात्पादेन निर्गच्छेन्नमस्कृत्य गुरोर्गृहात्॥ एकासन
नेनोपविशेद्गुरुणा तत्समैः सह॥ न विशेदासने देवि देवता गुरुसन्निधौ॥ गुरोः सिंहासनं देयं ज्येष्ठानां सुतमासनं दे
यासनं कनिष्ठानामितरेषां समासनं॥ जातिविद्याधनाढ्यो वा दूरे दृष्ट्वा गुरुं सदा॥ दंडप्रणामं कुर्वीत त्रिः प्रदक्षिणमा
चरेत्॥ ततोऽष्टौ षट् द्वादश वाप्येकादि त्रिकमेव वा॥ गुरुं तद्गुरुयोगेन तु वंदेत परमं गुरुं॥ ततो नमेद्गुरुं सोपि गुर्वग्र
तं निवारयेत्॥ प्रगुरोः संनिधौ शिष्यः स्वगुरुं मनसा नमेत्॥ गुरुर्बुध्यानमेत्सर्वं देवतं प्रणमेव वा॥ नैव मेदेव तु
ल्यानु प्रतिमां लोहमृण्मयीं॥ गुरोः प्रणम्य चित्तं ज्येष्ठानामेकमेव च॥ प्रज्ञानो मंत्रलिस्तु हृद्ज्येष्ठेषां वा स्ववंदनं॥ दे
वान्गुरून्कुलाचार्यान्ज्ञानवृद्धांस्तपोधनान्॥ विद्याधिकान्स्वकर्मस्थान्प्रणमेत्कुलनायिके॥ स्त्रीद्विष्टं गुरुभिः
शप्तं पर्वं पतितं शठं॥ विकर्मिणं कृतघ्नं वा नाश्रमिणं प्रणमेत्॥ अनिवेद्य गुरोः किंचित्क्रयं स्वर्गृहसंस्थितः॥ श्राम
अमेध्यं तेन शुक्रं स्यात्क्रकरो जायते मृतः॥ २५॥ एकग्रामस्थितः शिष्यस्त्रिसंध्यं प्रणमेद्गुरुं॥ क्रोशमात्रस्थितो

भक्त्या गुरुं प्रतिदिनं नमेत्॥ अर्द्धयोजनगः शिष्यः प्रणमेत्पंचपर्वसु॥ एकयोजनमारभ्य योजनद्वादशावधि॥ त
त्र योजनसंख्यातमासैर्गत्वा नमेद्गुरुं॥ दूरदेशस्थितः शिष्यो भक्त्या तत्संनिधिं गतः॥ अतिदूरस्थितः शिष्यो यदे
च्छा स्यात्तदा व्रजेत्॥ रिक्तहस्तस्तु नोपेयाद्राजानं दैवतं गुरुं॥ फलपुष्पांबरादीनि यथाशक्त्या समर्पयेत्॥ ए
वं यो नाचरेद्देवि विश्वस्य राक्षसतां व्रजेत्॥ गुरुशाक्तिस्य तत्सुतो ज्येष्ठभ्राता गुरोः समः॥ अल्पवयाश्च कनीयांसः पुत्र
वत्कुलपालकाः॥ लोकाचार्यस्य देवेशि गुरुज्येष्ठकनिष्ठयोः॥ गुरुकन्यस्य कुर्वीत प्रणामं स्वगुरोर्यथा॥ स्व
ज्येष्ठस्य क्रमज्येष्ठः कुलज्येष्ठस्तृतीयकः॥ गुरोर्ज्येष्ठस्तु देवेशि इति ज्येष्ठचतुष्टयं॥ यावज्ज्येष्ठाभिवादे तु क्र
मको ज्ञोगरीत॥ गुरोस्त्वेगुलक्ष्य वंदनादिविधानतः॥ पितृमात्रादिसर्वेषु पक्षकोटिशुवं ध्रुवं॥ अभ्युत्थान प्रणा
मादैरस्यक्तो दोषजाघवैः॥ यदात्वाचार्यरूपेण स्वात्मानं संप्रकाशयेत्॥ अभ्युत्थान प्रणामादौ रस्यक्तो दोषजा
घवः॥ यदात्वाचार्यरूपेण स्वात्मानं संप्रकाशयेत्॥ अभ्युत्थान प्रणामादौ दोषदः स्यान्न हि प्रिये॥ पतिं कृत्वापत्नुम
स्तु प्रणामं यः करिष्यति॥ स महापशुरित्युक्तो देवताशापमाप्नुयात्॥ यो गुरुः स्थानकं प्राप्तः पादुकापरिसं
स्थया॥ गुरुवत्सतु मंतव्यो ज्येष्ठो वंद्यो न च प्रिये॥ २२८॥ ॥ इति पादुकाचारविधिः॥ ॥ अथ समयाचारवि

सौ.र.क.
प.

धिः॥ तत्र कुलार्णवे॥ श्रीगुरुं कुलशास्त्राणि पूज्यस्थानानि यानि तु॥ नाम्ना श्रीपूर्वकं देवि प्रणम्य परिकीर्त्तयेत्॥१॥
श्रुत्वादित्तं वपर्यंतं यस्य मे गुरुसंततिः॥ तस्य मे सर्वशिष्यस्य कोन पूज्यो महीतले॥ गुरुं नाम्ना न भाषेत जपकालादृते
प्रिये॥ श्रीनाथदेवस्वामीति विवाहे वोधनो वदेत्॥ श्रीगुरोः पादुकां मुद्रां मूलमंत्रं स्वपादुकां॥ शिष्यादन्यत्र देवेशि न व
देद्यस्य कस्यचित्॥ पारंपर्यागमाम्नायमंत्राचारादिकं प्रिये॥ सर्वं गुरुमुखाल्लब्धं सफलं स्यान्न चान्यथा॥ श्रीशा
स्त्राश्रयनूतं च पुस्तकं देववत्प्रिये॥ निःसंसमर्च्चयेद्भक्त्या पशुहस्ते न निक्षिपेत्॥ स्वदारवन्निषेवेत कुलशास्त्रा
णि पार्वति॥ पशुशास्त्राणि सर्वाणि वर्जयेत्परदारवत्॥ स्वचर्मस्थितयथाक्षीरमपेयं स्याद्द्विजोत्तमैः॥ तथा पशुमुखाद्
गीतं श्रोतव्यं कौलिकैः॥ यः शृणोति कुलाचारं यथाशास्त्रं च यो वदेत्॥ तावुभौ गच्छतः साक्षाद्योगिनीवीरमेल
नं॥ अश्रद्दधानाये चात्र कुलधर्मं कुलेश्वरि॥ नरकान्न निवर्त्तेते यावदाभूतसंप्लवं॥ तावत्तानयाप्रीतामन्ये
न च समाहृता॥ सकृद्वामगता चापि पंचधा गुरुयोषितः॥ अलंघ्याः पूजनीयास्तु गुरुवद्गुरुयोषितः॥ कुलोत्पु
कोलक्षवर्णा कुमारी च कृशोदरी॥ मनोहरा यौवनस्था मर्द्दयेद्देवताधिया॥ आममांससुराकुंभमंत्रेमे सिद्धलिं
गिनं॥ सहकारमशोकं च क्रीडालोलां कुमारिकां॥ एकवृक्षं श्मशानं च समस्तं योषितामपि॥ नारीं चरकवसनां दृष्ट्वा

२२६

वंदेत भक्तितः॥ गुरुशक्तिसुतज्येष्ठकनिष्ठकुलदेशिकान्॥ कुलदर्शीनशास्त्राणि कुलद्रव्याणि कौलिकान्॥ क्षे
त्रकोन्नतचक्राण्यपि वाचकान्दर्शकांस्तथा॥ १६॥ शिवं तकान्बोधकान्योगियोगिनीः सिद्धपूरुषान्॥ कन्याकुमारकों
नग्नोन्मत्तामपि योषितं॥ न निंदन्न जुगुप्सेत न हसेन्नापमानयेत्॥ नाप्रियं नानृतं ब्रूयात्कस्यापि कुलयोगिनः
कुरूपेमतिहृष्टोतिनवृद्धे कुलयोषिते॥ परिसेयेन्नभक्तानां वीराणां च हृतनाहृतं॥ न पश्येदनितां नग्नां मुन्म
त्तां प्रकटस्तनीं॥ न दिवा सेवयेन्नारीं न योनिं च न निरीक्षयेत्॥ याकाचिदंगना लोके सा मातृकुलसंभवा॥ कु
प्यंति कुलयोगिन्यो वनितानामतिक्रमात्॥ शत्रुं नापराधं च निनां पुष्पेणापि न ताडयेत्॥ दोषान्न गणयेत्स्त्री
णां गुणानेव प्रकाशयेत्॥ तिष्ठंति कुलयोगिन्यः कुलवृक्षेषु सर्वदा॥ तस्मात्तेषु नमोक्रव्यं यत्नेन विशेषतः॥
न त्वपेत्कुलवृक्षाधो न चोपद्रवमाचरेत्॥ दृष्ट्वा भक्त्या नमस्कुर्यात् छेदयेन्न कदाचन॥ स्त्रीभ्यां तककरंज्ञास्त
निवास्यन्त्य कदंवका॥ बिल्वोवटोडुंवरश्च कुले वृक्षा नवस्मृताः॥ देवतागुरुशास्त्रादिसिद्धाचारविडंव
नकः॥ विद्याचोरो गुरुद्रोही स्वरासत्संतां व्रजेत्॥ गुरुं मोहाद्दनाद्दृत्य निर्भर्त्स्य वीरपूरुषान्॥ विकल्प्य कु
लशास्त्राणि भवंति व्रह्मराक्षसाः॥ १७॥ एकाक्षरप्रदातारं यो गुरुं नैव मन्यते॥ श्वानयोनिशतं गत्वा चांडा

मे.र.क.
प.

लत्वमवाप्नुयात्॥ गुरुं प्रकाशयेद्धीमान् मंत्रं नैव प्रकाशयेत्॥ अप्रकाशप्रकाशाभ्यां क्षीयेते संपदायुषी॥ कुलधर्ममना
श्रित्य स्वाचारं यो न पालयेत्॥ यथेष्टाचारिणस्तस्य महापातकिनः प्रिये॥ आपदो दुरिता रोगा दारिद्र्यं कजद्रोभयं
॥ योगिनीनां प्रकोपश्च भविता च पदे पदे॥ वर्तमानः प्रनष्टश्च तेजोहीनोतिदुःखितः॥ निंदितः सर्वविद्विष्टो वि
कलाः संगवर्जितः॥ देशाद्देशांतरं याति कार्यहानिश्च सर्वदा॥ न चापि कुलमार्गस्थाः साकिन्यः कुलपालि
काः॥ भक्षयंति पुरा तां मां वरोद्दामयैव तु॥ तस्मादाचारवान्देवि योगिनीनां प्रियो भवेत्॥ सदाचारेण देवत्वं यो
गिनी वीरमेलने॥ संज्ञानुवर्ति तिर्यक्के कौलिकास्तद्विपर्ययात्॥ संस्कारेण विहीनत्वात् गुरुवाक्यस्य लंघनात्॥ आ
चारलंघनाद्देवि कौलिकः पतितो भवेत्॥ ३६॥ नित्यं नैमित्तिकं काम्यं मंत्रनेत्रादि लोपने॥ अनर्हपशुदृःसंगे मंत्रसा
कर्यसंभवे॥ गुप्तप्रकटसंभूते ज्ञाताज्ञानकृते प्रिये॥ एवमादिषु दोषेषु पापस्य गुरुलाघवं॥ देशं कालं वयो वित्तं स
म्यक् ज्ञात्वा यथाविधि॥ प्रायश्चित्तं गुरुर्दद्यात्सर्वपापविशुद्धये॥ शिष्योपि च तथा लोके प्रायश्चित्तं समाचरेत्॥ अ
थवा सर्वपापानां गुरुनामजपस्मृतिः॥ जोवनदस्य काष्ठं परिशुद्धं यथाग्निना॥ अनाचारस्य मालिन्यं प्राय
श्चित्ताग्निना दहेत्॥ बहुनात्र किमुक्तेन रहस्यं शृणु पार्वति॥ वर्णाश्रमाणां सर्वेषामाचारः स्मृतिपूर्वः॥ गुरु

२२७

श्चिचारमाचारं कथयेत्कुलनायिके॥ तत्त्वग्रज्ञातिशिष्यश्चेत्सदा पापं गुरोर्न हि॥ मंत्रिदोषश्च राजानं भार्यादोषः स्व
पतिं यथा॥ तथा प्राप्नोत्यसंदेहः शिष्यपापं गुरुः प्रिये॥ तथा प्रयोगसारे। देवस्थाने गुरुस्थाने स्मशाने वा चतु
ष्पथे॥ पादुकासनविण्मूत्रमैथुनानि विवर्जयेत्॥ देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताः॥ सिद्धं सिद्धाधि
वासं च श्रीपूर्वं समुदीरयेत्॥ प्रमत्तामत्तमोकस्यां पुष्पितां॥ विरूपां शुष्ककेशीं च कामार्त्तां च न निंदयेत्॥ कन्यायोनिप
शुक्रीडांदिग्वस्त्रां प्रगटस्तनीं॥ नालोकयेन्नरद्रव्यं परदारांश्च वर्जयेत्॥ धाम गोगुरुविप्राग्निविद्याकोशनटान्स्त्रि
॥ नैव प्रसारयेत्पादौ नैतानपि च लंघयेत्॥ आलस्यमदसंमोहसाध्यवैभवविग्रहात्॥ असूयामानसंमाने परनिं
दां च वर्जयेत्॥ लिंगिने व्रतिने विप्रे वेदवेदांगसंहिताः॥ पुराणागमशास्त्राणि कस्यांश्चापि न दूषयेत्॥ पुगंसूशाल
मयमाने दामचुल्लीपुरखले॥ स्पर्शं संमार्जनी दंडं ध्वजं वैदर्यमायुधं॥ कलशं चामरं छत्रं दर्पणं भवनं तथा॥ योग
योग्यानि चान्यानि यागद्रव्याणि यानि च॥ महास्थानेषु वस्तूनि यानि वा देवतालये॥ दिव्यौकानि पदार्थानि भक्ता
विशानि यानि वै॥ लंघयेत्ज्ञानुने तानि नैतानि च पदा स्पृशेत्॥ योगेशीजोकवींढिन्या च स्वैरविसर्पिणी॥
परहिंसात्मिकाया च न नमेन्नरेन्द्रचित्॥ प्रतियद्दं न गृह्णीयादात्मभोगविवित्सया॥ देवतागुरुपूजार्थं

सौ.र.कु. यत्नतोप्यर्जयेद्धनं॥ धारयेदार्जवं सत्यं सौशील्यं समतां धृतिं॥ ५७॥ क्षान्तिं दयां मनःस्थैर्यं च दिव्यां शक्तिं
प. च सर्वदा॥ विनीतकार्यकरं जन्तुं गुरोश्छायां न संश्रयेत्॥ स्तंभदीपमनुष्याणामन्येषां प्राणिनां तथा
॥ नखाग्रकेशनिर्धूतस्नानवस्त्रघटोदकं॥ एतत्स्पर्शात्त्यजेद्दूरं स्वरस्यात्मजरजस्तथा॥ तथास्तोमशेनुः॥ नविंदेत्कारणं देवं
नशास्त्रेतेन निर्मितं॥ न गुरुं साधकं चैव लिंगं छायां न लंघयेत्॥ नाद्याद्वंधेन निर्माल्यं तद्धान्यद्वि वदीक्षिते॥ न तु शि
व निर्माल्यं न तथा॥ षडन्वयमहारत्नं न लंघयेद्गुरोरान्तं पुनरंन वदेत्तथा॥ रात्रौ दिवा च तस्या तदा स वत्सरिपाल
येत्॥ असत्यमशुभं तद्वद्वादं परित्यजेत्॥ अप्रियं च तथा जस्रं कामक्रोधौ विशेषतः॥ अप्रियं च तथा जस्रं
कामक्रोधौ विशेषतः॥ अपृच्छन्मुखतो ब्रूयाद्गुरोरग्रे कदाचन॥ अभिमानं न कुर्वीत धनज्ञातात्ममादिभिः॥ गुरुद
र्शनमोक्षव्यं ते नादत्तं कदाचन॥ दत्तं प्रसादवत्प्राप्तं जेमतो न कदाचन॥ अद्वैते देवपूजां च गुरोरग्रे परित्यजेत्॥ पादु
कायोगपट्टादि गुरुचिह्नानि सादरं॥ न लंघयेत्स्पृशेच्चैव पादाभ्यां प्रणमेत्सदा॥ पर्यंकशयने तद्वत्तथा पादप्रसारणं
॥ अंगभंगं च लीलां च न कुर्याद्गुरुसन्निधौ॥ गमनागमने कुर्यात्त्राणं गुरुपादुकां॥ छायां न लंघयेत्तद्वन्न गच्छेन्न
पुरतो गुरोः॥ पश्चात्पादेन निर्गच्छेत्त्राणं च गुरोर्गृहात्॥ गुरोरग्रे न कुर्वीत प्रभावं शिष्यसंग्रहं॥ अहंकारं न कुर्वीत

१२८

नो चर्मणां धारयेद्गुरुः॥ प्रगुरोः सन्निधौ नैव स्वगुरुं प्रणमेद्बुधः॥ नमस्काराय प्रोद्युक्तं गुरुर्दृष्ट्वा निवारयेत्॥ मन्नियोगं
गुरोर्द्रष्टा पुष्पदानैव भाषयेत्॥ उपयुक्तं परेणैव यदि वादीक्षितेन तु॥ छत्रोपानद्वस्त्रादि नोपयुंजीत कर्हिचित्॥ अ
संपन्नावयोपत्सु न दोषं द्रजिते सति॥ स्वकुले दीक्षितानां चाप्याचार्याणां तथैव च॥ उपयुक्तं न दोषः स्यान्न द
त्वा दत्तादपि॥ मंत्रोपयुक्तमन्त्राद्यं तथा यंत्रं च संस्कृतं॥ प्रागमायतनादेवाः शिरसा प्रणतो वदेत्॥ निक्षिप
दं न सितं तो न पत्रेद्वनीयथा॥ ज्ञातायामापदि न्नं सेशपथं गुरुसंज्ञकं॥ न कुर्याद्द्रावत्संजं प्रमादेन कृतं चेत्॥
न दर्चं निर्वेद द्युत्तादंतपज्ञान पाकृती॥ अनिर्वाहे तु कार्यस्य यद्वर्षं शपथः कृतः॥ प्रायश्चित्तं जपो देवी सहस्रं स्व
मनोस्ततः॥ लोकोद्वेगकरी या च पाचमर्मनिकृंतनी॥ स्थितु द्वेगकरी या च नो गिरं नैव भाषयेत्॥ रम्यमप्युत्सवं ज
मविमनसोविसमीक्षितं॥ लोकविद्वेषणं वेषं न गृह्णीयात्कथंचन॥ अत्रोक्तान्यः सदा चेतानैहिकामुष्मिकोचि
तान्॥ आचारानादृतः शान्तिं दीक्षितः सोधिगच्छति॥ स्त्रीणां विशेषतो देव्यास्तमयं त्वसमजाशयः॥ पाजनात्समया
नां तु सिद्धिरुत्पद्यते चिरात्॥ मेत्र सोमुख्यमायाति समयस्य स्य सर्वदा॥ सिद्धये समयस्यस्य सर्वा स्तु मोर्कपा श्रि
मा॥ अयने विषुवे चैव ग्रहणे चेंद्रसूर्ययोः॥ अष्टम्यां पूर्णिमायां च तेषु पुनैमित्तिको जपः॥ नित्या ब्रितु गुरोणि तं

सोऽथ पूर्णो चैव समाचरेत् ॥ स्वार्जितैः साधनैः स्वदानहोमार्चनादिकं ॥ कुर्याच्चेदधोयाति भक्त्याकुर्वन्नपीश्वरि ॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना ॥ कृते सौभाग्यरत्नाकरे नवविंशस्तरंगकः ॥ ॥ इति श्रीसौभाग्यरत्नाकरे एकोनविंशस्तरंगः ॥ ॥ ॥ श्रीगुरुदेवेनमः ॥ ॥ अथ पुरश्चरणविधिः ॥ तत्र पुरश्चरणसंपन्नो मंत्रो हि फलदायकः ॥ किं होमैः किं जपैश्चैव किं मंत्रन्यासविस्तरैः ॥ रहस्यानां हि मंत्राणां यदि न स्यात्पुरस्क्रिया ॥ पुरस्क्रिया हि मंत्राणां प्रधानं बीजमुच्यते ॥ वीर्यहीनो यथा देही सर्वकर्मसु न क्षमः ॥ पुरश्चरणहीनोऽपि तथा मंत्रः प्रकीर्तितः ॥ इति वैशंपायने पुरश्चरणस्यावश्यकत्वाभिधानात्तस्य तु निष्फलत्वविधिहीनानां फलं नेहेति तु कर्मणामिति विधिहीनानुष्ठाने निंदाश्रवणात्तदनुष्ठानविधिर्विविच्य लिख्यते ॥ ॥ तत्र पुरश्चरणशब्दनिरुक्तिर्वायवीयसंहितायां ॥ साधनं फलमंत्रस्य पुरश्चरणमुच्यते ॥ पुरतश्चरणीयत्वाद्धि नियोगाख्यकर्मणां ॥ पुरतो विनियोगस्य चरणाद्वा नवोदितमिति ॥ विनियोगलक्षणं तु ॥ मंत्रतंत्रप्रकाशे ॥ धर्मार्थकाममोक्षाणां शास्त्रमार्गेण योजनं ॥ सिद्धमंत्रस्य संप्रोक्तो विनियोगो विचक्षणैः ॥ पुरश्चरणपूर्वोऽसौ विनियोगो विनिर्मितः ॥ फलाय मंत्रसेवायाराजसेवा यथा तथा ॥ चरणं पूर्वमेवासौ पुरश्चरणमुच्यते ॥ इति ॥ एतेन काम्यकर्मफलसिद्धिजनकक्रियाऐहिकामुष्मिकमंत्रात्मशुद्धिहेतु

क्रिया वा पुरश्चरणमित्युक्तं ॥ तत्र श्रीविद्यायाः पुरश्चरणमुक्तं ज्ञानार्णवे ॥ यत्र वा कुत्रचित्स्थाने लिंगं सत्पश्चिमामुखं ॥ स्वयंभूर्बाणलिंगं वा वृषशून्यं मलस्थितं ॥ पश्चिमायतने वापि इतरे वापि सुव्रते ॥ शक्तिक्षेत्रे शुभे गंगायां च नद्यां पर्वतमस्तके ॥ पवित्रे पुण्यजे देवि जपेद्विद्यां प्रसन्नधीः ॥ तत्र स्थित्वा जपेल्लक्षं साक्षाद्देवीस्वरूपवान् ॥ ततो भवति विद्येयं त्रैलोक्यवशकारिणी ॥ एवं जपं यथाशक्ति कृत्वादौ साधकोत्तमः ॥ किंशुकैर्हवनं कुर्याद्दशांशेन वरानने ॥ कुसुंभकुसुमैर्वापि मधुरत्रयमिश्रितैः ॥ विधिनोक्तप्रकारेण विघ्नौघं नाशयेत्क्षणात् ॥ सर्वकामप्रदा राज्यभुक्तिमुक्तिफलप्रदेति ॥ इतरे पूर्वायतने ॥ एवं लक्षजप एव श्रीविद्यायाः पुरश्चरणं ॥ दशांशहोमस्य तद्धर्मस्य सर्वकामप्रदत्वादिफलस्य चाप्यभिधानादेतत्तद्धर्मोपदेशादिति न्यायात्तत्वनिर्णयाख्ययोगादौ विधानाद्युक्तानां प्रयोगाणां कर्मसिद्धिरिमाकांक्षायां पुरश्चरणपूर्वोऽसौ विनियोगो विनिर्मित इति वचनात् ॥ तदभिधानस्यैव योग्यत्वाच्च ॥ तथा श्रीक्रमसंहितायामपि जोपासुश्रीविद्यासु रुद्रस्योक्तं लक्षमेवमिदं जप्तं सर्वपापहरो भवेदिति ॥ लक्षरूपमात्रमेवोक्तमिति वामकेश्वरतंत्रेऽप्येवमेवोक्तमिति वदंति ॥ वस्तुतस्तु विचार्यमाणे दक्षिणामूर्तिसंहितैकवाक्यतया ज्ञानार्णवे श्रीचक्रसाधनप्रकारेणोक्तविलक्षजप एव पुरश्चरणमिति भाति यथा ज्ञानार्ण

सौ·र·क·
प·

वे॥ शृणु सर्वांगसुभगे श्रीचक्रविधिमुत्तमं॥ यस्य विज्ञानमात्रेण कर्त्ता हर्त्ता सदाशिवः॥ अनेन विधिना यत्र श्रीचक्रं कुंकुम
संयुतं॥ प्रजप्तेन तु सकलं वशीकुर्यान्न संशयः॥ नगरं वशमायाति देशमंडलमंडितं॥ योषितः सकला वश्याश्च
नक्षामाधिपीडिताः॥ विद्याविभूतिहृदयाः साधके सक्तमानसाः॥ तद्दर्शनेन देवेशि जायंते सर्वयोषितः॥ अदे
मालां समाश्रित्य मालावर्णरूपिणी॥ अष्टमुक्ताफलमयी वांछितफलदायिनी॥ सर्वसिद्धिप्रदा नित्यं सर्व
राजवशंकरी॥ यथा मुक्ताफलमयी तथा स्फाटिकनिर्मिता॥ रुद्राक्षमालिका मोक्षे भवेत्सर्वसमृद्धिदा॥ प्रवाल
मालावश्ये तु सर्वकार्यार्थसाधिका॥ माणिक्यमाला फलदा साम्राज्यफलदायिनी॥ पुत्रजीविकमाला तु व
श्यदा भोगदा भवेत्॥ अस्य मालां प्रकल्प्याथ चंदनेन प्रपूजितां॥ समाश्रित्य जपेद्विद्यां लक्षमात्रं यतः शुचिः॥ योषितो
ध्यायमयंत्रे नमनस्तन्मुक्तिश्च जे॥ तदा द्वितीयलक्षं तु प्रजपेत्साधकोत्तमः॥ पातालतलनागेंद्रकन्यका क्षोभयंति
तं॥ तासां करास्त्रजालैस्तु न मोहं याति साधकः॥ तदा लक्षत्रयं कुर्यात्साधकः स्थिरमानसः॥ तृतीयलक्षे संप्राप्ते
द्रावयंति सुरांगनाः॥ अभिमानेन सौंदर्यसौभाग्यमदकारिणः॥ साधकं द्रावयंत्येव तत्स्वासौ मनस्थिरः॥ तदा
लक्षत्रये साधु सर्वपापनिकृंतनं॥ एवं लक्षत्रयं जप्त्वा तु न स्यात्स्वस्थमानसः॥ संक्षोभयति त्रैलोक्यं पातालतलवा

सिनः॥ पुरुषा योषितो वश्याः स्थावरा चरमपि प्रिये॥ ॥इति त्रिलक्षजपमुक्त्वा श्रीचक्रसाधनस्योक्तत्वाच्छ्रीचक्रसाधनस्य
काम्यप्रयोगत्वात्काम्यप्रयोगस्य विद्यासिद्धेरपश्चिमत्वाद्विद्यासिद्धेः पुरश्चरणमूलकत्वात्पुरश्चरणमनुक्त्वा काम्य
प्रयोगः॥ कथनानौचित्यादस्माज्ञानेदनिरूपणादस्माज्ञायाः पुरश्चरणप्रकरण एव वक्तव्यत्वादिति प्रवाकृत्य
कथनादेवं विधानां विद्यानां सिद्धिप्रतिबंधकतया पुरश्चरणकाल एव निषिद्धत्वात्काम्यजपेषु तत्फलविद्याना
मिव फलत्वेनाभिधानाच्च तस्थुः स्वस्थमानस इति नियमनस्थैर्ययोः पुरश्चरणकाल एवास्तेनमावश्यकत्वे
न तत्कथनस्यौचित्याद्दक्षिणामूर्तिसंहितायामपि॥ शृणु देवि प्रवक्ष्यामि श्रीविद्यामंत्रसाधनं॥ शमीदूर्वा
कुराश्वत्थपत्रैरर्कसंभवैः॥ श्रीचक्रं पूजयेद्देवि मासमात्रं समाहितः॥ सहस्रजन्मजं पापं हंति मासेन
दैशिकः॥ इत्यारभ्य प्रायश्चित्तपूर्वकं नानाविधकाम्यप्रकारेणैव स्यान्नास्माज्जोप्याद्विजपलक्षणं
प्रागुक्तप्रकारेण विप्रत्रयकथनपूर्वकं च लक्षत्रयजपमुक्त्वा तद्दशांशेन होमः स्यात्कुसुमैर्बिल्वदलैः
कुसुंभपुष्पैर्जुहुयान्मधुरत्रयसंमिलैः॥ इति तद्दशांशहोमकथनादेव लक्षत्रयजपरूपं पुरश्चरणमिति त
त्त्वं॥ यत्तु तान्त्रिके॥ यत्र वा कुत्रचिल्लिंगे लिंगे सरित्सागारस्य जपस्थानकथनपूर्वकं तत्र स्थित्वा जपे

सौ.र.क.
प.

लक्षं साक्षाद्देवी स्वरूपवानित्युक्तं स तु जलस्याष्टः पूर्वोक्तलक्षत्रयस्मारकः दक्षिणामूर्तिसंहितैकवाक्यात्॥ अतएवस्त्री च
क्रसाधनप्रकरणे तुक्तस्थानहोमावचोक्तौ अन्यथा तत्समाख्यानामप्यैवं वक्तुमुचितत्वात्॥ नवलक्षजपस्यापि
पुरश्चरणं केचिद्वदंति॥ तदप्युक्तं दक्षिणामूर्तिसंहितायां॥ अथवा नवलक्षं तु जपेद्धीमान् समाहितः॥ तद्दशांशेन हो
मं तु पूर्वोक्तविधिना चरेत्॥ साधयेत्स्वर्गभूर्लोकपातालतलवासिन इति॥ ज्ञानार्णवे तु नवलक्षजपेनोक्तः
किं तु एकलक्षस्मारस्यैकल्पे स्यात्स्येदं फलमित्यादिनवलक्षपर्यंतस्य पृथक् पृथक् फलमुक्तं न तु द्वितीयल
क्षस्य तृतीयलक्षस्येति॥ तस्मात्तत्र संततयपंचचत्वारिंशल्लक्षजपो जायते॥ तेन तत्र पुरश्चरणत्वशंका
पि नास्ति॥ स तु काम्यजप एवेति॥ निश्चितं वर्णसमाम्नायात्तु ब्रह्मनाडीगतानादिक्षांतवर्णान्विभाव्य चा अ
र्णविंदुयुतं कृत्वा स्वेष्टमंत्रं जपेत्सुधीः॥ अकारादिषु संयोज्य तथा कादिषु चक्रमात्॥ स्थानमेकमथो तत्र
कल्पयेज्जगदीश्वरि॥ तदा लिपिर्भवेद्देवि समाख्याईशतसंख्यया॥ अनया सर्वमंत्राणां जपः सर्वार्थसाधकः॥ क्षका
ने रमेकसंख्यायां जकारादिविलोमतः॥ एकैकोत्तरितं मंत्रं जपेदेवं फलप्रदमिति॥ कुलमजावलारोक्ताअचा होत्तर
सहस्रं वा शोत्तरशतं चापदा जपः॥ कार्यस्मात्तदा वर्गाष्टकविभेदेन भवेदष्टोत्तरंशतमिति॥ अत्र वर्गाष्टकजपस्तु

तुद्धिहशतादिसंख्यावसानएव कर्तव्यः॥ एवकृतयुगजपः॥ कलावेतच्चतुर्गुणजपादिकं कार्यमिति॥ तंत्रराजेत्
ता त्रीपकृतस्य स्वरव्यंजनबिंदूत्रपृथक्कृते समास्तरात्रिभवंतितेषां समस्तानां वर्णानां इति वर्णत्रिलक्षमिति॥
संभूय एकविंशतिलक्षजपः पुरश्चरणं कृतयुगे॥ कलावेतच्चतुर्गुणजप इति पुरश्चरणमुक्तं॥ पुरश्चरणं
तु जपहोमतर्पणाभिषेकब्राह्मणभोजनात्मकपंचांगरूपं भवति॥ अत्रैतदंगपंचकेपूर्वपूर्वदशां
शतः॥ कार्यमिति तंत्रराजे तु होमसंख्यासमसंख्येतर्पणमितिशेषः॥ केचित्तु जपो होम तर्पणं च स्याभि
षेकोपमर्पणं॥ सर्पार्घ्यं जजपानं च ब्राह्मणं देव पूजनं॥ ब्राह्मणानां भोजनं च पूर्वपूर्वदशांशतः॥ दशांगोपा
सनेनैवापुरश्चरणमुच्यते॥ इति वचनाद्दशांगे वदंति॥ अत्र संसारे दुःखभयविह्वये यदीछेत्सिद्धिमात्मनः॥ पं
चांगोपासनेनैव मंत्रमापीसुखं व्रजेत्॥ इति कुलप्रकाशतंत्रवचनात्॥ बहुसंमतत्वाच्च॥ पंचांगमेव पुरश्चरणं
प्रसिद्धमिति॥ केचित्तु सारदातिलकप्रपंचसारादिषु जपहोमाविभिधाय प्रयोगाभिधानाज्जपहोमयोरेव पुरश्चर
णत्वे वदंति तच्चरम्यं बहुतंत्रविरोधात्॥ तत्रापि सामान्यपरत्वे पंचांगस्यैव पुरश्चरणस्योक्तत्वाच्चेति॥ अथ दे
शः॥ तत्र समुद्रतीरपर्वतमस्तेगसमुद्रगामिनदीतीरविस्तृतगृहविविक्तनिजगृहगोशालाश्वत्थबिल्वमूलजला

सौ.र.कू.
प.

शयपश्चिमामुखवृषभस्य शिवालयगुरुसंनिधितुलसीवनस्येष्टदेवतासंनिधिपुण्यक्षेत्रतीर्थवनोपवननदीह्रद
स्वाभिमतस्थानम्लेच्छदुष्टमृगव्याघ्रशंकावर्जितैकांतनिंदारहितधार्मिकस्येष्टदेवताभक्तजनाश्रयसुभिक्षनि
रुपद्रवराजनन्सचिवादिगमनागमनरहितस्थानानि येषामभ्यन्तमं स्थानं ग्रामे क्रोशमात्रं नगरे क्रोशद्व
यं नदीपर्वततीर्थादौ परिणामरहितं अमुकस्येदं मंत्रस्य पुरश्चरणसिद्धये ॥ मयेयं गृह्यते भूमिर्मे त्रोमेस्थि
ध्यनामितिमंत्रेण भूमिपरस्य हंविधायक्षीरवृक्षसंभवान्नवितस्तिमितान्दशकीलान्कृत्वाऽस्त्रमंत्रेण पुष्पकु
ष्यकुंकुमप्रष्याभिमंत्र्य पूर्वादिष्टदिक्षु ईशानयोर्मध्ये निर्ऋतिवरुणयोर्मध्ये च निखनेत् ॥ तेषु त्रिषु संपूज्य
तेषु स्थानेषु इंद्रादिदशदिक्पालेभ्यो माषभक्तबलिं दद्यात् ॥ ततः क्षेत्रपालं गणेशं वास्तुपुरुषं च संपूज्य प्रा
कृष्णस्य कूर्मायतादिस्नानायतांस्थानस्यान्तसारेरवा विलिख्य नवकोष्ठानि कृत्वा तेषु पूर्वादिक्रमेण कचटतपयशा
ख्यान्सप्तवर्गान्सप्तकोष्ठेषु विलिखेत्ये शासकोष्ठे लसौ विलिख्य मध्यकोष्ठं तथैव नवधा विभज्य पूर्वादिक्रमेण हि
शः विदिशः षोडशस्वरान्स्वकोष्ठेषु लिखेदिति कूर्मचक्रं निर्माय तत्र मध्यनवकेमध्ये पूर्वादिक्रमेणाष्टसु दिक्षु
चाष्टतवर्गभवेजराजवासुकार्थकल्पच्छक्तिपद्मयोनिमहाशंखच्छायाछत्रगणान्नवक्षेत्रपाजान्सेवा

दितत्पुष्पीनमोंततत्वनाम्ना संप्रपूज्य मनामाद्यक्षरयुक्तकोष्ठदिशि कूर्ममुखेन दलानेमध्ये कूर्मपृष्ठे वा सुखवाद
धः कोष्ठद्वयान्ततमे कूर्महस्ते वा ग्रहे जपार्थं शीतवातातपविवर्जितं गृहं कुर्यात् ॥ अथ वर्णस्थानानि ॥ अ
वर्णस्य गकारेण कुं वर्णस्य चकारेण टवर्णस्य पकारेण ओकारस्य षकारेण जकारस्य टकारेण ञकारस्य
रस्य खकारेण उकारस्य तकारेण फकारस्य धकारेण नकारस्य रेफेण यकारस्य सकारेणेति ॥ तेषामभो
ष्मरित्वं यत्र स्थानं साधकयोराद्यक्षरेणारित्वं तत्स्थानं त्याज्यमिति ॥ अथ जपमाला ॥ पुत्रजीवशंखप्र
वालरत्नस्फटिकमुक्ताफलपद्मबीजरजतसुवर्णकुशग्रंथिरुद्राक्षान्यतमनिर्मिता श्रोत्ररशनच
तुःपंचाशत्सप्तविंशतिसंख्या तैर्बीजैर्युक्ता समेरुका कार्या ॥ अथ मालासंस्कारकालः ॥ विष्णोर्द्वादश्याः श्र
वर्क्षः ॥ शक्तेरष्टमीनवमीचतुर्दशीरात्रिः ॥ शिवस्य त्रयोदशी दिवा गणेशस्य चतुर्थी दिवा सूर्यस्य सप्तमी
दिवा इति ॥ अथ मालायाः सूत्राणि ॥ विष्णोः पट्टसूत्रं कार्पाससूत्रं वा देव्याः पट्टसूत्रं शिवस्योर्णं वा वल्कलं
वा ॥ सूर्यगणेशयोः कार्पाससूत्रं पट्टसूत्रं वा कार्पाससूत्रं च ब्राह्मणीकृतं स्वसमानवर्णयोषित्कृतं वा
त्रिगुणं त्रिगुणीकृतं कुर्यात् ॥ अन्येषु सूत्रेषु यथेष्टमेव स्यो ज्यमानं ॥ अथ संस्कारः ॥ तत्र गोमूत्रगोम

सो.र.कं.
प.

यद्गव्यदधिघृतकुशोदकात्मकं पंचगव्यमिति ज्ञात्वा घृतेन च होमार्थं संपाद्य ध्यानः॥ कृतनित्यकृत्यः कृतभोजनः साध-
को रात्रौ सूत्रं मणींश्च प्रत्येकं प्रत्येकं पंचगव्येन संशोध्य प्रक्षाल्य नवसु पिप्पलदलेषु पद्माकाररचितेषु सूत्रं
मणींश्च संस्थाप्य तेषु प्रणवं भुवनेश्वरीबीजं मातृकां च विन्यस्य मणिसूत्रं च गंधादिभिः संपूज्य स्थंडिला-
द्वावग्निं संस्थाप्य यथाशक्ति सघृतैस्तिलैः सद्यादिपंचमंत्रैः कृत्वा होमाशक्तौ जपं विधाय सूत्रेषु खेषु पुन-
र्वं संयोजयन् मणीनारोप्य एकैकं मणिमध्ये ब्रह्मग्रंथिं विधाय गोपुच्छाकारेण सर्पाकारेण वा ग्रथ-
यित्वा सर्वतः स्थूलं सजातीयमेकं मणिं सूत्रे हृदयमेकीकृत्य मेरुं ग्रथयित्वा॥ सद्योजातं प्रपद्यामि सद्यो-
जाताय वै नमः॥ भवे भवे नातिभवे भजस्व मां भवोद्भवाय नमः इति मंत्रेण पंचगव्येन शीतलजलेन च प्र-
क्षाल्य ॐ वामदेवायेति मंत्रेण चंदनागरुकर्पूरकुंकुमैर्विलिप्य ॐ अघोरेभ्य इति मंत्रेण अगरु-
उशीरशर्करागुग्गुलमधुचंदनघृतैर्धूपयित्वा ॐ तत्पुरुषायेति मंत्रेण गंधचंदनकस्तूरीकुंकुमकर्पूरैर्लेप-
येत्॥ ततः ॐ ईशानः सर्वविद्यानामिति मंत्रेण प्रतिबीजं शतं सहस्रं वाभिमंत्रयेत्॥ मेरुं चानेन अघोरेभ्य इत्यनेन वाभि-
मंत्रयेत्॥ तत आवाहनस्थापनसंनिधापनसंनिरोधनसंमुखीकरणसकलीकरणावगुंठनामृतीकरणपर-
णप१

मीकरणानि॥ तत्र मुद्राभिर्विधाय प्राणमंत्रैः पंचभिर्मंत्रैः प्रतिबीजं पंचोपचारैः स्वेष्टदेवतावत् संपूज्य त्वा इत्थं सं-
स्कृतमालया जपं कुर्यादिति॥ अथ प्रतिष्ठाप्रकरोक्तशास्त्राणामेव नामेषां अन्येषां संस्कारप्रकारस्तु य-
थितां माला कुत्रचित्ताम्रे संस्थाप्य तस्यां गणेशसूर्यविष्णुशिवदुर्गाः प्रत्यकं प्रत्यकं आवाह्य पंचोपचा-
रैः संपूज्य ह्रौं इति मंत्रेण पंचगव्ये निक्षिप्य पुनस्तस्मादुद्धृत्य शीतलजले निक्षिप्य प्रक्षाल्य चंदनकस्तूरी-
कुंकुमकर्पूरागरुभिरनुलिप्य तस्यां ह्रौं मंत्रमष्टोत्तरशतं जपित्वा सूर्यादिनवग्रहादिंद्रादिदिक्पालांश्च सं-
पूज्य सघृतैस्तिलैर्यथाशक्ति मूलमंत्रेण हुत्वा यथाशक्ति कांचनं गुरवे दक्षिणां दत्वा ब्राह्मणांश्चान्नादिभि-
स्तोषयेदिति लेके॥ प्रकारः प्रकारांतरस्तु सूत्रमणींश्च पंचगव्ये अहोरात्रं स्थाप्य चतुर्थदिने तस्मादुद्धृत्य अस्त्रमंत्रेण प्रक्षा-
ल्य हृन्मंत्रेण ग्रथयित्वा कवचमंत्रेण प्रतिबीजं ब्रह्मग्रंथिं नागपाशं वा विधाय मेरुं च प्रणवेन बध्नीयात् ततः स्थंडिले श्री-
४ चक्रं कृत्वा तत्र स्वेष्टदेवतां संपूज्य मूलविद्यामष्टोत्तरशतं जपित्वा पुरश्चरणोक्तदशांशेनैतस्या वर्त्तनं वा कृत्वा श्रीचक्रमध्ये
मालां संस्थाप्य तस्यां मस्त्रमलेन गंधाद्यैः स्वस्वेष्टदेवतारूपां तां मूलविद्यया संपूज्य प्राणप्रतिष्ठां बलिदानं विधा-
य पुनस्तस्यां स्वेष्टदेवतारूपां तां श्रीमूलविद्यया संपूज्य प्राणप्रतिष्ठां बलिदानं विधाय पुनस्तस्यां स्वेष्टदेवतां संपूज्य

सौ·र·क·
प·

रवेदक्षिणां दत्वा ब्राह्मणभोजनादिभिस्तोषयेदित्ययं प्रकारः॥ इति तृतीयप्रकारः॥ अथ पुरश्चरणकाले विहि
हितानि मनःसंहरणं शौचं मौनं मंत्रार्थचिंतनाव्यग्रता॥ निर्वेदस्त्यागजपोत्साहक्रोधत्यागस्वधर्मानुष्ठानपरितुष्टे
न्द्रियनिग्रहब्रह्मचर्यगुरुनतिसाधुसंसर्गसुगंधामलकस्नानमंत्राभिमंत्रितजले नाभिषेकत्रिषवणादिस्नव
नमशक्तौ सकृत्वा स्नानं पित्रादितर्पणं मध्याह्नपत्रहितपलाशपत्रावल्यां रात्रौ मितभोजनं गोविप्रकन्यादिपूज
पावस्थमाणं पंचतिक्ते सहिततोर्ज्जलभस्मणं सुगंधोंगवसनं मुखकेशधारणं च॥ पंचतिक्तानि तु। पंचतिक्ते
मुखे क्षिप्त्वा जपं कृत्वा समर्पयेत्॥ तस्माहं सकलं पृथ्वीं ददामि कुरुष्वोत्तमं॥ कौलं वै पंचतिक्तेस्य कौलं कुल
समुद्भवं॥ तस्मादेयं प्रयत्नेन देव्यै चोद्भवमिच्छता॥ एला जाती फलं चैव कर्पूरं च लवंगकं॥ जातीपत्रं तथा देवि
पंचतिक्तमिदं प्रियै॥ इति रुद्रयामलोक्तं॥ पंचतिक्तसहितं वृजभस्मणं सुगंधोंगवसनमुखकेशधारणं च॥ अथ
निषिद्धानि॥ अभियानरतभाषणकरंजविभीतकार्कस्नुहीछायाकमणप्रतिग्रहास्त्रीशूद्रपतितोच्छिष्टनास्तिकसं
भाषणस्नानतर्पणाद्यनुष्ठानवक्रुवस्त्रैकवस्त्रमलिनवस्त्रधारणकाम्यकर्मासंकल्पितकर्मस्वाश्रमाद्यविहि
तकर्माचरणकोस्यभोजनासन्नापणान्यपूजनकौटिल्यचौरासाधुसमागमो स्नानजलस्तानोन्म[illegible]नगीतवाद्य

२३४

दिग्वसनत्वपरशनाष्टविधमैथुनतत्कथालापस्त्रीतस्पर्शप्राणिहिंसाकंचुकोष्णीषधारणप्रलापकराद्यावरणके
शमोक्षणशिरःप्रावरणचिंताक्रोधभ्रमत्वरामनोरथशयनगमनोत्थानांधकारामंगजस्थानपादुकाधारण
यानशय्याधिरोहणपादप्रसारणोत्कटासनस्तुतनंभादिकांदिविकलमनशनत्वपौष्टपादत्वनग्नत्वकुशर
हितकरणत्वानि च॥ अथ जपः॥ स च त्रेधोपांशुजिह्वामानसभेदाच्चतुर्विधः। स्पष्टपदाक्षरपूर्वकोच्चारणो
वाचिकः॥ ईषदोष्ठचालनपूर्वकं किंचित्श्रवणयोग्य उपांशुः जिह्वामात्रसंदेन जपो जिह्वाजपः॥ मनसा पदाक्षर
णां उच्चारमै मानसः। वाचकादीनामुत्तरोत्तरं फलं पौष्कल्यं दशशतसहस्रगुणत्वेनेति॥ अथासनानि। व्याघ्रच
र्ममृगाजिनवैत्रजकंबलकुशकटरक्तवस्त्रात्मकानि॥ अथ निषिद्धासनानि॥ वंशदारुजन्मभिपाषाणतृणपल्लवे
ष्टके ष्टकानिर्मितानि॥ अथ जपारंभात्पूर्वदिनकृत्संतत्र प्रातः स्नात्वा नित्यक्रियां विधाय भोजनादिभिर्ब्राह्मणां
स्तोषयित्वा गुरुमपि विचित्रभूषणवस्त्रादिभिः परितोष्य स्तौं क्षेत्रपालायनम इति मंत्रेण क्षेत्रपालं संपूज्य प्रागुक्त
वलिं गृह्ण गृह्ण स्वाहा दानविधिना क्षेत्रपालाय ए हि विदुपिपुरुपुरुमंजयभंजयनर्त्तयनर्त्तयविघ्नविघ्नमहा
भैरवक्षेत्रपालबलिं गृह्ण गृह्ण स्वाहा॥ इति मंत्रेण बलिं दत्वोपवशेत्॥ शक्रोद्ये देवक्षिरात्रे बलिमुपोषणं

सौ.र.क.
प.

चकुर्यात्॥ अथपुरश्चरणारंभदिनत्संलग्नदीक्षोक्तमासर्क्षतिथिशुद्धेदिवसेप्रातःस्नात्वागुरुर्विप्राज्ञामादायकु
शहस्तःस्वस्तिकवचनंकारयित्वाॐसूर्यःसोमोयमःकालःसंध्येभूतान्यहःक्षपा॥ पवनोदिक्पतिर्भूमिराकाश
खचरामराः॥ ब्रह्मंशासनमास्थायकल्पध्वमिहसंनिधिं॥ इतिपठित्वाताम्रपात्रेकुशतिलाक्षतजलान्यादायो
दङ्मुखः॥ ॐअद्यामुकेमासिअमुकराशिगतेसवितरिअमुकपक्षेअमुकतिथौभारतवर्षाख्यप्रदेशेवि
शेषदेशेअमुकगोत्रोमुकशर्माहंश्रीअमुकश्रीविद्यासिद्धिकामःइयत्संख्यजपात्मकंपुरश्चरणमहंकरिष्ये॥
इतिसंकल्प्यगुरुगणेशदुर्गामातॄर्नत्वाऐंजांसमाप्यजपमारभेत्तत्रमूलविद्ययाप्राणायामत्रयंकृत्वाम
लविद्यायाःप्राग्वदृष्यादिकरषडंगन्यासान्विधायदेवींध्यात्वामानसैरुपचारैःसंपूज्यएतान्मूलवर्णक
पूरजातीफलजलीपत्रात्मकंपंचपतिकंदेव्यैसमर्प्यतन्मुखेस्थितांजपमालांवामहस्तेकृत्वाचित्तेवासंस्थाप्यअ
र्घोदकेनमूलविद्ययानुसृत्यॐमांमालेमहामायेसर्वशक्तिस्वरूपिणि॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धि
दाभव॥ ह्रींसिद्ध्यैनमः। इतिगंधपुष्पाक्षतैर्मालांसंपूज्यगंअविघ्नंकुरुमालेत्वंइतिमंत्रेणदक्षिणहस्तेनमा
लामादायस्वशिरसिगुरुंकंठेपीतवर्णांमूलविद्यांहृदयेस्वेष्टदेवतामात्मानंगुरुपादयोर्ध्यात्वागुरुमंत्रदे

वतात्मनामैक्यंभ्रूमध्यस्थाज्ञाचक्रेविभाव्यकंठस्थविशुद्धिचक्रेतच्चतुष्टयमेकीभूतमानीयतत्रसर्वेश्वरीप
रदेवतांध्यात्वामूलविद्ययाहृदयस्थानाहतचक्रमानीयतत्रापिभगवतींध्यायन्मंत्रार्थगतचित्तोहृद
यसमीपेमालामानीयदक्षिणहस्तस्यमध्यमांगुलिमध्यपर्वणिसंस्थाप्यैकचित्तोनुग्रीवःसमुन्नतगा
त्रःकंठमौनरहितःखटखटादिशब्दमकुर्वन्मालायाःप्रतिबीजंमंत्रमुच्चरन्पर्वबीजजपसमयेपरवी
जमस्पृशन्प्रणवोच्चारणपूर्वकमारभ्यप्रातःकालान्मध्याह्नावधिदेशाद्युपद्रवसंभावनायांप्रहरत्रयाव
धिवाजपित्वापुनःप्रणवमुच्चार्यत्वंमालेसर्वदेवानांप्रीतिदाशुभदामम॥ शिवंकुरुष्वमेभद्रेयशोवीर्यंचस
र्वदा॥ ह्रींसिद्ध्यैनमः। इतिमंत्रेणमालांशिरसिसंस्थाप्यपुनःप्राणायामत्रयंकृत्वाऋष्यादिकरषडंगन्यासान्विधायार्घोमि
दकेनप्राग्वत्कृतंमंत्रेणदेवताहस्तेजपंसमर्प्यमालांजपनमंत्रेणमालांप्राग्वत्संपूज्यरहसिस्थापयेत्॥ ततोमध्याह्नस्ना
नादिकंविधायपुनःप्रभोर्विसर्जनंकृत्वाप्रतिदिनहोमपक्षेजपदशांशंकल्पोक्तद्रव्यैर्होमंकुर्यात्॥ प्रतिजपहोम
पक्षेजपसंख्यंजपंतद्दशांशहोमादिकंचसमाप्याग्रिमजपारंभंकुर्यात्॥ कल्पोक्तसंख्यासमाप्त्यनंतरहोम
पक्षेकल्पोक्तसंख्यजपंसमाप्यपश्चाद्दशांशहोमादिकंकुर्यादितिपक्षत्रयेप्येकःपक्षोप्यंगीकार्यः। होमपर्यायस्तुप्र

मौ.र.क्त.
प.

गेवदीक्षाप्रकरणेभिहितहोमाशक्तौ तावदादद्गौतमः॥ होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः॥ इतरेषां तु
वर्णानां त्रिगुणादिर्विवर्धीयत इति॥ द्विगुणजपस्तु पुरश्चरणजपस्य। इतरेषां क्षत्रियवैश्यद्विजभक्तव्यतिरिक्त-
शूद्राणां द्विजभक्तानां शूद्राणां तु द्विजपत्नीतुल्यजपाभिधानात्॥ तथा कुंभसंभवे॥ यदि होमे न शक्तिः स्याद-
जापं तर्पणेपि च॥ तावत्संख्यजपेनैव ब्राह्मणाराधनेन च॥ भवेदंगद्वयेनैव पुरश्चरणमार्यवै॥ यद्यदंगं वि-
हीयेत तत्संख्याद्विगुणो जपः॥ कर्तव्यः सांगसिद्ध्यर्थं तदशक्तेन भक्तितः॥ तावत्संख्याजपेन यावता पुरश्चर-
णं तेन प्रकृतजपद्विगुणजपलाभः॥ न च होमद्विगुणजपः प्रजायोसंख्याभावेन तद्वैगुण्याभावात्॥ उत्तर-
ग्रंथविरोधात्। तदशक्तेन द्विगुणजपासमर्थेन यद्यदंगं न [illegible] संपद्यते तावत्संख्याद्विगुणो जपः।
कर्तव्य इति॥ तथा कुलार्णवेपि॥ यद्यदंगं विहीयेत तत्संख्याद्विगुणं जपं॥ कुर्वीत त्रिःचतुःपंचसंख्यया साधकः
प्रिये॥ कुर्वीत सांगसिद्ध्यर्थं तदशक्तेन भक्तितः तेन शक्तानां द्विजातीनां द्विगुणादिजपः॥ अशक्तानां होमसंख्या-
द्विगुणादिजपः॥ द्विजभक्तव्यतिरिक्तशूद्राणां पंचगुणजपः॥ द्विजभक्तानां द्विजस्त्रीणां च द्विगुणादिजपेनैव
पुरश्चरणं दक्षिणा च प्रदातव्या गुरोर्दिव्याद्विजन्मना॥ भक्तियुक्तस्य शूद्रस्य दक्षिणा द्विगुणा भवेत्॥ स्त्रीणामपि त-

२३५

था पालेया भक्तस्यैव फलं भवेदिति गौतमेन विप्रभक्तस्य शूद्रस्य विप्रपत्नीनां च ततो द्विगुणदक्षिणाविधाना-
देकं च त्रिगुणीत इति न्यायेन जपेपि तथा कल्पनादिति॥ अपरे तु होमाशक्तानां द्विजातीनां क्रमेण वेदरसनागगु-
ण जपः तदाग्निनानां शूद्राणां चायमेव प्रकृतजप इत्याहुः॥ यथासंप्रदायं विधेय इति। इत्थं होमं विधाय चं-
दनकर्पूरादिवासितैः शुद्धसलिलैर्होमसंख्यादशांशतः प्रागुक्तविधिना देवीं संतर्प्य स्वात्मानमिष्टदेवता-
रूपं ध्यायन्॥ कुंभमुद्रया मूलविद्यांते आत्मानमभिषिंचामि नम इति तर्पणदशांशसंख्यया स्वमूर्ध्नि नम-
भिषिंच्याभिषेकसंख्यादशांशसंख्यकान् ब्रह्मविद्यादीक्षितान्सदाचारान्समान्ब्राह्मणान्निमंत्रितान्कृत्वा-
भ्यंगादिना स्नपयित्वा वस्त्रगंधादिभिरलंकृत्य षड्रसैर्मिष्टान्नैर्नानाविधैः स्वेष्टदेवताबुध्या भोजयित्वा ताम्बू-
लदक्षिणादिभिः परितोष्य कुमारिकाः सुवासिनीश्च यथाशक्त्या तथैव परितोष्य प्रदक्षिणीकृत्य प्रणम्य वि-
सर्जयेदिति। प्रत्यहं वा जपांते वा समस्तसंख्यासमाप्तौ वा भक्तिपूर्वकं कुर्यादिति॥ ततो वैश्वदेवादिकमाह्निकं वि-
धाय स्वेष्टदेवतामंत्रजपध्यानकीर्तनश्रवणादिना दिनशेषं नीत्वा शक्तौ सायंतनं स्नानं विधाय पूजां समाप्य भुंजी-
त न त्र भोज्यो नि। शुक्लैकविधास्ति त्वहैमंतनीवारकंगुषष्टिकायवाः श्यामवन्हताः पादाम्पामनुन्नो वातोल्पवह-

सो.र.क.
५.

ता: गुडवर्जितमैसलवं हस्तितमगुरकलायकैमुकेतरकंदविशेषनालिकेरकदलीजंबलीपनसाम्रामलकईदरी॥
तकीवास्तुककालशाकहिंगमोचिकासैंधवसमुद्रलवणोत्रुहृत्सारागिगव्यानिपिप्पलीजीरकनारंगतिंति
डीम्लानि॥ अथवर्ज्यानि॥ गुडक्षारमलवणक्षारलवणस्विन्नपर्युषितनिःस्नेहकोद्रवदिदूषितकोजिकगंज
नविल्वकरंजलशुनमसूरकोद्रवमंडुकतैलपक्कमाषमसूरचणककोशधमदेवदेवधान्यादीनि अतिभोजने
चाभ्यभोजनपर्याय॥ तत्र स्वेष्टदेवताप्रसादमन्नेन स्वपत्ररहितपलाशपत्रावल्यां संस्थाप्य मूलविद्यया
प्रोक्ष्य प्रतिद्रव्यं मूलविद्यासप्तधाभिमंत्र्य मौनी पवित्रे हिते मितं हस्तेनैव गासीयात्॥ मूलविद्यया त्रिः श
वारामंत्रितं जलं च प्राशयेदिति॥ अथशयने। कुशनिर्मितायां शय्यायां प्रक्षालितायां तादृशं वस्त्रमास्तीर्य तां
मूलविद्यया सप्तवारमभिमंत्र्य॥ ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरंगमं ज्योतिषां ज्यो
तिरेकं तन्मे मनः शिवसंकल्पमस्तु॥ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वंति विदथेषु धीराः॥ यदपूर्वं
यक्षमंतः प्रजानां तन्मे०॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरंतरमृतं प्रजासु॥ यस्मान्न ऋते किंचन कर्म
क्रियते तन्मे०॥ येनेदं भुवनं भविष्यत्परिगृहीतममृतेन सर्वं। येन यज्ञस्तायते सप्तहोता तन्मे मनः शि०॥ यस्मि

न्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शि०॥ सुषार
थिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव। हृत्प्रतिष्ठं यदजिरं यविष्ठं तन्मे मनः शिवसंकल्पमस्तु
इति मंत्रोच्चारं पठित्वा ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन। इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत॥ ॐ हिलि हि
लि शूलपाणये स्वाहा॥ नमोऽजाय त्रिनेत्राय पिंगलाय महात्मने॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः॥ स्व
प्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर॥ ॐ नमः सकललोकाय वि
ष्णवे प्रभविष्णवे॥ विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः॥ इति मंत्रान्पठित्वा प्राक्शिरः दक्षिणपार्श्व
शायी स्वप्नं परीक्षेत॥ तत्र सुप्तानां प्रथमे प्रहरे दृष्टस्य स्वप्नस्य सर्वेण फलं॥ द्वितीये षड्भिर्मासैः। तृतीये मासत्रये
ण। चतुर्थे मासात्॥ निशांते सद्यः फलं स्यादिति॥ अथ सिद्धिसूचकस्वप्नाः। तत्र। प्रासादसुमुखस्वेष्टदेवता
गुरुनिर्मलोचंद्रसूर्यमंडलगंगागोसरस्वतीसंध्याशिवा॥ लिंगालोदर्शनं भूमिलाभरक्तसमुद्रतरणमुद्धजय
होमवह्निप्रज्वलनहंसचक्रवाकमयूरसारसरथारोहणकन्याछत्ररथदीपप्रासादपद्मगजवृषभाज्यसमुद्रस
र्पफलवृक्षपवित्रामांससुरासवस्त्रीदर्शनदीतरणाकाशगमनश्मशानदर्शन हर्म्यप्रासादशिखरग॥

सौ·र·क·
प·

वाम्रवृक्षभक्षणरूपर्वतशिखरारोहणविमानगमनलाभदेवीदर्शनानि॥ मदिरापानमांसभक्षणकृमिपुरीषानुलेपन
रक्ताभिषेकदधिभक्षणभोजनश्वेतवस्त्रानुलेपनसिंहासनरथयानध्वजराज्याभिषेकरत्नाभरणादिदर्शनानि॥ अ-
थाशुभसूचकाः। चंडालकलभकाकसूकरगर्दभमंगलद्रव्यतैलाभ्यक्तनग्नमुण्डकृष्णवस्त्रकंटककलहरुदितजडितप्रासाददर्शन
रोगदं॥ तत्र प्रायश्चित्तं नृसिंहमंत्रं पठित्वा दुःस्वप्नसूचिकान्दोषान्नहि पुनर्नृसिंहमंत्रं पठित्वा स्वापदा॥ इमशीत
रसातं घृतैर्जुहुयात्। अथवा एवमेवाष्टमेवेणहोमः कार्यः॥ नृसिंहमंत्रस्तु वर्णात्मकोक्तिसंख्यं तु मनुस्वर-
विभूषितं॥ विंदुनादयुतं शोकं बीजं नरहरेः स्मृतं। क्षौं इत्युक्तं॥ अस्य मंत्रस्तु फलविधानाः॥ अथ पत्रप्रतिवेदनं॥
गुरुचरणारविंदयुगलं प्रणम्य पुष्पहस्तः स्वप्नं तस्मै निवेदयेत्॥ गुरोरग्रेव न प्रकाशयेत्॥ स्वप्ने वासिसम
क्षेवाश्चर्यमतिहर्षदं॥ अकस्माद्हृदि जायेत नरव्यातयं गुरोर्विनेत्रिवचनात्॥ अथ सिद्धिचिह्नानि। चित्तप्रसादो मन-
स्तुष्टिः स्वल्पाशननिद्राजपश्चोत्तिर्दर्शनाकस्मादतिहर्षअंतरिक्षस्थदुंदुभिशब्दमधुरवाद्यनानागीतश्रवणकर्पूरा-
दिगंधप्राप्तिचंद्रार्ककिरणकीर्णकाशालोकनादीनि॥ अथ मंत्रसिद्धेरन्यः पर्यायः॥ तत्र राशिसूर्योपरागे चिराच-
मेकरात्रं वा पर्वमुपोष्य एकभक्तं वा विधाय ग्रहणं दृष्ट्वा स्नानमात्रं विधाय समुद्रगायां नद्यां नाभिमात्रे जले स्थितः-

तदन्ते कृचित्जलेऽस्मयो वामसुपविष्टः स्नानं विधाय ॐ अद्यामुके मासि अमुकराशिगते सवितरि अमुकति-
थौ भारतवर्षाख्यप्रदेशे अमुकतीर्थे सोमग्रहणे सूर्यग्रहणे वा अमुकगोत्रः अमुकशर्माऽहं विद्यासिद्धि-
कामः सूर्यग्रहणे तत्समयमारभ्य सोमग्रहणे तत्समयमारभ्य रेवा विमुक्तिपर्यंतममुकविद्याजपमहं करि-
ष्ये इति संकल्पं विधाय जपेत्॥ ततो ग्रहणकालीनजपदशांशहोममहं करिष्ये इति होमसंकल्पं विधाय-
स्य संकुर्यात्॥ तद्दशांशो ग्रहणकालीनजपदशांशहोमसंख्याद्विगुणजपमहं करिष्ये त्रिगुणाद्यवमेव
मेव संकल्पः तर्पणादिकमप्येवमेव संकल्प्य कार्यमिति॥ अपरस्तु मंत्रसिद्धिपर्यायः॥ तत्र ॐ अद्येत्यादि
ष्यौ विद्यासिद्धिकामः कृष्णाष्टमीमारभ्य तच्चतुर्दशीपर्यंतममुकस्यौ विद्याया अयुतचतुष्टयजपं तद्दशांशहोमतर्प-
णाद्यात्मकं पुरश्चरणमहं करिष्ये इति संकल्पं विधायायुतचतुष्टयं समधाविनस्य प्रत्यहं चतुर्दशीतः सप्तश-
ताधिकसहस्रपंचकमेतिमदिने षोडशोत्तरसप्तशताधिकसहस्रपंचकं जपेदित्ययुतचतुष्टयं जपित्वा होमादिकं
कुर्यात्॥ अत्रापि प्रत्यहं वा समस्तं जपांते वा होमादिकं कार्यमिति। होमाशक्तौ कृष्णाष्टमीमारभ्य कृष्णचतुर्दशी
पर्यंतमयुतचतुष्टयजपसमसंख्यजपमहं करिष्ये तद्दशांशहोमसंख्याद्विगुणादिजपमिति वा संक-

सौ.र.कु.
५.

ल्यः॥ कृष्णाष्टमीमारभ्य चतुर्दशीपर्यंतमयुतचतुष्टयं जपं समध्याविनम्य प्रत्यहं चतुर्दशोत्तरसमस्तशताधिकसहस्र
पंचकं जपेदिति एवमयुतचतुष्टयजपं कृत्वा दशांशहोमादिकं कुर्यादिति। अत्र सर्वत्र पुरश्चरणे जपेत्स्वनित्या
नंतरं प्रारंभदिने यावत्संख्यजपः कृतः। तावद्देवीतिमदिनपर्यंतमन्यूनाधिकं कार्यमिति न्यूनाधिके तु सि
द्धिहानिः स्यात्॥ अन्यस्तु क्रमोत्क्रममातृकापुटितं मंत्रं मासमात्रं प्रतिदिनं शतं जपेत्॥ तत्र ॐ अद्येत्यादि
अमुकविद्यासिद्धिकामः क्रमोत्क्रममातृकापुटितामानुकविद्याद्यादिमासं प्रतिदिनं शतशतं जपमहं क
रिष्य इति जपसंकल्पः॥ संपुटप्रकारस्तु। अआइईउऊऋॠऌॡएऐओऔअंअः कखगघङ चछजझञ
टठडढणतथदधनपफबभमयरलवशषसहळक्षमूलविद्यां क्षळहसषशवलरयमभबफपनधद
थतणढडठटञझजछचङघगखकअःअंऔओऐएॡऌॠऋऊउईइआअ इति शतवारं मूलविद्यां जपे
दिति॥ अत्र शतमित्युपलक्षणं। अष्टोत्तरशतं जपेदिति संप्रदायः॥ अपरस्त्वत्र क्रमोत्क्रममातृकापुटिता
यां मूलविद्यायामष्टोत्तरसहस्रं मासमात्रं प्रतिदिनं जपेत्॥ संकल्पस्तु पूर्ववदेव मातृकापुटपयस्तु अइउऋऌए
ऐओऔहयवरलङकखघगञचछझञमणटठडनतथधदमपफभबशषसइति॥ जपप्रकारस्तु॥ अइउ

२३६

ऋऌएऐओऔहयरवलङकखघगञचछझञणटठढडनतथधदमपफभबशषसक्षळसषशमभ
फपमदधथनतडढठटणञझछचञगघखकङलवरयहऔओऐएॡऌऋऊउइअ इति मूलविद्या इमां भ
क्तिविधिज्ञादौ पठित्वा मध्ये मूलं अंते चैवं पठित्वा एवमष्टोत्तरसहस्रमष्टोत्तरशतं वा प्रतिदिनं मासमेकं ज
पेत्॥ अष्टोत्तरशतं तु गुरुजनमंत्रपरमिति सेयं। प्रकारांतरस्तु अद्येत्यादि अमुकविद्यासिद्धिकामो रात्रौ
त्रिकालपूजनं करिष्ये इति संकल्प्य वत्सरमात्रं प्रतिदिनं रात्रौ त्रिकालं सर्वोपचारैः श्रीचक्रे देवीं सांगावरणां पू
जयेत् एवं षण्मासं वा त्रिमासं वा मासमात्रं प्रतिदिनं वा पूजयित्वा तु पुरश्चरणमंतरेणापि विद्यासिद्धिर्भवति
। अन्यस्तु मंत्रवर्णौषधिविनिर्मितमंत्रवर्णसमसंख्या गुलिकानां धारणं विलेपनं नाभिः प्रजानत्काथजलैः
स्नानं तद्भस्मधारणं च कुर्यात्॥ तेन विद्यासिद्धिर्भवति॥ वर्णौषधयस्तु॥ चंदनकुचंदनागरुकर्पूरोशीरकु रा
ष्ठवालकुंकुमकंकोलजातीफललतामांसीमुरचोरथ्यंथिगोरोचनापत्रपिप्पलविल्वगुडूचीपृश्निपर्णीचित्रम
कंजवंगकतककट्फलबदरीदुंबरपाषाणभेदपद्मशंखपुष्पीमयूरशिखालज्जालुसाग्निमंथसिंहीकुशक
काशशंखपुष्पीरोहिणसोनाकबृहतीपाटलगंधिकपर्णीतुलसीअपामार्गेंद्रवल्लीभृंगराजापराजितानाल

सौ.र.क. मलीहृतांजजिह्वांश्रीदेवीकुमारीभृंगीनमुस्तेत्येकपंचाशदौषधयःक्रमादकारादिक्षकारांतैकपंचाशद्वर्णा
१० नामिति॥अपरप्रकारस्त्वालक्तपत्रेगोरोचनागंधादिभिरष्टदलपद्मंविरच्यतत्कर्णिकायांसाधकनामवर्णा
विदर्भितंआग्नेयंतेमकलेनामप्रणवेचविलिख्यपत्रेषुद्वंद्वशःक्रमेणस्वरान्विलिख्यगुलिकीकृत्यपवित्रमदा
संवेष्ट्यतदपिसिक्थकेनसंवेष्ट्यमधुरत्रयपूरितेस्वर्णमयपात्रेनिक्षिप्यक्षीरपूर्णेनूतनकुंभेसयंत्रगुलिकं
तस्यात्रनिक्षिप्यप्रागुक्तविधिनाग्निकुंडादौसंस्थाप्यतत्समीपेतंकुंभंसंस्थाप्यॐअद्येत्यादिअमुकविद्यासि
द्धिकामाविद्यासाधकयोरैक्यत्वसिद्ध्यर्थमष्टोत्तरसहस्रमष्टोत्तरशतंवामधुरत्रयहोममहंकरिष्यइतिसंकल्प्यो
पात्रविद्यायाशंखपत्राकृतिंकुंभेसंपातेस्तुवजग्नंकृतशेषंनिक्षिपन्नुकृत्वातंकुंभंजलाशयेनिक्षिप्यगुरुंब्राह्म
णान्वदीनांधात्र्यान्नादिभिस्तोषयेदिति॥एवंकृतेविनसिध्यतिचेत्तुविद्यायाश्चावरणादिकंकुर्यात्॥तत्रशावरणं
तुवरुणबीजग्रथितंमंत्रंकर्पूरकुंकुममनःशिलागोरोचनोशीरैर्विलिख्यदुग्धमधुजलघृतमेकीकृत्यकस्मिं गभ
श्चित्पात्रेनिधायतन्मध्येतंयंत्रंनिक्षिप्यतज्जपहोमान्कुर्यादिति॥अथबोधनं॥तच्चवाग्बीजपुटितमंत्रजप
रूपं॥अथवशीकरणं॥तत्रभूर्जपत्रेरक्तचंदनहरिद्राकस्तूरीमनःशिलाभिर्विद्यामालिख्यकंठेधारयेदिति

अथपीडनं॥अधरोत्तरभावेनमंत्रपदानिप्रजप्यदेवतामप्यधरोत्तरभावेनध्यात्वार्कदुग्धेनमंत्रंभूर्जपत्रेसमालि
ख्यतत्पादेनाक्रम्याधरोत्तरक्रमपठितमंत्रेणहोमंचकुर्यादिति॥अथपोषणं॥तच्चबालाबीजैःपुटितमंत्रंगोदु
ग्धमधुमोभर्जादौविलिख्यहस्तेधारयेदिति॥अथशोषणं॥यत्नभस्मनावायुबीजविदर्भितंमंत्रंविलिख्यकंठे
धारयेदिति॥अथदहनं॥पलाशबीजतैलेनवह्निबीजसंपुटितंमंत्रस्यैकैकमक्षरंविलिख्यप्रतिवर्णंचाधस्ता
र्ध्वंचवह्निबीजमालिख्यकंठेधारयेदिति॥विदर्भलक्षणंतु॥शारदातिलके॥मंत्रार्णद्वंद्वमध्यस्थंसाध्यनामाक्ष
रंलिखेत्॥विदर्भणमितिज्ञेयइति॥एकांतरंतुग्रथनमितिच॥श्रीविद्यानंदनाथेनशिवयोःप्रियसूनुना॥कृते
सौभाग्यरत्नाब्धावगाह्यत्रिंशस्तरंगकः॥ ॥इतिश्रीसौभाग्यरत्नाकरेत्रिंशस्तरंगः॥ ॥ ॥अथारब्धपुर
श्चरणव्रतस्याशौचादिसंभवेविनजपबाधः॥यदुक्तंविष्णुना॥यज्ञव्रतविवाहेषुश्राद्धेहोमेऽर्चनेजपे॥प्रारब्धे
सूतकंनस्यादनारब्धेतुसूतकं॥प्रारंभोवरणंयज्ञेसंकल्पोव्रतजापयोः॥नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रि
येति॥वस्तुतस्तुतांत्रिकदीक्षावतांआशौचादिसंभवेपिनित्यार्चनादिविधौनास्ति॥जपोदेवार्चनविधिःकार्यो
दीक्षान्वितैर्नरैः॥नास्तिपापंयतस्तेषांसूतकेवायतात्मनामितिदेवीयामलवचनात्॥सूतकेमृतकेचैवधर्मो

सौ॰र॰क॰
प॰

ज्ञारादिके तथा॥ अर्घ्यं जाप्यं तथा कुर्यान्मंत्रेणानेन सपुरःसरमिति॥ मदुक्तानीत्युक्तवचनात्॥ सूतके मृतके चैव निसोविस्नु
नयस्य च॥ सा तु शानस्य विघ्नं इसयः शुद्धिः प्रजायते इति नारदपंचरात्रे वचनाच्च॥ यत्तु। अशुचिर्न महामायां प्रजये
त्तु कदाचनेत्यादि कालिकापुराणशुक्रवचनानि तानि तु नात्र लिखितानि॥ ग्रंथगौरवभयात्॥ तानि तु तंत्रोक्तमं
हामायां मंत्रपराणि तेयानि तत्त्वकरणात्॥ अन्यथा प्राकृतलिखितवचनानां वैयर्थ्यापत्तेः॥ नैमित्तिककाम्यपूजासु
निषेध एव। सूतके मृतके चापि वर्त्तमाने तु नारद॥ कामतः पूजितो मंत्रेशो तिकादौ च कुत्रचित्॥ न पेत्स्य यशतं म
त्री सिद्धमंत्रस्य भक्तितः॥ शतत्रयं सकामाच्च प्रायश्चित्तविधौ जपेत्॥ इति॥ नारदपंचरात्रे॥ नैमित्तिकार्चने प्रा
यश्चित्तविधानादिति अकामात् नैमित्तिके एतत्सर्वं निःकामोपासनायामिति केचिदाहुः॥ अथ सूतकिनः प्रजो
वत्साम्यागमवोधितं॥ स्नात्वा नित्यं च निर्वर्त्तमानस्य क्रियया तु वै॥ वा प्रप्रजाक्रमेणैव स्नानयोगेन प्रजयेत्॥
परीकामान्न चेत्कामी नित्यं पर्वं वदा चरेदिति तत्त्वसारसंहितावचनात्॥ सकामैस्सूतकाद्यशौचे मानसपूजै
व कार्येति॥ अत्र यथा गुरूपदेशं कार्यं॥ अथ काम्यहोमविधिः॥ तत्रादौ तंत्रोक्तपरिभाषाग्निचक्रं विचार्य सौम्य
क्रूरग्रहमुखे शाहुतिप्रवेशं विज्ञाय शुभग्रहमुखप्रवेशदिने शुभहोमं अशुभग्रहमुखप्रवेशदिने चाशुभहो।

२५१

मारंभं कुर्यात्॥ तत्परिज्ञानप्रकारस्तु सूर्यस्थितनक्षत्रमारभ्य चंद्रस्थितनक्षत्रपर्यंतं गणयित्वा त्रित्रिभेदं त्रीणि
सूर्यादिनवग्रहेभ्यो विभज्य दद्यात्॥ तत्रादौ सूर्यस्ततो बुधः ततः शुक्रस्ततः शनैश्चरस्ततश्चंद्रस्ततो भौम
स्ततो गुरुः॥ ततो राहुः॥ ततो केतुस्तथा। तदुक्तं च सूर्यो बुधो भृगुश्चैव शनिश्चंद्रो महीसुतः॥ जीवो राहुश्च केतुश्
च नवैते देविखेचराः॥ त्रीणि त्रीणि च ऋक्षाणि रविभादीनि दापयेत्॥ तन्मुखे तदाहुतिप्रवेशः॥ इत्थं
ग्निचक्रपरिज्ञानप्रकारः॥ अत्र सौम्यहोमे सूर्ये शोकः॥ बुधे च धनागमः॥ शुक्रे अभीष्टफललाभः॥ शनौ पीडा॥ चंद्रे
सौख्यं। भौमे वै धनं। गुरौ धनप्राप्तिः॥ राहौ रोगः॥ केतौ मृत्युः॥ इति ग्रहाणां फलानि॥ अथ स्वर्गमर्त्यपा
तालेषु वह्नेः स्थितिं विज्ञाय तत्फलानि च ज्ञात्वा काम्यहोमारंभं कुर्यात्॥ तत्परिज्ञानप्रकारस्तु प्रति
पदादिहोमारंभतिथिपर्यंतं गणयित्वा सूर्यवारादिहोमारंभवारपर्यंतं च गणयित्वा मयत्र लब्ध
संख्या कानं काने कोनत्रिंशंकैर्मेलयित्वा ज्ञातांकसमुदायं त्रिभिर्हृत्वा वशिष्टे एक एके दृशिः॥
स्वर्गे वदति द्वये चेत्पाताले॥ मत्स्यैर्न्मर्त्यलोके इति पावकस्थितिं विज्ञाय तत्फलानि निर्दिशेत्॥ तत्र
स्वर्गस्थिते वह्नौ सुताः पाताले धनक्षयः॥ मर्त्यलोकस्थिते सकलफलप्राप्तिः॥ इत्थं वह्निचक्रं विज्ञाय

प्रागुक्तेमध्ये प्रागुक्तद्वादशराशिस्थानगतेषु नवसु कुण्डेषु प्रागुक्तमंगलामंगलरूपेषु प्रागुक्तविधिनाऽग्निस्था
पनं कृत्वा प्रागुक्तजिह्वामैर्मेदान्विज्ञापयचोक्तद्रव्यैर्यथाविधिं जुहुयात्॥ नत्वसौम्यहोमद्रव्याणि ज्ञानार्णवे॥
मालतीजातिकामल्लीकुसुमैर्मधुमिश्रितैः॥ घृतप्लुतैर्हुनेद्देवि वागीशत्वं प्रजायते॥ रक्तस्यापि दिग्भूतस्य
शिलारूपस्य नान्यथा॥ जपापुष्पैराज्ययुक्तैः करवीरैस्तथा विधैः॥ हवनान्मोहयेन्मन्त्री लोकत्रयनिवासि
नः॥ कर्पूरं कुंकुमं देवि विमिश्रं मृगमदेन हि॥ हवनान्मदनो देवि मन्त्रिणा विजितो भवेत्॥ सौभाग्येन विला
सेन सामर्थ्येनापि सुव्रते॥ चंपकैः पाटलैः कृत्वा श्रियं प्रोत्थसितां वरा॥ प्राप्नोति मन्त्री महतीं स्तंभयेज्जग
तीमिमां॥ श्रीखण्डं गुग्गुलं चैव मृगमदं होमयेन्नतः॥ राजमानेन्द्रदेवानां पुरं धी वशमानयेत्॥ सर्वलोका
वशास्तस्य भवंत्येव न संशयः॥ लाक्षाहोमात्त्वभेद्यास्ते दारिद्र्यभरपीडितः॥ दुर्गोपसर्गशमने पद्मान्न
मधुहोमतः॥ क्षीरं दधि मधुत्वा मं पृथग्युत्वा वरानने॥ आयुर्धनं यथारोग्यं समृद्धिर्जायते नृणां॥ कमे
लाक्षीसैलमक्षीरमधुभास्त्रनाशनं॥ दूरस्थितानां देवेशि गुरुत्वाप्रोक्तमार्गतः॥ होमः कार्यो वश्यकामैः
रन्यथा निष्फलं भवेत्॥ रुधिराक्तेन छागस्य मांसेन निशि होमतः॥ मधुरत्रययुक्तेन गुरुणोक्तविधानतः॥ पर

राष्ट्रं महादुर्गमसमस्तं स्ववशं नयेत्॥ महापलेन देवेशि रिपोः सैन्यं विनाशयेत्॥ खेचरो जायते रात्रौ हुत्वा होमं च
तुष्पथे॥ दधिमाक्षिकहोमेन सौभाग्यं धनमाप्नुयात्॥ सितया केवलं होमो वैरिस्तंभनकारकः॥ कमलै रक्तैर्हो
मः सम्यक्संपत्तिदायकः॥ रक्तोत्पलैर्जगद्वश्यं राजानो वशगाः स्मृताः॥ नीलोत्पलैर्महादुष्टा वशमायांति नान्य
था॥ श्वेतोत्पलैः श्रियं वाचं लभते हवनात्प्रिये॥ श्वेतैस्तु होमात्कमलैर्लक्ष्मीसौभाग्यमाप्नुयात्॥ कल्हारहव
नान्मन्त्री सौभाग्यं च धनं लभेत्॥ पक्वबदरहोमेन वशीकुर्यान्महीसुरात्॥ मातुलुंगफलोद्भूतहोमेन स्त्रि
या वशे॥ नारंगफलहोमेन वेश्या वश्या भवंति हि॥ कूष्माण्डफलहोमेन नरा वश्यास्तथापरे॥ द्राक्षाफलैस्सिद्ध
यो होलक्षहोमान्न संशयः॥ कदलीफलहोमेन लक्षमात्रेण भूभृतः॥ वश्यास्तु दशसंख्याकाः भवन्त्येव न सं
शयः॥ खर्जूरीफलहोमेन लक्षमात्रेण भूभुजः॥ वश्या विंशतिसंख्याकाः सत्यं परमेश्वरि॥ नालिकेरफलै
र्होमात्समृद्धिर्जायते प्रिये॥ लक्षमात्रेण मंत्री राजा परइव प्रिये॥ पक्वाम्रफलहोमेन लक्षमात्रेण सुंदरि
चतुःसमुद्रपर्यंतां मेदिनीं वशमानयेत्॥ पनसस्य फलैर्होमाल्लक्षेणाशु नरभुजः॥ वश्या भवंति देवेशि नात्र का
र्या विचारणा॥ तिलाज्यहोमाद्देवेशि कार्यसिद्धिर्भवेत्प्रिये॥ रात्रिकालवरणाभ्यां तु दुष्टलोकान्वशं नयेत्॥

सौ. र. क.
प.

वैरिणो वशमायाति घृतचंदनसर्पिर्होमतः॥रक्तचंदनहोमेन वश्याहि पुरुषास्त्रियः॥कर्पूरस्य च होमेन वाग्वश्यं जाय
तेन्नृणां॥कस्तूरीहोमतो देवि राजानो राजमंत्रिणः॥वश्या भवंति सकलाः परिवारयुताः प्रिये॥तिलतंदुलहोमे
न शांतिर्भवति मंदिरे॥शर्करागुडहोमेन सर्वकार्यार्थसाधकः॥घृतपायसहोमेन सितायुक्तेन मंत्रिणः॥त्रै
लोक्ये वशमायाति धान्यसिद्धिमवाप्नुयात्॥नानाविधान्नहोमेन धान्यसिद्धिर्भवेद्ध्रुवं॥सोपस्करैश्च वटकै
रुपसर्गान्विनाशयेत्॥बंधूककुसुमैर्होमात्सर्वसत्त्वान्वशं नयेत्॥जपापुष्पैर्जगद्वश्यं बाणपुष्पैश्च होमतं॥ ६
बकुलस्य कुसुमैः सौभाग्यं जायते महत्॥दशांगधूपहोमेन सौभाग्यमतुलं लभेत्॥कुलसंजावतारे॥मो
सीशिवाकौशिकसर्जमल्लाभागाः समं बद्धरुजः कमाद्दीशो जेयमुस्ताकरजं च कुष्ठं सर्वार्द्धं खंडं कथितो
दशांगः॥तया॥नेत्रस्थैः स्त्रियो वश्याः कूष्मांडैर्दैत्यकन्यकाः॥श्रीफलैरतुलां लक्ष्मीं पत्रैर्वा सुरवंदिते॥इक्षु
खंडैः सुरवाणिस्त्वद्भसा राजकन्यकाः॥वश्या भवंति देवेशि नारिकेलजलेन वा॥केवलं घृतहोमेन वर
दाः सर्ववशंकराः॥तया नेत्रराजे॥अथ होमं प्रवक्ष्यामि ललिताविधया शिवे॥येन मर्त्योपि भुवने प्रत्य
नो देवता समः॥तद्विधानेन मृगशालेष्ट्यकाजादि भेदतः॥त्रिकोणे पुनर्वत्कुंडे पुनस्तत्कर्म सुचोदिते॥नुकु
२४३

याकुंभमार्गेण तत्कर्माणि पूर्वकं॥मुक्तपतिपदारंभात्संलिंतकमलैकुंडेनेत्॥मधुरत्रयसंसिक्तैः पुष्पैरप्यरुणैः
शुभैः॥अखंडितैरष्टमाचाच्चरोत्त्रपति संन्निभः॥ते एव दिवसे षुवंसितैः सर्वाहनवा कुसुमैः॥कल्हारैर्हवना
त्रेपुदिनेषु धनधान्यवान्॥तथैवोत्पलहोमेन श्रीयमाप्नोति पुष्कलां॥अरुणैर्ररुसलैर्होमात्कन्यका समवा
प्नुयात्॥कैरवैर्हवनात्रेपुदिनेषु श्रियमाप्नुयात्॥सौभाग्यं कीर्त्तिमारोग्यं मन्वाप्नोत्यर्चनादपि॥ते षष्ठ्यां कुं
कुमस्योदष्टुतैस्त्रिदिनहोमतः॥अचलां च श्रियं प्राप्य सुखी जीवति भूतले॥तैश्चंदनाक्तैर्हवनात्त्रिदिनेषु प्र
पावधि॥पुत्रदासीदासपुत्रश्चिरं जीवति मानवः॥तैरेव दुग्धचात्क्तैश्च होमात्कंदर्पसंन्निभः॥वनिताजनैः सह
नरोदीर्घायुर्वक्त्रजीवति॥छत्रपतिपदारंभाद्दर्शांतं तु क्रियाचते॥घृताक्तैरष्टमाचैरणिः सपत्नाजमेचिच्छ्ने
ये॥ते एव दिवसे षट्सौगुडैः क्षौद्रप्लुतैर्हुनेत्॥कांति लक्ष्मी जयारोग्ययुतो जीवति भूतले॥द्राक्षाभिर्दुग्ध
सिक्ताभिस्त्रिदिनैर्हवनान्नरैः॥श्रीराहारीचिरं न मो जीव कलुषाशयः॥खर्जूरीफलहोमेन त्रिमध्वक्तेन
त्रिदिने॥आयुरारोग्यवित्तयसंपत्तीश्रियमश्नुते॥कदलीफलहोमेन तथा त्रिदिवसेषु च॥पुत्रपौत्रकीर्त्ति
न्यैर्मान्यो जीवेद्वर्षशतं सुखी॥नारिकेलफलस्त्रोदैः सिताढ्यैः समन्वितैः॥हवनात्रिदिने रिपुमरवि

सौ॰र॰क॰
प॰

रि

लेन मवाप्नुयात्॥ नैरिस्तु वारिसंसिक्तैर्हवनान्मद्दिनेषु वै॥ वासांसि नानावर्णानि महार्हाणि लभेन्नरः॥ सर्वैस्त्वेतैस्त्रि
मध्वक्तैर्हवनाच्छ्रियमाप्नुयात्॥ तैः सवत्सासितागव्यपयोक्तैर्हवनादपि॥ महिषीक्षीरसंसिक्तैर्होमाद्दिव्यमवा
प्नुयात्॥ अजाक्षीरहुतैर्लक्ष्म्यै नष्टा याति क्षीरसंहुतैः॥ नालिकेरफलक्षोदक्षीराक्तैरपि तैर्हुनेत्॥ तथा वाद
शाभिर्ईश्वरैकैकैः संहतैस्तु वा॥ नित्यशो हवनाद्दुग्धक्षौद्रसर्पिःसमन्वितैः॥ संपन्नसस्यां पृथिवीमवाप्नो
ति सुनिश्चितं॥ गोमहिरण्यवासोभिः समृद्धो जीवति स्थितो॥ रविवारे सिताज्यैस्तु क्षीराक्तैर्हवनात्तथा॥
अष्टादन्नसमृद्धिः स्याद्धुताक्तैर्वा मधुप्लुतैः॥ सोमवारे सितोपेतैर्नालिकेरजलप्लुतैः॥ संपन्नसस्यां पृथि
वीमवाप्नोति सुनिश्चितं॥ अंगारवारे क्षौद्राक्तैरन्नैर्होमाल्लियं लभेत्॥ नैरिन्धसंमिश्चितैर्हवनान्नीमहीं
लभेत्॥ बुधवारे घृताक्तैस्तु होमेन तिलतंडुलैः॥ श्रियं सकलकल्याणानि लभ्यान्नलते नरः॥ गुरुवारे दु
ग्धसिक्तैस्तिलैश्च हैस्तथेन्नरैः॥ हवनाल्लभते लक्ष्मीमष्टादति मनोहरं॥ तैः समस्तैः समस्ताक्तैर्जुहुयात्क्र
मशः क्रमात्॥ तद्दिने शिंदिराख्यः स्याद्दिष्टा हवनवैभवात्॥ तद्दिनेषु तु नक्रान्तौ चौचीस्वीस्तु भोजये
त्॥ घृतक्षीरसिताक्षौद्रगुडापूपसमन्वितैः॥ अष्टिमादिषु केस्वेषु नवस्वपि हुनेत्क्रमात्॥ शालीभिः संदु

लेपुष्पैर्माषैर्गौरलवैस्तिलैः॥ तथा विधैः सर्षपैश्चकोऽवैरिंदिरा मयि॥ क्षौद्रसर्पिस्तैलदुग्धकेसरे [illegible] सुरसाप्लुतैः॥ म
हिष्याजाविकाक्षीरहुतैर्नवसु चक्रमात्॥ माषादिषु तथा होमं नवभिः स्यान्नवस्वपि॥ चणकैश्चणकान्नैश्च मुद्गा
न्नैर्केसरैस्तथा॥ माषान्नैश्च हरिद्रान्नैर्गुडान्नैः पायसैरपि॥ मुद्गान्नैश्च त्रिमध्वक्तैः कीर्तिर्लक्ष्मीर्जयान्मये॥ तथा म
जादिनवकेनवभिर्जुहुयात्तथा॥ पृथुकैः सक्तुभिर्लाजैरिस्तुकोऽपयः प्लुतैः॥ शाल्वीचणकचूर्णस्थैर्माषपिष्टलि
ज्जोद्भवैः॥ अपूपैर्मधुराम्लैर्वि मयं कीर्तिमिंदिरां॥ आरोग्यमाप्नुयाद्राजमान्यतां च लभेद्ध्रुवं॥ सिद्धयोगेषु पद्मवै
र्जुहुयात्स्मसमृद्धिमान्॥ तथामृतादियोगेषु जुहुयाद्रोगशांतये॥ गुडूचीतिलदूर्वाभिस्त्रिमध्वक्ताभिरादरात्॥ उ
च्चयोगेषु जुहुयादरुणैरुत्पलैः शुभैः॥ उच्चो भवति सर्वेषां स्वकुलानां सुनिश्चितं॥ पर्वतारख्यहुने योगेषु तद्वै
स्तद्विपर्वतं॥ भवेद्स्माच्चिरेणैव कालेन परमेश्वरि॥ अथास्य मद्भुतं होममाकर्णय वदामि ते॥ स्वक्षेत्रगेस्वो
च्चगे वा जुहुयाद्ग्रहतर्पणे॥ पायसैर्घृतसिक्तैस्तु सितमिश्रैस्तु विद्यया॥ सर्वदा योक्तविधिमेनं कुर्याद्यथावि
धि॥ तत्रत्योक्तेषु कालेषु यहार्त्रिस्यान्न तत्कुले॥ मासेषु जन्मत्रितये होमे कुर्याद्यथाविधि॥ दूर्वामृतातिलैर्निसं
यावज्जीवं सुखं भवेत्॥ तद्दिनेषु जपेद्विद्यां सहस्रं दिननित्यया॥ न तस्य कुत्रचित्क्वापि कदाचित्क्लेशसंभवः॥ त

सौ॰र॰क॰
प॰

र्णिकारयेच्चंद्रवासितैर्मधुरैर्जलैः॥ सौरभाढ्यैः प्रसूनैश्च पूजयेदयनद्दिने॥ अवंध्यजन्मत्रितयः स्यात्कदाचिन्नमोचि
कः॥ यदि स्यात्तस्य रोगादिपीडा भवति निश्चितं॥ उच्चस्थे वा स्वराशौ वा स्थिते चेद्दिवाकरे॥ विद्योतयेत्सहस्त्रं वा
शतं वा पूजयेच्छिवां॥ यस्तस्य रोगतो बाधा कदाचिन्न भवेद्ध्रुवं॥ तस्माद्रुक्षेषु कालेषु तथा कुर्वन्सुखी भवेत्॥ य
द्रोगादिदारिद्र्यक्लेशयुक्तस्समंत्रिणः॥ मांत्रिकत्वं भवेत्तौ केशो कहा सा स्यादेव भवेत्॥ पलाशपुष्पैश्च फलैः प
त्रैः कौंडैश्च मतकैः॥ हवनाद्दशमात्रेण वाग्मी स्यात्कुंठवागपि॥ अर्कपुष्पैस्त्रिमध्वक्तैर्होमाद्दशमवाप्नुया
त्॥ मंडलात्तस्य पात्रैश्च समडिरपि मूलतः॥ बिल्वप्रसूनैस्तु फलैः पत्रैः कौंडैस्तथा हुनेत्॥ मलैश्च जस्मी
संमिश्रैर्यस्तदन्हि यगा भवेत्॥ पद्माद्यैर्मधुराभ्यक्तैर्होमान्मात्रावह्निने नरः॥ इंदिरां जनते रम्यां सर्वं जो कच
मत्नुतो॥ चंपकैर्मधुसंमिश्रैर्जुहुयात्तद्दिनावधि॥ आढ्यः स्याद्वज्रजः पुत्रान्वा प्नोति गुणान्वितान्॥ नै
रैवाज्यहुतैर्होमान्मंडजे त्वच्च संस्थिते॥ लभते सर्वसस्याढ्यो ध्रुवं भोक्ता च जायते॥ तैः क्षीराक्तैर्हुतैश्च
ंद्रस्वोच्चगे तद्दिनैर्भवेत्॥ शतगुः साधकस्तद्वत्रिमध्वक्तैर्जमेत्त्रयं॥ पाटलैः सौद्रसंमिश्रैर्होमात्कन्या
मवाप्नुयात्॥ नगरोत्थैरपि तथा जाजैश्च कुठैरपि तैः॥ क्षीरमिश्रैर्हवनाच्चतुर्निर्जभते धनं॥ अंबरा

णि विचित्राणि मर्होणि च तद्दिने॥ शतपत्रैस्त्रिमध्वक्तैर्होमाल्लक्ष्मीमवाप्नुयात्॥ केसरैश्च कदंबैश्च कुंदैर्विकचि
तैरपि॥ मल्लिकामालतीजातीपुन्नागैश्च नमेरुभिः॥ जुहुयात्सप्तमारंभे पंचमं तं मधुप्लुतैः॥ एकैकशः समस्तै
श्च महालक्ष्मीमवाप्नुयात्॥ तैरेव मिश्रक्षीरमिश्रितैर्होमात्स्वर्णमवाप्नुयात्॥ तथाजाकैश्च हवनाल्लभते भ
वनैः श्रियं॥ प्रसूनैः कर्णिकारोत्थैः क्षीराक्तैर्हवनाद्दिने॥ भुद्दितैरपि चलां लक्ष्मीमवाप्नोति सुनिश्चितं॥ कंल्हा
रैरक्तकुमुदैरुत्पलैः कमलद्वयैः॥ प्राग्वन्नेदादिपूर्णांतमेकैकैर्वापि पंचभिः॥ हवनाल्लभते लक्ष्मीमनल्पगुण
मवाहनां॥ त्रिमध्वक्तैस्तथैकैकैः सर्वैर्वा साधकोत्तमैः॥ केतकीकुसुमैः सौद्रहुतैर्होमात्तु तद्दिनैः॥ वासांसि
लभते चित्रवर्णानि बहून्यपि॥ सितैः प्रसूनैः क्षीराक्तैर्होमाद्यामोति तद्दिने॥ सितानी वासांसि तथा मुक्तादामि
मा॰ निरूप्य कं भिरन्यकैः॥ हुनेन्मरुवकैः सौद्रहुतैर्वांछितसिद्धये॥ तथा दमनकैः पत्रैर्हवनाच्छ्रियमश्नुते॥ यद्वर्णानि प्र
सूनानि जुहुयाद्दिव्यया श्रिये॥ तद्वर्णान्येव वासांसि लभते साधको ध्रुवं॥ मरिचैः सर्षपैस्तैलहुतैर्होमान्नि
शासु वै॥ तज्जामानकुलस्त्रागजोजामिषाणां समानयेत्॥ पाटलीकुंदमंदारशेफालिकसमुद्भवैः॥ चंपकाशो
कपुन्नागनमेरुकुसुमैः शुभैः॥ हवनाद्वनिताः सर्वा वशयेत्सौद्रसंहुतैः॥ तैरेवाज्यहुतैर्होमाद्वशयेत्पुरुषा

सौ॰र॰क॰
प॰

नपि॥ तैरात्मलक्ष्मीलभते घृताक्तैर्हवनान्निशि॥ समस्तजीवभुवनं वशयेत्रैः सितान्वितैः॥ अन्नैर्घृताप्लुतैर्नित्यं
हवनादन्नवान्भवेत्॥ लक्षैकहवनान्नित्यमाप्नुयात्तिलतंडुलैः॥ मधुराक्तैस्तु लवणैः सुश्लिष्टपरिचारिणैः॥ त्रि-
मध्वक्तैर्हुतैः सर्वान्वशयेदंगनाजनान्॥ तथा लदन्वितैर्लोणैर्होमाद्वेश्यावशं नयेत्॥ तथा पुष्पैस्तु तोयाक्तै-
र्हुतैस्तु वशगा नृपाः॥ आज्यैस्तु केवलैर्होमाद्दिनैरुक्तैर्धनी भवेत्॥ नित्यशो घृतहोमेन श्रीमान् भोगी
च जायते॥ स्नातोनुलिप्तः स्रग्वी च सितगंधस्रगंबरः॥ संपूज्य देवीं तुष्ट्यास संस्थितेद्यवाहने॥ सव-
त्सायाः सितायागोः पयः सिद्धिगुणोपचेत्॥ तस्य मात्रे तंडुलं तु शालीजं सितमेव वा॥ सितादुग्धसमोपेतं
कृत्वा वैसिस्थकं महत्॥ गृहीत्वा पाणिना विद्यां जपित्वाशं तवारकं॥ श्रियैमेदेविदेहीति प्रोक्ताकाहोमश्च ले-
नले॥ कृत्वा समाप्य पूजां तु तथानुस्कान्तु तद्दिने॥ मौनी तु गमयेद्रात्रिं श्रियमाप्नोति पुष्कलां॥ निरंतरं नित्यश-
स्तु कुर्याच्चेन्नरश्चयः॥ न कदाचिरमानुं च सद्भुतामं वशक्षयः॥ पायसैर्जुहुयात्सम्यक् वारेषु साधकः
निवेदयेत्ततः जाया महाग्रादाढ्यतमो भवेत्॥ सवत्सारुणवर्णायागोः क्षीरान्नवनीतकं॥ तद्दिनान्नं तु कंल्हार प्र-
सूनैर्निक्षिपेत्ततः॥ तद्दुग्धसंकुर्नेदग्नौ सोमवारेतकुचके॥ कालेतावद्दिनैर्जस्त्वां भस्माख्यां जनेभुवं॥ तथाधव

नद

जरूपायाम्रीतेसितोबुजे॥ निधायादायमौनेन जुहुयाद्यौ भृगोर्दिने॥ समवारप्रयोगेन महतीं प्राप्नुयाछ्रियं॥ रूपमासां
सर्वलक्ष्यां नानाभोगान्वितां शुभां॥ तथारुणासमुद्भूतं नवनीतं रवेर्दिने॥ निधाय विकचे स्पष्टे कर्णिकायां ततस्तु त-
न्नाम्नुहुयादष्टनिवारैराढ्यः स्यात्साधकः शिवे॥ कर्णिकारस्य पुष्पाणि तथा चंपकजान्यपि॥ जुहुयान्नवनीताक्तान्यु-
चैस्तु ग्रहणे गुरोः॥ निरातंकां महायां च राजचोरपहारकैः॥ प्राप्नोति महतीं लक्ष्मीं पातदन्वयगामिनी॥ केवलं नवनीते-
न सितोपेतेन होमतः॥ कीर्तिं लक्ष्मीं धनारोग्यविजयैरायुराप्नुयात्॥ वंधकैः किंशुकैः ग्धैतैस्त्रिमध्वक्तैर्हुतक्रिया॥ सौभा-
ग्यलक्ष्मीविजयकीर्तिप्रभावान्भवेत्॥ दध्यन्नहोमादन्नाढ्यः साधकः स्यात्त्रिमासतः॥ आर्द्रेषु तालपत्रस्य खंडेषु
निजवांछितं॥ विलिख्य नवनीतेन सुमेते जुहुयान्निशि॥ मंडलान्मासतो वाराप्नोत्येव स्ववांछितं॥ तथा पालाश-
पर्णेषु विलिख्य जुहुयात्तथा॥ कुंकुमैः चूतपत्रेषु लिखित्वा वा हुनेन्निशि॥ चंदनैः पानसे पत्रे विलिख्य जुहुयात्त-
था॥ पद्मस्त्रोदे विलिख्यं हि नागवल्लीदले शुभैः॥ हुनेत्स्वाप्नोति निजं वांछितं प्रोक्तकालतः॥ कस्तूरी लिखितेन चित्र-
पत्रे चंपकजे रुदः॥ तेर्हुतैस्तद्वाप्नोति निर्दिष्टे स्तद्विधानतः॥ एलालवंगकंकोलजातीफलसमन्वितैः॥ सितैरा-
लिख्य चस्त्रेह पत्रे पद्मसमुद्भवे॥ जुहुयात्तस्य संसिद्धैव कुभिः कर्म चोदिते॥ नास्मात्परमस्ति भुवने विद्याहोमे रुः

सौ.र.क्र.
प.

दीरितैः॥ अथक्रूरहोमः॥ तत्र नेत्रराजे मस्त्रपरं च होमो नेकधिनं परमेश्वरि॥ इदानीं स्थलहोमं तु कथयाम्यरिमर्दनं॥
नेत्रलक्ष्मौदिने कुंडे कुर्याद्धोमं तु दारितैः॥ विधानैर्ईषनिधनरोगनिग्रहचाटनं॥ आयुर्हाये रिपोर्ज्ञात्वा लग्नोत्कर्षात्तु कृ
त्तनः॥ नदात्मकैग्रहाणां च स्थितिमष्टकवर्गकं॥ चैयाणामनुकूल्येन कुर्यान्न दभिचारकं॥ अन्यथा क्रूरकर्माणि कुर्वा
णो नाशयेत्रिहि॥ तास्येव कर्माणि न तत्त्रयः प्रातिकूल्यतः॥ कुर्यान्न हेवता भक्ति मास्ति कुंवर्त्मनं शुरू॥ तस्मात्पूर्वं विज्ञि
यं त्र ज्ञानाज्जो च्चारिपुनिग्रहं॥ विदध्यादन्यथा शक्तिनैष्फल्यं चात्मनाशनं॥ रिपोरष्टमलग्ने च काले त्वष्टमराशिगे॥ स्था
ने कुर्याद निष्ठानि तद्विनाशाय साधकः॥ प्राच्यामेष वृषौ वक्रौ मिथुने दक्षिणे तथा॥ कुलीरसिंह मिथुने निर्ऋत्यां क
न्यका तथा॥ तुलाकीटौ पश्चिमतो धनुर्वायौ तु संस्थितं॥ नक्रकुंभौ तु चोत्तरतो मीनमीशे तु संस्थितं॥ एवं राशिक्रमं
ज्ञात्वा कुर्यात्कर्माणि देशतः॥ कालेतु पंचदं च सुः घटिकाक्रमयोगतः॥ चैत्रादिषु तु मासेषु द्वादशस्वपि भास्करः॥
मेषादिराशिगो यानि तथाग्ने ग्रहमंडले॥ देहेषु प्राणिनां तद्वद् दृष्टंगुल्वविभेदतः॥ मर्त्यादि चरणानां तु तान् द्वादशसु
लग्नस्ये च॥ चैयाणामानुगुण्येन कुर्यात्कर्माणि नान्यथा॥ शुभाशुभानि कर्माणि फलं त्येवं कृते ध्रुवं॥ तथा द्वनिविप
स्थानाम्यतनस्थानकानि च॥ ज्ञात्वा विदध्यात्तु मन्त्याः प्रयोगं सर्वतस्तथा॥ सितेहरिद्रत्न गते नासासिणित

२४७

याश्विनौ॥ न्यशेत्स्वमूर्ध्नि मध्ये तु तत्र शंखं त्रुभप्रतः॥ कर्णौ नेत्रे नासिकायां वर्त्मे तेषु रुषस्य तु॥ मध्यकंठस्तनत
टे हृदि नाभौ च गुह्यके॥ जानुमध्ये घ्रिपार्श्वेषु तथा गुह्येषु दक्षिणे॥ अधौ संधौ नात्रु गुह्ये नाभौ चे लिखिते
न्तरे॥ लिखेद्दिग्वकुंतो पुंसि स्त्रियां वामादिवर्त्मते॥ विपनाद्यांवि यस्या नेवेधये केठकै नतु॥ संक्रोचका
रव्येनतदातीव्रतास्थिमयेन वै॥ वर्णादि समुत्स्यै वा तमायः सारसूचिभिः॥ पुत्तल्या यत्र तद्विंतदंगं
शत्रुदेहजं॥ आधिनापीडिते कालादविधेयं भवेद्ध्रुवं॥ नत्रजे नार्त्रिनाक्षिलेनाविलेशपुरं क्रमेण॥ पु
त्तलीकरणं वस्ये मृत्युनिग्रहसिद्धये॥ भौमस्तु केतुधाम्यं शे भास्कार सौम्य भार्गवौ॥ मंगलो गुरुमंदा
हिगुरवो शकराशिपाः॥ नक्षत्राणि च तुष्याद्या एवं मलोत्तरेशते॥ एतावतेव पुत्तल्यस्वं शक्रमयोग
तः॥ प्रथमे नवके चेंड भास्करांशकयोः क्रमात्॥ षोडश द्वादश तथा मान मंगुलि संख्यया॥ अन्यांशकेषु स
र्वेष्वि चतुर्दश समारिताः॥ द्वितीये नवके मेषांत्र्यथ ध्वर्दा सुस्वे वोदश॥ तृतीये नवके मेषां त्रयोदश समाश्रि
ते॥ चंद्रार्कयोरेकविधिः प्रोक्तः संख्याक्रमस्तथा॥ पुत्तलीकरणे द्रव्यं चक्रिहस्तमदान्वितं॥ चिताभ
स्मजलवल्मीकमृद्धिपिप्पलिकादुनं॥ मरिचं गृहधूमं च लशुनं हिंगुसैंधवं॥ जोरिकेचेति कथितं पुत्तलीद्रव्य

सौ॰र॰कु॰
प॰

मीश्वरि॥ साध्यर्क्षवृक्षैः पिष्टैस्तमापचार्णैर्मिश्रितस्त्वकैः॥ वैरिदेहजरोमाद्यैः रूपे तैः पुत्तली क्रिया॥ पुत्तली दैर्घ्यमा
नेतु हस्तद्वाङ्गुलैः शमथैकतः॥ शीर्षे त्र्यास्कंदे रूर्ध्वे त्र्यास्याद्द्वयेन था॥ कटिप्रपदयोरेकमंशमेवं तु पुत्तली॥ २
विधायतं त्रे सर्वत्र प्रयोगानाचरेत्ततः॥ पातालयोगे नीचाख्ये विषयोगे च मस्तुले॥ नाशयोगे च दिनमन्म-
न्मौक्ष कचयोगके॥ चंडीशचंडायुधके महाखड्गे च कोणके॥ एकस्तम्भे ग्लौ कंटकाख्ये स्थूणे पंचार्कसंज्ञके॥ कु-
यात्प्रयोगान्प्रत्यर्थिभंगाय पत्निधनाय वा॥ निग्रहाय निरीक्ष्यैवं कुर्यात्सिद्धिमवाप्नुयात्॥ वस्त्राकर्षण विद्वेष-
स्तंभनोच्चाटमारणे॥ विदध्यात्पुत्तलीः सम्यक् च तस्त्र प्रोक्तयोगतः॥ पिष्टेन शिक्थेन तपा चक्रिदस्तम-
दापि च॥ साधनस्त्वत्र वक्ष्येऽणु पुरुषलक्षणसंयुताः॥ आसने पादयोः स्थाने कुंडमध्ये तु साधकः॥
पिष्टमन्त्ररुजाः खात्वा स्थापयेत्तित्स्थमेवरे॥ कुंडमध्यादुपर्यूर्ध्वे पदान्यकुशीर्षिकामपि॥ एवं संधारणे
कृत्वा कुर्यात्कर्म समीरितं॥ अथैतेषां विषमपदव्याख्या॥ तत्र निग्रहदशष्टौ युद्धादिषु पराजयविषयः
॥ आयुर्दायमित्यादिनाशनमितिसंतानो चतुर्णां श्लोकानामयमर्थः॥ रिपोरभिचारकाले ज्योतिःशास्त्रे दो-
राख्ये प्रोक्तप्रकारेण तत्स्य तात्कालिकमायुर्दायं गोचराष्टकवर्गेषु यत्नाणां स्थितिं च विचार्य तत्र यानुक्र

ले सति तस्याभिचारकर्म कुर्यात्॥ तमनवेत्य क्रियमाणानि क्रूरकर्माणि यतः कुर्वाणमेव नाशयंति अतः सर्वा-
पा तेन निरीक्ष्यैव कुर्यादिति॥ अत्र च शत्रोर्देवता मात्रिकयमाचारं गुरुं तत्सार्ध्वं वर्णिनो मांत्रिकान पिज्ञात्वा तेषाम-
नुभवादिकं वा तद्विराणे चतत्त्वा बले सति तदभिचारादिकं न कुर्यादिति॥ रिपोरित्यादि श्लोकस्यायमर्थः॥ त-
त्र शत्रोर्जन्मर्क्षं नाशर्क्षं च तज्जन्मराशेर्वाष्टमे लग्नादुदयकाले वस्तमानद्वादशराशिस्थाने तु रिपोरष्टमराशिगे
स्थाने तद्विनाशाय कर्म कुर्यादिति॥ प्राच्यामित्यादि श्लोकद्वयस्यायमर्थः॥ तत्राभिचारादिकर्मकरणार्थं रचि-
ते मंडपादौ चतुरस्त्रीकृतेन व धा विभक्ते पूर्वदिग्गतखंडे उत्तरदक्षिणक्रमेण मेषवृषयोः स्थानद्वयं॥ आग्ने-
यां मिथुनस्य दक्षिणे पूर्वपश्चिमक्रमेण कर्कसिंहयोः नैर्ऋत्यां कन्यायाः॥ पश्चिमे दक्षिणोत्तरक्रमेण तुलावृश्चिक-
योः॥ वायव्ये धनुर्लग्नस्य॥ उत्तरे पश्चिमपूर्वक्रमेण मकरकुंभयोः॥ ईशान्ये मीनस्येति॥ सुस्थित मित्यनेन कालच-
क्रस्य राशिचक्रं व चेच्चेमनीस्तुकं॥ एवमित्यादि श्लोकस्यायमर्थः॥ उक्तक्रमेण देशेषु राशिस्थितिकं मंडलं त्वाका-
लेपि स्वयोधिष्ठितराश्यादितः॥ प्रतिराशि पंच पंच घटिकाक्रमयोगेन द्वादशराश्युदयकालमपि ज्ञात्वा क्रूरक-
र्माणि कुर्यादिति॥ राशिनामनाधिकभावस्त्वेशदेशयोर्वैषम्यात्कलितशास्त्रे प्रकं॥ तदत्राप्रयोजकमिति॥ चैत्रा-

सौ.र.क. दीत्यस्य श्लोकस्यायमर्थः॥ चैत्रादिषु सौरमासेषु मेषाद्येकैकराशिवृद्धिक्रमेण ज्योतिःशास्त्रे तत्र हृदपरिवृत्तिप्रोक्ता
प. तद्विशेषेण चैत्रादिग्रहमंडले॥ मदहस्तयोर्दयालीतिदेहेष्वित्यादिश्लोकस्यायमर्थः॥ समस्तप्राणिनां देहेषु मेषा-
दिमीनांतक्रमेणांगुष्ठक्रमेण द्वादशस्थानेषु द्वादशराशीन्न्यसेदिति॥ त्रयाणामित्याद्यस्यायमर्थः।
देशकालदेहात्मकानामानुकूल्येन वस्यमाणकर्माणि कृतानि फलदानि भवंति॥ अन्यथा न भवंतीति॥ त-
थेत्यादि॥ श्लोकस्यायमर्थः॥ तत्राहनि प्रयोगदिवसे तत्पेस्यमृतस्थानकानीत्यत्रान्वयः॥ तानि तु पादांगुष्ठ-
प्रपदगुल्फजानुलिंगनाभिहृत्स्तननासिकर्णभ्रूशंखमूर्धाख्यानि॥ एतेषु स्थानेषु शुक्लपक्षे पूर्वं दक्षि-
णपादांगुष्ठमारभ्य मूर्धांतं तेन तन्मार्गगतस्थानेषु पंचदशसु प्रोक्तेषु स्थानेषु तत्प्रथमादिपूर्णांतेषु पंचदशसु
तिथिषु प्रतितिथि एकस्मिन् स्थाने एककाले तिथयात्क्रममहरहः क्रमादमृतकलायाः स्थितिर्भवति॥ कृष्णपक्षे
तु शिरो वामभागादि वामपादांगुष्ठांतेषु प्रोक्तेषु पंचदशसु स्थानेषु पूर्णांते तत्र प्रतिपदमारभ्यामावास्यांतं पंच-
दशतिथिषु प्रतितिथि यथाक्रममवरोहक्रमेणामृतकलास्थितिर्भवति॥ स्त्रीणां तु शिरोदक्षिणभागादि दक्षिणांगुष्ठां-
तं प्रोक्तेषु पंचदशसु स्थानेषु पूर्णांते तत्र प्रतिपदादि दर्शांतं पंचदशसु तिथिषु प्रतितिथि यथाक्रममवरोहक्रमेणामृ-

तकलायाः स्थितिर्भवतीति॥ विषस्थानानि वक्ष्यमाणानि। मितेत्यादिसार्द्धत्रयश्लोकस्यायमर्थः॥ तत्र शुक्लपक्ष-
प्रथमादिदर्शांतासु त्रिंशत्तिथिषु पुरुषस्य दक्षिणभागे हृदयादिमस्तांतेषु नवसु स्थानेषु दक्षिणे पुनस्त-
द्वामपार्श्वमस्तकादि पादांगुष्ठांतपंचदशसु स्थानेषु पुनर्दक्षिणपादांगुष्ठनाभ्यंतषट्सु स्थानेषु चेत्यन्य-
त्रिंशत्स्थानेषु क्रमेण विषपरिवृत्तिर्भवतीति॥ स्त्रीणां तु तत्तत्तिथिस्थानेषु दक्षिणे वामपार्श्वे व्यत्यय-
क्रमेण विषपरिवृत्तिर्भवति॥ विषनाड्यामित्यादिसार्द्धत्रयश्लोकस्यायमर्थः॥ तत्र सप्तविंशतिनक्षत्रे-
षु प्रतिनक्षत्रं ज्योतिःशास्त्रे प्रोक्ते विषात्मकनाडीचतुष्टयकाले शत्रुप्रतिकृतिरूपपुत्तल्यादेर्देहे प्रोक्तविष-
स्थाने संकोचकारस्यस्वमन्त्रस्य विषपस्य देहे लोस्पृतीग्रास्थिना वर्चराद्विकंटकैर्वा वेधात्॥ शत्रोस्तत्तदंगव्याधि-
पीडा तः प्रयोगस्य गौरवलाघवादिकाशीघ्रं विलंबेन वा वृत्तिर्भवतीति॥ भौमेत्यादिश्लोकस्यायमर्थः॥ तत्र अहिः
शनैश्चरः भौमादयो ग्रहाः मेषादिद्वादशराशिनामश्विन्यादित्रिनक्षत्रेष्व द्वादशद्वादशांशकानां चक्रमे-
णाधिपतय इत्यर्थः॥ नक्षत्राणीत्यस्य श्लोकस्यायमर्थः॥ अश्विन्यादिसप्तविंशतिनक्षत्राणि प्रतिनक्षत्रं च
तुष्टयतुष्टयचरणक्रमेणाष्टोत्तरशतचरणैरष्टोत्तरशतांशकाः भवंति तेषामष्टोत्तरशतपुत्तलिका भवंति॥

प्रथमे स्यादिह सौकर्यस्याप्यमर्थः॥ तत्राग्निसाध्यास्वेषां नवनस्त्रांशकेषु सूर्यसोमयोरंशकेषु सूर्यसोमयोरंश
कपुत्तलीनां क्रमेण द्वादशांगुलं षोडशांगुलं च मानं भवति॥ भौमादीनां चतुर्दशांगुलं मानं॥ मघादिस्वेषु तद्दिती
यनवकांशकानां सोमसूर्ययोः प्राग्वत्॥ भौमादीनां सार्द्धत्रयोदशांगुलं मानं॥ मूलादिरेवंतं तृतीयनवकां
शकानां भौमादीनां त्रयोदशांगुलं मानं॥ सूर्यसोमयोः प्राग्वत्॥ पुत्तलीकरणे स्यादिह सौकर्यस्याप्यमर्थः॥ तच्च
चक्रिहस्तमृत्कुलालहस्तमृत्॥ चिताभस्मसमं च शुंठ्यादि चूर्णितं लशुनस्वरसं॥ साध्यर्क्षवृक्षत्वचः साध्यनक्षत्रवृक्ष
॥ मिश्रयेकं मधूच्छिष्टं॥ शत्रुदेहज रोमादि आदिशब्देन नखपादपांसुश्च गृह्यते॥ अत्रायं निर्गलितार्थः॥ शत्रुनक्ष
त्रवृक्षत्वचैका पुत्तली कार्या॥ कुलालहस्तमृत्तिकया वा॥ माषपिष्टेन। परा मधूच्छिष्टेन तिलतैला॥ इति चतस्रः
पुत्तल्यः सर्वकर्मसु कार्याः॥ तत्र क्रूरकर्मणि शुंठ्यादिद्रव्याण्येके चिताभस्मादिशत्रुदेहरोमादीनि च यथा
योग्यं चूर्णितं कृत्वा निमंत्रिकायां पिष्टे मधूच्छिष्टे च मेलयित्वा प्रयत्नतः पुत्तलीका कार्येति॥ पुत्तलीदैर्घ्यमा
नमित्यादि॥ सौकर्यस्याप्यमर्थः॥ तच्च तत्तद्दंशकोक्तपुत्तलीदैर्घ्यांगुलमानमष्टधा विभज्य तेषु षट्कांशेन
केशादूर्ध्वमंशत्रयेण कटेरूर्ध्वमर्द्धांशेकेन करविरदेशमंशत्रयेण पार्ष्णिभागादूर्ध्वमर्द्धांशेन प्रपदादिशे

षांगं च कुर्यादिति॥ सर्पशीर्षस्रुचा होमं कुर्यादशुभकर्मसु॥ वैरियोन्यस्रजा कृत्वा चरुं तु जुहुयात्तथा॥ त्रि
कोणकुंडे यमदिङ्मुखो भूत्वार्द्धरात्रके। श्मशाने निर्जने देशे विदध्यादभिचारकं॥ पत्राभिचारहोमं तु कुरुते
तु विसाधकः॥ तत्राभितोन्यपो रक्षां कारयेदात्मसिद्धये॥ न चेद्रात्रिं प्रतिष्ठास्यैव नानिहंतमु॥ स्वराष्ट्रसंधौ कुर्वी
त न कुर्वीत स्वमंडले। यदि कुर्यात्स्वमारेन मांत्रिको ज्ञानमोहितः॥ तदा दुःखं पीडयंत्येव शनकैर्वैरिभूभृतः॥ अस्तु मम
समिद्भिर्होमात्फलं लेखकरंजनैः॥ हेमीदलरसाक्तैस्तु होमाच्छत्रुं विनाशयेत्॥ नक्तमालसमिद्भिर्होमात्फलैर्वा तथा
जुहुयात्॥ रिपुरुग्रो विरोगार्त्तः प्रयाति यमशासनं॥ उन्मत्तकाष्ठैः प्रज्वाल्य वह्निं तद्बीजकैर्जुहेत्॥ तस्मात्तां वा जु
नेर्मास्मान्भ्रातिमिरेतिमा भुयात्॥ आरग्वधसमिद्भिर्होमात्तत्फलैः॥ वितस्तिमात्रैः सोन्नाक्तैर्दवना
देरिणोम्पतिः॥ आरुष्करसमिद्भिर्होमात्तद्बीजैस्तत्पत्ता जुहुतेः॥ होमाद्दरातेस्त्वीश्वगिन्निज्वरेण स्यान्मृतिर्ध्रुवं
॥ सौवीराक्तैस्तु कार्पासबीजैर्होमात्तु मंडलात्॥ अरातिनामयान्योन्यकलहाग्निघने भवेत्॥ सर्वपाज्या
हुतेः शुंठी मागधी मरिचैर्जुहेत्॥ वैरिमन्मस्त्वरसाद्धोमं डलान्मृत्विर्ज्वरात्॥ चाणुक्यैः पुत्तलीं कृत्वा ड
न्वैरुक्तविधानतः॥ सर्षपारुष्करघ्नसेसिक्तैर्जुहुयान्निशि॥ प्राग्वद्धुत्वा तदंगैस्तु कुंडचित्रोरुणांबरः

रक्तमश्वगोतपुष्पादियुतः शत्रुन्विनाशयेत्॥ आरुष्करघृताभ्यक्तैस्तद्वीजैः सर्पशीर्षकैः॥ हवनान्मन्त्ररूढस्समिधो द
वनादपि॥ दिनैः कैश्चिद्रिपुः स्विष्टो नाशमेति सुनिश्चितं॥ कुमकुम्भनिपाते न निर्घाते नारिसंभूतः॥ सलिलोपावकैस
र्पदंशान्मन्त्रह्निपाकृतात्॥ पत्तरात्रसमगोधर्वपिशाचैर्नरास्तसैः॥ अन्यैर्वाकारणैः स्विष्टो नाशमेति रिपुर्ध्रुवं॥ नि
वपत्रैश्चकर्पासवीजैस्तत्काष्ठकाण्डजैः॥ हवनात्सर्षपस्नेहसिक्तैर्विद्वेषणं भवेत्॥ नीचयोगे कृते दृष्टो रिपुवस्त
समेधितैः॥ तद्रसखंडैस्तज्जाकैर्निशामध्ये रिपुर्दिनैः॥ उच्चाटितः प्रयात्येव मेत्रशक्त्यापिनाडितः॥ मस्तुपत्रैश्चत
त्काष्ठैस्तद्वीजैस्तत्कुचोकृतेन॥ अरातेर्हृतिनो वा हा रोगैर्नश्यति निश्चितं॥ गैरिकैः पुत्रजीरुत्वारिपोरस्मरा
शिकैः॥ ग्रागुरुकंटकाद्यैस्तु पदंगं वेधयेच्छनैः॥ विषनाग्नं विषस्थाने तथैव यमकंटकैः॥ स्वईप्रहरकैः शीर्षे प्र
हरेद्धादशैः शनैः॥ अरातेस्तत्रदं गेस्यान्निधनं प्रहरादिना॥ येथि निर्वाकेरकादिस्तत्र बृद्धि विदारणे॥ तत्र
स्त्रवोलेवत्सोत्यपुत्रजीस्यापितेरकाः॥ गर्दभीमेहसलिलेसंस्थाप्यकाथयेच्छनैः॥ रिपुर्दाहज्वरग्रस्तस्त्रामेया
नियमालयं॥ मधुच्छिष्टेन तत्कृत्वा तापयेन्निशि नोष्णनैः॥ तेनोन्मादज्वरग्रस्तः प्रयाति निधनं शनैः॥ तीन
कंटकविद्धांगीरवनेस्मितग्रहेनिशि॥ त्रुण्णाम्मिशाचविष्टश्चरिपुर्याति यमालयं॥ ग्रागुरुकैरेवतद्रुपैरशेषैः पु

त्रजीनथा॥ निर्माय कुंडमध्ये तां खात्वा रात्रिमहीरुहैः॥ समिद्भिर्मौनत्तसमिद्भिस्तैलाक्तैर्जुहुयान्निशि॥ संनिपातज्वरस्तस्य
वक्तजिह्वेतिमंदधीः॥ घृतपंचकनकैर्दृढंस जनातियमालयं॥ तथाविधां तां प्रतिमां निखनेच्छ्मपत्तके॥ नवम्यामा
नरदिवसेमात्गेहेप्यपीठके॥ सप्ताहान्निधनं वैरी प्रयाति निशि ताडितः॥ कृताधेः शिरसिस्त्रीये निर्घातवदजस्तितं॥ स
र्षपंमाषचूर्णंचतिलेशालिजतंडुलैः॥ पिष्ठासाध्यस्तवत्सस्पकैजैरपिसंयुतं॥ एरंडवीजैर्मिलितं तत्पुत्रजिकांततः
तद्धस्तोतर्निधायारिनामतालस्यपत्रगं॥ संजप्य तां स्मशानेविधायानान्निपवनिजो मतः॥ सहस्रधारे साध्यस्य वर्ष्मे
हमारिपु॥ निबध्य तां पादयोस्तु भ्रातृवत्सोन्यतंतुना॥ गृहीत्वाजीवहनतां सजदं निक्षिपेच्छुचौ॥ कृत्वाग्नौ मैः सद
स्त्रचनाम ध्वांघ्रिमवास्तुखी॥ नहिनेतापतस्याद्विक्लेनज्वरेणसः॥ यस्तदेहोद्भवोभ्यमौ विसंज्ञः प्रलयस्तु कुः
प्रयाति निधनेत्तरीप्रयोगवज्जतः शिवे॥ साध्यस्य संभृतं पुत्रजीमर्कदुग्धतः॥ वन्मीकीरेणुवालिसां ब
ध्वोप्राग्वदधोमुखीं॥ साध्यनामानि संयुक्तां कुंडाद्ध्वं प्रजं बयेत्॥ जुहुयात्तत्समिद्भिस्तु तत्क्षीराक्तैर्निशांतरा
॥ ज्वरात्रिःस्यात्दरातेस्तु चिभिरेव दिनैस्ततः॥ पश्चात्तिनस्य रसेच्छा नो तडागोदरे खनेत्॥ जंबालमध्ये तेन स्या
त्रैरव्यंतस्मशानेःशनैः॥ तत्पादिनकुर्वीतचिरं रोगात्मको भवेत्॥ तथा तामाममंडेतु निवेश्यांगारवासरे॥ चे

सौ·र·क·
प·

ङ्कायतने खात्वा न यो निपुरतो बलिं॥ निहन्यद्द्वारनित्तु निहन्याडुपसर्गकैः॥ स्वके हे तुल्य धः खात्वा नडुपर्य्य
ग्निवर्द्धनात्॥ अविच्छिन्नमरातेस्याज्ज्वरादिगदसंभवः॥ तां तथा कृलरूपां तु अरुजं घास्थिसंयुतां॥ निवध्य पर्व
न्सूत्रेण द्विषः केहेस्वनेन्निशि॥ राशौ नदहमे मासान्त्रयात्सूच्चाटितो न्यतः॥ तथाविधे पुत्तलिका पुगेहे लोके
मार्गतः॥ विडालमुखिका चर्मबध्वं साध्याख्ययायुतं॥ निखनेत्रीरयोर्नद्याः पितृगेहेयवा त्रतः॥ मातृगेहेन
दीपर्सा द्विद्वेषः स्याद्वयोः सदा॥ तां नवभाग्वडुनाद्य साध्याख्यादिसमन्वितं॥ नदिघानापामि दीस्तास्वनेद्दरौ शिग
हेपुनः॥ मध्ये हदि स्तु तु मथा तत्कुलोत्सादनं भवेत्॥ एवं निकरवर्त्ती नामाभिचारस्तु दीरितः॥ दूरस्थितानां द्विषतां क
थंस्यादभिचारकं॥ वदामि ते श्रृणु प्राज्ञे सुदूरस्थस्य वैरिणः॥ विनाशने प्रयोगं तु क्षिप्रमप्यभिचारकं॥ येनारि
र्निकटस्थात्तु शीघ्रमेव निधनं व्रजेत्॥ साध्यर्क्षवृक्षैः पुत्तलिका विधाय प्राशेशातंक्रमात्॥ प्राग्वदीरितक्षीरदय
सिक्ताः स संज्ञकाः॥ तन्नूंदेशकमानाय घनास्तां मध्यरात्रतः॥ एकामेकां क्रुनेहे रिदिग्मुखस्तां भरो पतः॥ त
त्रदेशककाले वा सुदूरस्थोपि नाशभाक्॥ कथ वामां त्रिकबलीनिहंतुं शत्रुं तां व्रजेत्॥ तच्छृणु त्वं शिवे वक्ष्ये
प्रकारं तस्य निग्रहे॥ नैमीत्रिकैस्तस्य पूर्वां विद्वेषं कारयेत्ततः॥ नैर्द्विष्टोनिधनं तस्मिन्सुशंकेस्यादनाश्रयात्

भार्गवी॥ ग्पाधिकं महारत्नाकरमांत्रिकसंगतं॥ राज्ञा वै राजपुत्रं वा कथं हन्यात्त्वयोगतः॥ तन्मे कथय देवेश य
द्युपायस्तु विद्यते॥ वदामि ते श्रृणु प्राज्ञे त्वमोघं घोरविग्रहं॥ अभिचारमरातीनामासु नाशकरं परं॥ सिद्धमं
त्रान्वितस्त्रिंग्धा नक्षोडशानि स्थिरा शयान्॥ तैरवच्छिन्नरूपं तु होमयेद्यामतः क्रमात्॥ तेन तन्निधनं याया
स्थितस्याप्ययत्नतः॥ अरातिनिधनं कुर्यादेवमुक्तविधानतः॥ ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसनु
ना॥ रचिते सौभाग्यरत्नाब्धावेकत्रिंशस्तरंगकः॥ ॥इति श्रीसौभाग्यरत्नाकरे एकत्रिंशस्तरंगः॥ ॥
अथ काम्यहोमद्रव्याणां मानं॥ ज्ञानार्णवे॥ श्रृणु देवि प्रवक्ष्यामि मानं हवनसिद्धिदं॥ पुष्पं समग्रं तु कुर्यात्क
मले चापि पुष्कले॥ कुसुंभवाणपुष्पाणि यद्येकानि कुर्वे प्रिये॥ शतसंख्या राजिकास्तु विज्ञा(?) शतसंख्यया
॥ जातिप्रमाणा(?) ताम्रचकं॥ चुलुकार्द्धपयः क्षीरमन्नं ग्रासमितं भवेत्॥ स्यात्फलं मदेशा
विकूष्मांडं मातुलुंगकं॥ मनः प्रिये स्यात्खंडं स्यात्फलं भवति निश्चयात्॥ रंभाफलं चतुःखंडं जंबुचेतखंडितं न हि
नारिकेलस्य खंडं हि स्यात्तं कुर्यान्मनः प्रिये॥ पर्वस्थाने चेक्षुखंडं मनःसंतोषकारि वा॥ द्राक्षाफलं समग्रं स्या
न्नारंगं खार्जुरं तथा॥ गुग्गुलुः क्रमुकार्द्धं तु कुंकुमं चनमा भवेत्॥ गुंजासमं मसकर्परं कस्तूरी पुष्करं तथा॥ चंदनं

सो.र.कु.
प.

चागुरुं देविकर्पूरकेण समं भवेत्॥ मनःशिलाकृतीकृत्वा होमे कुर्यात्तु लोचने॥ एतदाकृतिमात्रेण कथितं सर्वसिद्धिदं
।यथेच्छया वरारोहे स्त्रीविद्यां परितोषयेत्॥ ७॥ तथा शारदातिलके॥ कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं॥ दधि
प्रसृतमात्रं स्याल्लाजाः स्युर्मुष्टिसंमिताः॥ पृथुकास्तत्प्रमाणाः स्युः शर्करापि तथोदिताः॥ गुडः पलार्द्धमानः स्यात्क्षौ
द्रापि तथामताः॥ ग्रासार्द्धं चरुमानं स्यादिक्षुः पर्वमितः स्मृतः॥ एकैकं पत्रपुष्पाणि तथा एतानि कल्पयेत्॥ कदली
नागरंगाणां फलान्येकैकशो विदुः॥ मातुलुंगं चतुःखंडं पनसं दशधा कृतं॥ अर्द्धानालिकेराणि खंडितानि विदुर्बु
धाः॥ त्रिधा कृतं बिल्वफलं कपित्थं खंडितं द्विधा॥ उर्वारुकफलं होमे कथितं खंडितं त्रिधा॥ फलान्यन्यानि खंडशः।
नि समिधः स्युर्दशांगुलाः॥ दूर्वात्रयं समादिष्टं गुडूची चतुरंगुला॥ व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषयवा अपि
॥ तंडुलाः स्युस्तदर्द्धांशाः कोद्रवा मुष्टिसंमिताः॥ गोधूमा रक्तकलमा विदिता मुष्टिमानतः॥ तिलाः स्युः शुक्तिमात्राः
स्युः सर्षपास्तत्प्रमाणकाः॥ शुक्तिप्रमाणं लवणं मरीचानपि विंशतिः॥ पुरं बदरमानं स्यादमृतं तत्समं स्मृतं
॥ चंदनागुरुकर्पूरं कस्तूरीकुंकुमानि च॥ तिंत्रिडीबीजमानानि समुद्दिष्टानि देशिकैरिति॥ कर्षजसरणमुकं
सारसंग्रहे॥ माषो दशगुंजास्यात्षोडशमाषो निगद्यते कर्ष इति॥ तैलस्याप्येतदेव परिमाणं॥ शुक्तिः कर्षद्व

यं प्रसृतिमात्रं। शुक्तिः पलं। पलार्द्धं कर्षद्वयं। ग्रासार्द्धं असीतिरक्तिकामितं॥ तदुक्तं पिंगलामते॥ गुंजाभिर्दशभिर्मा
षः शाणो माषचतुष्टयं॥ द्वौ शाणौ धटकः कोलो बदरं द्रंक्षणं स्मृतम्॥ तौ द्वौ पाणितलं कर्षः सुवर्णं कवलग्र
हः॥ पिचुर्विडालपदकं तिंदुकोक्षमूलद्वयं॥ शुक्तिरष्टमिका ते द्वे। पलं बिल्वं चतुर्थिका॥ मुष्टिराम्रं प्रकुं
चोष्ठ द्वे पले प्रसृतिरुच्यते॥ मातुलुंगं बीजपूरं। उर्वारुकं कर्कटी। तदर्द्धांशाः शुक्तिमिताः चुलुकमात्राः पाणि
तलप्रमाणाः कर्षमात्रा इत्यर्थः॥ पुरुः गुग्गुलुः॥ बदरमानं असीतिगुंजामितं॥ रामठं हिंगुः। तथा नारदपंचरा
त्रे॥ तत्तीयं खंडमन्नानां फलानि स्वप्रमाणतः॥ शैवागमेपि॥ खंडत्रयं स्याद्भक्ष्याणां स्वान्येवं च होमयेत् ये
केदानामहमे नागं जनानामंगुलद्वयमिति। अथ समिधः। नारदपंचरात्रे। समिन्मादेशमात्रेण सममच्छे
दाग्निना तथा॥ विशीर्णा द्विदला ह्रस्वा वक्रा स्थूला कृशा द्विधा॥ कृमिदष्टा च दीर्घा च निस्त्वचः परिवर्जि
ताः॥ विशीर्णायुःक्षयं कुर्याद्द्विदला व्याधिसंभवः॥ ह्रस्वायां मृत्युमाप्नोति वक्रा विप्रकरी तथा॥ स्थूलाभिर्दरते
लक्ष्मीः कृशायां नाशयते स्यः॥ द्विधायां नेत्रदोषाः स्युः कीरदष्टार्थनाशिनी॥ दैर्घ्यं प्रकुरुते दीर्घाः प्राणघ्नो निस्त्व
चः स्मृताः॥ प्रसीरा नाधिकान्ना समिधः सर्वकामदाः॥ आर्द्रात्वचे महच्छेदा नत्वांसेगुलवर्तुला॥ इदृशी

मो.र.क.
प.

होमयेत्साज्यैर्लक्षः प्राप्नोति विपुलां श्रियं॥ श्रौते स्मार्त्ते च तंत्रोक्ते समिधः परिकीर्त्तिताः॥ तथा वायवीयसंहितायां॥ ना
पालाशपारावाविपज्ञियाद्वादशांगुलाः॥ अवक्राश्च स्वयंशुष्काः सत्वचो निर्व्रणाः समाः॥ दशांगुलावा विहिताः
कनिष्ठांगुलसंमिताः॥ प्रादेशमात्रावालाभे होतव्याः सकलाअपि॥ अथ काम्यजपविधिः॥ तत्रचूडामणौ॥ चक्रे
समर्चयेद्विमकलं नियतव्रत॥ ग्रामस्य मध्यगतं वा विमध्यं वा चक्रमर्चयेत्॥ उपचारैः समाराध्य सहस्रं प्रज
पेच्छुचिः॥ तदग्रे संस्थितो मंत्री ततोनंतफलं लभेत्॥ ध्यात्वाथवा चक्रराजं मनः प्रजासमन्वितं॥ जपारंभे सु
धीः कुर्यान्महापातकहा भवेत्॥ निगदेनोपांशुना वा मानसेनाथवा जपेत्॥ निगदः परमेशानि स्पष्टवा
चाभिगद्यते॥ अव्यक्तं स्वेस्फुरद्वक्त्रे उपांशुः परिकीर्त्तितः॥ मानसस्तु वरारोहे चिंतनांतररूपवान्॥ निगदेन तु य
ज्जप्तं लक्षमात्रं वरानने॥ उपांशुस्मरणेनैव तु सौख्यं भवति शैलजे॥ उपांशुर्लक्षमात्रं तु यज्जप्तं कमलेक्षणे॥ मा
नसोच्चारणात्तुल्यमेकेन परमेश्वरि॥ मुद्रासन्नद्धयोगः सन् पूर्वोक्तध्यानयोगतः॥ लक्षमात्रं जपेद्यस्तु महापा
पैः प्रमुच्यते॥ लक्षद्वयेन पापानि सप्तजन्मभवान्यपि॥ महापातकमुख्यानि नाशयेन्नात्र संशयः॥ [redacted]
ततो लक्षत्रयं जप्त्वा यंत्रमंत्रकलेवरं॥ महापातककोटिस्तं नाशयेन्नात्र संशयः॥ चतुर्लक्षं जपेद्देवी महावाग्मी

२५५

श्वरो भवेत्॥ सप्तलक्षं जपान्मंत्री खेचरीमेलको भवेत्॥ अष्टलक्षं जपान्मंत्री देवप्रियो भवेन्नरः॥ अणिमाद्यष्ट
सिद्धीनां नायको भवति प्रिये॥ वशगास्तस्य राजानो योषितस्तु विशेषतः॥ नवलक्षप्रमाणं हि जपेत्त्रिपुरसुंद
री॥ रुद्रमूर्त्तिः स्वयं कर्त्ता हर्त्ता साक्षान्न संशयः॥ सर्वैर्वंद्यः सदा स्वस्थः सर्वसौभाग्यवान्भवेत्॥ अथ कूटत्र
यस्य पृथक्पृथक्साधनविधिः॥ तत्रैव ज्ञानार्णवे॥ एषा विद्या वरारोहे पारंपर्यक्रमागता॥ भववंधनाशयंती
संस्मृता पापहारिणी॥ जपात्स्तुतेर्जपेशानि ध्याता सर्वार्थसाधनी॥ पृथक्बीजत्रयस्यादं साधनं कथयामि
ते॥ शुक्लांबरधरा वीरा गंधकस्तूरिमंडितः॥ मुक्ताफलस्फुरद्भूषाभूषणैः शुभ्रमाल्यधृक्॥ शुभ्रमंदिरसं
विलोत्रसर्वयमसमन्वितः॥ पूजयेच्छुक्लकुसुमैर्नैवेद्यमपि सज्वलं॥ पायसंदुग्धसंपूर्णं तथामृतफलोदनं
॥ घृतगोलकसंपन्नेनानाशुभ्रान्नपूरितं॥ नैवेद्यं दर्शयेद्दैवी वागीश्वर्यै सुरेश्वरि॥ मनःसंकल्पशुभ्रो वा साध
येत्सोस्तु वा स्वयं॥ वाग्भवाख्यं जपेद्दिव्यं वागीशीं संस्मरेद्बुधः॥ कर्पूरधवलांशुभ्रपुष्पाभरणभूषितां॥ अ
सेन शुभ्रवसनां वस्त्रमौक्तिकभूषणां॥ मुक्ताफलामलमणिजपमालालसत्करां॥ पुस्तकं वरदानं च दधतीमभ
यप्रदां॥ एवं ध्यायेन्महेशानि सर्वविद्याधिपो भवेत्॥ मूलादिब्रह्मरंध्रांतं स्वतनौ पूषवर्षिणीं॥ तस्मान्मोतिर्म

सौ.र.क.
प.

यीं ध्यायेज्जितकामेमतरूपिणीं॥ पाषाणेन समो वापि मर्त्त्यो जीवसमो भवेत्॥ अथ कामकलासक्तः साधकः परमे
श्वरि॥ रक्तालंकारसुभगो रक्तगंधानुलेपनः॥ रक्तवस्त्रावृतः सम्यक् कुमध्ये कामकलात्मना॥ रक्तपुष्पैस्तु विविधैः
कुंकुमादिभिरर्चयेत्॥ मन्त्रादिब्रह्मरंध्रांतं स्फुरद्दीपस्वरूपिणीं॥ बंधूककुसुमारक्तकोतन्मणान्वितां॥ इक्षु
कोदंडपुष्पेषुवरदाभयसत्करां॥ नदीपकांतिसिंदूरभरितेंदुवनच्छवे॥ चिंतयेत्परमेशानि त्रैलोक्यं मोदयेत्क्षणा
त्॥ राजानो वशमायांति पन्नगा राक्षसाः सुराः॥ कंदर्पइव देवेशि योषितां मानहारकः॥ मनश्चिंतितयोषित्तु दा
सीव वशगा भवेत्॥ चलच्चंद्रेंदुसंकाशां तरुणारुणविग्रहां॥ चिंतयेद्योषितो योनौ क्षोभयेत्त्रिपुरसुंदरी॥ किंपुन
र्मानुषी देवी त्रैलोक्यमपि मोहयेत्॥ एवंविधं चिंतितादेवि सिंदूराभां हृदि स्मरेत्॥ आकर्षयेत्तदा शीघ्रं रंभामपि
तिलोत्तमां॥ रक्तवर्णां स्त्रियं ध्यात्वा नदीयमहसा ततः॥ तस्या मूर्ध्नि स्मरेद्धीमान् स्ववशीप्रवर्त्तिनीं॥ ध्यायेत्तां मोदयेद्देवि
मदनोन्मत्तमानसां॥ क्षणमात्रेण देवेशि त्रैलोक्यं वशमानयेत्॥ एतत्कामकलाध्यानं नामेच कामा वरानने॥ मोहयेत्त्रिजगत्सर्वं
प्रयोगेष्वल्पपार्वति॥ सर्वार्थकामादेवेशि ज्ञातव्याः पंचसंख्यकाः॥ विदर्भितेन कामेन मन्मथांतर्गतं कुरु॥ कंदर्पं संपुटं
कृत्वा कोणगं शिगतं ततः॥ मकरध्वजसंज्ञं तु सर्वमेतद्वरानने॥ मीनकेतुगतं कुर्यान्मोहयेज्जगतीमिमां॥ त्रैलोक्य

मोहनो नाम प्रयोगोयं प्रकीर्त्तितः॥ अत्र विदर्भेत्यादि कुर्यादित्यस्य पादोनश्लोकद्वयस्यायमर्थः॥ प्रथमं मन्मथकूटं
क्लींकारमालिख्य तस्य ककारस्योदरे कामराजकूटं क्लींकारमालिख्य तस्य हकारस्योदरे मम रेफाधः अमुकं नयो
र्मध्ये वशमानयेति क्लींकारविदर्भितं विलिख्य विजृंभया ह्रिल्लेखाय कंदर्पकूटरूपेण ऐंकारद्वयेन त्रिकोणाका
रेण पुटितं षट्कोणं तावेष्ट्य तस्य षट्कोणोदरे षु चतुर्थं मकरकेतनकूटाक्षरं ब्लूंकारमालिख्य षट्कोणाद्ब
हिर्मीनकेतनकूटाक्षरेण स्त्रींकारेण संवेष्ट्य वांछितार्थेषु विनियुंज्यादिति॥ अत्रैवं च मकूटाक्षरजेरवनंतद
क्षरवह्निस्थानगे सकलयंत्रे यथा भवति तथा गुरुक्रमेण मनःसमाधेरः मितिरहस्यार्थः॥ तथा॥ स्मरणु देवि प्रव
क्ष्यामि शक्तिबीजस्य साधनं॥ स्वहृत्संहारपर्यंतं शरीरे चिंतयेत्परां॥ ... मीप्रथमाराशिर्वर्षंतीव विहारिणीं॥
ईमच्चतानासमानां विद्युत्त्रिकरसुप्रभां॥ स्फुरच्चंद्रकलापूर्णकलशं वरदाभये॥ ज्ञानमुद्रांचदधतीं साक्षादमृत
रूपिणीं॥ ध्यायन्निवं हरेत्मंत्री नानाकारव्यवस्थितेः॥ एतस्य स्मरणादेवि नीलकंठत्वमागतः॥ अहं मृत्युंजयो भू
त्वा विचरामि नजेस्थ्यतेः॥ वैनतेयसमो मंत्री त्वषभावसहस्वतुत॥ भूतप्रेतपिशाचांश्च नाशयेद्योगसंचयं॥ चा
तुर्थिकज्वरान्सर्वानपस्मारांश्च नाशयेत्॥ अथ त्रिकूटासंपूर्णां महात्रिपुरसुंदरी॥ चिंतिता साधकस्यापि त्रैलो

स्यवशकारिणी॥ क्रमेणानामिहचक्रमंडलस्यारुणप्रभा॥ पद्मरागमणिस्वच्छाचिंतिता सुरवंदिते॥ तस्याश्च गुणमेन
कवशकारिणी॥ क्रमेणानामिहचक्रमंडलस्यारुणप्रभा॥ पद्मरागमणिस्वच्छाचिंतितासुरवंदिते॥ तस्याश्चगुणमे
स्वर्यं सौभाग्यंच प्रजायते॥ तं ध्यात्वा मंत्रमंत्री योगिनीनां भवेत्प्रिये॥ मानसचक्रेतस्य कायेन तेन सार्द्धं सुखी भवेत्॥
पुत्रवान्नेव देवेशि मंत्री ध्यानान्न संशयः॥ यदा चक्रस्थिता पूर्णा खेचरी सिद्धिदायिनी॥ चतुःषष्टिर्यतः कोट्यो
योगिनीनां महौजसां॥ चक्रमेतत्समाश्रित्य संस्थिता वीरवंदिते॥ आदिसंबोधिनि पदे मध्ये बीजाष्टकं बहिः॥ क-
ला ध्यात्वा गनासंगे कामराज इवापरः॥ पाशांकुशधनुर्बाणैर्मर्दनैर्मोहयेत्प्रिये। त्रैलोक्यसुंदरी देवि किं पुनर्मर्त्ययो
षितः॥ तथैव शक्तिवंधैश्च शस्त्रैस्तन्मयविग्रहः॥ सिद्धगंधर्वदेवांश्च वशीकुर्यान्न संशयः॥ एतामाराध्य देवे
शि कामः सौभाग्यसुंदरः॥ हरिश्च परमेशानि त्रिपुराराधनात्प्रिये॥ त्रैलोक्यमोहनो भूत्वा स्थितिकर्त्ता भवत्स
दा॥ एतत्समाराधनात्तु ब्रह्मा सृष्टिकरो भवत्॥ चंद्रसूर्यौ वरारोहे सृष्टिसंहारकारकौ॥ अथ श्रीचक्रसाधन
विधिः॥ तच ज्ञानार्णवे॥ शृणु सर्वांगसुभगे श्रीचक्रविधिमुत्तमं॥ यस्य विज्ञानमात्रेण कर्त्ता हर्त्ता सदाशिवः॥ अ
नेन विधिना यत्र श्रीचक्रे विक्रमसंयुतं॥ पूजयेत्तेन च सकलं वशीकुर्यान्न संशयः॥ नगरं वशमायाति दिदेशे मं
त्रमद्भिः॥ योषितः सकला वश्या स्वजलकामाग्निपीडिताः॥ विद्याविमिष्टहृदयाः साधकेमस्तमानसाः॥ तद्दर्शने

नरेदेवेशि जायंते सर्वयोषितः॥ गोरोचनादिभिर्द्रव्यैश्च कराजे समालिखेत्॥ अंतीव सुंदरे रम्यं तन्मध्ये प्रतिमां व
रां॥ त्वचेलंती नामसहितां महाबीजविदर्भितां॥ महाबीजं मन्त्रविद्यायाः कामराज कुरे विदर्भलक्षणं प्रागेव
प्रोक्तं। चिंतयेत्तु ततो देवी योनन्नानोसहस्रतः॥ अरुणपूर्वा देवेशि स्तुतमात्रा पिंडुरूपभा॥ राजकन्याथवान्या
वा भयलज्जाविवर्जिता॥ आयाति साधकं सम्यक्कमंत्रगलासती प्रिये॥ चक्रमध्यगतो भूत्वा साधकः स्त्रिं
ये प्रदा॥ उपतुष्टर्पसहस्राभमात्मनमरुणं तथा॥ साध्यमयरुणीभूतं चिंतयेत्परमेश्वरि॥ अनेन क्रमयोगेन स्वयंक
दर्परूपवान्॥ सर्वसौंदर्यसुभगः सर्वलोकवशंकरः॥ सर्वशृंगारोपचारैश्च मुद्रासहितविग्रहः॥ चक्रपूजयेत्तु
यस्य नाम विदर्भितं॥ सप्तवेदाम्बुदे विधनाद्यो वापि भूपतिः॥ चक्रमध्यगतं कुर्यात्तामयस्यास्तु योषितः॥ अ-
दृष्टा यामहेशानि योनिमुद्राधरो बुधः॥ हतादानयते शीघ्रं यक्षिणीं राजकन्यकां॥ नागकन्यामप्सरसं रक्षचरीं वा
सुरांगनां॥ विद्याधरी दिव्यरूपामधिकन्यामपि प्रिये॥ मदनोद्भवसंतापस्फुरज्जघनमंडलां॥ कामबाणप्रभिन्नां-
तःकरणां लोलचक्षुषं॥ महाकामकलाध्यानयोगात्तु सुरवंदिते॥ सोभयेत्स्वर्गमर्त्योकपाताललतलयोषितः
॥ अथ यंत्रलेखकादिवश्यप्रयोगः॥ रोचनाभागमेकं तु भागमेकं तु कुंकुमं॥ अथ भागद्वयं देवि चंदनं मृग्ये।

स्मं॥ एकत्रितिलकं कुर्याच्चैलोक्यवशकारकं॥ अष्टोत्तरशतावृत्त्या मंत्रयित्वा शतं नयेत्॥ राजानं नगरं ग्रामं येन
यद्यत्स्पृशते॥ मंत्रिणा परमेशानि तत्सर्वं तस्य वश्यगं॥ तांबूलं धूपमुदकं पत्रं पुष्पं फलं दधि॥ दुग्धं घृतं तैलं प
ञ्चं वस्त्रं कर्पूरमेव च॥ कस्तूरी घुसृणं चैलालवंगं जातिपत्रकं॥ फलं वा वस्तु यद्यत्तु सकलं परमेश्वरि॥ शतमष्टोत्तरं ज
त्वा यस्मै यस्मै प्रयच्छति॥ स वश्यो जायते देवि नात्र कार्या विचारणा॥ स्त्रियस्तु सकला वश्या दासीभूता भवंति हि
ष्ठाकर्षणमेतत्तु कथितं नान्यथा भवेत्॥ अथाकर्षणप्रयोगः॥ रहस्ये स्थानके मंत्री लिखेद्भोचनया भुवि॥ चा
रुशृंगारवेषाढ्यां सर्वाभरणभूषितां॥ प्रतिमां सुंदरांगीं तां विलिख्य तु मनोहरां॥ तत्रालके हृन्नाभितन्मध्ये ड
जयोजितं॥ तन्नाम महाविद्यामंकुशांतर्विदर्भितं॥ सर्वसंधिषु देहस्य मदनाक्षरमालिखेत्॥ लीनं दाडि
मपुष्पाभं चिंतयेद्देहसंधिषु॥ तदा सा निःसुरवीभूता स्वयं देवी स्वरूपकः॥ पुष्पं तु सोमिलीन ध्यात्वा मंत्रमष्टश
तं लपेत्॥ निर्योन्यद्दहनागारे चेत् स्वर्यकन्याभने॥ ततो विकलसर्वांगी कामबाणैः प्रपीडिता॥ अत्र समान
संप्रेमभ्रममाणा मदालसा॥ एवमाकर्षयेन्नारीं योजनानां शतादपि॥ तथा मातृकां विलिखेच्चक्रबाह्यतः
सकलां प्रिये॥ भूर्जपत्रे सुवर्णपत्रे रौप्यपत्रे स्थलाम्बुजे॥ सोऽवध्यः सर्वजंतूनां व्याघ्रादीनां विशेषतः॥ तथैव

मातृकापुटको ससंज्ञो नाम मंडितो॥ कर्पूरकुंकुमाद्यैस्तु अजरामरतां लभेत्॥ अनेनैव विधानेन रोचनागुरुकुंकुमैः॥
लिखितं चक्रयोगेन साध्यनाम वरानने॥ विदर्भितं स्वनाम्ना तु यस्मिन्कस्मिन्नपि स्थितं॥ स्थावरं जंगमं वापि सकलेन
नमंडले॥ वशी कुर्यान्महेश्यानि पादाक्रांतेन संशयः॥ महात्रिपुरसुंदर्याः कामकूटेन मास्वता॥ एकमेकमवष्टभ्य
साध्यनामाक्षराणि हि॥ बहिरप्यविलेर्वर्णैर्मातृकायाः प्रवेशयेत्॥ हेममध्यगतं कुर्याच्छिखायां वामके तु
जे॥ धारयेद्यंत्रकुत्रापि चैलोक्यवशकारकं॥ राजेंद्रमपि देवेशि दासवत्तं करोति हि॥ राजानो वाजिनः सर्वे महादु
ष्टमदोत्कराः॥ व्याघ्राके सरिणो मत्ता वश्यास्तस्य भवंति हि॥ पूर्वक्रमेण नगरं नाम संदर्भितं लजे॥ मध्ये चैतु
ष्पथे वापि चतुर्दिक्षु निधापयेत्॥ महासोभो यो पिलां तुजनानां महतामपि॥ तथैव सर्वदुष्टानां पुरस्थानां च
जायते॥ एतन्मध्यगतो पृथ्वी सशैलवनकाननां॥ चलंती सर्वराजेंद्र मंडितां सागरांबरां॥ मासषट्कं चितये
द्यः सम संक्षोभकरो भवेत्॥ करास्त्रलेपमात्रेण नार्यस्तस्य वशाः प्रिये॥ राजानो ब्राह्मणा वैश्याः शूद्राश्च पश
वो जगत्॥ दृष्ट्याकर्षयते देवि चैलोक्ये सचराचरं॥ दृष्ट्या विषं नाशयते नात्र कार्या विचारणा॥ स्तनद्वेन पि
शाचांश्च ज्वरांश्चापि तुर्यकामपि॥ शूलगुल्मादिरोगांश्च दृष्ट्या नाशयति क्षणात्॥ एतत्क्षिद्रं सुभगं रा चौ

सौ॰र॰क॰
प॰

संपूजिते प्रिये॥ योजनानां शताद्देवि सम्यगाकर्षयेद्ध्रुवं॥ यदा दिक्षु विदिक्ष्वेवं सम्यग्देवि प्रयत्नतः॥ तत्तद्दिक्षु स्थितां
स्त्रीकान्विदिक्स्थानपिसुंदरि॥ वशमानयते शीघ्रं सपुत्रपशुबांधवान्॥ कूर्मपत्रे समालिख्य रोचनागुरुकुंकुमैः॥ त
न्मध्ये नगरं देशं मेरुखंडमेव वा॥ नाम्ना विदर्भितं स्वस्य पूजयित्वा यथाविधि॥ भूमिमध्यगतं कृत्वा त्रैलोक्यं व
शमानयेत्॥ अथवा धारयेत्कंठे शिखायां वा भुजेऽलके॥ यत्र कुत्र स्थिते भद्रे सोऽमयेन्नगरं महत्॥ अर्कक्षीरेण
संयुक्तं धत्तूरकरसं तथा॥ रोचनाकुंकुमे चैव नासालक्तकसंयुतं॥ कस्तूरीद्रवसंयुक्ते मेकीकृत्य ततः परं॥
चक्रमेतत्समालिख्य यस्य नाम्ना महेश्वरि॥ तस्य व्याघ्रहयव्याधिरिपुसर्पगजादिकं॥ चोरग्रहजलारिष्टं
शाकिनीडाकिनीभवं॥ भयं न विद्यते देवि परमेवाभिचारजं॥ नित्यं समर्चयेद्देवि कालमृत्युं विनाशयेत्॥
अथवा मध्यगां देवीं त्रिकोणे नयमध्यगे॥ अथ स्वनामसंयुक्तं रोचनाकुंकुमान्वितं॥ निधापयेत्स्वसमाला
दासवत्किंकरो भवेत्॥ पीतद्रव्यैः समालिख्य पीतपुष्पैः समर्चयेत्॥ पूर्वाशाभिमुखो भूत्वा स्तंभयेत्सर्ववादिनः॥
सहस्रवक्त्रो देवि मूको भवति तत्क्षणात्॥ नाम्ना यस्य स वाग्मी हि पाषाणइव निश्चलः॥ जायते देवदेवेशि महा
नीलीरसेन तु॥ नाम संयोज्य विधिवद्दक्षिणामामुखो बुधः॥ वक्त्रोदग्ध्याम देशानि मारयेद्वैरिणं प्रिये॥ महि

षाम्बुपुरीषाभ्यां रसमालिख्य शैलजे॥ गोमूत्रेणाच संलिख्य नाम संदर्भपूर्ववत्॥ क्षितिकारनालमध्यस्थं विद्वेष
णकरं भवेत्॥ कृत्वा रोचनया नाम काकपक्षस्य मध्यगं॥ जेवमानं तदाकाशे शत्रूच्चाटनकारकं॥ महानीली
रोचनाभ्यां कुंकुमागुरुसारमादिभिः॥ विलिख्य धारयेन्मंत्री सर्ववर्णान्वशं नयेत्॥ अनेनैव विधानेन स्थापये
त्क्षीरमध्यगं॥ तेनोदकेन संस्नातं पीतेन सर्ववश्यकृत्॥ सौभाग्यं जायते तेन पानीयेन न संशयः॥ एतन्मध्य
गतो पृथ्वीनगरं वामलोचने॥ सर्वादाम्नो नयेन्मंत्री संज्वलमानं विचिंतयेत्॥ अथवस्येमदेशानि महापातक
नाशनं॥ शिवां संपूजयेद्देवि सुगंधैः कुसुमैः प्रिये॥ महापातकयुक्तात्मा तत्क्षणात्पापहा भवेत्॥ शमीदूर्वा
कुशाश्वत्थपत्रैर्वेरथवार्कजैः॥ मासेन हंति कलुषं सप्तजन्मकृतं नरः॥ पूर्वाशाभिमुखो भूत्वा पीतद्रव्यैः
समर्चयेत्॥ पीतस्थाने समालिख्य स्तंभयेत्सर्ववादिनः॥ उत्तराभिमुखो भूत्वा चंदनेन समालिखेत्॥ संपूज्य वि
धिवद्विद्वान्सर्वयोषिन्मनोहरः॥ वश्यभोजायते देवि दासीमिव शं नयेत्॥ यमाशाभिमुखो भूत्वा चक्रे क्षामयदार्चयेत्॥
यस्य नाम्ना किलैतत्वं चेहानिः प्रजायते॥ अग्निरास्त्रसवायव्यशोककोणेषु पूजितं॥ एवं वश्यरमेशानि क्रमेणापरियोजि
तं॥ स्तंभविद्वेषणव्याधिशत्रूच्चाटकरं परं॥ रोचनालिखितं चक्रं सारमध्ये स्थितं बुधः॥ सर्ववश्यकरं देवि भवत्येव न संश

सौ०र०क० प०

यः॥ गोमूत्रमध्यगं सम्यक् शत्रूच्चाटकरं परं॥ तैलस्थं चक्रराजं तद्विद्वेषणकरं परं॥ भवेत्॥ ज्वलज्ज्वलनमध्यस्थे शत्रुना
शकरं भवेत्॥ यदैकांते चतुर्मार्गे सिंदूररजसा लिखेत्॥ सर्वबाह्यात्समारभ्य यावन्मध्यं महेश्वरि॥ अकारादिक्ष
कारांतां मातृकां तत्र विन्यसेत्॥ पूजयेद्रात्रिसमये कुलाचारक्रमेण तु॥ साधकः खेचरो देवि जायते नात्र संशयः
गिरावेकतरौ तद्वच्च ये कुलमार्गतः॥ अजरामरतां लब्ध्वा सुखी भवति मांत्रिकः॥ श्मशाने पूजयेच्चक्रं महा
भूतदिने तु यः॥ पूर्वक्रमेण विधिवत्साधकः स्थिरमानसः॥ खड्गसिद्धिं च वेतालसिद्धिं च घुटिकां लभेत्॥ पा
दुकांजनसिद्धिं च मनःसिद्धिं च धातुदां॥ समहावीरसिद्धिं तु यक्षिणीचेटकोद्भवां॥ सर्वं लभते मंत्री नात्र का
र्या विचारणा॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ द्वात्रिंशस्तरंगकः॥ इति श्री
सौभाग्यरत्नाकरे द्वात्रिंशस्तरंगः॥ ॥ ॥अथ श्रीविद्यामंत्रभेदा निरूप्यंते॥ तत्र श्रीज्ञानार्णवे॥ सकलाभु
वनेशानि कामेशीबीजमुत्तमं॥ अनेन सकला विद्याः कथयामि वरानने॥ शक्त्यंतस्तुर्यवर्णीयं कलमध्ये सुलोचने
॥ वाग्भवे पंचवर्णं तु कामराजमथोच्यते॥ मादनं शिवचंद्राढ्यं शिवोत्तमीनलोचने॥ कामराजमिदं देवि षड्वर्णं सर्व भ
मोहनं॥ शक्तिबीजं वरारोहे चंद्राढ्यं सर्वसिद्धिदं॥ शक्तिरेकादशस्वरः॥ तस्याः अंते अधस्तुर्यवर्णः त्रिमूर्तीशः

२४६

सकलाभुवनेशानी तस्य कलाभ्यां सह वर्तमाना भुवनेशी सर्वत्वात्॥ सकलाभुवनेशानी तस्य कलाभ्यां सह वर्त
माना भुवनेशी सर्वत्वात्॥ कलयोर्मध्ये शोक वर्णद्वये दत्ते कामराजविद्यायाः॥ वाग्भवाख्ये प्रथमकूटे भवति
॥ मादनं सकले सेतत्संबंधात् क्रोधीशः शिवचंद्रेशौ नकुलीशः स्वग्वीशाद्यो यस्य तत्॥ शिवः नकुलीशः औ
नेयस्य तत्॥ चंद्रः स्वग्वीशः आद्यो यस्य तत्॥ वामकेश्वरतंत्रे॥ मादनं तदधः शक्तिस्तदंते बिंदुमालिनी
॥ ऐं इमा काशबीजस्य मधस्तात्त्वलनास्तरे॥ मायाबिंदीश्वरयुतं सर्वां परिनियोजयेत्॥ अयं सवाग्भवो देवी
वागीशात्त्वपूर्वकः॥ शिवबीजं त्रिधा कृत्वा सृष्टिस्थितिलयक्रमैः॥ द्वयमाद्येन रहितं मायाधो मदनास्त्र
रे॥ पुनस्थितिशिवाधस्तादिंद्रबीजं नियोजयेत्॥ तथाज्य शिवाधोपि ज्वलनार्णं महेश्वरि॥ चतुर्थस्वरसंयुक्तं बिं
दुखंडेंदुलं कृतं॥ एवमेतन्महाबीजं कामराजं महोदयं॥ मायाबीजं महेशानि मादनेशकसंयुतं॥ चंद्रबीजं केव
लं तु विनियोज्य वरानने॥ त्र्यक्षरं सृष्टिक्रमं देवि प्राग्गुरुक्रमेण तु॥ संहारक्रमयोगेन शक्तिकूटं समुद्धरेत्॥ इति
ज्ञानार्णवोक्तवचनव्याख्यानानुसारात्॥ कामराजपक्षे तु स्फुटोर्थः॥ लोपामुद्रापक्षे तु सारसंग्रहे॥ माश
क्तिं समाख्याता दनेस्वीकारकः शिवः॥ एवं मादनमित्युक्तो हकारशिव संज्ञकः॥ तत्र शक्तिर्ययार्थ

सौ.र.क.
प.

ते सकारश्च विधीयते॥ शिवो हकार इत्युक्तः सकारः शक्तिरुच्यते॥ बिंदुमालिनिकार्णस्य पर्यायः परमेश्वरि॥ श
क्त्योर्मातृकार्णा तेमायाविहि स्वरादयः॥ यथा स्थिता पंच वर्णा वाग्भवस्य निराविला॥ तावेतौ कामशक्त्या
ख्यौ वर्णौ निष्कीलकात्मकौ॥ हंसपरमेश्वरेर्विमादने ज्ञातरूपस्तु विकाशः शिव उच्यते॥ सकारस्तत्तु रोज्ञेयः
संकोचः शक्तिरूपवान्॥ संकोचः परमा शक्तिर्विकारः परमः शिवः॥ संकोचश्च विकाशश्च हस इत्यक्षरद्वयं॥
तयोरधोधोरूपेण कवर्णो बिंदुमालिनी॥ अधोध ईं तु आकाशोज्वलनश्च तयोरधः॥ मायाबिंदुईगौ चैव वाग्भ
वो सावकीलकः॥ ज्ञानार्णवे॥ कामराजाख्यविद्यायाः शक्तिं तुर्यं च सुंदरि॥ हित्वा मुखे शिवे तु म्यो लोपामुद्रा
प्रकाशिता॥ कामराजाख्यविद्यायाः शक्तिं तुर्यं च सुंदरि॥ हित्वा मुखे शिवे तु म्यां लोकोपामुद्रा प्रकाशिता॥
कामराजाख्यविद्यायाः पूर्वोक्तायाः शक्तिं एकारं तुरीयमोकारं कलयोर्मध्यस्थितमेतदक्षरद्वयमपास्य क
लयोरादौ क्रमेण हकारसकारौ देयौ॥ एवं कृते लोपामुद्राराधिता विद्या भवति॥ तेनाद्यकूटद्वये पूर्वोक्तमेव
॥ कामराजाख्यविद्याया वाग्भवे नवराननेः॥ विपो वा रेपवस्याभिशक्तिमादनमध्यगे॥ शिवे कुर्याद्वाग्भवं तु
शिवाद्यं कामराजकं॥ चंद्राद्यं तत्तृतीयं स्यादितीयं मनुपूजिता॥ शक्तिमादनयोः एकारककारयोर्मध्ये शि

२८०

वं हकारं कुर्यात्॥ तदा वाग्भवं कूटं भवति॥ कामराजविद्याया वाग्भवं हकाराद्यं चेत्॥ कामराजकूटं स्यात्॥ चंद्राद्यं
सकाराद्यं तद्वाग्भवे वाग्भवे नेति॥ इति ज्ञानात्॥ कुबेरविद्या वधिरयमधिकारः॥ तृतीयं स्यात् शक्तिकूटं स्यात्॥ शि
वाद्यं वाग्भवं देवि चंद्राद्यं शिवमध्यगं॥ कौ मादने कामराजे तु शक्तिबीजे हसाननं॥ चंद्राराधित विद्येयं भोगमोक्ष
फलप्रदा॥ शिवो हकारः॥ आद्यो यस्य तत्॥ चंद्र स्याद्यं मादनं शिवस्य मध्यगं अधः कुर्यादित्यर्थः॥ तेन हकसल
इत्यादि॥ हसौ आननं आदौ यस्य तत्॥ हसाद्यं वाग्भवं विद्धि शिवाद्यं सहमध्यगे॥ मादने कामराजे तु तार्तीयं स्मर
पार्वति॥ शिवाद्यं शक्तिबीजं स्याद्विद्या कुबेरपूजिता॥ सहयोर्मध्यगं तेन हसकहल इत्यादि कामराजाख्यविद्यायास्तार्ती
यं सुरवंदिते॥ हसाद्यं शक्तिबीजं तु विद्या गस्त्यप्रपूजिता॥ तार्तीयं शक्तिकूटे हसौ आद्यौ यस्य तत्॥ तेन आद्यकूटद्व
ये कामराजविद्याया एव कामराजाख्यविद्याया वाग्भवे मादनं न्यसेत्॥ चंद्रं तत्रैव संयोज्य कामराजे तथा तथा॥ श
क्तौ चंद्रमुखं कुर्याद्विद्येयं नंदिपूजिता॥ शक्तौ तु कूटे॥ चंद्रं सकारं मुखे आदौ तेन सकइत्यादि॥ कामराजाख्यवि
द्यायाद्वितीये भित्तृतीयके॥ शक्तिबीजं स्थितं देवि चंद्राधः कुरुतत्वतः॥ इंद्राराधितविद्येयं भुक्तिमुक्तिप्रदायि
नी॥ शक्तिबीजस्यांतर्मित्तृतीयकूटस्थितं लकारं तदीयसकारस्याधः कुर्यात्॥ तेन सलकइत्यादि॥ आद्यकूट

सौ॰र॰क॰
प॰

दयेतुकामराजप्रस्तारस्यैव॥लोपामुद्राख्यविद्यायाः द्वितीयायांमहेश्वरि॥कामराजेभृगुंहित्वातार्त्तीयेसकगःशि
वः॥एषाविद्यावरारोहेत्रिपुरासूर्यपूजिता॥भृगुंसकारं।तदाहकहइत्यादि॥तृतीयेशक्तिकूटेसकगःसकार
ककारयोरधःहकारंकुर्यादित्यर्थः॥लोपामुद्रांद्वितीयांतुविलिख्यसुरवंदिते॥पुनर्विलिख्यतामेवचतुर्थपंचमेस्थिता
॥हित्वातुभुवनेशानीमेकोच्चारेणचोच्चरेत्॥चतुःकूटमहाविद्याशंकरेणप्रपूजिता॥पूर्वोक्तामगस्तिविद्यामालि
ख्यतामेवपुनरपिविलिख्यचतुर्थपंचमयोःद्वितीयवारलिखितयोःआद्यद्वितीयकूटयोरंतस्थितेमायाबीजद्वयं
विहायकूटत्रयेणैकंकुर्यादित्यर्थः॥लोपामुद्रांपुनर्देविविलिख्यतदनंतरं।नंदिकेश्वरविद्यांचषट्कूटांवैस्नवी
भवेत्॥लोपामुद्राभगस्तिविद्या॥अगस्तिनंदिविद्याभ्यांषट्कूटावैस्नवीप्रियेइतिसंहितोक्तेः॥कामराजाख्यविद्या
यास्त्रिकूटेभुवनानने॥यास्थिताभुवनेशानीतांतुकुरुमहेश्वरि॥विंदुहीनांनादहीनांदुर्वासःपूजितांभवेत्॥तेनह्री
इतित्रिपुरकूटेभुवनेशोच्चारणं।दक्षिणामूर्तिसंहितायांतुमायास्थानेहरीवर्णयुगलेचक्रमाद्विलिखेत्॥दुर्वाससापूजि
तेयंपुरुषार्थप्रदायिनीत्युक्तेनहरीइतिपृथगुच्चारः॥तृतीयतेवर्णयुगलमितुक्तेः॥अत्रयथागुरूपदेशतोजपःका
र्यः॥तानाहवि।त्रिकूटाःकथिताःसर्वाश्चतुःकूटाचशांकरी॥षट्कूटावैस्नवीचैवेति॥तथाचंद्रांतेवारुणांतेचशक्रा

दिसहितंपृथक्॥वामाक्षिविंदुनादाढ्यंविश्वमातृकलात्मकं॥विद्यादौयोजयेद्देविसासाक्षाद्यस्वरूपिणी॥त्रिकूटाः
सकलाभेदाःपंचकूटाभवेतिहि॥वैस्नवीवसुकूटास्यात्षट्कूटाशांकरीभवेत्॥द्वितीयोयंप्रकारःस्यादुत्तमोभु
वनत्रये॥वेदांतंहकारः॥वारुणांतंशकारः॥शक्रादिःरेफः॥वामाक्षिईकारः॥विंदुरनुस्वारः॥नादोर्द्धचंद्रः॥एतैर्माया
वीजेश्रीवीजेचोद्धृतं।तथा।वेदादिमेडितादेविशिवशक्तिमयीसदा॥तदाभेदास्तुसकलाःषट्कूटापरमेश्वरि॥वैस्नवी
नवकूटास्यात्सप्तकूटातुशांकरी॥वेदादिप्रणवः।तथा॥आद्यंवीजद्वयंभद्रेविपरीतक्रमेणतु॥विलिख्यपरमेशानि
ततोन्यापिसमुद्धरेत्॥विपरीतक्रमेणश्रीमायाक्रमेण॥अंतर्मुखावरारोहेकुमारित्रिपुरेश्वरि॥अंतर्मध्येमुखं
आद्येवाग्भवेवीजेयस्याःसातथाकामवाग्भवशक्तीवीजक्रमेणेत्यर्थः॥एभिस्तुपंचसंख्याकैर्वीजैःसंपुटिताभवेत्॥
षट्कूटापरमेशानिवेदाद्येयंषोडशाक्षरी॥त्रिकूटाःसकलाभद्रेषोडशार्णाभवंतिहि॥वैस्नवीकोनविंशार्णाशिवास
प्तदशाक्षरी॥वक्ष्येकोटिसहस्रैस्तुजिह्वाकोटिशतैरपि॥वर्णितुंनैवशक्येयंश्रीविद्याषोडशाक्षरी॥पुटितात्क्रमोत्क्रमे
णाद्यंतयोःपंचवीजयुतामेचमादौवदेत्सर्वसाध्यसंज्ञामनंतरं।विपरीतंपुनस्त्रीनेमंत्रंतत्पुटितंस्मृतं॥इति॥सिद्धे
श्वरितंत्रोक्तेःसंपुटजस्रणं।तथा।षोडशार्णामयाभद्रेश्रीविद्याकथितापरा॥विधानमिवचोरेभ्योरक्षणीयंसदा।

सौ॰र॰क॰
प॰

प्रिये॥ तदेवायस्य कस्याविदेयाचात्मप्रदायिने॥ निर्मलाय समस्ताय प्राणेभ्योप्यधिकाय च॥ वामकेश्वरतंत्रेषू शसतो॥
कामो विसर्गयुतः शक्तिर्माया शक्रस्वरूपा वीति। पश्चाद्देवि महामायाबीजं चांते नियोजयेत्॥ एवं च वाग्भवं बीजं कथितं
देवि दुर्लभं॥ एतज्ज्ञात्वा महाबीजं किं न सिध्यति भूतले॥ कामः ककिविसर्गेनाथकारेण युक्तः। एतेन सर्वत्र श्रीविद्याकूटे
षु सस्वराणवर्णाः पवनीयाः शक्तिः। ए। मायाई। शक्रः। ल। महामाया भुवनेश्वरी। अयमाद्यो वाग्भवकूटः। तथा॥ शि॰
वबीजं समुद्धृत्य शक्तिबीजमनंतरं॥ तदधः कामबीजं तु व्योमानलसंयुतं॥ चतुर्थस्वरसंयुक्तमर्द्धेंदुबिंदुसंयुतं॥
प्रथमे कामबीजस्य कूटं त्रैलोक्यपूजितं॥ शिवबीजं ह। शक्तिबीजं स। कामबीजं क। ह। ल। व्योम ह। अनलेन रेफेण।
चतुर्थस्वरेण ईकारेण च युक्तं। एतेन मायाबीजे व्योमानले त्यादिनोक्तं। तथा॥ वियद्वह्निसमायुतं देवि मादनेन तदनं॰
तरं॥ तदधो हंसबीजं तु इंद्रबीजं च पार्वति॥ विष्णोः पदं वह्नियुतं मायाविजविभूषितं॥ अर्द्धेंदुमस्तकाक्रांतं कूटं चैसौ॰
भाग्यदुर्लभं॥ मध्यकूटमिदं पुण्यं सर्वसौभाग्यदायकं॥ हंसबीजं ह विष्णोः पदमित्यादिना भुवनेशमुद्धृत्य॥ कामबीजं
मदेशानि शिवबीजं ततः परं॥ तदधो वायुबीजं तु इंद्रबीजं ततः परं॥ वियद्वह्निसमायुक्तं चतुर्थस्वरसंयुतं॥ अ॰
र्द्धेंदुबिंदुसंयुक्तं तृतीयं बीजमुद्धरेत्॥ वायुबीजं य। बीयदित्यादिना मयोक्ता। प्राणबीजं समुद्धृत्य कामबीजं समु॰

२६२

द्धरेत्॥ इंद्रबीजं ततो देवी क्रमेण विनियोजयेत्॥ सांतं वह्निसमायुक्तं चतुर्थस्वरसंयुतं। नादबिंदुकलायुक्तं शक्ति॰
कूटं समुद्धरेत्॥ प्राणबीजं ह। देवी सकारः। पिनाकीशं चेंद्रसंस्थमिति वक्ष्यमाणरुद्रयामलवचनात्॥ शांतमित्या॰
दि मानयोद्धृतो। एतान् क्रमेण योजयेदित्यर्थः॥ श्रीरुद्रयामले। ब्रह्मा चाधारशक्तिश्च कलास्मरः पुरंदरौ॥ एता॰
न्संयोज्य परतईश्वरी योजयेच्छिवे। चेंद्रबीजं तदादिस्थं शिवबीजं नियोजयेत्॥ मादनं शक्रबीजस्थं योजयेद्भुवने॰
श्वरीं॥ शिवबीजं मादनस्थं शक्रषष्ठं नियोजितं॥ रक्तसप्तमषष्ठस्थं मायाबीजं समुद्धरेत्॥ तुंडाक्षरं शिवादि॰
स्थं मरुदिंद्रसमन्वितं॥ धराधरसुताबीजमेकत्र विनियोजयेत्॥ वकतुरीयबीजाधः क्रोधीशं च नियोजये॰
त्॥ पिनाकीशं चेंद्रसंस्थमाकाशं रक्तसंयुतं। चतुर्थस्वरसंयुक्तं नादबिंदुविभूषितं॥ सर्वमेकत्र संयोज्य पंच॰
पंचाक्षरी भवेत्॥ पंचकूटात्मिका विद्या सर्वतंत्रेषु गोपिता॥ ब्रह्मा क। आधारशक्तिः ए। कलास्मर ई। पुरंदर॰
ल। ईश्वरी मायाबीजं। चेंद्रबीजं स। तदादिस्थं शिवबीजं। तेन सकारादौ हकार इत्यर्थः। मादनेक। शक्रबीज॰
स्थो लस्य। भुवनेश्वरी मायाबीजं। शिवबीजं ह। ततु मादनस्थे ककारोपरिस्थितं। शक्रषष्ठं तत्। रक्तसप्तम॰
षहकारस्य विजो मेन षष्ठमक्षरं लकारतत्स्थं तदुपरिस्थितं। भुवनेश्वरी मायाबीजं। एतेन हकहलह्रीं इ॰

तिरूवंसिद्धं। तुंडाख्यरंक। शिवादिस्थं सकरोपरिस्थितं मरुत्॥ ईडः। ज। धराधरसुतभुवनेश्वरी। वरूतुरीयवीजे ह
क्रोधीशः क। पिनाकीशः ज। चंडः स। आकाशेत्यादिनामयोद्धृता॥ श्रीक्रमसंहितायां। कामेशक्तिच मायो च ईडः
वीजं ततः पठेत्॥ वियदग्निसमायुक्तं नादविंदुसमन्वितं॥ वाग्भवे कथिते क्रै चतुर्थस्वरभूषिते॥ शक्तिः ए
। मायाई॥ वियदित्यादिनाभुवनेश्वरीवीजं॥ वियच्छक्तिततः पश्चात्कालीनकुलवह्निमत्॥ मायाश्वरेण सं
युक्तं नादविंदुकलान्वितं॥ वियद्यैंडेविसमुद्धृत्य कामं श्रीमममहेश्वरि॥ शक्रवीजे परं भडेऽभूपरं स्मृतं
वल्लभे॥ महामायाततः पश्चात्त्वज्ञावनीति कथ्यते॥ मादनेशक्तिवीजं तु वालिमं तु ततः पठेत्॥ ईश्वी
जे ततः पश्चाच्छिववीजं सवह्निकं। चतुर्थस्वरसंयुक्तं विंदुनादविभूषितं॥ शक्तिवीजे हकारः॥ तस्यापि या
क्तिवाचकत्वात्। अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः॥ हकारोंऽत्यः कलारूपो विमर्शाख्यः प्रकीर्तित
इति। संकेतपद्धतिवचनात्॥ वामकेश्वररुद्रयामलयोरैकवाक्याच्च। वालीय। कामराजमिदं देवि शक्ति
वीजं शृणु प्रिये। शिववीजं महादेवि काममिंदं महेश्वरी॥ महामायापदे तस्मात्सर्वकामफलप्रदा॥ महेश्व
री सकारः॥ पिनाकीशे चंडसंस्थमिति यामलोक्तेः॥ डामरे। पंचमी षोडशी चैव तथा सर्वांगसुंदरी॥ चंडाले।

सोऽपि गृहीयाद्धृदि मार्गेण जप्यते। सर्व एव शुभः कालः पूजने ग्रहणेऽपि च॥ न च दोषो दिवारात्रौ संध्यायां च म
हानिशि। न शुद्धिं चिंतयेदत्र भावशुद्धेर्हि शुद्धता॥ नात्र शुश्रूषाद्यपेक्षास्ति न वामित्रादिदूषणं॥ अमित्रादिदूषण
मिति पदच्छेदः॥ तेनारीदोषो नास्तीति। सर्वांगसुंदरी विद्यामाह श्रीमच्छंकराचार्यचरणाः॥ गिरामाहुर्दे
वीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं पद्मां हरसहचरीमद्रितनयां। तुरीया कापि त्वं दुरधिगमनिःसीममहि
मा महामाये विश्वं भ्रमयसि परब्रह्ममहिषी॥ हरसहचरीशब्दाद्धकारसकारौ॥ पद्माशब्दाद्विंदुः॥ लो
पामुद्राकामराजविद्ययोरंत्यकूटे ते वर्णद्वये दत्ते तुरीयानामविद्या स्यादिति। इयं सर्वांगसुंदरीविद्येत्यानं
दगिरिश्रीचरणैर्व्याख्याते। अत्र पद्माशब्दस्य लक्ष्मीवाचकत्वेन कामकलाक्षरप्रतिपादकत्वात्स्म
विंदुत्रयात्मकत्वाद्धकारोपर्येको विंदुः सकारपार्श्वे विंदुद्वयं तेन हंसः पदं सिद्धमिति अस्मदाराध्यचरणो
क्तिः॥ इत्येवं श्रीमत्त्रिविद्यायाः एकपंचाशद्भेदाः श्रीमदाराध्यचरणप्रसादप्राप्ताः प्रदर्शिताः॥ अथ प्रयुज्या
सां विद्यानां नवांशः मित्रादिदूषणमित्युक्तेः॥ सिद्धसाध्यादिविचारो न कर्तव्यः॥ तथापि निसानौ चैपुराणांचना
वेस्यास्तु शकादयः॥ तथाप्यत्रोच्यते किंचिदभिचारादिसिद्धये इति तंत्रराजवचनेनाभिचारकर्म सुखसाधि

सौ·र·क·
प·

रुद्रमंत्रेणाभिचारे क्रियमाणे सर्वस्यैव नाशकरं भवति॥ शत्रोर्वा मित्रभूतेन क्रियमाणो नैष्फल्यं भवति इत्या
दिदोषपरिहाराय स्वस्य मित्रभूतेन शत्रोररिभूतेन तत्कर्मणः कर्तव्यत्वात्॥ तत्परिज्ञानाय मंत्रमेलनच
क्राणि नक्षत्रचक्रादीनि लिख्यंते॥ तत्रादौ नक्षत्रचक्ररचनाप्रकारः॥ तत्र दक्षिणोत्तरायताश्चतस्रो रेखाः
प्राक्प्रत्यगायता दश रेखाश्च लिखित्वा सप्तविंशतिकोष्ठानि विरच्य दक्षिणोत्तरायतपंक्तित्रये सर्वोर्ध्वपं
क्तेः प्रथमकोष्ठे अ आ द्वितीये इ तृतीये ई उ ऊ चतुर्थे ऋ ॠ ऌ ॡ पंचमे ए षष्ठे ऐ सप्तमे ओ औ अष्टमे क
नवमे ख ग इति विलिख्य तदधस्थद्वितीयपंक्तेः प्रथमकोष्ठे घ ङ द्वितीये च तृतीये छ चतुर्थे ज
पंचमे झ ञ षष्ठे ट सप्तमे ठ ड अष्टमे ढ ण नवमे त इति विलिख्य तदधस्थतृतीयपंक्तेः प्रथमकोष्ठे थ द
ध न प फ द्वितीये ब तृतीये भ चतुर्थे म पंचमे य र षष्ठे ल सप्तमे व श अष्टमे ष स ह नवमे ळ क्ष अं
अः॥ इति स्वरादि दक्षिणोत्तरं मातृकावर्णान्विलिख्य सर्वोर्ध्वपंक्तेः प्रथमकोष्ठमारभ्य सर्वाधस्तृती
यपंक्तेर्नवमकोष्ठपर्यंतेषु सप्तविंशतिकोष्ठेषु एकादिसप्तविंशतिनक्षत्राणि परिकल्प्य विचारयेत्॥ तत्र य
स्मिन्कोष्ठे साधकस्य नामाद्यक्षरं तिष्ठति तत्रस्थमेकं वर्णं विज्ञाय तत्र यन्नक्षत्रं समायाति तत्साधकस्य

जन्मनक्षत्रं परिकल्प्य तत्कोष्ठमारभ्य मंत्रस्याद्यक्षरं यस्मिन्कोष्ठे तिष्ठति तत्पर्यंतं गणयित्वा तत्रस्थमंक
नक्षत्राणि च विज्ञाय तत्र यन्नक्षत्रं दृश्यते तन्मंत्रस्य नक्षत्रं परिकल्प्य साधकनक्षत्रमारभ्य मंत्रनक्षत्र
पर्यंतं। जन्मसंपद्विपत्क्षेमप्रत्यरिः साधको वधः। मैत्रं परममैत्रं च जन्माद्यानि पुनः पुनरिति कुला
र्णवोक्तप्रकारेण जन्मादिनवकं पर्यायत्रयेण विज्ञाय फलानि चिंतयेत्॥ तत्फलानि च कुलार्णवे॥ जनुषस्तारा
यामसुरापुर्नाशस्तृतीयया। मृत्युः पंचमतारायां सप्तमाख्यातको मतः॥ द्विचतुःषडष्टनवगतास्ताराः शुभा मताः
॥ इति ताराफलं ज्ञात्वा मंत्रं दद्याद्विशालधीः॥ अथ नक्षत्राणां गणभेदाः॥ तत्र ऋक्षं मूलं च वतारे। अश्विनी मृगशीर्षं
च तथा पुष्य पुनर्वसू। हस्तस्वाती अनुराधा रेवती विष्णुदैवतं॥ भरणी रोहिणी चैव आर्द्रा पूर्वात्रयं तथा॥ पू
र्वाषाढोत्तराषाढा पूर्वभाद्रोत्तरा च निः॥ कृत्तिकाहिर्मघा चित्रा विशाखा ज्येष्ठका तथा॥ मूलं धनिष्ठा शतभिषा च रक्षो
गणाः प्रिये॥ विष्णुदैवतं श्रवणनक्षत्रं देवगण इति विशेषः॥ अहिः आश्लेषा। नरः मनुष्यगणाः॥ अथैतेषां गणानां
प्रीतिविशेषो रुद्रयामले। स्वगणे चोत्तमा प्रीतिर्मध्यमा देवमानुषे॥ अधमा राक्षसे देवे मृत्युर्मानवराक्षसे॥ इति
नक्षत्रशोधनप्रकारः॥ अथ राशिचक्रं॥ तत्र प्राक्प्रत्यगायते रेखाद्वये दक्षिणोत्तरायते रेखाद्वयं च मध्ये चतु

सौ.र.क.
प.

रखेयथा भवति तथा विलिख्य मध्यस्य चतुरस्रस्य चतुःकोणेषु बहिरेकैकां रेखां कृत्वा द्वादशखंडानि विधाय तेषु
खंडेषु प्रागादिप्रादक्षिण्येन। प्रथमखंडे अआइई। द्वितीयखंडे उऊऋॠ। तृतीये ऌॡ। चतुर्थे एऐ। पंचमे ओऔ
। षष्ठे अंअः शषसहलक्षः। सप्तमे कखगघङ। अष्टमे चछजझञ। नवमे टठडढण। दशमे तथदधन। एका
दशे पफबभम। द्वादशे यरलव। इति मातृकावर्णान्विलिख्य तेषु प्रागादिषु द्वादशखंडेषु एकादिद्वादशप
र्यंतानंकानेकैकशः समालिख्य यस्मिन्खंडे साधकस्य नामाद्यक्षरं तिष्ठति तदारभ्य यस्मिन्खंडे मंत्राद्यक्ष
रं तिष्ठति तत्पर्यंतं गणयेत्। तत्र लब्धादि द्वादशस्यांकानां नामानि कुलार्णवे। जन्मधनभ्रातृबंधु
पुत्रकलत्रकाः। मरणं धर्मकर्मव्ययाद्वादशराशयः॥ इति। अथैतेषां फलानि रत्नसागरे। एकोवाप्यथ
पंचमो वा यदि नवमो राशिस्तु सद्बोधवो राशिस्मात् दशमोद्वितीयसहितः षष्ठोभवेत्सेवकः॥ रुद्राग्निस्वरसंख्या
यदिमतो मंत्रोभवेत्पोषकः॥ तस्मात् द्वादशकोष्ठक श्रुतिमितो मंत्रः स्मृतो घातकः इति। रुद्र एकादश। अग्निस्तृ
तीयः। स्वरसंख्यासप्तमः। श्रुतिमितश्चतुर्थः॥ अथ पांचमौक्तिकचक्रं॥ तत्र दक्षिणोत्तरायताः षड्रेखाः प्राक्
पश्चिमायताः एकादशरेखाश्च विलिख्य पंचाशत्कोष्ठानि कृत्वा दशकोष्ठैरेकैका पंक्तिरिति पंक्तिपंचकं

२६५

परिकल्प्य तासु पंक्तिषु सर्वोर्ध्वगतप्रथमपंक्तौ वामादिदक्षिणांतं दशसु कोष्ठेषु अआएकचटतपयष द्वितीय
पंक्तौ इईऐखछठथफरस तृतीयपंक्तौ उऊओगजडदबलह चतुर्थपंक्तौ ऋॠऔघझढधभवळ पंचमपं
क्तौ ऌॡअंङञणनमशक्ष इति वायुपृथ्व्यग्निजलाकाशात्मकान् पंचवर्गान् विसर्गरहितपंचाशद्वर्णवि
भागजनितान्विलिख्य स्वनामाद्यक्षरं यत्र पंक्तौ तिष्ठति तत्रैव चेन्मंत्राद्यक्षरमपि तिष्ठति तदा तन्मंत्रमेकभू
तदैवत्यं स्वकुलं ज्ञेयं। अन्यत्र चेन्मंत्राद्यक्षरं तिष्ठति तदा तत्। किंभूतदैवत्यमिति विचार्य तद्गुणदोषान्जा
नीयात्॥ आत्मनो नामाद्यक्षराधिदैवतभूतस्य विरुद्धभूतदैवत्यं चेन्मंत्राद्यक्षरं भवति तदा तन्मंत्रं न गृह्णी
यात्॥ मित्रभूतदैवत्यं वा तटस्थभूतदैवत्यं वा मंत्राद्यक्षरं स्यात्तदा तन्मंत्रेण गृह्णीयात्। भूतानां वैर
मैत्रीतटस्थता स्वरूपमुक्तं॥ श्रीकुलार्णवे॥ महीसलिलयोर्मैत्रमनिलानलयोरपि। सामान्यमग्निभूम्योस्तु सलि
लानिलयोस्तथा॥ शात्रवं वै पृथिवीनभसि च सर्वत्र चापरं॥ परस्परं विरुद्धानां वर्णानां यत्र संगतिः॥ वर्जयेत्तां रशं
मंत्रे नाशकृत्तत्कुलेश्वरि॥ अपरं आकाशः॥ अथ मंत्राणां सिद्धसाध्यादिशोधनप्रकारः॥ तत्रादौ द्वादशारच
क्रं॥ तत्र द्वादशारचक्रे राशिचक्रवद्विधाय तस्य द्वादशखंडेषु प्रागादिप्रादक्षिण्यक्रमेण अआ इई उऊ एऐ ओऔ

सौ.र.कृ.
प.

ऋँ अः॥ इति द्वादशस्वरान् प्रतिरेखं क्रमेणैकशः समालिख्य पुनस्तथैव ककारादिढकारांतान् वर्णान्विलिख्य पुन-
स्तथैव ङकारादिमकारांतान्वर्णान्विलिख्य पुनस्तथैव मकारादिहकारांतान्वर्णान्नवरेखे पुक्रमेण विलि-
ख्य यस्मिन्कोष्ठे शिष्यनामाद्यक्षरं तिष्ठति तदारभ्य मंत्राद्यक्षरपर्यंतं सिद्धसाध्यसुसिद्धारिक्रमेण गणयेत्
॥ तत्र कुलजमन्त्रावतारे। नवैकपंचमः सिद्धः साध्यः षड्दशयुग्मकः॥ सुसिद्धोत्रिनिकृद्यग्निस्तुर्याष्टद्वाद-
शोरिपुः॥ इति ज्ञात्वावतारे हेमंत्रं दद्याद्विशारधीः॥ अथ षोडशारचक्रे सिद्धसाध्यादिशोधनप्रकारः
नवप्राक्चतुरायतां दक्षिणोत्तरायतांश्च पंचपंचरेखा विलिख्य षोडशकोष्ठानि कृत्वा चतुश्चतुःकोष्ठात्मक
दक्षिणोत्तरायतपंक्तिचतुष्टये सर्वोर्ध्वपंक्तेः प्रथमकोष्ठे अं ततस्तृतीये आं तदधस्तृतीयपंक्तेस्तृतीयकोष्ठे इं तत-
स्प्रथमकोष्ठे ईं पुनः प्रथमपंक्तेर्द्वितीयकोष्ठे उं ततश्चतुर्थे ऊं ततस्तृतीयपंक्तेर्द्वितीये ऋं ततश्चतुर्थे ॠं पुनः द्विती-
यपंक्तेर्द्वितीयकोष्ठे लृं ततश्चतुर्थे ॡं पुनश्चतुर्थपंक्तेश्चतुर्थे एं ततो द्वितीये ऐं पुनर्द्वितीयपंक्तेः प्रथमे ओं तृतीये
औं पुनश्चतुर्थपंक्तेस्तृतीयकोष्ठे अं ततः प्रथमे अः। इति षोडशस्वरान्विलिख्य स्वरलेखनक्रमेणैव कादिषोड-
शकं॥ थादिषोडशकं। हादित्रयं च पुनः पुनर्लिखेदिति मातृकावर्णान्विलिख्य तच्चक्रमीशानादिचतुश्च

तुःकोष्ठचतुष्टयेन विभज्य तच्चतुष्कचतुष्टये यस्मिन्चतुष्के साधकनामाद्यक्षरं तिष्ठति तदारभ्य यस्मिन्मंत्राद्य-
क्षरं तिष्ठति तदवधि गणयित्वा सिद्धसाध्यसुसिद्धारीन्विचारयेत्॥ न साधकमंत्राद्यक्षरयोरेककोष्ठ एव स्थि-
तिश्चेद्भवति तदा स मंत्रः सिद्धः। द्वितीये सिद्धसाध्यः। तृतीये चेत्सिद्धसुसिद्धः। चतुर्थे चेत्सिद्धारिः। एवं ततः प्रा-
दक्षिण्यक्रमाद्द्वितीयचतुष्के चेत्तत्प्रथमकोष्ठे मंत्राद्यक्षरं तिष्ठति तदा स मंत्रः साध्यसिद्धः। तद्द्वितीये चेत्साध्य-
साध्यः। तृतीये चेत्साध्यसुसिद्धः। चतुर्थे साध्यारिः। एवं तृतीयचतुष्के चेत्सुसिद्धसिद्धः। द्वितीये सुसिद्धसा-
ध्यः। तृतीये सुसिद्धसुसिद्धः। चतुर्थे सुसिद्धारिः। एवं तुर्यचतुष्केपि प्रथमे अरिसिद्धः। द्वितीयेऽरिसाध्यः। तृ-
तीयेऽरिसुसिद्धः। चतुर्थेऽर्यरिः। इति सम्यग्गुरुमुखाद्विज्ञाय मंत्रमेतत्कार्यं। अथैतेषां फलानि। त-
त्र कुलजमन्त्रावतारे। सिद्धः साध्यति कालेन साध्यः सिध्यति वा न वा॥ सुसिद्धस्तत्क्षणादेव अरिर्मूलं निकृ-
न्तति॥ तंत्रराजे। सिद्धसिद्धो जपात्सिध्येत् द्विगुणात्सिद्धसाध्यकः॥ सिद्धसुसिद्धसंसेप्रासेः सिद्धारि-
र्हन्ति गोत्रजान्॥ साध्यसिद्धो विसंक्लेशात्साध्यसाध्यो तिदुःखहृत्॥ साध्ये सुसिद्धो भजनात्साध्यारिः
स्वस्त्रियेहरेत्॥ सुसिद्धसिद्धोर्द्धजपात्फलं दद्याद्यथेप्सितं॥ सुसिद्धसाध्यो जापाद्यैः सिद्ध्येत्साधनोप्य

सौ॰र॰क॰ या॥ सन्निदे तु सुसिद्धस्तु पूर्वजन्मकृतश्रमः॥ तस्मात्तं सर्वसिद्धीनां साधने योजयेन्मनुं॥ सुसिद्धारिरशेषेण सका-
प॰ लं मारयेद्ध्रुवं॥ अरिसिद्धः सुतं हन्यादरिसाध्यस्तु कन्यकां॥ तत्सुसिद्धस्तु पत्नीघ्नः अत्यरिः साधकापहः॥ सार-
संग्रहे। दुष्टसंराशिभतारिवर्णप्रचुरमंत्रकं॥ सम्यक्परीक्षितं यत्नाद्दूरे येन्मतिमान्नरः॥ अत्र मंत्रमेलने प्र-
सिद्धमेव नामयात्स्वं॥ सिद्धसाध्यादियोगेषु मंत्रदाने विशेषतः॥ प्रसिद्धं नाम यत्क्रीयास्य सुप्तो येन जागृयात्
।इति ज्ञानार्णववचनात्॥ अथ ऋणधनशोधनप्रकारः॥ तत्र मात्रकायां साधकनामाद्यस्वरमारभ्य मंत्राद्य-
स्वरपर्यंतं गणयित्वा जातसंख्यां त्रिगुणीकृत्य तन्नक्षत्रभिराहृत्यावशिष्टमंकं पृथक्कृत्य निधाय पुनर्मंत्राद्यस्व-
रमारभ्य साधकनामाद्यस्वरपर्यंतं गणयित्वा जातसंख्यां सप्तभिर्गुणित्वा तज्जातसंख्यां चिभिराहृत्यावशि-
ष्टमंकैः पृथक्संस्थाप्यावशिष्टांकद्वये यत्र संख्याधिक्यं स ऋणीति ज्ञेयः॥ यो मंत्रः स्वस्य ऋणी भवति स एव ग्राह्यो
नाम्नः॥ दैवाद्धीनं मंत्रं स्वस्य पश्चात्स्वयमृणीति ज्ञात्वा तद्दास्यांकशोधयित्वा मंत्रशेषांके कियत्संख्यांकमधिक-
मिति विज्ञाय तत्संख्यालक्षं स्वेष्टविद्यां जपेत्॥ तावता ऋणशुद्धिर्भवतीति सोडशार्णादिकं॥ ॥श्रीविद्यानंद-
नाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाख्ये त्रयस्त्रिंशस्तरंगकः॥ ॥इति श्रीसौभाग्यरत्नाकरे त्र-

२५७

यस्त्रिंशस्तरंगः॥ ॥अथोक्तानां काम्यकर्मणामंगत्वेन पूजनीयदेवताक्रमध्येयो विंशेतरंगे वारेशाद्य-
यतिथीशनक्षत्रेशानां पूजाप्रकारः प्रदर्श्यते॥ इदानीं दिननित्यातिथिनित्यानां धातुदेवतानां पंचाशन्मिथु-
नदेवतानां च सांगावरणपूजाविधिः॥ तत्रादौ तंत्रराजे। आसां तु नित्याविद्यानामंगानि शृणु सुंदरि॥ हिरु-
क्षैस्तैः षडंगानि कुर्याद्वर्णैः करांगयोः॥ विम्नस्पमात्रकाम्नुक्रांजयेद्विद्यास्तथैकशः॥ रक्तारक्तांबरारक्तं- श्रीः
भ्रपर्णस्त्वग्विलेपनाः। पाशांकुशेक्षुकोदंडपंचबाणविशिखाः स्मरेत्॥ वामायद्ध्र्यो राद्ये। तदाग्धस्य
योरन्मेदसायुधध्याने॥ तदावृत्तीनां पंचानां शक्तीस्तत्सदृशीः स्मरेत्॥ चतुरस्रद्वयं कृत्वा द्वारद्वयविभूषि-
तं। अष्टपत्रं वृत्तमध्ये तत्र योनौ च तां यजेत्॥ अंगानि त्रिर्मध्ययोनावंतरेत्वायुधानि तु॥ पत्रे तो गुरुपंक्ति-
चक्रोणेष्वष्टसु चक्रमान्॥ वहिर्दले च्छुपि नयायजेद्वर्णैर्विलोमतः॥ रूपिणीः शक्तिसहितैर्मायासन्नासरीयु-
तैः॥ श्रीस्मादिशक्तीस्तद्वाह्ये चतुरस्रे तथा यजेत्॥ आसां बलिप्रदानं च करोतु कुंकुमच्छया॥ समनास्यर्घ्यके दे-
नयाजो ऋतुपाः स्मरन्नधियाइति॥ अथ प्रयोगः॥ ॥तत्र साधकः कृतप्रातराह्निकक्रियः पूजागृहे कृचि-
त्वासनमास्तीर्य प्राग्वक्तरपञ्चत्र प्राङ्मुखो उपविश्य प्राणायामं विधिवत्सर्वंकृत्वा बलिं दत्वा गुर्वादिवंदनपूर्वं

सौ.र.क.
प.

कं संक्षेपतो भक्तसुद्धिं मातृकान्यासं च कृत्वा योगपीठन्यासं विधाय तद्दिननित्याविद्यया प्राणायामत्रयं कृत्वा शिरसि ऐं ऋ
श्री दक्षिणामूर्त्तिऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदये कालनित्यायै देवतायै नमः॥ इति विन्यस्य मम क्रिय
माणकाम्यकर्माङ्गत्वेन कालनित्यापूजने विनियोगः॥ इति कृतांजलिरुक्त्वा तद्दिननित्याविद्यायाः प्रथमाक्षरमु
च्चार्य हृदयाय नमः॥ द्वितीयं शिरसे स्वाहा॥ तृतीयं शिखायै वषट्॥ पुनः प्रथमं कवचाय हुं। द्वितीयं नेत्रत्रयाय वौ
षट्। तृतीयमस्त्राय फट्। इति षडंगमंत्रानंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य रक्तां रक्तो
त्तरामिति ध्यात्वा मानसपूजादिकं विधाय पुरतः स्वर्णादिपट्टे कुंकुमादिना सकेसरमष्टदलकमलं विरच्य तन्मध्ये प्राग्दी
क्षाप्रकरणोक्तप्रकारेण नवयोनिचक्रं विधायाष्टदलाद्बहिश्चतुरस्रत्रयमंतर्वीथिविभागेन प्राक्पश्चिमयोर्द्वारद्वय
युतं कृत्वा तन्मध्ययोनौ तद्दिननित्याविद्यया अभ्यर्च्य त्रयं जितिवितास्य वर्णादिपीठे स्वपुरतः संस्थाप्य तत्र तद्दिननित्याविद्यया
पुष्पांजलिं दत्वा अर्घ्यपाद्यादिपात्राणि संस्थाप्यात्मपूजां विधाय श्रीचक्रस्य पीठपूजावदेव पीठपूजां विधाय। चारुनादिपुष्पां
तैरुपचारैरुपचर्य सयांगपूजनं कृत्वा योनिमुद्रां पाशादिचतुर्मुद्राश्च प्रदर्श्य मध्ययोनिमध्ये अग्नीशासुरवायव्यकोणेषु दे
व्यग्रे तदादि चतुर्दिक्षु च प्राग्वत्षडंगानि संपूज्य मध्ययोनेर्वहिरष्टकोणाभ्यंतरस्थांतरालेषु प्राग्वदायुधचतुष्टयं संपूज्य दे

व्याः पृष्ठभागे पूर्वयोनिमध्ययोन्योरंतराले गुरुपंक्तित्रयस्थाने प्राग्वद्रेखात्रयं विभाव्य तासु प्रथमरेखायां प्रातःसंध्योक्त
प्रकाशानंदादिगुरुत्रयं मध्यरेखायां ज्ञानानंदादिगुरुत्रयं तृतीयरेखायां स्वभावानंदादिगुरुत्रयं चेति गुरुपंक्तित्रयं सं
पूजयेत्। अत्र स्वमंडलेषु नाथांताः शक्त्यंता देविमंडले इति तंत्रराजवचनात्। प्रकाशानंदशक्तिपादुकां पूजयामीत्या
दिशक्तिपादांतता प्रयोगवाक्ये ज्ञातव्या॥ अत्र यद्यपि तंत्रराजे यद्यपि पादुकां पूजयामीति समासरीत्यैव पूजायामु
क्तं तथापि वृक्षपुस्तकेषु श्रीपादुकां पूजयामीति श्रीपदादिदर्शनात्। सर्वचक्रपूर्वयाः तथा पूजा कार्या। ततो हृद्योनिषु
देव्यग्रमारभ्य वामावर्तेन तद्दिननित्याविद्यायाः आद्याक्षरं षोडशस्वरसंपुटं कृत्वा मायाबीजपूर्वकं तेषामाद्यमक्षर
मुच्चार्य कृपिणीशक्तिश्रीपादुकां पूजयामि। द्वितीयं कृपिणीशक्तिश्रीपादुकां पूजयामि। इत्यादि षोडशशक्तीः संपूज्याष्ट
दलेषु च वामावर्तेनाष्टशिखास्थशक्तीः संपूज्य बहिश्चतुरस्रवीथ्यां वामावर्तेन प्राग्द्वाराद्यष्टशक्तीर्मायावि
नादिकाः संपूज्य लोकपालार्चनादि नैवेद्यदानांते नित्यहोमं प्राग्युक्तविधिना कृत्वा विद्यया सतर्पणं
त्य बलिदानं च विधाय सर्वं समापयेदिति तद्दिननित्यानित्यार्चनविधिः॥ अथ कामेश्वर्यादिपंचदशनित्यानां पूजावि
धिर्लिख्यते। तत्र कामेश्वरीनित्यापूजनविधिः॥ तत्र तंत्रराजे। अथ षोडशनित्यासु द्वितीयायाः समीरिता। कामे

मौ·र·कृ·
प·

श्वरीति तां सर्वकामदां स्मरेत्तत्त्वतः ॥ तस्मात्संतत्यानमेदोस्तच्छक्तिस्तत्र प्रजनमिति । अत्र पंचदशनित्यादिविद्यानां नि
त्यप्रजाप्रकरणे लिखितत्वान्नात्रोद्धारः क्रियते । दक्षिणामूर्त्तिसंहितायां ॥ ऋषिः संमोहनो नाम च्छंदस्तु पंक्तिरुदाहृ
तं । कामेश्वरी देवतास्यात्कंदर्पबीजशक्तिके । कंदर्पैककार ईकारौ । पृथिवीकीलकं प्रोक्तमिति । पृथिवी लकारः ॥ नेत्र
राजे । मन्त्रविद्यास्वरैरेव कुर्यादंगानि षट्क्रमात् ॥ एकेन हृदयं शीर्षं तावता तो द्वयेन यात् ॥ चतुर्भिर्नयनं तच्च द्वस्त्रमे
केन चोदितं ॥ दक्षश्रोत्रनासाद्वितये जिह्वा रसनाभिगुह्यके ॥ व्यापकत्वेन सर्वांगे मूर्धादिपदावधि ॥ न्यसेद्विद्या
क्षराण्येषु स्थानेषु तदनंतरं ॥ समस्तेन व्यापकं तु कुर्यादुक्तक्रमेण वै ॥ अथ ध्यानं प्रवक्ष्यामि नित्यप्रजानुचोदि
तं ॥ येन देवी सुप्रसन्ना दद्यात्तीष्टमयत्नतः ॥ बालार्ककोटिसंकाशां माणिक्यमुकुटोज्वलां ॥ हारग्रैवेयकांचीभि
रूर्मिकानूपुरादिभिः ॥ मंडितां रक्तवसनां रत्नाभरणशोभितां ॥ षड्भुजां त्र्यक्षणामिंदुकलाकलितमौलिकां ॥ पंचा
ष्टषोडशद्व्यष्टषट्कोणचतुरस्रगां ॥ मंदस्मितलसद्वक्त्रां दयामंथरवीक्षणां ॥ पाशांकुशौ च पुंड्रेक्षुचापं पुष्पशि
लीमुखं ॥ रत्नपात्रं सुधापूर्णं वरदं बिभ्रतीं करैः ॥ वामाद्यूर्ध्वयोरग्रेतदधस्ययोरस्मेतदग्धस्ययोरधरे ॥ एवं ध्या
त्वार्चयेद्देवीं नित्यप्रजानुसिद्धये ॥ प्रयोगादिषु सर्वत्र वक्ष्ये ध्यानानि तत्र वै ॥ मदनोन्मादनौ पश्चात्प्राग्वादीपनमोहनौ ॥

शोषणाश्चेति कथिता बाणाः पंच पुरोदिताः ॥ कुसुमास्त्रेश्च जापश्चान्मदना मदनातुरा ॥ अनंगमदना पश्चात्पंचमी मदवेगि
नी ॥ ततो भुवनपालास्याच्छशिरेखा वनेतरा ॥ रेखा गगनवेगाख्या प्रत्याः पत्रेषु चाष्टसु ॥ श्रद्धा प्रीति रतिश्चैव धृतिः कांति
र्मनोरमा ॥ मनोहराष्टमी प्रोक्ता देवी चाथ मनोरथा ॥ मदनोन्मादिनी पश्चान्मोहनी शंखनी ततः ॥ शोषिणी च वशंकारी
सिंजनी सुभगा ततः ॥ सस्वराः षोडश प्रोक्ताः प्रियदर्शनकांतिकाः ॥ प्रत्यस्ताः प्रतिपत्रं तु पद्मे के षोडशच्छदे ॥ पद्माचेद्या
सुमनसा रतिः प्रीतिर्धृतिस्तथा ॥ ऋद्धिः सौम्या मरीचिश्च परतस्त्वंशुमालिनी ॥ शशिनी चांगिरा छाया ततः संपूर्ण
मंडला ॥ तुष्टामृता च व्याकथिता कलाः स्याः सस्वरा विधोः ॥ षोडशाष्टपिपत्रेषु पूजयेत्तां यथाक्रमं ॥ बहिर्वह्निगणकाले
षु डाकिन्याद्यास्तथार्चयेत् ॥ तद्बहिश्चतुरस्रस्थां लोकेशांस्तत्समान्यसेत् ॥ बटुकं गणपं दुर्गां क्षेत्रेशं चाग्निकोयजेत
॥ अन्यापस्त्रिषु विद्यादिसमाख्यैस्तराश्रितैः ॥ तत्राममि बलिं तेभ्यो दद्यात्कुंभादिचोदितैः ॥ ततस्तामंगविद्याभ्यो रूपा
र्घ पूजयेच्छिवां ॥ प्रागुक्तैरुपचारैश्च होमं कुर्याच्च तत्तथा ॥ घृताक्तैर्मधुराक्तैर्वा प्रसूनैरक्तलैः शुभैः ॥ अत्राभ्यां चेति । अथ प्र
योगः ॥ तत्र प्रात्ववदासनपूजादियोगपीठन्यासांते कामेश्वरीविद्यया प्राणायामत्रयं कृत्वा शिरसि ॐ संमोहनाय ऋषये न
मः ॥ मुखे पंक्तिछंदसे नमः ॥ हृदये श्रीकामेश्वर्यै देवतायै नमः ॥ गुह्ये कं बीजाय नमः ॥ पादयोः ई शक्तये नमः ॥ नाभौ लं

सौ.र.क.
प.

कीलकायनमः॥ इति विन्यस्य मम कर्त्तव्य प्रयोग फल सिद्धये विनियोगः॥ इति कृतांजलिरुत्क्लाऐं हृदयाय नमः। सकलह्रीं
शिरसे स्वाहा। नित्य। शिखायै वषट्। क्लिन्ने। कवचाय हुं। मद्रवे। नेत्रत्रयाय वौषट्। सौः अस्त्राय फट्। इति करषडंगन्
यासं विधाय। दक्षनेत्रे ऐं नमः॥ वामे सकलह्रीं नमः। दक्षश्रोत्रे नित्य नमः॥ वामे म नमः॥ दक्षनसि क्लिं नमः॥ वामनसि न्नेनम
ः॥ क्वायो मन नमः॥ हृदयेन नमः॥ नाभौ द्रव नमः॥ गुह्ये वे नमः॥ सर्वांगे सौः नमः॥ इति वर्णान्विन्यस्य मूल विद्यया त्रिर्व्याप
कं विन्यस्य ध्यानमानस पूजो ने स्वर्णादि पट्टे कुंकुमादि पीठे नाष्टदल कमलेकृत्वा न हहिः षट्कोण तद्बहिश्चतुर्दारस्
क्रं चतुरस्र द्वयमिति पूजाचक्रं निर्माय स्वपुरत श्चंदनादि पीठे संस्थाप्य तत्र कामेश्वरी विद्यया पुष्पांजलिं निक्षिप्य पीदि
स्थापनाद्यात्मपूजांते शाग्वदग्निस्थापन प्रकरणोक्तं कामेश्वरी पीठं संपूज्य तत्र कामेश्वरी विद्यया मूर्त्तिं परिकल्प्य तत्र
कामेश्वरीं तद्विद्यया वाद्यावाहनादि पुष्पांतै रुपचारैः संपूज्य प्राग्वल्लयांगे संपूज्य पंचदलकमलके सरेषु अग्नीशासुर
वायव्यामत्र तादि चतुर्दिक्षु च षडंगानि संपूज्य देव्याः एष भागे पंच दल हृदजयोरं तराले प्रादिननि सापूजोक्तगुरुपंक्तिं
त्रयं संपूज्य पंचदलेषु देव्यग्रादि प्रादक्षिण्येन ह्रीं श्रीं द्रां मदन बाणायनमः॥ ह्रीं श्रीं द्रीं उन्मादन बाणायनमः॥ ह्रीं श्रीं क्लीं दी
पन बाणायनमः॥ ह्रीं श्रीं ब्लूं मोहन बाणायनमः॥ ह्रीं श्रीं सः शोषण बाणायनमः॥ इति संपूज्य तद्बहिरष्टदलेषु देव्यग्रादिप्रा

२७०

दक्षिण्येन। ह्रीं श्रीं अनंगकुसुमा श्री पादुकां पूजयामि।२ अनंगमेखला श्री पा।२ अनंगमदना श्री पा।२ अनंगमदनातुर
श्री पा।२ अनंगमदवेगिनी श्री पा।२ अनंगभुवनपाला श्री पा।२ अनंगशशिरेखा श्री पा।२ अनंगगगनरेखा श्री पा
।२ ततः षोडशदलेषु ह्रीं श्रीं अं श्रद्धा श्री पादुकां पूजयामि।२ आं प्रीतिश्री।२ इं रतिश्री।२ ईं धृतिश्री।२ उं कांतिश्री।२
ऊं मनोरमा श्री।२ ऋं मनोहरा श्री।२ ॠं मनोरथा श्री।२ ऌं मदना श्री।२ ॡं उन्मादिनी श्री।२ एं मोहिनी श्री।२ ऐं शं
खिनी श्री।२ ओं शोषणी श्री।२ औं वशंकरी श्री।२ अं सिंजिनी श्री।२ अः सुभगा श्री।२ इति संपूज्य तद्बहिः षोडशदले
षु ह्रीं श्रीं अं पूषा श्री।२ आं इडा श्री।२ इं सुमना श्री।२ ईं रतिश्री।२ उं प्रीतिश्री।२ ऊं धृतिश्री।२ ऋं ऋद्धिश्री।२ ॠं सौम्या श्री श्री ६
।२ ऌं मरीचिश्री।२ ॡं अंशुमालिनी श्री।२ एं शशिनी श्री।२ ऐं गिरा श्री।२ ओं छाया श्री।२ औं संपूर्णमंडला श्री।२ अं तुष्टि
श्री।२ अः अमृता श्री॥ इति संपूज्य तद्बहिः षट्कोणे ऐं डाकिनी श्री पादुकां पूजयामि। वामाग्रे ऐं राकिनी श्री। एवं देव्याः पृष्ठको
णे ऐं लाकिनी श्री। पृष्ठवामे ऐं काकिनी श्री। पृष्ठदक्षिणे साकिनी श्री। देव्यग्रे हाकिनी श्री॥ इति संपूज्य षट्कोण हहिश्चतुर
स्रांतरे आग्नेयकोणे ऐं वं वटुक श्री पा.पू.। नैर्ऋत्ये गं गणपति श्री.पू.। वायव्ये ऐं दुं दुर्गा श्री। ईशाने ऐं क्षें क्षेत्रेश श्री।
पा। इति संपूज्य तद्बहिश्चतुरस्रे देव्याः पृष्ठमारभ्य पूर्वादिदशदिक्षु ऐं लं इंद्रशक्ति श्री पादुकां पूजयामि। रं अग्निशक्ति

सौ॰ र॰ कृ॰
प॰

आपादुकां प्रजयामिद्रत्यादिजोकेशां स्तदायुधानि च शक्त्यां तैस्तत्रन्नाममभिः सं प्रत्यर्थ्य पादि निम्नहोमो ते प्राग्वत्कुरुकुल्या
बलिं च दत्वा जपादिकं शेषं प्राग्वत्समापयेदिति। अत्र दुर्गाबलिः। प्राग्युक्तवन्दुर्गामंत्रेण देयः। अत्र वेचदशनित्यास्वपि
पूजाहोसर्वत्र नवलिपूजांतेसम्यक्कुर्यात्कुरुकुल्या बलिं च दद्यात्। इति कामेश्वरी नित्यायजनविधिः। अथ भगमालि
नीनित्याविधिः। तंत्रराजे। अथ षोडशनित्यासु स्वतीयां भगमालिनीं। यस्तु देवि प्रवक्ष्यामि सांगासावरणां क्रमात्॥
तदंगान्यथ तद्ध्यानं तदावरणदेवताः॥ तस्य आद्याः क्रमादिति। दक्षिणामूर्त्तिसंहितायां। ऋषिरस्यास्तु सुभगो गाय
त्रीछंद उच्यते। देवतेयं सवीजं तु तरङ्गमात्मके प्रिये॥ शक्तिस्त्वीबीजमस्यं तु कीलकं परमेश्वरीति॥ इयं भगमा
लिनीनित्या तंत्रराजे। अंगानिमंत्रवर्णैः स्याद्याद्येन तदुदीरितं॥ ततस्तु त्रिशीर्षस्याच्छिरवाविभिरुदीरिता। चतुरा
यत्रयैः शेषाण्यंगानि षडिति क्रमात्॥ अरुणामरुणाकल्पां सुंदरीं सुस्मिताननां॥ त्रिनेत्रां बाहुभिष्षड्भिरुपेतां क
मलासनां॥ कल्हारपाशपुंड्रेक्षुकोदंडान्वामबाहुभिः॥ दधानांदक्षिणैः पद्ममंकुशं पुष्पसायकं॥ तत्र यत्रोध्वादि क्रमे
णायुधध्यानं॥ तत्राभिः परितो वृतां शक्तिभिरात्मभिः॥ अक्षरैत्याभिरन्याभिः स्मरोन्मादमदात्मभिः॥ पंचत्रिंशच्छता
लैः स्वरूपिणीशक्तिपंचकं। शक्तास्त्री च संयोज्य शक्ती स्तत्संख्यका यजेत्॥ मदनां मोहिनीं लोलां जंभिनीमुद्यमां शु

विधा

भां॥ ह्लादिनीं द्राविणीं प्रीतिं रतिं रक्तां मनोरमां॥ सर्वोन्मादां सर्वसुखां मत्तंगामभितोद्यमां॥ अनल्पां व्यक्तविभवां विवि
धसौभविग्रहे॥ एतास्तुः शक्तयः पंच पंचाशद्भिः शतैर्त्विति॥ ताभिर्वृत्तां तु तां देवीं पूजयेत्तांश्छिनामसौ॥ अथ पूजा
क्रमं देवि शृणु सर्वार्थदायकं॥ येन विघ्नं वशे न स्याद्दपि स्थावरजंगमं॥ चतुरस्त्रं हृदये कृत्वा कुर्याद्द्वारं तु पश्चिमे॥ त
न्मध्ये पंचदलं कृत्वा तत्कर्णिकागते। योनिद्वयं तयोर्मध्ये तिर्यग्रेखाविधानतः॥ योनीः कुर्याच्च तत्रेखायोनयः परि
तः स्थिताः। अग्रादिलोमगास्तास्तु शक्तिसंस्थाप्य पूजयेत्॥ मध्ये वस्त्रद्वये कृत्वा तच्चविंशतिरेखयाः॥ निष्पाद्य तावं
तीर्योनीर्मदनाद्याः समर्चयेत्॥ वर्त्तांतरालेत्वभितोयजेदंगानि षट्क्रमात्॥ तन्मध्ये भगमालां नाम वायोक्तस्वरूपिणीं
संस्थापनादिभिर्युक्तामर्चयेदुपचारकैः॥ अर्घ्यमंगैश्च मन्त्रेन संसाध्याभ्युक्ष्य मन्त्रतः॥ द्वारस्य पार्श्वयोर्गणेशक्षेत्र
स्थार्चयेत्॥ तदंतर्भगमालायां मदनाद्यास्तथार्चयेत्॥ मध्ये यदेवीमभितोयजेत्तास्यायुधान्यपि॥ ततो देवीं षोड
षोडशभिरुपचारैरुदीरितैः॥ पूजयेदाद्यवर्णेन विदध्यात्रद्धृदि हृदयं॥ जपेद्दशोत्तरशतं नमयेद्देव्यास्तु नित्यशः॥
प्राग्वदग्निमुखे कृत्वा होमं कुर्याद्दशांशतः॥ संयोज्य विंदौ तां प्राग्वन्मन्त्रजेनाप्यर्च्चितां तथा॥ स्वात्मन्युद्वासयेदुक्तवका

पे

सौ॰ र॰ क॰
प॰

रेणमहेश्वरी ॥ देव्यात्मावशाये द्विष्टं नरनारीनराधिपान् ॥ अथ प्रयोगः ॥ तत्र प्राग्वदासनपूजादियोगपीठन्यासांतं
कृत्वा मूलविद्यया प्राणायामत्रयं कृत्वा शिरसि सुभगाऋषये नमः ॥ मुखे ॐ गायत्रीछंदसे नमः ॥ हृदये श्रीभगमालि-
नीनित्यायै देवतायै नमः ॥ गुह्ये हर ङ्लें बीजाय नमः ॥ पादयोः स्त्रीशक्तये नमः ॥ नाभौ ह्रीं कीलकाय नमः ॥ इति विन्य-
स्य मम अभीष्टसिद्धये जपे विनियोगः ॥ इति कृतांजलिरुक्त्वा ॥ ॐ ऐं हृदयाय नमः ॥ ॐ भगभुगे शिरसे स्वाहा ॥ ॐ भगि-
नि शिखायै वषट् ॥ ॐ भगोदरि कवचाय हुं ॥ ॐ भगमाले नेत्रत्रयाय वौषट् ॥ ॐ भगावहे अस्त्राय फट् ॥ इति मंत्रैः कृ-
रषडंगन्यासं विधाय प्राग्वन्मूलविद्यया व्यापकं विन्यस्य भैरुणामित्यादि यथोक्तरूपं ध्यात्वा मानसपूजां विधाय स्व-
र्णादिपट्टे कुंकुमादिभिरंतर्बहिर्विभागेन चतुरस्रद्वयेन चतुरंगुलांतरालं समचतुरस्रां वीथीं कृत्वा तस्याः पश्चिमदि-
ग्भागे मध्ये द्वारं विधाय तस्य चतुरस्रस्य मध्ये पंचदलं पद्मं विरच्य तत्र हृत्पुष्करायां तत्कर्णिकायां समत्रिरेखां तत्रस्य शान्त्य-
त्रयोपयोगमानां योनिं कृत्वा तस्याः करेखां चतुर्विंशतिधा विभज्य तैरंशैस्त्रयोविंशतिचिह्नानि कृत्वा तस्यास्तिसपुरे-
खाप्रवितयां कृत्वा तेष्वेकांशमानमभितस्य त्र्यस्रान्तदंतः प्राग्वन्मध्यत्रिरेखमिति त्रिरेखायोनिं विधाय तस्यां योन्यां

एकोरेखामेव विंशतिधा विभज्य तेषु विंशतिचिह्नानि प्रतिरेखमिति रेखात्रयेपि प्रत्येकं कृत्वा तेषु वाम्याग्रं तरश्चि-
ह्नेषु चिह्नाच्चिह्नमिति क्रमेण पंचचत्वारिंशद्रेखास्तिर्यग्रूपाः प्रतिपिनाश्च विलिखेदेवं कृते बाह्यरेखाग्राणपश्चे-
न्द्रेरेखायाः लिखचत्रिकोणानि पंचविंशदधिकशतसंख्यानि संभवंति ॥ तदंतस्स्वरेखाक्रमेण वृत्तं निष्पाद्य तदंत-
रचितपापं चमांशमानेन क्रमेण वृत्तं विधाय तदंतरप्येकांशमानेन वृत्तांतरे कृत्वा पूर्ववत्त्रयोर्विक्रमेण षोडशांशमद्दिनं-
विक्रमभानं त्रिगुणीकृत्य तत्र समुदायमानं दशधा विभज्य तेष्वेकांशेन चिह्नानि परितस्तद्वृत्तद्वये प्रतिवृत्तं दशदशवि-
धाय तेषु क्रमेण वामाग्रदक्षिणाग्रमिति गोमूत्रिकाक्रमेण तिर्यग्रूपा विंशतिरेखा विलिखेत् । एवं कृते बाह्यवृत्तस्य
स्थानाग्रएमेतस्य वृत्तस्थाग्राणि च त्रिकोणान्यभितो विंशतिसंख्याकानि संभवंति इत्थं पूजाचक्रं निर्माय प्राग्वत्पुरतः सं-
स्थाप्य भगमालिनीविद्यया तत्र भगमालिनीविद्यया मूर्त्यर्घ्यादिस्थापनाद्यात्मपूजांते प्राग्युक्तभुवनेश्वरीपीठं संपूज्य
तत्र भगमालिनीमूर्त्तिं संकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याः पृष्ठभागे वृत्ताभ्यंतरे एव प्राग्वत्प्रकाशा-
नंदादिगुरुपंक्तिचतुष्टयं पूजयित्वा पंचदलकर्णिकामध्यगतवृत्तद्वयीनराजे प्राग्वद्गुरुभिश्च सुरवायव्यादे वायव्यांतदा-
दि चतुर्दिक्षु च षडंगानि संपूज्य द्वारस्य वामदक्षिणपार्श्वयोः ॥ ॐ ऐं रागशक्तिश्रीपादुकां पूजयामि ॥ ॐ द्वेषशक्तिश्री

सौ॰र॰क्रु॰
प॰

पादुकां॰ पू॰।। इतिसंपूज्य पंचदलकमलकर्णिकामध्यगतयोनिद्वयांतरालस्य पंचविंशदधिकशतसंख्यत्रिकोणेषु देव्यग्र
त्रिकोणमारभ्य वामावर्त्तेन ॐ ऐं ऐंरूपिणी शक्तिश्री पादुकां पूजयामि॥१॥ ॐ ऐं भगरूपिणी शक्तिश्री पादुकां पूजयामि॥२॥ ए
वं गरूपिणी शक्तिश्री·।३ तुरूपिणी शक्तिश्री·४ गेरूपिणी शक्तिश्री·५ नरूपिणी शक्तिश्री·६ गिरूपिणी शक्तिश्री·७ नि
रूपिणी·८ मरूपिणी·९ गोरूपिणी·।१०। दरूपिणी·११ रिरूपिणी·१२ मरूपिणी·१३ गरूपिणी·१४ मारूपिणी·।१५ जे
रूपिणी·१६ मरूपिणी·१७ गारूपिणी·१८ वरूपिणी·१९ हेरूपिणी·२० मरूपिणी·२१ गरूपिणी·२२ तुरूपिणी
·२३ त्येरूपिणी·२४ मरूपिणी·२५ गरूपिणी·२६ योरूपिणी·२७ निरूपिणी·।२८ मरूपिणी·२९ गरूपिणी·३० नि
रूपिणी·३१ पारूपिणी·३२ तरूपिणी·३३ निरूपिणी·३४ मरूपिणी·३५ वंरूपिणी·३६ मरूपिणी·३७ गरूपिणी·
३८ वरूपिणी·३९ शंरूपिणी·४० करूपिणी·४१ रिरूपिणी·४२ मरूपिणी·४३ गरूपिणी·४४ रूरूपिणी·४५ पंरू
पिणी·४६ निरूपिणी·४७ त्यरूपिणी·४८ क्लिरूपिणी·४९ न्नेरूपिणी·५० मरूपिणी·५१ गरूपिणी·५२ स्वरू
पिणी·५३ रूरूपिणी·५४ पेरूपिणी·५५ मरूपिणी·५६ वांरूपिणी·५७ तिरूपिणी·५८ मरूपिणी·५९·
गारूपिणी·६० निरूपिणी·६१ मेरूपिणी·६२ ह्यारूपिणी·।६३ नरूपिणी·६४ यरूपिणी·६५ वरूपिणी·६६ ररू

पिणी·६७ देरूपिणी·६८ रेरूपिणी·६९ नेरूपिणी·७० सुरूपिणी·७१ रेरूपिणी·७२ नेरूपिणी·७३ भरू
पिणी·७४ गरूपिणी·७५ क्लिरूपिणी·७६ न्नेरूपिणी·७७ क्लिंरूपिणी·७८ न्नरूपिणी·७९ द्रूरूपिणी·८० वेरूपि
णी·८१ क्लेरूपिणी·८२ दरूपिणी·८३ यरूपिणी·८४ द्रारूपिणी·८५ वरूपिणी·८६ यरूपिणी·८७ अरूपिणी·८८
मोरूपिणी·८९ घेरूपिणी·९० मरूपिणी·९१ गरूपिणी·९२ विरूपिणी·९३ चेरूपिणी·९४ स्तुरूपिणी·९५ भरू
पिणी·९६ सोरूपिणी·९७ मरूपिणी·९८ यरूपिणी·९९ सरूपिणी·१०० वंरूपिणी·१ मरूपिणी·२ त्वानुरूपिणी
·३ मरूपिणी·४ गेरूपिणी·५ म्वरूपिणी·६ रिरूपिणी·७ ऐंरूपिणी·८ क्लींरूपिणी·९ ऊंरूपिणी·१० ह्रींरूपिणी·११
श्रेंरूपिणी·१२ ह्रूंरूपिणी·१३ सौंरूपिणी·१४ ह्रूंरूपिणी·१५ हैंरूपिणी·१६ ह्रौंरूपिणी·१७ हैंरूपिणी·१८ क्लिंरूपि
णी·१९ न्नेरूपिणी·२० मरूपिणी·२१ वांरूपिणी·२२ तिरूपिणी·२३ मरूपिणी·२४ गारूपिणी·२५ निरूपिणी·२६ मे
रूपिणी·२७ वरूपिणी·२८ मारूपिणी·२९ भारूपिणी·३० मरूपिणी·३१ धरूपिणी·३२ स्वोरूपिणी·३३ हुं हुं रूपिणी
·।३४ फ्रौंरूपिणी·३५ शक्तिश्री पादुकां पूजयामि॥ इतिसंपूज्य तदंतर्वर्त्तित्रिकोणद्वयांतरालस्य विंशतित्रिकोणेषु देव्यग्र
मारभ्य वामावर्त्तेन गुं मदनाश्री पादुकां पूजयामि। ॐ ऐं मोहनीश्री पादुकां पूजयामि। एवं जोज़ा· भंजनी· उद्गमा·

सौ.र.द्व. प.

शुभा ह्लादिनी॰द्राविणी॰प्रीतिः॰रतिः॰रक्ता॰मनोरमा॰सर्वोन्मादा॰सर्वसुखा॰अनंगा॰अमितोद्यमा॰अनल्पा॰अव्यक्ता॰
विभवा॰विविधविग्रहा॰क्षोभविग्रहा॰श्रीपादुकां पूजयामीति संपूज्य तदंतरावृत्तवीथीरेखास्वपि । षोडशविन्यस्तेषु
षट्सु खंडेषु देव्यग्रखंडमारभ्य ओं ऐं इक्षुकोदंडाय नमः ।। एवं पाशाय । कह्लाराय । पद्माय । अंकुशाय । पुष्पसायकं
भ्यो नम इति देव्या वामाधःकराद्दक्षिणाधःकरांतं स्वायुधानि संपूज्य पुनस्तद्बिंद्वां भगमालिनीनित्यां संपू
ज्य धूपादि सर्वं प्राग्वत्समापयेत् । इति भगमालिनीनित्यार्चनविधिः ।। अथ नित्यक्लिन्नानित्यपूजाविधिर्लिख्यते । त
च तंत्रराजे । अथ षोडशनित्यासु चतुर्थ्यामुत्पावीति । नित्यक्लिन्नाभिधानोतीतन्मंत्रं प्रागुदीरितं । तदंगानि च त
ध्यानं तत्र क्लिन्नाभिरर्चनमिति ।। दक्षिणामूर्तिसंहितायां ।। ऋषिर्ब्रह्मा समुद्दिष्टो विराट्छंद उदीरितं । नित्यक्लि
न्ना देवता प्रोक्ता वनिता द्राविणी परा । बीजमाद्यं वह्निमायाशक्तिर्नै कीलकं मतमिति ।। तंत्रराजे । आद्येन मंत्रवर्णेन हृ
दयं समुदीरितं ।। ततो द्वाभ्यां पुनर्द्वाभ्यां द्वाभ्यां द्वाभ्यां द्वयेन च ।। कुर्याच्छेषाणि चांगानि करयोश्च न्यसेत्क्रमात् ।। त
त्र षडंगमंत्रोक्तेन च तत्र करद्वये ।। न्यसेद्गुह्यन्मनादिकनित्यानांतं मूर्धगं ।। शेषेत तज्जद्वये न्यस्वा हृदकुक्षौ त्रैन
नोर्द्वयोः ।। तथा ध्वजे च पार्श्वे च पादयोरर्णकान्न्यसेत् ।। अरुणामरुणाकल्पामरुणांशुकधारिणीं ।। अरुणस्रग्वि

२३४

क्लि
क्लिन्नानित्यां
३

लेपनां चारुस्मेरमुखाम्बुजां ।। नेत्रत्रयोल्लसद्वक्त्रां भाले घर्माम्बुमौक्तिकैः ।। विराजमानां मुकुटलसदर्धेन्दुशेखरां ।।
चतुर्भिर्बाहुभिः पाशमंकुशं पानपात्रकं ।। अभयं विभ्रतीं पद्ममध्यासीनां मदालसां ।। वामाद्यूर्ध्वयोरादौ तदाद्यध
स्ययोरस्त्वेवं स्वायुधध्यानं ।। ध्यात्वैवं पूजयन्नित्यां स्वशक्तिभिः ।। क्षोभिणी मोहिनी लोला त्रिकोणादिषु शक्तयः ।। नित्या
निरंजना क्लिन्ना क्लेदिनी मदनातुरा ।। मदद्रवा द्राविणी च द्रविणा चाष्टपत्रगाः ।। मदाविला मंगला च मन्मथार्ता म
नस्विनी ।। मोहा मोदा मानमयी माया मंदा मितावती ।। चतुरस्रगताः पूज्याः मदारुणा च लेखगाः ।। मध्ये नित्या समाक्रा
रवर्णा वा स्वायुधान्विताः ।। चतुरस्रद्वये कृत्वा प्राक्प्रत्यक्द्वारसंयुतां ।। तन्मध्ये ह्यष्टदलं पद्मं तन्मध्ये त्र्यस्रकं तथा ।। अ
र्घ्य पद्मं गन्धाभ्यां कृत्वा तां त्र्यङ्गुखोर्चयेत् ।। चतुरस्रे पश्चिमादिनिर्ऋतिरंतं यजेच्चताः ।। द्वारपार्श्वेषु कोणेषु दिक्षु ता
द्दश पूजयेत् ।। तदंतरद्वयच्चेषु पश्चिमादिप्रदक्षिणं ।। अर्चयेद्दश शक्तीस्ताः तदंतर्योनिकोणगाः ।। त्र्याग्रदक्षिणाति
स्रः शक्तीस्त्वोक्तविधानतः ।। कर्णिकायोनिमध्यस्थदेशे वाग्मीशवह्निषु ।। नेत्रास्त्रं पुरतो दिक्षु यजेदंगानि षट्क्रमात् ।।
ततो देवीं तु तां नित्यां नित्यक्लिन्नामुदीरितैः ।। उपचारैरर्चयेच्च बलिं दद्याच्च पूर्ववत् ।। तदग्रतो जपेद्धि प्रोक्तसहस्रं यदि
वा शतं ।। ततो मर्च्यशिवो होमं कुर्यादुक्तक्रमेण तु ।। आज्यसिक्तैर्मधसाज्येन पुष्पैर्वा सौरभान्वितैः ।। तत्कृपात्स्वहृदि

सौ॰र॰क॰ ५॰

नसंरव्यं प्रग्वन्समाप्यनत्॥ अभ्यर्च्यदेवीमथतोस्वात्मसुद्दास्यपर्ववत्॥ न्यासं कृत्वास्तोत्रयुगंनपित्वातन्मयश्चरेत्
॥ अथ प्रयोगः॥ तत्र प्राग्वदासनपूजादियोगपीठन्यासांतं कृत्वा नित्याक्लिन्नाविद्याप्राणायामं च ये कृत्वा शिरसि
ब्रह्मणे ऋषये नमः॥ मुखे विराज छंदसे नमः॥ हृदि श्री नित्यक्लिन्नायै देवतायै नमः॥ गुह्ये ह्रीं बीजाय नमः॥ पादयोः स्वा
हा शक्त्यै नमः॥ नाभौ क्लिन्ने कीलकाय नमः॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः॥ इति प्राग्वदुक्त्वा ह्रीं हृद
याय नमः॥ नित्यशिरसे स्वाहा॥ क्लिन्ने शिखायै वषट्॥ मदद्रवे कवचाय हुं॥ द्रवे नेत्रत्रयाय वौषट्॥ स्वाहा अस्त्राय फट्॥ इ
ति करषडंगन्यासं कृत्वा॥ हृदये ह्रीं नमः॥ दक्षनेत्रे निं नमः॥ वामे त्यं नमः॥ दक्षश्रोत्रे क्लिं नमः॥ वामे न्ने नमः॥ दक्षिणनासा
यां मं नमः॥ सर्वांगे दं नमः॥ लिंगे वें नमः॥ गुदे स्वां नमः॥ पादयोः हां नमः॥ इति विन्यस्य प्राग्वन्मूलविद्यया व्यापकं कृत्वा ध्या
नादि मानसपूजांते स्वर्णादिपट्टे कुंकुमादिना पूर्वपश्चिमयोर्द्वारद्वययुतं चतुरस्रद्वयं कृत्वा तन्मध्ये वृत्तं अष्टदलं निर्मा
य तत्कर्णिकायां स्वाभिमुखाग्रं त्रिकोणं कृत्वा प्राग्वत्पुरतः संस्थाप्य अर्घ्यादिस्थापनाद्यात्मपूजांते प्राग्वद्भुवने
श्वरीपीठमभ्यर्च्य तत्र नित्यक्लिन्नां विद्यया तन्मूर्तिं परिकल्प्यावाहनादि पुष्पांजल्यंतं संपूज्य त्रिकोणांतः आग्नेयं देवीं परितः षडंगा
नि संपूज्य तद्बहिर्दिक्षु प्रागादिप्राग्वत्प्रकाशानंदनाथादिगुरुपंक्तित्रयमभ्यर्च्य चतुरस्रे देव्यग्रगतद्वारस्य दक्षिणे॥

२७५

ॐ ह्रीं श्रीं मदाविलाम्बा श्रीपादुकां पूजयामि॥ उत्तरे ऐं ह्रीं श्रीं मंगलाम्बा श्रीपादुकां पूजयामि॥ एवं मन्मथार्ता॰ मनस्विनी॰ मोदा॰ प्र
मोदा॰ मानमयी॰ माया॰ मेदा॰ मितावती॰ इति प्रादक्षिण्येन दिग्विदिक्षु द्वारपार्श्वेषु च संपूज्य अष्टदलेषु अग्रदलमारभ्य ॐ ह्रीं
श्रीं नित्या श्रीपादुकां पूजयामि॥ एवं निरंजना॰ क्लिन्ना॰ क्लेदिनी॰ मदनातुरा॰ मदद्रवा॰ द्राविणी॰ द्राविणी श्रीपादुकां पूजयामि॥
त्रिकोणे॥ क्षोभिणी॰ मोहिनी॰ लोलाम्बा श्रीपादुकां पूजयामि॥ इति प्रादक्षिण्येन संपूज्य पुनर्मध्ये नित्यक्लिन्नां तद्विद्यया सं
पूज्य धूपदीपादिकं सर्वं कृत्वा प्राग्वत्समापयेत्॥ इति नित्यक्लिन्नापूजाविधिः॥ अथ भेरुंडानित्यापूजाविधिर्लिख्यते॥ म
न्त्रश्रीतंत्रराजे॥ अथ षोडशनित्यासु भेरुंडा पंचमी तु या॥ तद्विधानं प्रवक्ष्यामि यथाविधि॥ मंत्रोद्धारस्तन्त्रीये म
दंगन्यासवर्त्रिदेवताः॥ पूजाक्रमं चेति॥ दक्षिणामूर्तिसंहितायां॥ ऋषिरस्या महाविष्णुर्गायत्री छंद उच्यते॥ देवतेयं वरारो
हे न्तरीयं बीजमुच्यते॥ वह्निजायातु शक्तिः स्यात्कीलकं स्थाणुरेव चेति॥ तंत्रराजे॥ आद्यं त्रयम वस्यैः षड्भिः कुर्यात्षडंग
कं॥ रंध्रास्यमुखकंठेषु हृन्नाभ्याधारयुग्ये॥ न्यसेन्मंत्राक्षरं वर्णं मातृकान्यासपूर्वकं॥ ततः शक्तीश्वरीं स्याध्यानं चन्द्र
लुपार्वति॥ ध्यात्वाव्रतौतु श्लोकाद्याः सुरासाक्षीत्यर्चयेत्॥ तदंतरष्टपत्रेषु विजयो विमलो शुभं॥ विश्वां विभूतिं विनतां
विविधां विनतो कमात्॥ तदंतरष्टकोणेषु कमलां कामिनीं तथा॥ किरातीं कीर्तिमहितां कुट्टिनीं कुलसुंदरीं॥ कल्याणीं का

सौ.र.क.
प.

लकोणे च पूजयेद्रुक्मयोगतः॥ डाकिनी राकिनी तद्वल्लाकिनी काकिनी तथा॥ शाकिनी हाकिनी षट्कोणे पूर्वक्रमतोऽर्चयेत्॥
इच्छाज्ञानक्रियाशक्तीस्त्रिपुकोणेषु पूजयेत्॥ चतुरस्रद्वयं कृत्वा चतुर्द्वारसमन्विते॥ तदंतरष्टपत्राब्जं वृत्तयुग्ममयोन
रा॥ अष्टास्रमष्टपुरद्वं द्वारवृत्तसमन्विते॥ तदंतस्तादृशं कुर्यात्षट्कोणं चारुविग्रहं॥ तदंतस्तादृशीं कुर्याद्योनिं तन्मध्य
तो यजेत्॥ भेरुंडां पंचमीनित्यामुक्ताशक्तिभिरावृतां॥ अर्घ्यं षडंगमन्त्राभ्यां सेशेषाभ्यां मुखे वा यजेत्॥ बलिं च षोडशा
र्णेन दद्याद्दाढ्येन योः क्रमात्॥ अथ ध्यानं प्रवक्ष्यामि देव्याः सर्वार्थसाधकं॥ तदाद्यत्रिस्थशक्तीनां क्रमेणारुणपार्वति॥
तप्तकांचनशंकाशदेहां नेत्रत्रयान्वितां॥ चारुस्मितांचितमुखीं दिव्यालंकारभूषितां॥ ताटंकहारकेयूररत्नस्तवकमं
डितां॥ रशनानूपुरोर्म्यादिभूषितैरतिसुंदरीं॥ पाशांकुशौ खड्गखेटौ गदावज्रधनुःशरान्॥ करैर्दधानां मासीनां प
जायामप्यदास्थितां॥ शक्तिभिस्तत्समाकारतेजोहेतिभिरन्विताः॥ पूजयेत्प्रददनितः स्थितसौम्यमुखाः सदा॥ एवं
देवीं मावतीं गिरावृतामर्चयेत्तथा॥ बलिमापूर्ववत्तयोर्दद्यात्सर्वोक्तविधिना सुते॥ अथ प्रयोगः॥ तत्र प्राग्वदासनपूजादियो
गपीठन्यासांते भेरुंडाविद्यया प्राणायामत्रयं कृत्वा शिरसि॥ ॐ महाविष्णवे ऋषये नमः॥ मुखे ॐ गायत्रीछंदसे नमः॥
हृदि ॐ भेरुंडानित्यायै देवतायै नमः॥ गुह्ये क्रौं बीजाय नमः॥ पादयोः ॐ स्वाहाशक्तये नमः॥ नाभौ क्रों कीलकाय नमः॥

२९६

॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये जपे विनियोगः॥ इति कृतांजलिरुक्त्वा॥ ॐ क्रौं हृदयाय नमः॥ ह्रौं शिरसे स्वाहा॥ क्रौं शि
खायै वषट्॥ श्रौं कवचाय हुं॥ ह्रौं नेत्राय वौषट्॥ ह्रौं अस्त्राय फट्॥ इति करषडंगन्यासं कृत्वा ब्रह्मरंध्रे ॐ नमः॥ भाला
ये क्रौं नमः॥ मुखे ह्रौं नमः॥ कंठे क्रौं नमः॥ हृदि श्रौं नमः॥ नाभौ ह्रौं नमः॥ मूलाधारे ज्रौं नमः॥ दक्षपादे स्वौं नमः॥ वाम
हं नमः॥ इति विन्यस्य प्राग्वद्व्यापकं कृत्वा तप्तकांचनशंकाशामित्यादिध्यात्वा मानसपूजांते प्राग्वत्स्वर्णादिपट्टे
कुंकुमादिना चतुर्द्वारयुक्तं चतुरस्रद्वयं कृत्वा तदंतरष्टदलपद्मं तदंतर्वृत्तं तदंतरष्टास्रं पुनस्तदंतर्वृत्तं तदंतः
षट्कोणं तदंतर्वृत्तं तन्मध्ये स्वाभिमुखाग्रत्रिकोणरूपां योनिं च कृत्वा प्राग्वत्स्वस्याप्याभ्यर्च्यार्घ्यपात्रं पूजां
ते प्राग्वद्भुवनेश्वरीपीठमभ्यर्च्य तत्र भेरुंडाविद्यया मूर्तिं परिकल्प्यावाहनादि प्राणप्रतिष्ठांते योनिमुद्रां प्रदर्श्यास
नादिपुष्पोपचारांते योन्यंतर्देवीमभितः प्राग्वत्षडंगानि संपूज्य योनिवृत्तयोरंतराले देव्याः पृष्ठभागे प्राग्वद्गुरु
पंक्तित्रयमभ्यर्च्य चतुरस्रपश्चिमद्वारपार्श्वयोः ह्रौं श्रीकौमारीश्रीपा०।२ वैष्णवीश्रीपा०। पूर्वद्वारस्योत्तरदक्षिणपा
र्श्वयोः २ वाराहीश्री० २ इंद्राणी० दक्षिणद्वारस्य पूर्वपश्चिमपार्श्वयोः २ चामुंडाश्रीपा० २ महालक्ष्मीश्री०। इति संपू
ज्य चतुरस्रस्य वायुकोणे कृतयुगशक्तिश्रीपा०। ईशाने त्रेतायुगशक्तिश्री०। आग्नेये द्वापरयुगशक्ति०। नैर्ऋति

सौ॰र॰कृ॰
प॰

कोणे कलयुगशक्तिः॥ इति संपूज्य तदंतरष्टदलेषु देव्यग्रदलमारभ्य प्रादक्षिण्येन ह्रीं श्रीं विजयायै नमः। श्रीपा॰। एवं विम
ला॰ सुभा॰ विश्वा विभूति॰ विनता॰। विविधा॰। विमला॰ इति संपूज्य तदंतरष्टकोणेषु देव्यग्रमारभ्य प्रादक्षिण्येन कमलाख्या
पा॰। कामिनी श्रीपा॰ किराता॰ कीर्त्ति कुट्टिनी॰। कुलसुंदरी॰ कल्याणी श्रीपा॰। कालकोला॰। इति संपूज्य तदंतः षट्कोणेषु दे
व्या वामाग्रकोणे ह्रीं श्रीं डाकिनी श्रीपा॰। एवं दक्षिणाग्रकोणे रं राकिनी॰। पृष्ठकोणे लाकिनी श्रीपा॰। पृष्ठवामाग्रकोणे
काकिनी॰। पृष्ठदक्षिणकोणे साकिनी॰। पृष्ठकोणे हाकिनी॰। इति संपूज्यांतस्त्रिकोणे देव्यग्रकोणमारभ्य प्रादक्षिण्ये
न ह्रीं श्रीं इच्छाशक्ति श्रीपा॰। ज्ञानशक्ति श्रीपा॰। क्रियाशक्ति श्रीपा॰। इति संपूज्याष्टकोणषट्कोणयोरंतराले देव्या द
क्षिणाग्रादिषु पृष्ठदक्षिणाग्रांतं स्थानचतुष्टये परिकल्प्य शरीरेभ्यो नमः॥ वज्रायेनमः॥ खड्गायनमः॥ अंकुशाय
नमः॥ इति देव्या दक्षिणाधःकरांतस्थान्यायुधानि संपूज्य देव्याः पृष्ठे वामभागमारभ्य वामाग्रावधि स्थानचतु
ष्टयं परिकल्प्य तेषु पाशायनमः॥ चर्मणेनमः॥ गदायैनमः॥ धनुषेनमः॥ इति देव्या वामोर्ध्वकरादितदधःक
रांतस्थान्यायुधानि संपूज्य प्राग्वत्खेटकपालौ सदायुधानि च संपूज्य पुनर्मध्यस्थाने सांगविद्यया संपूज्य धू
पादि सर्वं प्राग्वत्समापयेदिति॥ इति मेरुतंत्रोक्तनित्यापूजाविधिः॥ अथ वह्निवासिनीनित्यापूज्या॥ तत्रश्रीतंत्रराजे २९७

॥ अथ षोडशनित्यासु या षष्ठी समुदीरिता॥ सा विद्या वह्निवासिन्याः कथिता भद्रवासरा तदंगानि लिपिन्यासं ध्यानं शक्ति
भिरर्चनं॥ दक्षिणामूर्त्तिसंहितायां॥ ऋषिर्वसिष्ठश्छंदः स्याद्गायत्री देवतास्विह॥ आद्येन बीजशक्ती स्यात्कीलकं मध्यमेव
चेति॥ तंत्रराजे॥ विद्याद्वितीयबीजेन स्वरान्दीर्घान्नियोजयेत्॥ मायांतान्वह्निरेवांगन्यासं चरेत्सकरांगयोः॥ नवाक्षराणि
विद्याया नवरंध्रेषु विन्यसेत्॥ व्यापकं तु समस्तेन कुर्याद्देव्यात्मसिद्धये॥ सर्वास्वपि च विद्यासु व्यापकन्यासमाचरेत्
॥ तेन तन्मयो भूयात्साधकस्तेन सिद्ध्यति॥ तस्मात्किं चिरेण देवी नो प्रसादाय संभवेति हि॥ मातृकायाः षडंगं च मातृक
न्यासमेव च॥ सर्वासामथ मंत्राणां पश्चान्नोदितं मया सेन॥ तज्जिताया स्तुवर्गैस्तत्स्तोकमक्षभिरेव च॥ तेन तस्यास्तु जिवि
शोन्यासो नैव समीरितः॥ तप्तकांचनसंकाशां नवयौवनसुंदरीं॥ चारुस्मेरमुखांभोजां विलसन्नयनत्रयां॥ अष्टाभि
र्बाहुभिर्युक्तां माणिक्याभरणोज्ज्वलां॥ पद्मरागकिरीटांशुसंभेदारुणितांबरां॥ पीतकौशेयवसनां रक्तमंजीरमेख
लां॥ रक्तमौक्तिकसंभिन्नस्तवकाभरणोज्ज्वलां॥ रत्नाब्जं कंबुपुंड्रेक्षुचापपूर्णेंदुमंडलं॥ दधानां बाहुभिर्वामैः कल्हा
रं हेमशृंगकं॥ पुष्पेषुं मातुलुंगं च दधानां दक्षिणैः करैः॥ स्वसमानाभिरभितः शक्तिभिः परिवारितां॥ वामोर्ध्वा
दितदधःपर्यंतं दक्षिणोर्ध्वादितदधःपर्यंतमभिमायुधध्याने॥ एवं ध्यात्वार्चयेद्वह्निवासिनीं विश्वविग्रहां॥ न्यासजि

सौ.र.क. नी विस्फुलिंगिनी मंगला सुमनोहरा। कनका किनवा विश्वा विविधा चेति शक्तयः॥ अष्टकोणेषु संपूज्यास्तदग्रेषु च दक्षिणं
प. ॥ दलेषु द्वादशस्वेता राशिशक्तीः समर्चयेत्॥ मेषां वृषाख्यां शक्तिं मिथुनां कर्कटामपि॥ सिंहां कन्यां तुलां कीटां चापां च म
करामपि॥ कुंभां मीनां यजेत्प्राग्वत् अग्रादारभ्य कोकरि॥ चतुरस्रद्वारयुगे पार्श्वयोः कोणदिक्षु च॥ अन्ययोश्च दिशोः श
क्तीः प्रोक्ता दश समर्चयेत्॥ मायामनास्तरीमध्यगतैर्नामभिरीरितैः॥ धूम्रा सर्वभक्षा च विम्बा च विविधोद्भवा॥ चित्ररू
पावनी पा निःसपत्ना निरातंका चंडा वेनी॥ अर्चितस्वैभवा रक्ता दशमी परिकीर्तिता॥ समास्ते यां समभ्येतो विद्वद्याढ्यलिदेव
तो॥ वह्निदेवी तु संप्रोक्ता कुरुकुल्लादि विद्यया॥ यत्र नोक्ता देवता तु वह्निकर्मणि तत्र तां॥ वज्रयोनेर्वयोर्नित्यु हत्वा तद्ब
हिरंबुजं॥ द्वादशच्छदसंयुक्तं विरध्याद्व्रतयुग्मकं॥ तद्बहिश्चतुरस्रे द्वे द्वारद्वयसमन्विते॥ पूर्वपश्चिमयोस्तस्मिन्स्व
के देवी तथार्चयेत्॥ अथ प्रयोगः तत्र प्राग्वदासनप्राणादियोगपीठन्यासांतं कृत्वा वह्निवासिनी विद्यया प्राणायामत्र
यं कृत्वा शिरसि वसिष्ठऋषये नमः॥ मुखे गायत्रीछंदसे नमः॥ हृदि वह्निवासिनी नित्यायै देवतायै नमः॥ गुह्ये ह्रीं बी
जाय नमः॥ पादयोः नमः शक्तये नमः॥ नाभौ वह्निवासिनी कीलकाय नमः॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये वि
नियोगः॥ इति प्राग्वद्कृत्वा ॐ ह्रां हृदयाय नमः॥ ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्राय वौ

२९८

षट्। ह्रः अस्त्राय फट्। इति करषडंगन्यासं कृत्वा दक्षनेत्रे ॐ नमः॥ वामनेत्रे ह्रीं नमः॥ दक्षकर्णे वं नमः॥ वामकर्णे ह्निं न
मः॥ दक्षनसि वां नमः॥ वामनसि सिं नमः॥ मुखे नैं नमः॥ लिंगे नें नमः॥ गुदे मः नमः॥ इति विन्यस्य वह्निवासिनी विद्य
या व्यापकं विधाय तप्तकांचनशेकाशामित्यादि ध्यात्वा मानसपूजां ते स्वर्णादि पट्टे कुंकुमादिना द्वादशदलकमलं
विलिख्य तत्कर्णिकायां वसुदलं विधाय तन्मध्ये प्राग्वत्त्रयोनिचक्रं कृत्वा पद्माद्बहिर्वृत्तद्वयं विधाय तद्बहिः पूर्व
पश्चिमयोर्द्वारयुतं चतुरस्रद्वयं कुर्यादिति पूजाचक्रं निर्माय प्राग्वत्स्थाप्या ... अर्घ्यस्थापना ... प्रतांते
प्राग्वद्भुवनेश्वरीपीठमभ्यर्च्य तत्र वह्निवासिनी विद्याया मूर्तिं परिकल्प्यावाहनादि पुष्पोपचारांते वा स्याग्नेयं तर्वत्र
योरंतराले प्राग्वत्षडंगानि संपूज्य देव्याः पूरः ... नागे पूर्वयोनिमध्ये योन्यारंतराले गुरुपंक्तित्रयं संपूज्याग्नेयोनि पु
दिव्यग्रमारभ्य प्रादक्षिण्येन ह्रीं श्रीं ज्वालिनी पादुकां पूजयामि॥ एवं २ विस्फुलिंगिनी पा.।२ मंगला.।२ मनोहराश्री.।२
कनकाश्री.।२ किनवाश्री.।२ विश्वाश्री.।२ विविधाश्री पा.।इति संपूज्य द्वादशदलेषु देव्यग्रादि प्रादक्षिण्येन।२ मेषा.।
२ वृषा.।२ मिथुना.।२ कर्कटा.।२ सिंहा.।२ कन्या.।२ तुला.।२ वृश्चिका.।२ चापा.।२ मकरा.।२ कुंभा.।२ मीनाश्री पादुकां पू.।इति
संपूज्य चतुरस्रे देव्यग्रद्वारस्य दक्षिणभागमारभ्य प्रादक्षिण्येन।२ धूम्राश्री पा.।२ सर्वभक्षा.।२ विम्बा.।२ विविधोद्भवाश्री

मे॰र॰क॰ पा॰२ चित्ररूपा॰। इति पश्चिमद्वारपार्श्वद्वयवायव्योत्तरेशादेशिऐशानेरशानेषु संपूज्य पूर्वद्वारयोरुत्तरदक्षिणपार्श्वयो
प॰ र्दक्षिणनैर्ऋतिकोणेषु च ॥ ६ नि:सपत्ना॰२ निरञ्जना॰२ पावनी॰२ अचिन्त्यवैभवा॰२ रक्ताक्षी पादुकां पूजयामीति ॥
संपूज्य तद्बहि: शाम्भवीलोकपालांश्च तदायुधानि च संपूज्य धूपदीपादि सर्वं शाम्भवत्वं समापयेत् ॥ इति वह्निवासि
नीपूजाविधिः ॥ अथ वज्रेश्वरीनित्याविधिः ॥ तंत्रराजे ॥ अथ षोडशनित्यासु सप्तमी या समीरिता ॥ तस्या विधानं वक्ष्यामि
शृणु सर्वार्थसाधकं ॥ ओंकैकवर्णविद्या प्रागेव द्वादशाक्षरविग्रहा ॥ तदंगानि लिपिवित्त्या संध्याने शक्तिभिरर्चनमिति । द
क्षिणामूर्तिसंहितायां ॥ ऋषिर्ब्रह्मा च गीयते ॥ गायत्री छंद आख्यातं देवता परमेश्वरी ॥ परमेश्वरी वज्रेश्वरीति ॥ [illegible]
स्तुहल्ले रथा बीजशक्ती तु वाग्भवं कीलकं भवेदिति ॥ तंत्रराजे ॥ हृदयमेकैकमथ च द्वयं द्वयमथ द्वयं ॥ मायया पुटितं कृत्वा कुर्याद्देगा
नि षट् क्रमात् ॥ द्वयक्षरो त्रना मायायु सौनाभिगुह्ये षुच क्रमात् ॥ रक्तांबरं रक्तवराम्बरकृगंधमाल्यानुलेपनां ॥ चतुर्भुजां
वि त्रिनयनां माणिक्यमुकुटोज्ज्वलां ॥ पाशांकुशौ विस्तुचापं दाडिमीसायकं तथा ॥ दधानां बाहुभिर्नेत्रैर्दयामेदसुशीतलैः ॥
पश्यंतीं साधकेऽत्रस्य षट्कोणे महीपुरे ॥ चक्रमध्येसुखासीनां स्मेरवक्त्रसरोरुहां ॥ शक्तिभिः स्वस्वरूपाभिरावृतां पो
तमध्यगां ॥ सिंहासनेऽभितः पुरस्तस्या मिश्रशक्तिभिः ॥ वृतां नानाविधैर्नौदानिमा नायानादिभिः सदा ॥ कुर्वाणा

मरुणाम्भोधौ चिंतयेन्मंत्रनायिकां ॥ इच्छाज्ञानक्रियास्तत्र त्रिकोणस्थास्त्रिशक्तयः ॥ ज्ञाकिण्यादीः षडस्त्रस्याः पद्मद्वादश
पत्रगाः ॥ हृल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा ॥ निरंजना रागवती तथैव मदनावती ॥ मेखला द्राविणी वेगव
ती द्वादश शक्तयः ॥ ततः षोडशपत्रस्याः शक्तीः शकुर्णयोर्विके ॥ कमला कामिनी कल्यां कलां कलितकौतुके । किराती का
लकदने कौशिकां कुवादिनी ॥ कातरां कपटां कीर्तिं कुमारीं कुंकुमामपि ॥ चतुरस्रस्याष्टापि शक्तीः शकलाय ताः क्रमा
त् ॥ जंभनी वेगिनी नागा चपलापेशलासती ॥ रतिश्रद्धा भोगलोलामदोन्मत्ते मनस्विनी ॥ दिक्षु द्वारेषु पार्श्वेषु को
णदिक्षु च संस्थिताः ॥ द्वादशैता महादेव्याश्चतुरस्रे भितो यजेत् ॥ कृत्वार्घ्यमेतन्मंत्राभ्यां शोकरूपां तनोर्चयेत् ॥ शो
णाब्धिं हेमपोतं च सिंहासनमेतरं ॥ तच्च चक्रं ततो देवीं शाम्भवादावृतशक्तिभिः ॥ मायासमास्तरीमध्यगतैर्नामभिर
र्चयेत् ॥ बलिं च दद्यात्तद्वत्समस्तर्यापुरोक्तया ॥ देव्या स्वकुलकुण्ड्यां होमं कुर्याद्यथाविधि ॥ एतावैरङ्गैः पुष्पैर्घृतै
र्वा होममाचरेत् ॥ शाम्भवत्समापयेन्नित्यमर्चनं ते समीरितं ॥ इति ॥ अथ प्रयोगः ॥ तत्र शाम्भवासनपूजादियोगपीठ
न्यासांते ॥ वज्रेश्वरीविद्यया प्राणायामत्रयं कृत्वा ॥ शिरसि ब्रह्मणे ऋषये नमः ॥ मुखे गायत्रीछंदसे नमः ॥ हृ
दि वज्रेश्वरीनित्यायै देवतायै नमः ॥ गुह्ये ह्रीं बीजाय नमः ॥ पादयोः क्लीं शक्तये नमः ॥ नाभौ ऐं कीलकाय नमः ॥ इति

सौ·र·कु·
प·

विन्यासमम सर्वाभीष्टसिद्धये विनियोगः॥ इति कृतांजलिः कृत्वा ह्रीं क्लिन्ने ह्रौं हृदयाय नमः॥ ह्रौं ऐं ह्रीं शिरसे स्वाहा॥ ह्रीं
क्रौं ह्रीं शिखायै वषट्॥ ह्रीं नित्य ह्रीं कवचाय हुं॥ ह्रीं मद ह्रीं नेत्राय वौषट्॥ ह्रीं द्रवे ह्रीं अस्त्राय फट्॥ इति करषडंगन्यासं वि
धाय दक्षनेत्रे ह्रीं क्लीं ह्रीं नमः। वामनेत्रे ह्रीं न्ने ह्रीं नमः। दक्षकर्णे ह्रीं ऐं ह्रीं नमः॥ वामकर्णे ह्रीं क्रौं ह्रीं नमः। दक्षनसि ह्रीं नि
ह्रीं नमः। वामनसि ह्रीं त्य ह्रीं नमः। मुखे ह्रीं म ह्रीं नमः। वक्षसि ह्रीं द ह्रीं नमः। नाभौ ह्रीं द्र ह्रीं नमः। लिंगे ह्रीं वे ह्रीं नमः। इति वि
न्यस्य मूलविद्यया व्यापकं विधाय रक्तां रक्तांबरमित्यादि ध्यात्वा मानसपूजां विधाय प्राग्वत्स्वर्णादिपट्टे कुंकुमादिना
स्वाभिमुखाग्रत्रिकोणरूपां योनिं विधाय तद्बहिः षट्कोणं तद्बहिर्द्वादशदलपद्मं तद्बहिः षोडशदलपद्मं तद्बहिश्च
तुर्द्वारयुतं चतुरस्रद्वयं कुर्यादिति यंत्रं च कं निर्माय प्राग्वत्स्वपुरतः संस्थाप्यार्घ्यस्थापनं ह्यात्मपूजां ते प्राग्वद्व
ज्रेश्वरीपीठार्चने मंडूकादिपृथिव्यंतं सम्पूज्य तदनुशोणसमुद्राय नमः॥ कनकपोताय नमः। रत्नसिंहासनाय नमः॥ इति
संपूज्य तदनु धर्मादिपीठमंत्रांते प्राग्वत्संपूज्य तत्र यंत्रे श्रीविद्यया मूर्तिं परिकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य
त्रिकोणमध्ये प्राग्वत्षडंगानि संपूज्य त्रिकोणषट्कोणयोरंतराले देव्याः पृष्ठे प्राग्वद्गुरुपंक्तित्रयमभ्यर्च्य तत्त्रिको
णे देव्यग्रादि प्रादक्षिण्येन ह्रीं इच्छाशक्तिश्रीपादुकां पू०। ह्रीं ज्ञानशक्तिश्रीपा०। ह्रीं क्रियाशक्तिश्रीपादुकां पूजयामि इति संपू

२६०

रवा
ज्य षट्कोणेषु प्राग्वत् डाकिन्यादि षट्कं संपूज्य द्वादशदलेषु देव्यग्रमारभ्य प्रादक्षिण्येन ह्रीं हृल्ले श्रीपादुकां। एवं
क्लेदिनी। क्लिन्ना। क्षोभिणी। मदना। मदनातुरा। निरंजना। रागवती। मदनावती। मेखला। द्राविणी। वेगवती। इति संपू
ज्य तद्बहिः षोडशदलेषु कमला। कामिनी। कल्पा। कला। कलिता। कौतुका। किराता। काला। कदनी। कौशिकी। कंबुवादि
नी। कतरा। कपटा। कीर्ति। कुमारी। कुंकुमा। इति प्राग्वत्संपूज्य चतुरस्रे देव्यग्रादि द्वारचतुष्टयस्य पार्श्वे पूर्वपश्चिमद्वार
स्य दक्षिणभागादि प्रादक्षिण्येन। मंजनी। वेगिनी। नागा। चपला। पेशला। सती। रतिः। दोसदा। इति संपूज्य वायव्यादि
कोणचतुष्टये प्राग्वत्प्रादक्षिण्येन। भोगलोला। मदा। उन्मत्ता। मनस्विनी। इति नैर्ऋत्यंतं संपूज्य॥ प्राग्वल्लोकपा
लार्चादि शेषं समापयेदिति। इति वज्रेश्वरीनित्यापूजाविधिः॥ अथ शिवदूतीनित्याविधिर्लिख्यते॥ तत्रादौ तंत्रराजे
। षोडशनित्यासु याप्रोक्ता त्वष्टमी तदा। तद्विधानं शृणु प्राज्ञे सर्वाभीष्टफलप्रदं॥ विद्योद्धारः स्मृतः पूर्वमस्या मन्त्रे त
था॥ तदावरणशक्तीश्च तद्ध्यानं तत्प्रजनमिति॥ दक्षिणामूर्तिसंहितायां। ऋषी रुद्रोऽथ गायत्री छंदः स्याद्देवता शिवा॥
शिवा शिवादूतीति। आद्यं तेबीजशक्तीच मध्यं कीलकमुच्यते॥ इति। तंत्रराजे। कृत्वा प्राग्वत् षडंगानि विद्यार्णैर्नोक्तवर्त्मना
तेनैव पुटितैरेतैर्न्यसेच्छ्रोत्रादि पंचसु॥ षडंगमपि विन्यस्य व्यापकं विधायासीत॥ पश्चादर्घ्यसमुद्दिष्टं तद्रक्षीः

सौ॰र॰कु॰ प॰

शरणपार्वतीति॥ द्विकलाकर्षिणी लोलानित्या मदनमालिनी॥ विनोदा कौतुका पुण्या पुराणा चतुरस्रगाः॥ वागीशी वर
दा विम्बा विनदा विघ्नकारिणी॥ वीरा विघ्नहरा विद्येत्युक्ताः पत्राष्टशक्तयः॥ सुमुखी सुंदरा सारा सुमनाश्च सरस्वती
॥ समया सर्वगा सिद्धेत्युक्ता स्वष्टास्रशक्तयः॥ शक्तिरूपाः षडस्रेषु सर्वास्त्वयान्यदक्षिणे॥ मनदेवीसमाका
रवर्णायुधसमन्विताः॥ शिवां वाणीं दूरसिद्धां चैव विग्रहवतीमपि॥ नादां मनोन्मनां षट्पत्रेषु परितोर्चयेत्॥ इच्छा
ज्ञानक्रियाशक्तीस्त्रिषु कोणेषु पूजयेत्॥ मध्ये देवीं देविनितां पूजयेदष्टमीं शिवां॥ तस्या ध्यानं शरणं प्राज्ञयन्मये वि
श्वमीरिते॥ तथापि भक्तिसत्राणहेतोस्तन्मा परां तनुं॥ निदाघकालमध्याह्नदिवाकरसमप्रभां॥ नवरत्नकिरीटां च
त्रीक्षणामरुणाम्बरां॥ नानाभरणसंभिन्नदेहकांतिविराजितां॥ शुचिस्मितामष्टभुजां स्तूयमानां महर्षिभिः॥
पाशं खेटं गदां रत्नचषकं वामबाहुभिः॥ दक्षिणैरंकुशं खड्गं कुठारं कमलं तथा॥ दधानां साधकाभीष्टदानोद्यमस
मन्वितां॥ ध्यात्वैवं पूजयेद्देवीं दूतीं दुरितनाशिनीं॥ रत्नद्वयं वह्निस्रस्वं तद्द्वयं षट्दृगंबुजं॥ तथा षड्बुजमष्टास्रं तत॰
दष्टदलांबुजं॥ चतुरस्रान्वितासिमाः कृत्वा तन्मध्यगां शिवां॥ आवाह्याभ्यर्चनं कुर्यात् प्रागुक्तविधिना स्थिताः॥ जप्त्वा
कृत्वा नमस्कृत्य स्वात्मन्युद्वासयेत्तथेति॥ अथ प्रयोगः॥ तत्र प्राग्वदासनपूजादियोगपीठन्यासांते हृत्वा शिवदूतीवि

द्यां प्राणायामत्रयं कृत्वा शिरसि रुद्राय ऋषये नमः॥ मुखे गायत्रीछंदसे नमः॥ हृदि श्रीशिवदूतीनित्यायै नमः॥ गुह्ये ह्रीं बीजा
य नमः॥ पादयोः नमः॥ शक्तये नमः॥ नाभौ शिवदूत्यै कीलकाय नमः॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः॥ इति कृ
तांजलिः कृत्वा ह्रां ह्रीं मित्यादि षड्दीर्घस्वरयुक्तमायाबीजेन करषडंगन्यासे विधाय श्रोत्रयोः॥ ह्रीं शिं ह्रीं नमः॥ एवं सर्वांगेषु ह्रीं
वां ह्रीं नमः॥ चक्षुषोः ह्रीं दूं ह्रीं नमः॥ जिह्वायां ह्रीं त्यैं नमः॥ घ्राणयोः ह्रीं नं ह्रीं नमः॥ मनसि ह्रीं मं ह्रीं नमः॥ इति विन्यस्य समस्त
विद्यया व्यापकं विधाय निदाघकालेत्यादि ध्यात्वा मानसपूजां विधाय प्राग्वत्स्वर्णादिपट्टे कुंकुमादिना षट्दलकमल
पद्मं निर्माय तदंतर्वृत्ते मध्ये स्वाभिमुखाग्रं त्रिकोणं पश्चाद् हृदिः षट्कोणं तद्बहिरष्टकोणं तद्बहिरष्टदलपद्मं तद्बहिः पूर्व
पश्चिमयोर्द्वारयुते चतुरस्रद्वये कुर्यादिति रजश्चक्रं निर्माय तत्र स्वपुरतः संस्थाप्याभ्यर्च्यार्घ्यस्थापनाद्यात्मपूजां
ते शिवदूतीविद्यया मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारांते त्रिकोणांतः प्राग्वत् षडंगानि संपूज्य त्रिकोणवृत्तयोरंतरा
ले प्राग्वद्गुरुपंक्तित्रयं संपूज्य चतुरस्रे देव्यग्रद्वारस्य दक्षिणभागमारभ्य प्रादक्षिण्येन ह्रीं श्रीं विकृजा पादुकां पूजयामि
॥ एवं आकर्षिणीपा॰२ लोला॰२ नित्या श्रीपा॰॥ मदना॰२ मालिनी॰२ विनोदा॰२ कौतुका॰२ पुण्या॰२ पुराणा॰ इति संपूज्याष्टद
लेषु प्राग्वद्वागीशी॰॥ वरदा॰ विम्बा॰ विनदा॰ विघ्नकारिणी॰ वीरा॰ विघ्नहरा॰ विद्या इति संपूज्याष्टकोणेषु प्राग्वत्सुमुखी॰ सुं

दरी॰ सारा॰ सुमना॰ सरस्वती॰ समया॰ सर्वगा॰ सिद्धा॰। इति संपूज्य षट्कोणेषु देव्यग्रकोणमारभ्य डाकिनीश्रीपा॰। एवं राकिनी॰
लाकिनी॰ काकिनी॰ शाकिनी॰ हाकिनी॰ इति संपूज्य षट्पत्रेषु। शिवा वाणी॰ दूरसिद्धा॰ वै विग्रहवती॰ नादा॰ मनोन्मनी॰ इति संपू
ज्यांतस्त्रिकोणे देव्यग्रादि प्रादक्षिण्येन। इच्छाशक्तिश्रीपा॰ ज्ञानशक्तिश्रीपा॰ क्रियाशक्तिश्रीपा॰ इति संपूज्य त्रिकोणांतस्त्र्यो
रंतराले देव्या दक्षिणाधःकरादि वामाधःकरांतान्यायुधस्थानानि परिकल्प्य कमलायनमः॥ कुठारायनमः॥ खड्गायन
मः॥ अंकुशायनमः॥ पाशायनमः॥ गदायैनमः॥ रत्नचषकाय इति संपूज्य पुनर्मध्ये देवीं संपूज्य धूपादिकं सर्वं प्राग्वत्कृ
त्वा समापयेत्॥ इति दूतीनित्यार्चनविधिः॥ अथ त्वरितानित्याविधिर्लिख्यते। तत्र श्रीतंत्रराजे। अथ षोडश नित्या
सु नवमी या समीरिता॥ प्रोक्तैव त्वरिताविद्या प्रागेव द्वादशाक्षरी॥ तद्विधानं शृणु प्राज्ञे होमयंत्रादिभिः समं॥ येन मंत्री
मन्त्रया भो विक्षोभयति भूतलमिति॥ दक्षिणामूर्त्तिसंहितायां॥ ऋषिरीशो विराट् छंदो देवतेयं च पार्वती॥ कवचं स्त्रीं श
क्तिर्बीजं हूं कीलकमितीरितमिति॥ इयं त्वरितानित्या तंत्रराजे। विद्या॥ चतुर्थवर्णादि समभिस्त्वस्त्रैरस्तया॥ कुर्यादंगानि
युग्मालैर्बद्धक्रमेण करांगयोः॥ शिरोललाटकंठेषु हृन्नाभ्याधारकेषु च। मध्ये रूयुग्मे तथा जानुद्वये जंघाद्वये तथा॥ पादद्व
ये तथा वर्णान्न्यसेज्ज्ञानादशाविमिसेत्॥ द्वितीयो पांत्यमध्यस्थैर्मंत्रार्णैरितिरैरपि॥ ताराद्यैः शृणु तथ्यानं तच्छ्रीस्तत्रपूज

ने॥ श्यामवर्णां शुभाकारां नवयौवनशोभिनीं॥ द्विद्विक्रमात् हन्नागैः कल्पिताभरणोज्ज्वलां॥ ताटंकमंगदं तद्वत्समनानूपु
रं च तैः॥ विप्रक्षत्रियविट्शूद्रजातिभिर्भीमविग्रहैः॥ पल्लवांशुकसंवीतां शिखिपिच्छकृतैः शुभैः॥ वलयैर्भूषितभुजां
मालिकामुकुटोज्ज्वलां॥ बर्हिबर्हकृतापीडां तच्छत्रां तन्नताकिनीं॥ गुंजागुणलसद्वक्षःकुचकुंकुममंडलां॥ त्रिनेत्रां
चारुवदनां मंदस्मितमुखांबुजां॥ पाशांकुशवराभीतिलसद्भुजचतुष्टयां॥ ध्यात्वैवं तोतलां देवीं पूजयेच्छक्ति
भिर्वृतां॥ तदग्रस्यात्तु फट्कारी शरचापकरोज्ज्वला॥ प्रसादे फलदाने च साधकानां त्वरान्विता॥ यतः सा त्वरिते तु
क्ता महाशक्तिर्नवस्यसौ॥ हुंस्वर्णा गदापाणिर्बर्बरोर्द्धशिरोरुहः॥ किंकिरस्त्वग्रतस्तस्याः पूज्यः सर्वार्थसिद्धये॥ तद्
द्वारपार्श्वयोः पूज्ये जयाविजयसंज्ञके॥ शा क्री स्त स्म रशे स्वर्णवेत्रवेत्रकरांबुजे॥ हुंकारी खेचरी चेडाछेदनी क्षपणी
ततः॥ स्त्रीं हुंकारी क्षेमकारी जोकपाल समाह्वया॥ पूज्याः पद्माष्टपत्रेषु स्थितामंत्राणशक्तयः॥ याभिर्नित्यार्चिता
भिः स्यान्नरो नारी पुमन्वयः॥ शृणु पूजाविधिं तस्यास्त्वरिताया महेश्वरि॥ प्राग्वदर्घ्यं विधायेशी महसिंहासने शुभे॥ आ
सनं हैमचरित्रे विदध्यात्पुरद्वयं॥ पश्चिमद्वारसंयुक्तं तदंतर्वृत्तयुग्मकं॥ तदंतरष्टपत्राब्जं विधायात्र शिवां परां॥ प्रा
ग्वदावाह्य परितः शक्तिभिर्वेष्टितां तथा॥ मुद्रादर्शनपर्यंतं पूजयेत्तां यथोदितां॥ अग्रपत्राग्रके वृत्तमध्ये वर्णैः पुरोदि

सौ॰र॰क॰
प॰

ने॥॥ किंकरस्य बलिं दद्याद्देव्यग्रे प्रागुदीरितैः॥ स्वसमानगणाकीर्णमंडलस्थस्य भक्तितः॥ एवं पूजा विधायाग्रे ज
नयेद्विद्यां सहस्रकं॥ शतं वा हुतहोमस्तु पूजां प्राग्वत्समापयेदिति॥ अथ प्रयोगः॥ तत्र प्राग्वदासनपूजादियोगपीठन्यासांते
त्वरिताविद्यया प्राणायामत्रयं कृत्वा शिरसि सौरये ऋषये नमः॥ मुखे विराट् छंदसे नमः॥ हृदि त्वरितानित्यायै देवतायै
नमः॥ गुह्ये स्त्रीं बीजाय नमः॥ पादयोः हुं शक्तये नमः॥ नाभौ क्षें कीलकाय नमः॥ इति विन्यस्य मम सर्वाभीष्टसिद्ध्यर्थे वि
नियोगः॥ इति कृतांजलिः कृत्वा॥ ॐ खे च हृदयाय नमः॥ च छे शिरसे स्वाहा। छे क्षः शिखायै वषट्। क्षः स्त्रीं कवचाय हुं।
स्त्रीं हुं नेत्राय वौषट्। हुं खे अस्त्राय फट्। इति करषडंगन्यासं कृत्वा शिरसि ॐ नमः॥ ललाटे ह्रूं नमः॥ कंठे खें नमः॥ हृ
दि चें नमः॥ नाभौ छें नमः॥ मूलाधारे क्षं नमः॥ ऊरुद्वये स्त्रीं नमः॥ जानुद्वये हूं नमः॥ जंघाद्वये क्षें नमः॥ पादयोः फट्
नमः॥ इति मायापुटितान् वर्णान् विन्यस्य समस्तविद्यया प्राग्वद्व्यापकं कृत्वा ध्यानादिमानसपूजांते प्राग्वत्स्वर्णा
दिपट्टे कुंकुमादिना पश्चिमदिग्द्वारयुतं चतुरस्रद्वयं विधाय तदंतर्वृत्तद्वयं तदंतरष्टदलपद्ममिति प्राच्यकेनि
र्माय प्राग्वत्पुरतः संस्थाप्याभ्यर्च्य अर्घ्यादिस्थापनाद्यात्मपूजांते भुवनेशीपीठमभ्यर्च्य तत्र त्वरिताविद्यया मू
र्त्तिं परिकल्प्यावाहनादिपुष्पोपचारांते कर्णिकांतः प्राग्वत्षडंगानि गुरुपंक्तित्रयं च संपूज्य पद्मा हृदि वर्तत्रयांत

रालस्थवीथीद्वये देव्यग्रदलाग्रवामे ह्रीं श्रीं फट्कारीपादुकां पूजयामि॥ वामवीथ्यां देव्यग्र एवं किंकरपादुकां पू॰
इति संपूज्य चतुरस्रद्वारस्य दक्षिणोत्तरपार्श्वयोः जयाय नमः॥ विजयाय नमः॥ ततो ऽष्टदलेषु देव्यग्रदलमारभ्य प्रादक्षि
ण्येन ह्रीं श्रीं हुंकारीपा॰। एवं २ खेचरीपा॰ पू॰ २ चंडीपा॰ २ छेदनीपा॰ २ क्षेपणी॰ २ स्त्रीपा॰ २ हुंकारीपा॰ २ क्षेमकरीपादु
कां॰ इति संपूज्य प्राग्वद्ध्वोकपालार्चादि सर्वं समापयेत्॥ अत्र कुक्कुरस्थावजिदानानंतरं किंकरस्यापि देव्यग्रे ऽन्ना
दिभिर्बलिं दद्यादिति। त्वरितानित्यापूजाविधिः॥ ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्य
रत्नाब्धौ चतुस्त्रिंशस्तरंगकः॥ ॥इति श्रीसौभाग्यरत्नाकरे चतुस्त्रिंशस्तरंगः॥ ॥अथ कुलसुंदरी। तत्र श्रीतंत्र
राजे। अथ षोडशनित्यासु दशमी या समीरिता। विद्योक्ता कुलसुंदर्यास्तस्याः पूजाविधिं शृणु। तद्ध्यानमथ तत्सां
तच्छक्तीस्तत्समर्चनमिति। दक्षिणामूर्त्तिसंहितायां॥ ऋषिस्तु दक्षिणामूर्त्ति रहं शिरसि विन्यसेत्॥ छंदः पंक्ति
स्तु विज्ञेयं मुखे विन्यस्य देवतां॥ हृदये परमेशानि विन्यसेत् कुलसुंदरी॥ वाग्भवे बीजमित्युक्तं शक्तिस्तार्तीयमाश्रितं॥
कामबीजे कीलकं स्यात्पुरुषार्थे नियुज्यते॥ इति। तंत्रराजे। त्रिभिस्तैरुदितैर्मन्त्रवर्णैः कुर्यात्षडंगकं॥ आदिमध्याव
सानेषु पूजाजपविधौ क्रमात्॥ द्वयेकं तैस्त्रिभिर्बीजैर्दीर्घस्वरसमन्वितैः॥ कुर्यात्करांगवक्त्राणां न्यासं संयोज्य यथाविधि

सौ॰र॰क॰
प॰

॥ऊर्ध्वप्राग्दक्षिणोदक्पश्चिमापरनामभिः॥मुखैर्नित्यं तरस्यैस्तैः स्तदा न्यसेद्यथाक्रमं॥आधारं प्रहृत्स्वे कंठे द्वि
तीयं लोचनत्रये॥तृतीयं श्रोत्रचिबुके चतुर्थं घ्राणनालुषु॥पंचमे चोसनाभ्यां तु ततः पाणिपदद्वये॥मूलमध्याग्रतोन्य
स्येन्नवधामजवर्णकैः॥लोहितां लोहिताकारशक्तिवृंदनिषेवितां॥लोहितांशुकभूषास्रक्कुलेपनां षण्मुखांबुजां॥प्र
तिवक्त्रे त्रिनयनां तथा चारुस्मितान्वितां॥अन्यर्घ्यरत्नघटितमाणिक्यमुकुटोज्वलां॥ताटंकहारकेयूररसनानूपुरोज्व
लां॥रत्नस्तबकसंभिन्नलसद्वस्त्रस्थलोभुभां॥कारुण्यानंदपरमामरुणांबुजविष्टरां॥भुजैर्द्वादशभिर्युक्तां सर्वेषां
सर्ववाङ्मयीं॥प्रवालाक्षस्रजं पद्मं कुंडिकां रत्ननिर्मितां॥रत्नपूर्णं तु चषकं लुंगीं व्याख्यानमुद्रिकां॥दधानां दक्षिणै
र्वामैः पुस्तकं चारुणोत्पलं॥हैमीं च लेखनीं रत्नमालां कंबुं परैर्भुजैः॥लुंगीमातुलुंगी॥मालांभ्लान पंकजमयीं॥के
यूरं कंबुशंखं॥अभितस्त्वयमानां च देवगंधर्वकिंन्नरैः॥यक्षराक्षसदेवर्षिसिद्धविद्याधरादिभिः॥ध्यात्वैवमर्चयेन्नित्यं
वाक्कुलश्रीकीर्तिसिद्धये॥मितां केवलवाक्सिद्धैर्जस्यैदेम प्रभामपि॥धर्मार्थौ चैरिविदिष्टैर्मनतयेन्निग्रहाय च॥ली
लोचमक्रीकरणे स्मरेन्नत्र दयेसया॥भाषा या सरस्वती वीणासंस्कृता प्राकृता परा॥बहुरूपा चित्ररूपा रम्यानं
दकौतुके॥एकमेकादशप्रोक्तानवयोनिषु पूजयेत्॥बहिरष्टछदांभोजे ब्राह्म्याद्यास्ताः समर्चयेत्॥चतुरस्रे लोकपालां

श्छक्तिरूपान्समर्चयेत्॥इंद्राग्नियमरक्षोभिर्वरुणानिलसोमकान्॥ईशानं तावधीत्याग्रगाद्यष्टदिक्षु धरोत्तरं॥श
क्तैस्तैर्नामभिः प्राग्वत्पूजयेन्सर्वसिद्धये॥चतुरस्रद्वयं कृत्वा प्राकृष्टलग्नद्वारसंयुतं॥तन्मध्ये वृत्तयुग्मस्थं कुर्यादष्टछदां
बुजं॥चतुस्त्रिपंच चत्वारि भागतो नवयोनिके॥कृत्वात्र तो समावाह्य प्राग्वत्सम्यगथार्चयेत्॥एकादशत्वंतशक्ती
र्मध्ययोनेषु पार्श्वयोः॥तथैव लोकपालांत छक्तीर्हरिद्वये चर्ययेत्॥विशेष एष सामान्यमन्यदर्चनमंबिके॥सम्यक्
र्यां बलिं दद्यात्स्नानै तु कुरुकुल्लया॥एवं नित्यार्चनं कुर्यान्नित्यहोमं घृतेन वै॥॥अथ प्रयोगः॥तत्र प्राग्वदासन
प्राणायामादियोगपीठन्यासांते मूलविद्यया प्राणायामत्रयं कृत्वा शिरसि दक्षिणामूर्तिऋषये नमः॥मुखे पंक्तिछंदसे
नमः॥हृदये कुब्जसुंदरीनित्यायै देवतायै नमः॥गुह्ये ऐं बीजाय नमः॥पादयोः सौः शक्तये नमः॥नाभौ क्लीं की
लकाय नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः॥इति छंतांजलिरुक्त्वा षडंगं करं अंग पारं भेच॥ॐ
हृदयाय नमः॥ईं शिरसे स्वाहा॥ऊं शिखायै वषट्॥ऐं कवचाय हुं॥औं नेत्रत्रयाय वौषट्॥अः अस्त्राय फट्॥इति करांगयोर्वि
न्यस्य शिरसि ऐं ओं ऊर्ध्ववक्त्राय नमः॥मुखे ऐं ईं पूर्ववक्त्राय नमः॥दक्षकर्णे ऐं ऊं दक्षिणवक्त्राय नमः॥वामकर्णे ऐं ऐं उत्तरवक्त्राय न
मः॥चबुकाधः ऐं औं पश्चिमवक्त्राय नमः॥ब्रह्मरंध्रे ऐं अः परवक्त्राय नमः॥इति न्यसेत्॥एनामध्येतु आवरणपूजारंभेवि

सौ·र·क·
प·
सा

यायामध्यमेवीजं षड्दीर्घस्वरैर्भिन्नं कृत्वा ह्रैंक्लींह्सौ इत्यादिना न्यसेत्॥ एवं तेन विद्यायाभेदमित्येवमेव स्वरभिन्नं कृत्वा सांसीं
इत्यादिना न्यसेदेवं जपादौ जपमध्ये जपान्ते च। जपमध्ये तु दिक्संख्यायाश्चर्ध जपानन्तरमिति॥ अथ पञ्च कृत्वे प्रथमकृतस्य चक्र
न्यासानन्तरं मूलाधारे ऐं नमः॥ ब्रह्मरंध्रे क्लीं नमः॥ हृदये सौः नमः॥ दक्षनेत्रे ऐं नमः॥ वामे क्लीं नमः॥ ललाटनेत्रे सौः नमः॥ दक्षश्रो
त्रे ऐं नमः॥ वामे क्लीं नमः॥ चिबुके सौः नमः॥ दक्षनेत्रे ऐं नमः॥ वामे क्लीं नमः॥ ललाटनेत्रे सौः नमः॥ दक्षश्रोत्रे ऐं नमः॥ वामे
क्लीं नमः॥ चिबुके सौः नमः॥ दक्षनासापुटे ऐं नमः॥ वामनासापुटे क्लीं नमः॥ तालुनि सौः नमः॥ दक्षिणांसे ऐं नमः॥ वामांसे क्लीं न
मः॥ नाभौ सौः नमः॥ दक्षदोर्मूले ऐं नमः॥ मध्ये क्लीं नमः॥ अग्रे सौः नमः॥ एवं वामदोर्मूलादिषु॥ दक्षोरुमूले ऐं नमः॥ जानुनी क्लीं
नमः॥ पादाग्रे सौः नमः॥ एवं वामोरुमूले जानुनि पादाग्रे च न्यसेत्॥ ततो मूलविद्यया व्यापकं कुर्यात्॥ एतानपमध्ये न योर
पि मध्यवीजो न्यवीजयोरपि चक्रन्यासानन्तरं मूलवीजैर्न्नवविधन्यासे व्यापकं न्यासे च कुर्यादिति संप्रदायः॥ ततो ध्यानमासनप्र
जांते प्राग्वत्स्वर्णादिपट्टे कुंकुमादिना षड्दलकमलं कृत्वा तत्कर्णिकायां प्राग्वत्नवयोनिचक्रं विधाय पश्चाद् हृदि वृत्तद्वयेन हृदि
पूर्वपश्चिमयोर्द्वारयुते चतुरस्रद्वये च कुर्यादिति पूजाचक्रं निर्माय प्राग्वत्सुरतः संस्थाप्यार्घ्यादिस्थापनादात्मपूजान्ते
मंडूकादिना त्वंते प्राग्वत्पीठपूजां कृत्वा षड्दलकेसरेषु वामायै नमः॥ ज्येष्ठायै नमः॥ रौद्र्यै नमः॥ अंबिकायै नमः॥ इच्छायै नमः॥ २८५

ज्ञानायै नमः॥ क्रियायै नमः॥ कुब्जिकायै नमः॥ विषघ्न्यै नमः॥ दूतर्यै नमः॥ आनंदायै नमः॥ इति द्वादशशक्तीः संपूज्य ह्सौः सदाशिव
महाप्रेतपद्मासनाय नमः॥ इति समस्तपीठं संपूज्य तत्र कुलसुंदरीविद्यया मूर्त्तिं परिकल्प्यावाहनादि प्राणप्रतिष्ठान्ते प्राग्
रूपषडंगन्यासमंत्रैर्देव्या वक्ष्यमाणैः षडंगं संपूज्यासनादि पुष्पोपचारान्ते न्तः त्रिकोणाभ्यंतरे प्राग्वत्षडंगानि संपूज्य प्राग्योनिम
ध्ययोन्योर्मध्ये प्राग्वद् गुरुपंक्तित्रयं संपूज्य तत्त्रिकोणस्याग्रकोणे ह्रीं श्रीं भाषापादुकां पू॰। इति संपूज्या ह्रस्वयोनिषु देव्यग्र
योनिमारभ्य प्रादक्षिण्येन ह्रीं श्रीं सरस्वतीपादुकां पूजयामि॥ एवं वाणी· संस्कृता· प्राकृता· परा· बहुरूपा· चित्ररूपा· रम्या· इ
त्यष्टशक्तीः संपूज्यांतर्योन्यां देव्याः पुरः दक्षिणकोणे आनंदा· तद्वामे कौतुका· इति संपूज्याष्टदलेषु प्राग्वद्ब्राह्म्याद्याः संपूज्य चतु
रस्रे प्राग्वल्लोकपालान् लं इंद्रशक्तिपादुकां॰। इत्यादिशक्तिरूपान्संपूज्य तदायुधान्यपि तथैव शक्तिरूपाणि संपूज्य धूपादिकं
सर्वं कृत्वा॥ इति कुलसुंदरीनित्यापूजाविधिः॥ अथ नित्यानित्या॥ तत्र श्रीतंत्रराजे॥ अथ षोडशनित्यासु यात्रोक्ता कादशी तु नो॥
नित्यानित्यां श्रुणु ज्ञातेयदायत्तमिदं जगत्॥ विद्योद्धारः कृतः पूर्वं तद्विधानमिहोच्यते॥ यासौ समस्तजीवानां देहस्थितिविधा या
यिनी॥ न्यासं ध्यानं ततः शक्तीस्तामिः पूजां च साधनमिति॥ दक्षिणामूर्त्तिं संहितायां। त्रिपुरेशीवतंत्रं विनि॥ त्रिपुरेशावा
जातेन वालैव कुलसुंदरीति ज्ञातार्णवोक्ते र्बालावाला कुलसुंदर्योरभेदाज्ञा याऋष्यादिकमेव कुलसुंदर्यास्त एव नित्या
ना

नित्याया अपि विज्ञा कुलसुंदरी विधानोक्ता एवं कल्प्यादयो ऽपि ज्ञेयाः॥ तेतु प्रयोगे जिरवनीयाः॥ लं च राने॥ दीर्घस्वरसमे
तास्यां हंसहस्रां षडंगकं॥ भ्रूमध्ये कंठहृन्नाभिगुह्याधारेषु चक्रमात्॥ विन्यासराशिचक्रमशोन्यसेद्बिंदुयुतानि वा॥ व्या
पकं तु समस्तेन विधाय विधिनायुतं॥ ध्यायेत्तां सर्वसंपत्तिहेतोः सर्वात्मिकां शिवां॥ उद्यद्भास्करबिंबाभां माणिक्यमुकु
कुटोज्ज्वलां॥ पद्मरागकृताकल्पामरुणांशुकधारिणीं॥ चारुस्मितलसद्वक्त्रषट्सरोजविराजितां॥ प्रतिवक्त्रं त्रिनय
नां भुजैर्द्वादशभिर्युतां॥ पाशांकुशगुणपुंड्रेक्षुचापस्वेटत्रिशूलकान्॥ वरं वामैर्दधानां च पद्मं कुंभं पुस्तकं तथा॥ पुष्पेषुमेरुज
जाग्रं च कपालमभयं तथा॥ दधानां दक्षिणैर्हस्तैर्ध्यायेद्देवीमनन्यधीः॥ मेरुजाग्रे रवक्रं॥ अनेनाः शक्त्यैदेव्यारूपा कल्पैव
दामिते॥ ललिताशक्तिबंदाच्च बीजद्वयमथो क्रमात्॥ प्रणमंजवर्णः सुरं तेशक्तीति संयुताः॥ समस्तसर्वायुता से मा विद्या
स्याद्द्वादशाक्षरी॥ षट्समत्यापंचशतं यजेन्नाभिर्दत्तां शिवां॥ षट्कोणकोणे या सा नाडाकिन्याऽस्ततथा चै येत्॥ रक्तोनि
जैंद्रवक्त्रीशवरूपेषु क्रमाच्चताः॥ डाकिनी राकिनी पश्चाल्लाकिनी काकिनी तथा॥ शाकिनी हाकिनी सजदेवीसद्दृशवि
ग्रहा॥ हेतीस्तामभितः शक्तिरूपास्तन्मुकुटाननाः॥ लत्वा सार्धसंकल्यः पूजयेद्दीरितक्रमात्॥ सतिलद्वयहोमेन तु
जवेद्दिग्यां यथोदितां॥ षट्कोणबहिरष्टं तु शतार्धकंदजान्वितं॥ कृत्वा तेषपितालिस्तुकृतोपजातु मध्यमा॥ द्विचतुःषट्श

राइते दिदशाष्टद्वयछदैः॥ पद्मैरावृतषट्कोणेयजेल्लघ्वीरितार्चना॥ चतुरस्रद्वयं वा ऽपि चतुर्द्वारसमन्वितं॥ विधाय तेषु शा
खाग्रशक्तीनां विंशतिं यजेत्॥ ब्राह्म्यादिलोकपालाख्याः षोडशद्वारसंस्थिताः॥ अनेनत्र ऽरत्निपतिकाजरूपा विदिग्गताः
॥ अथ प्रयोगः॥ तत्र प्राग्वदासनप्रजादियोगपीठन्यासांते नित्यानित्याविद्यया प्राणायामत्रयं कृत्वा शिरसि दक्षिणामूर्
र्तिऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि नित्यायै देवतायै नमः॥ गुह्ये ऐं बीजाय नमः॥ पादयोः औः शक्तये नमः॥ ना
भौ ईं कीलकाय नमः॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः॥ इति कृतांजलिरुक्त्वा॥ हां सोः हृदयाय नमः॥ हीं सीं
शिरसे स्वाहा॥ हूं सूं शिखायै वषट्॥ हैं सैं कवचाय हुं॥ हौं सौं नेत्रत्रयाय वौषट्॥ हः सः अस्त्राय फट्॥ इति करषडंगन्यासं
विधाय॥ भ्रूमध्ये हं नमः॥ कंठे सें नमः॥ हृदि कं नमः॥ नाभौ लं नमः॥ गुह्ये रं नमः॥ मूलाधारे ऊं नमः॥ समस्तविद्यया व्यापकं वि
धाय उद्यद्भास्करबिंबाभामित्यादि ध्यात्वा मानसपूजांते स्वर्णादिपट्टे कुंकुमादिना षट्कोणं विधाय तन्मध्ये यंत्रं कृत्वा षट्को
णबहिः षोडशदलयुतानि षट्त्रिंशत्पद्मानि॥ य द्वाद्वात्रिंशद्द्वाविंशद्दलायुतान्यष्टादशपद्मानि चोत्तर्वहिर्विभागेन
न कृत्वा तद्बहिश्चतुरस्रद्वयं चतुर्द्वारोपेतं कुर्यादिति प्रमाकं चेन्निर्माय प्राग्वत्पुरतः संस्थाप्य अर्घ्यस्थापनाद्यात्म
पूजांते कुलसुंदरीपीठवत्पीठपूजां विधायावाहनादिपुष्पोपचारांतेन तंत्रमध्ये देवीं परितः प्राग्वत् षडंगानि संपूज्य

देव्याः रक्तभागे षट्कोणवृत्तयोरंतराले प्राग्वत्कुरुपंक्तित्रयमभ्यर्च्य षट्कोणेषु निर्ऋतिकोणे ह्रीं श्रीं डाकिनीपादु॰
कां पूजयामि॥ वायव्ये राकिनी॰ पूर्वकोणे २ लाकिनी॰। आग्नेये २ काकिनी॰ ईशाने २ शाकिनी॰ पश्चिमकोणे २ हाकिनी॰।
इति संपूज्य बहिः॥ षोडशदले देव्यग्रदलमारभ्य प्रादक्षिण्येन ह्रीं श्रीं अं अशक्तिपादुकां पू॰। आंशक्तिपा॰। एवं इंशक्ति॰
पा॰। ईशक्तिपा॰। इत्यादि अःशक्तिपादुकां पूजयामि। इत्यंतं षोडशशक्तीः पूजयेत्॥ एवमन्येष्वपि पंचत्रिंशत्पत्रेषु
ककारादिक्षकारांतवर्णशक्तीः प्रतिपत्रं षोडश षोडशशः क्रीरिति प्राक्तक्रमेणैव वर्णशक्तीः पूजयेत्॥ अष्ट
दशपत्रपत्रेषु प्रतिपत्रं द्वात्रिंशत्संख्याकाः शोभनशक्तयः पूज्याः॥ अथवा षट्कोणबहिरेकपंचाशद्दलमंडितं पद्मं विरच्य
तद्दलेषु देव्यग्रादि प्रादक्षिण्येन ह्रीं श्रीं अशक्तिपादुकां पू॰ ह्रीं श्रीं आशक्तिपा॰। इत्याद्यकारादिक्षकारांतैकपंचाशद्वर्ण॰
शक्तीः पूजयेत्॥ अथवा षट्कोणबहिः षोडशदलं पद्मं तद्बहिर्द्वादशदलं तद्बहिः षट्दलं तद्बहिश्चतुर्दलं तद्बहिर्द्विदलमिति पद्मपं
ठा क्तिं निर्माय तत्रेषु षोडशदलेषु स्वरशक्तीर्द्वादशदलेषु कादिठांत[illegible]शक्तीः दशदलेषु डादिफांतवर्णशक्तीः षड्दलेषु बादिलां
तशक्तीश्चतुर्दलेषु वादिसांतवर्णशक्तीर्द्विदलेषु हक्षशक्तीः॥ इति पंचशक्तीः पूजयेत्॥ एवमुत्तममध्यमकनिष्ठपक्षेष्वेकपक्षा
नुसारेण वर्णशक्तीः संपूज्य बहिश्चतुरस्रस्य चतुर्द्वारपार्श्वेषु देव्यग्रद्वारस्य दक्षिणपार्श्वमारभ्यारब्धद्वारस्योत्तरपा

र्श्वांतं प्रतिद्वारं द्विद्विक्रमेण ब्राह्म्याद्यष्टशक्तीः॥ इति पंचशक्तीः पूजयेत्॥ प्रादक्षिण्येन ह्रीं श्रीं ब्राह्मीपादुकां पूजयामि।
त्यादिक्रमेण संपूज्य पूर्वद्वारमारभ्य प्रतिद्वारं द्विद्विक्रमेणैंद्रादीशानांतलोकपालशक्त्यष्टकं प्राग्वत्संपूज्य वायव्यादि
निर्ऋत्यंतकोणचतुष्टये ह्रीं श्रीं अनंतशक्तिश्रीपादुकां पूजयामि॰१ एवं ब्रह्मशक्तिपादुकां॰२ नियतिशक्तिपादुकां॰२ का
लशक्तीपा॰२ इति संपूज्य षट्कोणांतर्वृत्तयोरंतराले द्वादशस्थानानि परिकल्प्य देव्या दक्षिणाधःकरोत्स्यानायुधानि
ह्रीं श्रीं अभयशक्तिपादुकां॰ एवं २ कपालशक्ति॰२ खड्गशक्ति॰२ पुष्पबाणशक्ति॰२ पुस्तकशक्ति॰२ अंकुशशक्ति॰२ पा
शशक्ति॰२ अक्षगुणशक्ति॰२ इक्षुचापशक्तिपा॰२ खेटकशक्ति॰२ त्रिशूलशक्ति॰२ वरशक्ति॰ इति संपूज्य पुनर्मध्ये देवीन
ह्रिद्यासंपूज्य धूपादिकं सर्वं कृत्वा समापयेत्॥ इति नित्यानित्यापूजाविधिः॥ अथ नीलपताका॥ तंत्रमौलौ तंत्रराजे॥ अ
थ षोडशनित्यासु द्वादशी या समीरिता॥ तस्या नीलपताकाया विधानं सर्वसिद्धिदं॥ न्यासक्रमविधानं च ध्यानं शक्तीः प्र
जनमिति॥ दक्षिणामूर्त्तिसंहितायां॥ ऋषिः संमोहनश्छंदो गायत्र्यं देवता मनोः॥ नित्या नीलपताकाख्या ह्रीं बीजं ह्रीं च श
क्तिकं। कामबीजं कीलकं स्यादिति॥ तंत्रराजे॥ मूलविद्याक्षरै रंगान्याचरेत्प्रपिक्रमात्॥ द्विचतुष्पषट्त्र्यर्णैः क्रमेण षडि
नीरितैः॥ मौलौ ललाटे नासाग्रे युगले वाचि कंठे हृदि क्रमात्॥ नाभ्याधाराधारके पादसंधिषु चित्रिषु चक्रमात्॥ मेढ्रास्तराणिक्रम

सौ.र.क. शोन्मेषेन्मदशादि च॥ व्यापकं च समस्तेन विदध्याच्च यथाविधि॥ इंद्रनीलनिभं भास्वन्माणिमौलिविराजितां॥ पंचवक्त्रां
प. त्रिनयनामरुणांशुकधारिणीं॥ दशहस्तोज्ज्वलन्मुक्ताप्रायाभरणमंडितां॥ रत्नस्तबकसंभिन्नचारुदेहां स्मितोज्ज्वलां॥ पाशंप
ताकां चर्म च शार्ङ्गं चापं वरं करैः॥ दधानां वामपार्श्वस्थैः सर्वाभरणभूषितैः॥ अंकुशं च ततः शक्तिं खड्गं बाणं तथाभयं॥ दधा
नां दक्षिणैर्हस्तैः शशीनां पद्मविष्टरे॥ आकारवर्णरेखास्यपाण्यायुधविभूषणैः॥ शक्तिर्वै देहितां ध्यायेद्देवीं नित्यार्चनक्र
मे॥ उभयपार्श्वयोरूर्ध्वादिक्रमेणायुधध्यानमिति॥ त्रिषट्कोणयुतं पद्ममष्टपत्रं ततो बहिः॥ अष्टास्वं भूपुरं कृत्वा तन्मे ६
नसुदर्शनयुग्मकं॥ चतुर्द्वारयुतं दिक्षु शाखाभिश्च समन्वितं॥ तत्वा नामारंतां शक्तिगणैस्तत्रार्चयेच्छिवां॥ इच्छाज्ञानक्रि
याशक्तीस्त्रिषु कोणेषु पूजयेत्॥ जाकिन्याद्या यजेत्षट् सुकोणेषु परितः क्रमात्॥ ब्राह्म्यादिरष्टपत्रेषु तत्कोणेषु बहिस्त
था॥ प्रागुक्तास्ता यजेच्छक्तीर्नित्यानित्यादिसहिताः॥ बलिद्वयं च कुर्वीत पूजां प्राग्वत्समापयेत्॥ सर्वत्र नित्यहोमेन तु चकु
र्याद्दत्वाप्यतोपि वा॥ तिलतंदुलकैर्वापि प्रोक्तद्रव्यानुदीरणमिति॥ अथ प्रयोगः॥ तत्र प्राग्वद्योगपीठन्यासांते नीलपता
काविद्यया प्राणायामत्रयं कृत्वा शिरसि संमोहनाय ऋषये नमः॥ मुखे गायत्री छंदसे नमः॥ हृदि नीलपताकानित्यायै देव
तायै नमः॥ गुह्ये ह्रीं बीजाय नमः॥ पादयोः ह्रीं शक्तये नमः॥ नाभौ क्लीं कीलकाय नमः॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये

विनियोगः॥ इति कृतांजलिर्वदेत्॥ ततः ह्रीं फ्रें हृदयाय नमः॥ स्रूं क्रौं आं क्लीं शिरसे स्वाहा॥ ऐं ब्लूं नित्यमदद्रवे शिखायै वषट्॥
ह्रूं कवचाय हुं॥ वें नेत्रत्रयाय वौषट्॥ हुं अस्त्राय फट्॥ इति करषडंगन्यासं विधाय॥ दक्षकर्णे ह्रीं नमः॥ वामकर्णे फ्रें नमः॥ दक्षनेत्रे स्रूं
नमः॥ वामनेत्रे क्रौं नमः॥ दक्षनासि आं नमः॥ वामनासि क्लीं नमः॥ मुखे ऐं नमः॥ कंठे ब्लूं नमः॥ हृदि नि नमः॥ नाभौ त्यं नमः॥ मूलाधा
रे मं नमः॥ दक्षोरुमूले दं नमः॥ जानुनि द्रं नमः॥ गुल्फसंधौ वें नमः॥ वामोरुमूले हूं नमः॥ वामजानुनि फ्रें नमः॥ गुल्फसंधौ ह्रौं
नमः॥ इति विन्यस्य नीलपताकाविद्यया प्राग्वद्व्यापकं विधाय ध्यानादिमानसपूजांते प्राग्वत्स्वर्णादिपट्टे कुंकुमादिना चतु
र्द्वारोपेतं चतुरस्रद्वयं कृत्वा तदंतर्वृत्तद्वयं तदंतरष्टकोणं तदंतरष्टदलकमलं तदंतः षट्कोणं तदंतस्त्रिकोणमिति यन्त्रा
चकं निर्माय पुरतः संस्थाप्य अर्घ्यादिस्थापनांतपूजां तेषु वनेश्वरीपीठमभ्यर्च्य तत्र नीलपताकाविद्यया मूर्तिं परिक
ल्प्यावाहनादिपुष्पोपचारांते त्रिकोणमध्ये प्राग्वत्षडंगानि संपूज्य त्रिकोणषट्कोणयोरंतराले प्राग्वद्गुरुपंक्तित्रय
मभ्यर्च्य त्रिकोणषट्कोणयोरंतराले देव्या दक्षिणाधःकरादिवामाधःकरांतमस्या आयुधानि॥ ॐ ह्रीं श्रीं अभयाय नमः॥ एवं २
बाणाय नमः॥ २ खड्गाय० २ शक्तये० २ अंकुशाय०॥ पाशाय० २ पताकायै० २ चर्मणे० २ शार्ङ्गचापाय० २ वराय नम इति संपू
ज्य त्रिकोणस्याग्रकोणादि प्रादक्षिण्येन ॐ ह्रीं श्रीं इच्छाशक्तिश्रीपा०। २ एवं २ ज्ञानशक्तिश्री० क्रियाशक्तिश्री० इति संपूज्य षट्को

सौ॰र॰क॰ प॰

णे देव्यग्रादि प्रादक्षिण्येन॥ ॐ ह्रीं श्रीं डाकिनीश्री॰॥१॥ एवं राकिनी॰२ लाकिनीश्री॰२ काकिनीश्री॰ साकिनी॰२ हाकिनीश्री॰ इत्यं से
पूज्याष्टदलेषु देव्यग्रादि प्रादक्षिण्येन ॐ ह्रीं श्रीं आं ब्राह्मीश्रीपादुकां पूजयामीत्यादि ब्राह्म्याद्यष्टशक्तीः संपूज्याष्टकोणेषु दे
व्यग्रमारभ्य प्रादक्षिण्येन॥ ॐ ह्रीं श्रीं सुमुखीश्रीपादुकां पू॰॥ एवं २ सुंदरी॰२ सारा॰२ सुमना॰२ सरस्वती॰२ समया॰२ सर्व॰
गा॰२ सिद्धा॰ इति संपूज्य तद्बहिः चतुरस्रे देव्यग्रद्वारस्य दक्षिणभागमारभ्य ह्रीं श्रीं विकलाश्रीपा॰॥ एवं आकर्षणी॰ लोला॰
निसा॰ मदना॰ मालिनी॰ विनोदा॰ कौतुका॰ पुण्या॰ पुराणा इति संपूज्य बहिश्चतुरस्रस्य चतुर्द्वारपार्श्वेषु देव्यग्रद्वारस्य द
क्षिणपार्श्वमारभ्य वामपार्श्वांते प्रतिद्वारे द्विद्विक्रमेण प्रादक्षिण्येन पुनर्ब्राह्म्याद्यष्टशक्तीः संपूज्य पुनर्देव्याः पश्चाद्भाग
स्य द्वारदक्षिणपार्श्वमारभ्य प्रतिद्वारे द्विद्विक्रमेणेंद्रादीशानांतलोकपालान् शक्त्याष्टके प्राग्वत्संपूज्याग्नेयादिकोण चतु
ष्टये भनेत ब्रह्म निपात्रिकाल शक्तीः संपूज्य वज्रादीन्यायुधानि प्राग्वच्छक्तिरूपाणि संपूज्य पुनर्मध्ये नीलपताकानि
त्यां तद्विद्यया समभ्यर्च्य धूपादि सर्वं प्राग्वत्कल्पयेत्॥ इति नीलपताकानित्यापूजाविधिः॥ अथ विजया॥ तत्र श्रीतंत्र
राजे॥ अथ षोडश नित्यासु संप्रोक्ता या त्रयोदशी॥ तद्विधानं प्रवक्ष्यामि विद्याप्रागुदितात्र वा॥ तदेवात्र स्वरन्यासं ध्याना॰
र्चास्यास्तु शक्तिभिरिति॥ दक्षिणामूर्तिसंहितायां॥ ऋषिरस्या अदिः छंदो गायत्री देवतास्वयं॥ स्वयं विजया॥ तंत्रराजे॥ वि॰

२८५

द्याया व्यंजनैर्दीर्घस्वरयुक्तैस्तु षट्स्वयं॥ ताभ्यां च षडंगं कुर्यात्तु अंगानि करांगयोः॥ स्थानेंद्रियेषु श्रोत्राद्यो प्रथमचिन्हे च विन्यसे
त्॥ अक्षराणि क्रमाद्विद्धि पुनरावृत्तिपूर्ववत्॥ पंचवक्त्रां दशभुजां प्रतिवक्त्रं त्रिलोचनां॥ भास्वन्मुकुटविन्यस्तचंद्ररे
खाविराजितां॥ सर्वाभरणसंयुक्तां पीतांबरसमुज्वलां॥ उद्यद्भास्वद्बिंबतुल्यदेहकांतिं शुचिस्मितां॥ शंखं पाशं खेट
चापौ कल्हारं वामबाहुभिः॥ चक्रं तथांकुशं खड्गं सायकं मातुलुंगकं॥ दधानां दक्षिणैर्हस्तैः प्रयोगे भीमदर्शनां॥
व्याघ्रारुढाभिरभितः शक्तिभिः परिवारितां॥ समरे पूजने न्येषु प्रयोगेषु सुखासनां॥ शक्रस्यापि पूजायां सुखासन॰
समन्विताः॥ सर्वा देव्यो व्यासमाकारमुखपाणायुधा अपि॥ वामोर्ध्वादिदक्षिणोर्ध्वादि चायुधध्यानं॥ चतुरस्रद्व
यं कृत्वा चतुर्द्वारोपशोभितं॥ पार्श्वाष्टकसमोपेतं तत्र प्राग्वत्समर्चयेत्॥ मदंतर्वृत्तयुग्मांतरष्टकोणे विधा
य तु॥ तदंतस्वतपापद्मे षोडशच्छदसंयुते॥ तथैवाष्टच्छदं पद्मं विधायावाप्य तत्र तां॥ तत्र षट्कोणावृतां सम्यगुपचा
रैस्तथार्चयेत्॥ मंत्राभ्यामं[illegible]सहोमं कुर्याद्वा तिलतंडुलैः॥ बलिहये प्रकुर्वीत पूजां प्राग्वत्समापयेत्॥ जलिता
रहिताः पंचदश नित्यास्तिथीश्वराः॥ चंद्रखंडलसन्मौलियुताः सात्मन्मयी सदा॥ अत्र कामेश्वर्यादि पंचदशनित्या
नां वह्निसियोपेत चंद्रकलापंचदशकरूप पंचदशतिथिमयत्वात्तासां चंद्रकलाधारणत्वे॥ ललितायास्तु तासां

सौ॰र॰क॰
प॰

कलानांकारणमन्तास्ययादिकालरूपत्वात्रस्यास्तद्वारणंनास्तितथा॥मायासमास्तुरीमध्यगतैर्नामभिरर्चयेत्॥तदाव
रणगाःशक्तीस्तद्वावरणदेतिकाः॥अथास्यदक्षिणेनैवताःसर्वास्तेषुपूजयेत्॥तासांक्रमेणनामानिशृणुवक्ष्येय
थाविधि।नित्यानित्यावद्दुदितमर्चनंचतुरस्रके॥ब्राह्म्यादिलोकपालाख्याःषोडशद्वारसंस्थिताः॥अनंतब्रह्मनिय
तिकालरूपाविदिग्गताः॥अंतःस्थिताष्टकोणेषुपूजयेदुर्कविग्रहाः॥जयांचविजयांदुर्गांभद्रांभद्रकरीमपि॥
क्षेमांक्षेमकरींनित्यामष्टकोणेषुमर्चितः॥तदंतःषोडशदलेअर्चयेत्षोडशाम्बिकाः॥शक्तीस्तागेष्वपुष्पादिषुतोभक्तिम
न्वितः॥विदारिकांविश्वमयींविश्वांविश्वविभंजिनी॥वीरांविक्षोभिणींविद्यांविनोदांवित्रविग्रहां॥वीतशोकांविषग्री
वांविपुलांविजयप्रदां॥विभवांविविधांविप्रांषोडशाकारसमन्विता॥तदंतरष्टपत्रेषुशक्तीरष्टाभितोयजेत्॥षो
डक्रमेणगंधाद्यैर्भक्तिनिष्ठावशोवशी॥मनोहरांमंगलांचमदोत्सिक्तांमनस्विनीं॥मानिनींमधुरांमायांमोहिनींतुरू
विग्रहां॥एवंपूजाजपध्यानहोमोपासनतोवशी॥भजतोनित्यशोदेवीयोसौस्यात्सर्वतःसुखी॥अथप्रयोगः॥तत्र
प्राग्वद्योगपीठन्यासांतेविजयाविद्ययाप्राणायामत्रयंकृत्वाशिरसिभद्ररूषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदि
विजयानित्यायैदेवतायैनमः॥इतिविन्यस्यभांहृदयायनमः॥भींशिरसेस्वाहा॥भूंशिखायैवषट्॥भैंकवचायहुं॥भौं

२५०

नेत्रत्रयायवौषट्॥भःअस्त्रायफट्॥इतिकरषडंगन्यासंविधायश्रोत्रयोःभंनमः॥सर्वांगेभंनमः॥नेत्रयोःरंनमः॥जिह्वा
योर्यंनमः॥नासायांभौंनमः॥चित्तेऽंनमः॥इतिविन्यस्यप्राग्वद्विजयाविद्ययाव्यापकंविधायतत्रदंतर्वत्रयुग्मेतदंतर
ष्टकोणंतदंतःषोडशदलपद्मंतदंतरष्टदलपद्ममितिपूजाचक्रंनिर्माययुरतःसंस्थाप्यास्यर्चायात्पूजांतेप्राग्व
द्भुवनेश्वरीयोगपीठमभ्यर्च्यतस्मिन्विजयाविद्यमूर्तिंपरिकल्प्यआवाहनादिपुष्पोपचारांतेप्राग्वत्षडंगानिगुरुपंक्तिं
त्रयंचसंपूज्यचतुरस्रस्यचतुर्द्वारपार्श्वेषुदेव्यग्रद्वारस्यदक्षिणपार्श्वमारभ्यतद्वामपार्श्वांतंप्रतिद्वारद्विद्विक्रमेण
ब्राह्म्याद्यष्टशक्तीःप्रादक्षिण्येनह्रींश्रींब्राह्मीश्रीपादुकांपूजयामि।इत्यादिक्रमेणसंपूज्यपूर्वद्वारमारभ्यप्रति
द्वारंद्विद्विक्रमेणइंद्रादीशानांतंलोकपालगणमष्टकंप्राग्वत्संपूज्यवायव्यादिनिर्ऋत्यंतकोणचतुष्टयेह्रींश्रींअ
नंतशक्तिपा॰।एवंब्रह्मशक्तिनियतिशक्तिकालशक्तिश्रीपा॰पू॰इतिसंपूज्याष्टकोणेषुदेव्यग्रमारभ्यप्रादक्षिण्ये
नह्रींश्रींजयाश्रीपादुकांपूजयामि।एवंविजया·दुर्गा·भद्रा·भद्रकरी·क्षेमा·क्षेमकरीनित्या।इतिसंपूज्यषोडश
दलेषुविदारिका·विश्वमयी·विश्वा·विश्वविभंजिका·वीरा·विक्षोभिणी·विद्या·विनोदा·वित्रविग्रहा·वीतशो
का·विषग्रीवा·विपुला·विजयप्रदा·विभवा·विविधा·विप्रा·इतिसंपूज्याष्टदलेषुमनोहरा·मंगला·मदोत्सिक्ता·मन

सौ.र.क. ५.

स्विनी। मालिनी। मधुरा। माया। मोहिनी। इति संपूज्याष्टदलेषु कर्णिकायां देव्या दक्षिणाधः करादिवामाधः करांतानि दश-
पुष्पाण्यायुधस्थानानि परिकल्प्य ह्रीं श्रीं मातुलुंगाय नमः।। एवं बाणाय केभ्यो नमः।। खड्गाय। अंकुशाय। चक्राय। शंखाय। पाशाय।
खेटाय। चापाय। कह्लाराय। इति संपूज्य पुनर्मध्ये विजयानित्यां तद्विद्ययार्घ्यपाद्यादि सर्वं प्रागुक्तमार्पयेत्।। इति जयानित्या-
पूजाविधिः।। अथ सर्वमंगला। तत्र श्रीतंत्रराजे। अथ षोडशनित्यासु या प्रोक्ता तु चतुर्दशी।। एकाक्षरा तु सा प्रोक्ता विद्या सा
सर्वमंगला।। न्यासक्रमं ध्यानविधिं शक्तीरावरणस्थिताः।। पूजाक्रमं साधनं च विनियोगादिकान् क्रमात्।। दक्षिणामूर्तिसं-
हितायां।। ऋषिश्छंदो महेशानि गायत्रीछंद उच्यते।। देवीयमिति।। इयं सर्वमंगला। तंत्रराजे। मूलविद्याक्षरैर्दीर्घस्वरैर्भि-
न्नैः षडंगकं। तानि तत्स्वरभिन्नानि न्यसेत्स्वहृन्मनोवधि।। सुवर्णवर्णरुचिरां मुक्तामाणिक्यभूषणां। माणिक्यमुकुटां ने-
त्रद्वयप्रेंखदयामरां।। द्विभुजां स्वासनां पद्मे त्वष्टषोडशतद्द्वये।। पद्मैरुपेते सचतुर्द्वारभूस्वयुग्मके।। मातुलुंगफलं दक्षे
दधानां करपंकजे। वामेन निजभक्तानां प्रयच्छंतीं धनादिकं।। स्वसमानाभिरभितः शक्तिभिः परिवारितां।। षट्सप्ततिभिर-
न्याभिरष्टारोक्ताभिरन्वितां।। प्रयोगे स्वन्येषु दानित्यसपर्यास्वकशक्तिकां।। ताः शक्तीः शृणु देवेशि या नित्या सावरणस्थिताः
।। भद्रा भवानी भव्या च विशालाक्षी शुचिस्मिता।। कुंकुमा कमला कल्पा ह्यर्चयेद्दलपत्रके।। कलावपरणी नित्या मनतोभ्री

विनोदयां।। अशोका मदनोन्मादा पूर्णा पुण्या भाग्या मयोदिता।। विवेका विभवा विश्वा विततां चाष्टयुग्मके।। पूजयेदभितः
शक्तीः प्राग्दक्षिणक्रमेण वै।। कामिनी खेचरी चर्या पुराणी परमेश्वरी।। गौरी शिवा ममेयां च विमला विजया प-
रा।। पवित्रा पद्मिनी विद्या विश्वेशी शिववल्लभा।। अशेषरूपा मानंदा मंबुजाक्षी मनिंदिता।। वरदा वाक्प्रदा
बाला विविधा वेदविग्रहा।। विद्या वागीश्वरी संध्या संयता च सरस्वती।। निर्मला नादरूपा च पूजयेत् षोडशद्वये
।। प्राग्वद्ध्यादिभिः सर्वाः क्रमादर्ध्यमंतस्थिताः।। ब्राह्म्यादि लोकपालास्त्रा शक्तीर्हरिपूजयेत्।। पश्चिमादिच-
तुर्दिक्षु चतस्रः प्रोक्तविग्रहाः।। अनंततत्त्वनियति कालरूपा विदिक्षु ताः।। बलिं चैवं यथा होमं च कुर्यात्प्रागवत्समा-
पनं।। जयेत्तु नित्यशः कुर्याद्येनस्याः सहस्रकं।। अथ प्रयोगः।। तत्र प्राग्वद्योगपीठन्यासानंतरं सर्वमंगलाविद्यया प्रा-
णायामत्रयं कृत्वा शिरसि चेशाय ऋषये नमः।। मुखे गायत्रीछंदसे नमः।। हृदि सर्वमंगलानित्यायै देवतायै नमः।। इ-
ति विन्यस्य स्वां हृदयाय नमः।। स्वीं शिरसे स्वाहा।। स्वूं शिखायै वषट्।। स्वैं कवचाय हुं।। स्वौं नेत्राय वौषट्।। स्वः अ-
स्त्राय फट्।। इति करषडंगन्यासं कृत्वा श्रोत्रयोः स्वां नमः।। सर्वांगे स्वीं नमः।। नेत्रयोः स्वूं नमः।। जिह्वायां स्वैं नमः।। ना-
सायां स्वौं नमः।। मनसि स्वः नमः।। इति विन्यस्य समस्तविद्यया व्यापकं विधाय ध्यानादिना मानसपूजां ते प्राग्वत्स्वर्णादि

सौ.र.क.
प.प.

पट्टे कुंकुमादिना चतुर्द्वारोपेतं चतुरस्रद्वयं कृत्वा तदंतर्द्वात्रिंशद्दलं तदंतः षोडशदलं तदंतरष्टदलमिति पद्मत्रयं
कृं निर्माय शाखसुरतः संस्थाप्य पाद्यार्घ्यादानपूर्वं भुवनेश्वरीपीठमभ्यर्च्य तत्र सर्वमंगलाविद्यामूर्तिं प
रिकल्प्य आवाहनादि पुष्पोपचारांते प्राग्वत्षडंगावृतिपंक्तित्रयं च संपूज्य कर्णिकायां देव्या दक्षिणवामयोः ह्रीं श्रीं
वीजपुराय नमः। रत्नवराय नमः इति संपूज्याष्टदलेषु ह्रीं श्रीं भद्राश्रीपादुकां पूजयामि। एवं भवानी। भव्या। विशालाक्षी।
शुचिस्मिता। कुंकुमा। कला। कल्या। इति संपूज्य षोडशदलेषु। कला। प्रकला। नित्या। अमृता। जीविता। अशोका। अम
ला। पूर्णा। पुण्या। भाग्या। उद्यता। विवेका। विभवा। विश्वा। वितता। इति संपूज्य द्वात्रिंशद्दलेषु। कामिनी। खेचरी।
चर्या। पुराणा। परमेश्वरी। गौरी। शिवा। अमेया। विमला। विजया। परा। पवित्रा। पद्मिनी। विद्या। विश्वेशी। शिव
वल्लभा। अशेषरूपा। आनंदा। अंबुजाक्षी। अनिंदिता। वरदा। वाणी। वाक्प्रदा। वाणी। विविधा। वेदविग्रहा। वंद्या। वा
गीश्वरी। सत्या। संयता। सरस्वती। निर्मला। नादरूपा। इति संपूज्य चतुरस्रस्य चतुर्द्वारपार्श्वेषु देव्यग्रद्वारस्य दक्षिण
पार्श्वमारभ्य तद्द्वारवामपार्श्वांतं प्रतिद्वारं स्थितयक्रमेण ब्राह्म्याद्यष्टशक्तीः। प्रादक्षिण्येन ह्रीं श्रीं ब्राह्मीश्रीपादुकां पूज
यामि। एवं क्रमेण संपूज्य वायव्यादि निर्ऋत्यंतं कोणचतुष्टये ह्रीं श्रीं अनंतशक्तिश्रीपादुकां पूजयामि। एवं ब्रह्म

शक्तिश्री। नियतिशक्तिश्री। कालशक्ति। इति संपूज्य पुनः सर्वमंगलाविद्यामध्ये तां संपूज्य धूपादिकं सर्वं प्राग्व
त्कृत्वा समापयेत्॥ इति सर्वमंगलापूजाविधिः॥ अथ ज्वालामालिनी॥ तत्र श्रीतंत्रराजे॥ अथ षोडशनित्यासु पंच
दशसु दिनात्मना॥ तद्विधानेन गुणप्राप्तेर्ज्वालामालिनिसुदाहृता॥ न्यासं ध्याने ततः शशाक्ती पृज्ञामविचसाधनं॥ दक्षिणा
मूर्तिसंहितायां॥ ऋषिस्तु काश्यपश्छंदो गायत्रं देवता विधं॥ रेफात्त्वे बीजशक्तीतु कीलकं कवचं प्रिये॥ इयं
ज्वालामालिनी॥ एकद्वय चतुः पंच चतुष्टयदशाक्षरैः॥ कुर्यादंगानि मूलार्णै रादितः षडंकरांगयो॥ ज्वलज्ज्व
लनसंकाशां माणिक्यमुकुटोज्ज्वलां॥ षड्वक्त्रां द्वादशभुजां सर्वाभरणभूषितां॥ पाशांकुशौ खेटखड्गौ चापबाणौ
गदाधरौ॥ शूलवह्निवराभीति दधानां करपंकजैः॥ स्वसमानाभिरभितः शक्तिभिः परिवारितां॥ चारुस्मितलस
द्वक्त्रसरोजां चीरुणान्वितां॥ ध्यात्वैवमुपचारैस्तैरर्चयेन्नित्यनिर्मशः॥ चतुरस्रद्वयं कृत्वा चतुर्द्वारसमन्वि
तं॥ शशास्रमष्टपत्राब्जमंतरष्टास्रकं ततः॥ षट्कोणं मध्यतस्त्र्यस्रं विधायात्र शिवां यजेत्॥ इच्छाज्ञानक्रियाशक्ती
र्चयेत्त्र्यस्रगाः क्रमात्॥ शक्तिणा प्राग्वषट्कोणे षण्णावेषरादिकाः॥ घस्मरा विश्वकबला लोलाक्षी लोलजिह्विका
॥ सर्वभक्षा सहस्राक्षी निःसंगा संहृतिप्रिया॥ बहिरष्टच्छदेप्येताः पूजयेच्च प्रदक्षिणं॥ अचिंत्याप्रमेया च पूर्णा

सौ. र. क.
प.

रूपांकुशा सदा॥ सर्वसंसिद्धिरूपा च पावनामेकरूपिणीं॥ बहिर्द्वारेषु कोणेषु पूजयेत्स्वायुधीरिताः॥ प्राग्वल्लतार्घ्यस्थ
केनापुष्पेणो क्रमं यजेत्॥ बलिहोमावसानं चैतन्मितिः सम्यक्समीरिता॥ अथ प्रयोगः॥ तत्र प्राग्वद्योगपीठन्यासांते ज्वा
लामालिनी विद्यया प्राणायामत्रयं कृत्वा शिरसि कश्यपाय ऋषये नमः॥ मुखे गायत्री छंदसे नमः॥ हृदि ज्वालामालिनिनि
त्यायै देवतायै नमः॥ गुह्ये रं बीजाय नमः॥ पादयोः फट् शक्तये नमः॥ नाभौ हुं कीलकाय नमः॥ इति प्राग्वदिष्टं मम सर्वा
र्थसिद्धये विनियोगः इति कृतांजलिरुक्त्वा॥ ॐ हृदयाय नमः॥ नमः शिरसे स्वाहा॥ भगवति शिखायै वषट्॥ ज्वालामालि
नी विद्यायाः कवचाय हुं॥ देवदेविने त्राय वौषट्॥ सर्वभूतसंहारकारिके अस्त्राय फट्॥ इति करषडंगन्यासं कृत्वा ज्वाला
मालिनी विद्यया व्यापकं विधाय ध्यानादि मानसपूजांते स्वर्णादिपट्टे कुंकुमादिना चतुर्द्वारोपेतं चतुरस्रद्वयं कृत्वा
तदंतरष्टपत्रं तदंतरष्टकोणं तदंतः षट्कोणं तदंतस्त्रिकोणमिति पूजाचक्रं निर्माय प्राग्वत्पुरतः संस्थाप्यार्घ्यादि
दानपूजांते प्राग्वद्भुवनेश्वरीपीठमभ्यर्च्य तस्मिन् ज्वालामालिनीविद्यया मूर्तिं परिकल्प्यावाहनादि पुष्पोपचारांते प्राग्व
त्षडंगानि गुरुपंक्तिं च संपूज्य त्रिकोणषट्कोणयोरंतराले देव्या दक्षिणाधःकरादीनि वामाधःकरांतानि द्वादशायुध
स्थानानि परिकल्प्य ह्रीं श्रीं अभीत्यै नमः॥ ह्रीं श्रीं वज्राय नमः॥ एवं शंखाय॰ बाणेभ्यो॰ खड्गाय॰ अंकुशाय॰ पाशाय॰ खे

टाय॰ चापाय॰ गदायै॰ ध्वजाय॰ वराय॰ इति संपूज्य त्रिकोणे ह्रीं श्रीं इच्छाशक्तिश्री पा॰ एवं ज्ञानशक्ति॰ क्रियाशक्ति
रिति॥ षट्कोणे देव्या वामाग्रकोणे ह्रीं श्रीं डाकिनीश्री पा॰ एवं दक्षिणाग्रकोणे राकिनी॰ दक्षकोणे लाकिनी॰ दक्षवा
मकोणे काकिनी॰ पृष्ठदक्षे शाकिनी॰ देव्यग्रकोणे हाकिनी॰ इति संपूज्याष्टकोणेषु स्मरा विस्मृका वना जोजाक्षी जो
लजिह्वा सर्वभक्षा सहस्राक्षी निःसंगा संहतिप्रिया॥ इति संपूज्याष्टदले अचिंत्या॰ अप्रमेया॰ पूर्णरूपा॰ दुरासदा॰ स
र्वा॰ संसिद्धिरूपा॰ पावना॰ एकरूपिणी॥ इति संपूज्य चतुरस्रस्य चतुर्द्वारपार्श्वेषु देव्यग्रद्वारस्य दक्षिणपार्श्वमारभ्य त
द्वामपार्श्वांतं प्रतिद्वारं द्वि द्वि क्रमेण ब्राह्म्याद्यष्टशक्तीः प्रादक्षिण्येन संपूज्य द्वारमारभ्य पूर्वक्रमेणेंद्रादीशानांतं प्राग्व
ल्लोकपालान् शस्त्राण्येकैकं संपूज्य वायव्यादिनिर्ऋत्यंतं कोणचतुष्टये प्राग्वदनंगशक्तिं ब्रह्मशक्तिं निवृत्तिशक्तिं काल
शक्तिं इति संपूज्य पुनर्ज्वालामालिनीविद्यया मध्ये तां संपूज्य धूपदीपादिकं सर्वं प्राग्वत्कृत्वा समापयेत्॥ इति
ज्वालामालिनि पूजाविधिः॥ अथ चित्रा नित्या॥ तत्र श्रीतंत्रराजे॥ अथ षोडशनित्यासु या चित्रा षोडशी शिवे॥ प्रोक्ता न
कल्पमधुना शृणु सर्वार्थसिद्धिदं॥ विद्याङ्गे वक्ष्यिता तदंगन्याससंयुता॥ ध्यानेशक्तीः पूजनं चेति॥ दक्षि
णामूर्त्तिर्मुनिर्दिष्टा यो॥ ऋषिर्व्वास्य समं प्रोक्तो गायत्री छंद उच्यते॥ विचित्रा देवतेति॥ तंत्रराजे॥ विद्यादि वायुना

सौ·र·क·
प·

कुर्याद्दीर्घस्वरयुताः क्रमात्॥ षडंगानि यथापूर्वं मातृकाविद्यान्यसेत्॥ उत्पदादिस्त्र्यविं बाणान वरत्नविभूषणं॥ नवर
त्नकिरीटां च चित्रपट्टांशुकोज्वलां॥ चतुर्भुजां त्रिनयनां शुचिस्मितजनमन्मुखं॥ सर्वानंदमयीं नित्यां सम्मि[illegible]तदायिनीं॥ च
तुर्भुजां भुजैः पाशमंकुशं वरदाभये॥ दधानां मंगलां पद्मकर्णिकां नवयोनिगां॥ अथायुधध्यानं॥ वामोर्ध्वादिवामदक्षि
णक्रमेण॥ तच्छक्तिनिष्ठतत्त्वके तस्यै वार्चनमीरितं॥ नवयोनावष्टवर्गयुतां ब्राह्म्यादिकां यजेत्॥ इच्छाज्ञानक्रियाश
क्तीरर्चयेन्मध्यकोणतः॥ हेतीश्च परितो देव्याः पूजयेदंकुशांतिके॥ सर्वासामपि नित्यानां नाथान्देव्यास्तु पश्चिमे॥ पूजये
त्तत्र दाकारांस्तत्र मंत्रैर्यथाविधि॥ गुरुमंडलपूजादिमाधारणं तु दीरितं॥ सर्वासामपि नित्यानां यदा पास्यदजाइमाः॥ अ
थ प्रयोगः॥ तत्र योगपीठन्यासांते त्रिचाविद्यया प्राणायामं त्र्यं कृत्वा शिरसि ब्रह्मऋषये नमः॥ मुखे गायत्रीछंदसे न
मः॥ हृदि त्रिचानित्यायै देवतायै नमः॥ इति विन्यस्य चां हृदयाय नमः॥ चीं शिरसे स्वाहा॥ चूं शिखायै वषट्॥ चैं कवचा
य हुं॥ चौं नेत्रत्रयाय वौषट्॥ चः अस्त्राय फट्॥ इति करषडंगन्यासं कृत्वा चक्रौं अं नमः॥ चक्रौं आं नमः॥ इत्यादि चक्रौं सं नमः
॥ इत्यं मातृकां विन्यस्य त्रिचाविद्यया व्यापकं विधाय ध्यानादि मानसपूजांते स्वर्णादिपट्टे कुंकुमादिना चतुर्द्वारं युक्तं
चतुरस्रद्वयं कृत्वा तदंतर्द्वात्रिंशद्दलपद्मं तदंतः षोडशदलं तदंतरष्टदलं तदंतर्नवयोनिमिति पूजाचक्रं निर्माय पु

श्री

रतः संस्थाप्यास्यार्घ्यादीन् प्रयोगांते प्राग्वद्भुवनेश्वरीपीठमभ्यर्च्य तस्मिंस्त्रिचाविद्ययामूर्त्तिं परिकल्प्यावाहनादिपुष्पो
पचारांते प्राग्वत् त्रिकोणाष्टकोणयोरंतराले षडंगानि देव्याः पृष्ठभागस्योत्तराले गुरुपंक्तित्रयं च संपूज्य त्रिकोणाष्टको
णयोरंतराले पूर्वदक्षिणवामयोश्चतुर्भुज्यास्थाने पुष्ठं श्रीं अभयाय नमः॥ एवं अंकुशाय नमः॥ पाशाय नमः॥ वाराह
यनमः॥ इति संपूज्यांतस्त्रिकोणे देव्याग्रादि प्रादक्षिण्येन ह्रीं श्रीं इच्छाशक्ति·२ ज्ञानशक्ति·२ क्रिया· इति संपूज्याष्टयोनि
षु ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ब्राह्मीश्रीपादुकां पूजयामि॥२ कं खं गं घं ङं माहेश्वरी श्री पा·२
पू·२ चं छं जं झं ञं कौमारी श्री पा·०२ टं ठं डं ढं णं वैष्णवी श्री·०२ तं थं दं धं नं वाराही श्री·०२ पं फं बं भं मं इंद्राणी श्री·०२
यं रं लं वं शं चामुंडा श्री·०२ षं सं हं ळं क्षं महालक्ष्मी श्री·पू·०॥ इति संपूज्याष्टदलादिषु सर्वमंगलाप्रयोक्त शक्तीः संपू
ज्य तत्रैव सर्वं समापयेत्॥ इति त्रिचानित्यापूजाविधिः॥ अथ पंडाकिन्यादिषट्धातुदेवतानां पूजाविधिर्लिख्य
ते॥ तत्र श्रीचक्रराजे न्यसौ विधाय षोडशकोणमस्तके प्रोक्तदिक्क्रमात्॥ मध्ये च तत्र तां नित्यां नित्यं गंधादिभि
र्यजेत्॥ अभितस्तास्यउस्त्रेषु तत्स्थहूंतक्रमाद्यजेत्॥ वाह्ये षष्टिचनाः प्राग्वत्प्रोक्तवर्णाः समर्चयेत्॥ तासां प
णमपितथा षट्सु कोणेषु शक्तयः॥ षट्त्रिंशन्नाः समा देव्याः सर्वास्तपायुधादिभिः॥ प्राग्वन्न्यासरागणो येच॥

सं० सौ० र० क०
पृ० प०

सुरपर्वीः कादिमो लगाः॥ परेषु पवर्गस्यार्णरहितैस्तैस्तु पार्चयेत्॥ तेषामपि च चक्राणां शक्तीनां वै च विलोमतः॥ पर-
मणिग्रहमंत्रासामाशत्रूणां विपत्तये॥ अथ प्रयोगः॥ तत्र कुत्रचित्सुसमयेषु संवत्ते गोमयोपलिप्ते पशुरहिते
गृहे प्राग्वत्स्वासनप्रजादियोगपीठमासीनो नित्यानित्याविधोक्तविधिना प्राणायामादिमानसपूजां तेन कृत्वा
स्वपुरतः कचिद्भित्तिं कृत्वा नदवधुं हं मतः परिम्भतुर्विंशांगुलमानन्त्रामात्रद्वं तेनिष्पाद्य तन्मध्ये प्राक्प्रसगायतं चतु
ससत्रमा स्फाल्य तत्कुत्स सत्रस्पाईमाने नतस्मिन्न्वत्रे श्वस्वसत्रस्य पूर्वाद्यादितश्च दक्षिणभागे चिक्रं दयमिति संभय
चिक्रचतुष्टयं कृत्वा विक्राच्छि के दक्षिणोत्तरायतं तिर्यक्सत्र चत्र्संपूर्वाद्यादितश्च दक्षिणभागे चिक्रं दयमिति-
संनयविक्रचतुष्टये कृते॥ दयमा स्फाल्य पश्चिमतिर्यक्सत्रचायदयमारभ्य सूत्रसत्रस्य पूर्वाद्यावधि सत्र दयेविम
स्पुनः पूर्वतिर्यक्सत्रस्य कोटिदयमारभ्य सूत्रस्य सत्रस्य पश्चिमाग्रान्ते सत्र दयं विन्यस्य पद्मीणं कृत्वा तस्मिन्न
तूकोणे आग्नेयादिवायुकोणान्तमीशानादिति निर्ऋतिकोणान्ते वा कर्णसत्र दयं विन्यस्य पूर्व कृत्वा सूत्र स
त्रसमे तानि चिह्नान्यपि सत्त्वाणि च त्वेकंचिधा विभज्य चिक्रानि कृत्वा पश्चिमवायव्येशानपूर्वाग्नेयनिर्ऋति-
दिग्गतेषु षट्सु सूत्रसत्रतृतीयांशस्थानेषु मध्ये च तत्र दूर्ध्वांशमानसूत्रचक्रमेण वृत्तसमत्कं कृत्वा प्र-

२९५

ससत्रवत्रयं पश्चेकं च तुर्विंशतिधा चतुर्विंशतिधा विभज्य मध्यवत्र मध्यगतबिंदुकारस्य परितः षट्सत्रवत्ते-
षु दशदशमांशस्थानेषु नत्तन्मध्यगतत्रसत्रे चिक्रानि कृत्वा पुनर्मध्यवत्रस्य वायव्यवत्रस्य च म-
ध्यादितः आग्नेयकोणगतवत्ते श्वसत्रे प्राग्वदृशमांशे चिक्रं कृत्वा तथैवाग्नेयवत्रमध्यवत्रयोरंतराजादितो
वायव्यवत्रमध्यगतश्वसत्रे दशमांशे चिक्रं कृत्वा तथैवैशाननिर्ऋतिकोणगतवत्रयोरपुक्तपुनरावृत्ति वत्रे चिक्र-
दयं विधाय तथैव प्राक्पसगायतश्वसत्रस्य पश्चिमाद्यादितः पूर्वाद्यादितश्च प्राग्वदृशमांशदशमांशे चिक्रदयं
विधाय सत्रमुवत्रे षट् चिक्रे प्रति वत्रे तिर्यग्रेखा दयं कृत्वा तेषु त्रगुणास्य षट्कोणमष्टकं निष्पाद्य तेषु प्रति षट्को-
णमध्ये षट्सु त्रिकोणेषु च वत्राणि कृत्वा श्वसत्र त्रोणिमार्ज्य येदिति पूजाचक्रमुद्धृत्य तन्मध्ये नित्यानित्याविद्यया पु-
ष्पांजलिं निक्षिप्य नित्यानित्याविद्यया प्रस्थापनाद्यान्य पूजां तेन कृत्वा मध्यषट्कोणे प्रागुक्तनित्यानित्यापूजोक्तवि-
धिना पीठपूजादिपुष्पोपचारांतेन तत्रोक्तविधिना डाकिन्यादिषट्के संपूज्य धूपदीपौ दत्वा वक्ष्यमाणैर्नैवेद्यैः षड्कं
निवेद्य तां व जादिसर्वं प्राग्वत्कृत्वा निर्ऋतिकोणस्य षट्कोणे धत्त्व वर्णमध्ये डाकिनीमावाह्य धत्त्व वर्णानित्या
नित्यासमानुमुख वृत्तमाप्य पाद्यादि पुनो ध्यात्वा ओं डीं इत्यादि षडंगमंत्रैर्जातिपुक्तैः षडंगन्यासयोगेन सकलीकृत्य
नस्माः प्राण प्रतिष्ठां विदध्यादेवमुत्तरत्रापि राकिन्यादिनामाद्यक्षरैः षड्दीर्घजातिपुक्तैर्न्यासं सकलीकरणं

सौ॰ र॰ क॰
प॰

प्राणप्रतिष्ठां च कुर्यात्॥ ततः स्वाभिमुखीमासनादिपुष्पांतैरुपचारैरभ्यर्च्य तदावरणशक्तीश्च निर्ऋतिकोणे ह्रीं श्रीं अं श-
क्तिपा॰ पू॰ एवं वायव्यकोणे २ कंशक्तिपादुकां॰ २ पूर्वकोणे २ खशक्ति॰ आग्नेयकोणे २ गशक्तिपा॰ २ ईशानकोणे २ घशक्तिपा॰
पश्चिमकोणे २ ङशक्तिपा॰। इति संपूज्य धूपदीपौ दत्वा पायसान्नं निवेदयेत्। ततो वज्रादि प्राणमंतैरुपचारैः परितोष्य वा-
यव्यस्य षट्कोणे सिंदूरवर्णे राकिनीनामायस्य सिंदूरवर्णां नित्यानित्यासमानमुखचतुर्भुजादियुतां ध्यात्वासनादिपुष्पोप-
चारांते राकिण्या वामादक्षिणाग्र दक्षिणाद्वामदक्षिणसंमुखस्थेषु षट्सु कोणेषु ह्रीं श्रीं इ शक्तिपा॰। एवं २ च शक्ति-
पादुकां॰ २ छशक्तिपा॰ २ जशक्तिपा॰ २ झशक्तिपा॰ २ ञशक्तिपा॰। इति संपूज्य धूपदीपौ दत्वा मुद्गौदनं निवेद्य ततो वज्रादि प्रा-
ग्वत्कल्पयेत्॥ ततः पूर्वदिग्गतषट्कोणे नीलवर्णे लाकिनीनामायस्य नीलवर्णां प्राग्वन्मुखचतुर्भुजादियुतां ध्यात्वासनादि
७ पुष्पोपचारांते चोक्तरीत्या षट्सु कोणेषु २ टशक्तिपा॰ २ ठशक्तिपा॰ २ डशक्तिपा॰ २ ढशक्तिपा॰ २ णशक्ति-
पा॰ इति संपूज्य धूपदीपौ दत्वा मुद्गौदनं निवेद्य शेषं प्राग्वत्कुर्यात्॥ अथाग्नेयस्य षट्कोणे धूम्रादिसवर्णे नाम्नीं
काकिनीनामायस्य प्राग्वद्ध्यात्वासनादिपुष्पोपचारांते प्राग्वत् षट्सु कोणेषु ह्रीं श्रीं तं शक्तिपा॰ २ थशक्तिपा॰ २ दश-
क्तिपा॰ २ दशक्तिपा॰ २ धशक्तिपा॰ २ नशक्तिपा॰। इति संपूज्य धूपदीपौ दत्वा हरिद्रायुक्तमन्नं निवेद्य ततो वज्रादि प्राग्वत्कल्प-
येत्॥ ततईशानगते षट्कोणे हेमवर्णे तत्र साकिनीनामायस्य स्वर्णवर्णां ध्यात्वासनादिपुष्पोपचारांते २ पं शक्ति-

२८५

पा॰ २ फशक्तिपा॰ २ बशक्तिपा॰ २ भशक्तिपा॰ २ मशक्तिपा॰। इति संपूज्य तिलमिश्रमन्नं निवेद्य शेषं प्राग्व-
त्कुर्यात्॥ अथ पश्चिमषट्कोणे शुभ्रवर्णे हाकिनीनामायस्य प्राग्वन्मुखादियुतां शुभ्रवर्णां ध्यात्वासनादिपुष्पोपचा-
रांते ह्रीं श्रीं यशक्तिपा॰ २ रशक्तिपा॰ २ वशक्तिपा॰ २ शशक्तिपा॰ २ षशक्तिपा॰ २ सशक्तिपा॰ २ हशक्तिपा॰। इति संपू-
ज्य धूपदीपौ दत्वा स्तुतिप्रणामादिभिः परितोष्य डाकिन्याद्याः सावरणास्तस्यां संयोज्य तां च स्वहृदि वासयेत्तन्मयः॥
सुखं विहरेत्। इति। इयमनुयागपूजा वश्यादिशुभकाम्यकर्मसु ज्ञेया॥ नित्यादिक्रूरकर्मसु तु प्रोक्तषट्कोणस्थ-
तके डाकिन्यादि नित्यानित्यांता विज्ञेया॥ विलोमेन तत्र तदावरणशक्तीश्च विलोमेन संपूज्य क्रूररूपाः ध्यायन्स्ववैरिनस्त्वयो-
निरुक्तसंपादितचरुणा नैवेद्यं कल्पयित्वा स्ववैरिणां शरीराणि च ताभ्यो निवेद्य क्रुद्धाभिस्ताभिस्तच्छरीराणि छित्वा छि-
त्वा पिशाचेभ्यो विभज्य दत्तानि तैश्च भक्ष्यमाणानि ध्यायेत्। इति धातुदेवतापूजाविधिः॥ अथ पंचाशल्लिपिन्यासः॥ तत्र
श्रीतंत्रराजे॥ आदिक्षांतास्वरैः प्राग्वद्भिन्नैः शक्तिसंयुतैः॥ बीजरूपाद्यैः समास्तद्यैस्तैः पंचदशस्वरैः॥ पंचाशच्छक्तयः
